श्रीमद्भगवद्बादरायणप्रणीतम्

श्रीमद्भागवतम्

नवमस्कन्धः

॥ अथ प्रथमोऽध्यायः ॥

राजोवाच —

मन्वन्तराणि सर्वाणि त्वयोक्तानि श्रुतानि मे
वीर्याण्यनन्तवीर्यस्य हरेस्तत्र कृतानि च ॥ १ ॥

॥ अथ श्रीभागवतटिप्पणी सत्यधर्मयतिकृता प्रारभ्यते ॥

गुरुर्मे नवमं स्कन्धं विवरीतुं समुद्यतम् ।
पारयेदन्तरायातानन्तरायांत्स वारयन् ॥

त्वदुक्तार्थो न विस्मृतो मयेति दिदर्शयिषुः श्रुतमनूद्य मनूनामन्ववायचरितस्य हरिचरित-सम्मिश्रिततया तद्भक्तिहेतुत्वात्तद्वद वदावदेति वदति ॥ राजेति । मे मया तत्र तेषु मन्वन्तरेषु वीर्याणि तत्साध्यानि कृतानि कर्माणि कृतान्यनुष्ठितानीत्यावृत्त्याऽन्वयः ॥ १ ॥

॥ अथ श्रीमद्भगवतटिप्पणी छलारी शेषाचार्यविरचिता प्रारभ्यते ॥

अस्मिन् स्कन्धे 'वैष्णवानां तु चरितं विष्णूद्रेकाय कथ्यते' इत्युक्तेः विष्णूत्कर्षज्ञानार्थं पुण्यश्लोकराजवंशो निरूप्यते । तत्र कतिपयैरध्यायैः सूर्यवंशः कतिपयैरध्यायैः सोमवंशश्चानुवर्ण्यते । प्रथमं तावदुक्तानुवादपूर्वकं वैवस्वतमनुवंशं राजा शुकं पृच्छति ॥ मन्वन्तराणीत्यादिना ॥ उक्तानि । अष्टमस्कन्ध इति शेषः । तत्र चतुर्दशमन्वन्तरेषु । कृतानि हरेर्वीर्याणि च मे मया श्रुतानीत्यन्वयः ॥ १ ॥

योऽसौ सत्यव्रतो नाम राजर्षिर्द्रविडेश्वरः ।
ज्ञानं योऽतीतकल्पान्ते लेभे पुरुषसेवया ॥ २ ॥

सत्यधर्मीया — पुरुषो मत्स्यः ॥ २ ॥

छलारी — अत्र यच्छब्दद्वयस्य स वै इत्युत्तरश्लोकेनान्वयः । असौ चाक्षुषमन्वन्तरे प्रसिद्धः । तस्यावस्थानमाह ॥ द्रविडेश्वर इति । तस्य महिमानमाह ॥ ज्ञानमिति । यः सत्यव्रतो नाम राजर्षिः । अतीतकल्पान्ते चाक्षुषकल्पान्ते । पुरुषसेवया मत्स्यावताररूपभगवत्सेवया । तदुपदेशेनेति यावत् । ज्ञानं तत्त्वज्ञानं लेभे ॥ तदुक्तम् ॥

मत्स्यरूपी महांबोधौ विहरंस्तत्त्वमब्रवीत् ।
सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ।
अश्रौषीदृषिभिः सार्धमात्मतत्त्वमसंशयम् ।
नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनमिति ।

ज्ञानं चेति क्वचित्पाठः ॥ २ ॥

स वै विवस्वतः पुत्रो मनुरासीदिति श्रुतम् ।
त्वया तस्य सुताः प्रोक्ता इक्ष्वाकुप्रमुखा नृपाः ॥ ३ ॥

सत्यधर्मीया — इक्ष्वाकुप्रमुखास्तदादयः ॥ ३ ॥

छलारी — सः सत्यव्रतो विवस्वतस्तन्नामकसूर्यपुत्रः सन्मनुरासीत् । अस्मिन् वैवस्वतमनुकल्प इति शेषः ॥ श्रुतम् । स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः ।

विष्णोः प्रसादात्कल्पेऽस्मिन्नासीद्वैवस्वतो मनुरित्यष्टमस्कन्धान्ते श्रुतमित्यर्थः । इक्ष्वाकुप्रमुखा दशसुतास्तत्रैव वैवस्वतमन्वन्तरनिरूपणसमये प्रोक्ताः ॥ ३ ॥

तेषां वंशं पृथग् ब्रह्मन् वंश्यानुचरितानि च ।
कीर्तयस्व महाभाग नित्यं शुश्रूषतां हि नः ॥ ४ ॥

सत्यधर्मीया — शुश्रूषतां श्रोतुमिच्छतां सेवमानानामिति वा ॥ ४ ॥

छलारी — वंश्यानुचरितानि च वंशे भवा वंश्यास्तेषां राज्ञां माहात्म्यानि चेत्यर्थः ॥ ४ ॥

ये भूता ये भविष्याश्च भवन्त्यद्यतनाश्च ये ।
तेषां नः पुण्यकीर्तीनां सर्वेषां वद विक्रमान् ॥ ५ ॥

सत्यधर्मीया — भूता अतीता भविष्याः । एष्यत्पदवद्भविष्यत्पदम् । तथा हि । अग्निः पूर्वेभिरित्यृग्भाष्यटीकाटिप्पणेषु नूतनैरेष्यैः । लृटः सद्वेत्यत्र योगविभागेनाकारेप्यादेशो व्याख्यायते ये भूता ये भविष्याश्चेत्याद्यभियुक्तप्रयोगबलात् । तथा च तस्मिन् लृडादेशेऽकारे परतः पूर्वोक्तरीत्याऽस्य प्रत्ययादौ कृतार्धधातुकगुणे इणः एष्य इति भवतीति परत्वात् । एष्यपदवद्भविष्यपदं टीकाटिप्पण्योरकारप्रत्यय इत्यत्र शप्रत्यय इत्यर्थापनीयम् । अन्यथा सार्वधातुकताकार्यं न स्यात् । तयोस्तु मुक्तानुबन्धस्य ग्रहणं द्रष्टव्यम् । इदं पूर्वोत्तरत्र चानुसन्धेयम् । तत्रैव तनेतिवत् । भवितारो ये चाद्यतना वर्तमाना ये भवन्ति मङ्गलं भवस्तद्वदाचरन्ति । मङ्गलरूपास्तेषामित्यन्वयः । अनेनाद्यतना इति सायश्चिरमिति ट्युस्तु ट्त्चेति ज्ञेयमिति वा भवन्तीति रिक्तम् । भूतभविष्यद्वदतिरिक्तस्य तदन्यतरबोधस्य समयविशेषस्य चाभावादिति निरस्तम् । यद्वा । ये भवन्ति क्रियाबन्धे लडित्युक्तेः । सार्वकालिकसत्ताश्चिरञ्जीविनस्तेषां विक्रमांश्चरितानीत्यर्थः । आवृत्तं वदेति सम्बुध्यन्तं शुकविशेषणम् । वाग्मिन् इति तदर्थः ॥ ५ ॥

छलारी — ये भूता इत्यादिकं वैवस्वतमनुवंशोत्पन्नेष्विति ज्ञेयम् । भवन्तीत्यस्यैव विवरणं अद्यतनाश्चेति ॥ ५ ॥

सूत उवाच —

एवं परीक्षिता राज्ञा सदसि ब्रह्मवादिनाम् ।
पृष्टः प्रोवाच भगवान् शुकः परमधर्मवित् ॥ ६ ॥

सत्यधर्मीया — परमधर्मविन्मुख्यधर्मज्ञः । परमश्च भगवांश्च धर्मश्च पुण्यप्रापकं कर्म च तौ वेत्तीति स तथेति वा ॥ ६ ॥

छलारी — प्रश्नप्रतिवचने सामर्थ्यमस्तीति द्योतयितुं भगवान् परमधर्मविदिति विशेषणद्वयम् ॥ ६ ॥

श्रीशुक उवाच —

श्रूयतां मानवो वंशः सङ्क्षेपेण परन्तप ।
न शक्यते विस्तरतो वक्तुं वर्षशतैरपि ॥ ७ ॥

सत्यधर्मीया — सङ्क्षेपेण शब्दतः ॥ ७ ॥

छलारी — मानवो वैवस्वतमनुसम्बन्धी ॥ ७ ॥

परावरेषां भूतानामात्मा यः पुरुषः परः ।
स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन ॥ ८ ॥

सत्यधर्मीया — वंशशंसनोपयुक्तं वक्ति ॥ परावरेषामिति । परैः सहिताश्च तेऽवराश्च तेषामित्युत्तरपदलोपी समासः । न द्वन्द्वः । तथात्वे द्वन्द्वे । वर्णाश्रमेतराणामित्युक्तेः पराऽवराणामिति स्यात् । नीचोच्चानां भूतानामात्मा स्वामी यः परः पुरुष इदं विश्वम् । द्वितीया षष्ठ्यर्थ इति बृहद्भाष्योक्तेरस्य विश्वस्य । अग्र इति शेषः । अन्यत्किञ्चन तदधीनं सन्नासीत् । इदं विश्वं स एवासीत् । तदधीनमासीत् । अन्यत्प्रधानादिकं किञ्चन स्वतन्त्रं नासीदित्यपि योजयन्ति । तस्मात्प्राधान्यं न परः किञ्चनासेत्यादेः ॥ ८ ॥

छलारी — वैवस्वतमनुवंशं वक्तुं पीठिकामारचयति ॥ परावरेषामिति । परावरेषां ब्रह्मादीनां कल्पादीनां च भूतानामात्माऽन्तर्यामी यः परमपुरुषो नारायणः स ब्रह्म एक एव कल्पान्ते । इदं विश्वम् । उदरे निधायेति शेषः । आसीत् ॥ तदुक्तं महाभारततात्पर्यनिर्णये ॥ आसीदुदारगुणवारिधिरप्रमेयो नारायणः परतमः परमात्म एकः । संशान्तसंविदखिलं जठरे निधायेति । उदरावस्थितिस्थानविशेषकथनपूर्वकमुक्त्वा । ब्रह्माण्डपुराणे

धामत्रयस्थिता मुक्ता वटपत्रस्थशौरिणः ।
कुक्षिंगता ध्यानमुक्ता यावत्सृष्टिर्भवेत्पुनः ।
तावत्तिष्ठन्ति चानन्दाः सृष्टा यान्ति स्वकं स्थलम् ।
तमःप्राप्तास्तामसाश्च स्वरूपेण व्यवस्थिताः ।
लिङ्गभङ्गमनुप्राप्ताः पूर्वद्वेषात्मकाः सदा ।
नाभेरधस्तात्तिष्ठन्ति यावत्सर्गः पुनर्भवेत् ।
नित्यसंसारिणः सर्वे सृष्टौ सृष्टौ भवन्ति च ।
न तेषां संसृतेर्नाशः क्वचित्क्वापि भविष्यतीति ।
स एक एवासीदित्येवकारव्यावर्त्यमाह ॥

अन्यत्किञ्चन चासीदिति । यत्किञ्चनान्यत्कालादिकमासीत् तत्तस्मादन्यन्नासीत् । किन्तु तदधीनमेवासीदित्यपि योज्यम् । काल आसीत्परम आसीत्तद्यदासीत्तदावृतमासीदिति श्रुतेः ॥ ८ ॥

तस्य नाभेः समभवत् स पद्मकोशो हिरण्मयः ।
तस्मिन् जज्ञे महाराज स्वयम्भूश्चतुराननः ॥ ९ ॥

सत्यधर्मीया — तस्य पुरुषस्य नाभेः समभवत्पद्मकोशः इति पांक्तः पाठः । नाभेरुदस्तात्पद्मेति पाठे नायं तच्छब्दः । तत्त्वे तस्मिन्नित्युक्तेरयमवक्तव्यं स्यात् । सशब्दः सारवाची । पुष्करं लोकसारमित्युक्तेः । लोकसारो यो पद्मकोशः स हिरण्मय उदस्तादुदभूत् । तस्मिन्स्वयम्भूश्चतुराननो जज्ञे । न यादृशस्तादृशः पद्मकोश इत्याह ॥ स्वयमिति । स्वयं साक्षाद्भूस्तद्रमाभिमन्यमान इति पद्मकोशविशेषणं वा । प्रायस्ते स्वसुताः स्वयमित्याद्युक्तेः स्वयंभूता व्यभिचीर्णान्यत्रेत्यतश्चतुरानन इति । सोऽप्येकश्चतुरचेष्टको वा चतुरप्रमुखो वाऽनेकमुखेषु केषुचिदेकश्चतुर्मुखः शते पञ्चाशन्यायेन वा स्यादित्यतः स्वयंभूरिति । न तथाविधोऽपि विधेरन्यः कश्चिदनेकजीवलोके सम्भावित इति न व्यभिचारापचार इति शंक्यम् । योगरूढत्वादमीषां शब्दानाम् ॥ ९ ॥

छलारी — ततः सृष्टिकाले प्राप्ते चतुर्विंशतितत्त्वसृष्टिरभूत् । ततो ब्रह्माण्डोत्पत्तिरभूदिति द्रष्टव्यम् । ततः परं किमभूदिति तत्राह ॥ तस्येति । गर्भोदके शयानस्य हरेरित्यर्थः । नाभेः सकाशात्पद्मकोशः पद्मकुड्लम् । उदस्तादिति छान्दसं रूपम् । उदभूत्पद्मसृष्टिरभूदित्यर्थः ॥ ९ ॥

मरीचिर्मानसस्तस्य जज्ञे तस्यापि कश्यपः ।
दाक्षायण्यां ततोऽदित्यां विवस्वानभवत् सुतः ॥ १० ॥

सत्यधर्मीया — प्रकृतमनुसरति ॥ मरीचिरिति । मरीचिस्तन्नामा । मृकणिभ्यामीचिरिति चिप्रत्ययान्तः शब्दः । मरीचिर्मुनिभेदेनेत्यभ्यधाद्भानुः । मरीचिर्भूषणे दीप्तौ ऋषिभेदे चेति विश्वः । मनसो जातो मानसः । तस्य मरीचेः कश्यपो जज्ञे । ततः कश्यपाद्दाक्षायण्यां दक्षपुत्र्याम् । गतम् । तन्नामाह ॥ अदित्यामिति । विवस्वान्नाम सुतोऽभवत् ॥ १० ॥

छलारी — तस्य ब्रह्मणो मनसः सकाशान्मरीचिर्जज्ञे । तस्य मरीचेः सकाशात्कश्यपो जज्ञे । ततः कश्यपाद्दाक्षायिण्यां दक्षपुत्र्यां विवस्वांस्तन्नामकसूर्यः ॥ १० ॥

ततो मनुः श्राद्धदेवः सञ्ज्ञायामास भारत ।
श्रद्धायां जनयामास दश पुत्रान् स आत्मवान् ॥ ११ ॥

सत्यधर्मीया — ततो विवस्वतः श्राद्धदेवो नाम्ना । संज्ञायां तत्संज्ञायाम् । आस । अव्ययं वा प्रकृत्यन्तररूपं वा । प्राचीविवृतमिति गतम् । स आत्मवान्मनस्वी प्रशस्तमनस्कः ॥ ११ ॥

छलारी — ततो विवस्वतः सकाशात् श्राद्धदेवस्तन्नामा सप्तमो मनुः । अस्यैव वैवस्वतनामान्तरम् । संज्ञायां विवस्वान्नामकसूर्यभार्यायाम् आसीत् । स वैवस्वतमनुः श्रद्धायां भार्यायाम् । आत्मवान् आत्मज्ञानी ॥ ११ ॥

इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूशकान् ।
नरिष्यन्तं वृषध्रं च नाभागं च नभं कविम् ॥ १२ ॥

सत्यधर्मीया — तदाह्वयमाह ॥ इक्ष्वाकिति । इक्ष्वाकादिनामान्तान् स जनयामासेत्यन्वयः ॥१२॥

छलारी — ते पुत्राः के इत्यत आह ॥ इक्ष्वाकिति । इक्ष्वाकुप्रभृतीन् दशपुत्रान् जनयामासेत्यन्वयः ॥ १२ ॥

अप्रजस्य मनोः पूर्वं वसिष्ठो भगवान् किल ।
मित्रावरुणयोरिष्टिं प्रजार्थमकरोद् विभुः ॥ १३ ॥

सत्यधर्मीया — प्रजाः प्रजाताः कथमित्यतः कथयति ॥ अप्रजस्येति । पूर्वं प्रसवलवातिक्रमानन्तरं प्रजारहितस्य । वसिष्ठः पुरोहितः । मित्रावरुणयोः "देवताद्वन्द्वे चेत्यानङ्" । तद्दैवत्यामिष्टिम् । प्रजार्थं तत्सन्तत्यर्थम् । अकरोत् । अर्थसाधनसमर्थताहेतुर्भगवानिति । यद्यपि पद्यमिदं श्रद्धायामिति पद्यत आद्यभावि तथाऽपि किलेति सूचितकथासाङ्गत्यायैवैवं न्यभांत्सीदिति ज्ञातव्यम् ॥ १३ ॥

छलारी — वैवस्वतमनुपुत्रस्य सुद्युम्नस्य केनचिन्निमित्तेन स्त्रीत्वे प्राप्ते सति तस्यां सोमपुत्राद्बुधात्पुरूरवप्रभृतिसोमवंशं वक्तुं सप्रस्तावमिलोपाख्यानमाह ॥ अप्रजस्येत्यादिना । सन्तानरहितस्येत्यर्थः । इक्ष्वाकुप्रभृतिपुत्रोत्पत्तेः पूर्वं मित्रावरुणयोरिष्टिं मित्रावरुणदैवत्याम् । मित्रावरुणयोरित्यत्र देवताद्वन्द्वे चेति दीर्घः ॥ १३ ॥

तत्र श्रद्धा मनोः पत्नी होतारं समयाचत ।
दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता ॥ १४ ॥

सत्यधर्मीया — तत्रेक्ष्वाकाद्यु

त्पत्तेः पूर्वं तत्र पुमपत्यविषयसङ्कल्पसमये । दुहित्रर्थं पुत्र्यर्थम् । समयाचत । पयोव्रता पयः क्षीरमेव व्रतं स्वीकार्यमाहारत्वेन यस्याः सा ॥ १४ ॥

छलारी — दुहित्रर्थं 'मम कन्या यथा भवेत्तथा यजेति' होतारं समयाचत । पय एव व्रतमाहारो यस्याः सा तथा । व्रतं भोजनं तं निवृत्त्येत्यर्थः ॥ १४ ॥

प्रेषितोऽध्वर्युणा होता दध्यौ तत् सुसमाहितः ।
गृहीते तेन हविषि वषट्कारं गृणन् द्विजः ॥ १५ ॥

सत्यधर्मीया — अध्वर्युणा प्रेषितः होता ''होतः यज'' इति प्रेरितः । तेनाध्वर्युणा हविषि गृहीते सति । वषट्कारं वौषडिति वषट्कारं गृणन् उच्चरन् । द्विजो होता सुसमाहितः । चिन्तितसिद्धिहेतुरयम् । दध्यौ पुत्र्यर्थं ध्यानं कृतवान् ॥ १५ ॥

छलारी — अध्वर्युणा यजेति प्रेषितो होता तेनाध्वर्युणा हविषि गृहीते सति वषट्कारं गृणन् वौषडिति वदन् तद्भार्यया प्रार्थितं दध्यावित्यन्वयः ॥ १५ ॥

होतुस्तद्व्यभिचारेण कन्येला नाम साऽभवत् ।
तां विलोक्य मनुः प्राह नातिहृष्टमना गुरुम् ॥ १६ ॥

सत्यधर्मीया — तस्य सङ्कल्पितपुमपत्योद्देश्यककर्मणो व्यभिचारेण विपरीतध्यानरूपेणेलेति नाम्ना सा कन्याऽभवज्जाता । या इला सङ्कल्पकालिकी वाणी । तद्व्यभिचारेण प्रवृत्ताऽत इलेति नामाभवदित्यपि योजयन्ति । वाणी सरस्वती भाषा वागिडेला प्रकीर्तितेत्यभिधानमुदाहरन्ति । तां जातां कन्याम् । नातिहृष्टमनाः साक्षादन्ववायानन्वयात् । गुरुं वसिष्ठम् ॥ १६ ॥

छलारी — तस्य पूर्वसङ्कल्पितस्य । व्यभिचारेण व्यत्यासेन । अन्यथा ध्यानेनेत्यर्थः । नातिहृष्टं मनो यस्य । न समासोऽयम् ॥ १६ ॥

भगवन् किमिदं जातं कर्म वो ब्रह्मवादिनाम् ।
विपरीतमहो कष्टं मैवं स्याद् ब्रह्मविक्रिया ॥ १७ ॥

सत्यधर्मीया — हे भगवन् ! ब्रह्मवादिनां वः कर्म सङ्कल्पितं पुमपत्यकं विपरीतं स्त्र्यपत्याधायकमिति विपरीतं किं जातम् । इदं कष्टम् । अहो आश्चर्यम् । ब्रह्मविक्रियैवं फलतो विपरीता मा न स्यात् ॥ १७ ॥

छलारी — वो युष्माकमिदं कर्म किं कस्मान्निमित्ताद्विपरीतं स्त्रीत्वापादकं जातम् । इदं स्त्रीत्वं कष्टम् । ब्रह्मविक्रियैवमनिष्टापादनी नैव स्यान्नैव भवति । अतो भवतां कर्मणः स्त्रीत्वापादकत्वम् । अहो आश्चर्यम् । अतो बलवन्निमित्तं वक्तव्यम् । तत्किमिति हृदयम् ॥ १७ ॥

यूयं मन्त्रविदो युक्तास्तपसा दग्धकिल्बिषाः ।
कुतः सङ्कल्पवैषम्यमनृतं विबुधेष्विव ॥ १८ ॥

सत्यधर्मीया — अननृतीभवनकारणनिकुरम्बमाह ॥ यूयमिति । तपसा युक्तास्तपसा दग्धकिल्बिषाः । कुतः किं कारणकं विबुधेषु देवेषु यथाऽनृतमसम्भावितं तथा युष्मासु सङ्कल्पवैषम्यं न स्यात् । मैत्रावरुणीमिष्टिं कुर्यात्पुत्रकाम इति श्रुतेः । मन्त्रविदो 'यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्निति' तद्धृदयज्ञाः । न च दोषोऽप्यमीषु सम्भावित इति भाषते ॥ तपसा दग्धकिल्बिषा इति च व्याचक्षते ॥ १८ ॥

छलारी — मन्त्रविदो मैत्रावरुणीमिष्टिं कुर्यात्पुत्रकाम इत्यादि मन्त्रहृदयज्ञाः । युक्ता मनोयोगयुक्ताः । न च दोषादन्यथात्वं मनस इत्याह ॥ तपसेति । यूयमेवंविधास्तेषु युष्मासु सङ्कल्पवैषम्यं चिन्तितस्यान्यथात्वं कुतो न कुतोऽपीति सम्भाव्यते । असंभावितत्वे दृष्टान्तः ॥ अनृतमिति । न हि देवेष्वनृतं दृष्टचरम् ॥ १८ ॥

तन्निशम्य वचस्तस्य भगवान् प्रपितामहः ।
होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनन्दनम् ॥ १९ ॥

सत्यधर्मीया — प्रपितामहो वसिष्ठः । रविनन्दनं वैवस्वतम् ॥ १९ ॥

छलारी — देहलीदीपन्यायेन तस्येत्यस्योभयत्रानुषङ्गः । तस्य तद्वचो निशम्य । तस्य वैवस्वतमनोः प्रपितामहो वसिष्ठो मरीचिवद्वसिष्ठस्यापि ब्रह्मपुत्रत्वात् । व्यतिक्रमं व्यतिक्रमणजन्यमिति ज्ञात्वा । रविनन्दनं वैवस्वतम् ॥ १९ ॥

एतत् सङ्कल्पवैषम्यं होतुस्ते व्यभिचारतः ।
तथापि साधयिष्येऽहं सुप्रजास्त्वं स्वतेजसा ॥ २० ॥

सत्यधर्मीया — व्यभिचारतो ध्यानस्य कन्याविषयत्वलक्षणात् । स्वतेजसा सुप्रजास्त्वं वैदिकानुवादः सः, पुमपत्यताम् ॥ २० ॥

छलारी — होतुर्व्यभिचारतो विपरीतध्यानेन । सुप्रजास्त्वं सत्पुत्रवत्वम् । तवेति शेषः ॥ २० ॥

एवं व्यवसितो राजन् भगवान् स महायशाः ।
अस्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया ॥ २१ ॥

सत्यधर्मीया — आदिपुरुषं श्रीनारायणम् ॥ २१ ॥

छलारी — इत्युक्त्वा मनसि तथा निश्चयं चकारेत्यपि ज्ञेयम् । एवं व्यवसित एवं कृतनिश्चयः ॥२१॥

तस्मै कामवरं तुष्टो भगवान् हरिरीश्वरः ।
ददाविलाऽभवत् तेन सुद्युम्नः पुरुषर्षभः ॥ २२ ॥

सत्यधर्मीया — तेन वरेण सुद्युम्नो नाम्ना । गतम् ॥ २२ ॥

छलारी — तेन वरेणेला पुरुषर्षभोऽभवत् । तदा तस्य सुद्युम्ननामाभवदिति योज्यम् ॥ २२ ॥

स एकदा महाराज विचरन् मृगयां वने ।
वृतः कतिपयामात्यैरश्वमारुह्य सैन्धवम् ॥ २३ ॥

सत्यधर्मीया — मृगयां मृग्यन्ते प्राणिनोऽत्रेति मृगया । आखेटो मृगया स्त्रियामित्यमरः । सैन्धवं सिन्धुसम्भवम् ॥ २३ ॥

छलारी — सः सुद्युम्नो मृगयां प्रति । मृगवधार्थमिति यावत् । जगामेत्युत्तरेणान्वयः । सैन्धवं सिन्धुदेशजातम् ॥ २३ ॥

प्रगृह्य रुचिरं चापं शरांश्च परमाद्भुतान् ।
दंशितोऽनुमृगं वीरो जगाम दिशमुत्तराम् ॥ २४ ॥

सत्यधर्मीया — दंशितः कवचवान् । गतम् ॥ २४ ॥

छलारी — दंशितो वर्मयुक्तः । अनुमृगं धावन्निति शेषः ॥ २४ ॥

सुकुमारवनं मेरोरधस्तात् प्रविवेश ह ।
यत्रास्ते भगवान् शम्भू रममाणः सहोमया ॥ २५ ॥

सत्यधर्मीया — नाम्ना सुकुमारवनम् । उमया रममाणः शम्भू रुद्रो यत्रास्ते तत्प्रविवेश ॥२५॥

छलारी — मेरोरधस्तात्स्थितम् ॥ २५ ॥

तस्मिन् प्रविष्ट एवासौ सुद्युम्नः परवीरहा ।
अपश्यत् स्त्रियमात्मानमश्वं च वडवां नृप ॥ २६ ॥

सत्यधर्मीया — आत्मानं स्वमश्वं वडवां चापश्यत् ॥ २६ ॥

छलारी — स्वात्मानं स्त्रियं स्तनकेशादिस्त्रीचिन्होपेतमपश्यत् । वडवामश्वाम् ॥ २६ ॥

तथा तदनुगाः सर्व आत्मलिङ्गविपर्ययम् ।
दृष्ट्वा विमनसोऽभूवन् वीक्ष्यमाणाः परस्परम् ॥ २७ ॥

इति श्रीमद्भागवते नवमस्कन्धे प्रथमोऽध्यायः ।

सत्यधर्मीया — तदनुगा अमात्यादयः । आत्मलिङ्गविपर्ययं परस्परं वीक्ष्यमाणा विमनसो दुर्मनस्का अभूवन् ॥ २७ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे प्रथमोऽध्यायः ।

छलारी — आत्मनां लिङ्गविपर्ययं पुरुषचिन्हविपरीतं स्त्रीचिन्हम् । विमनसो दुःखितमनसः ॥ ॥ २७ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे प्रथमोऽध्यायः ॥ ९-१ ॥

॥ अथ द्वितीयोऽध्यायः ॥

राजोवाच —

कथमेवंगुणो देशः केन वा भगवन् कृतः ।
प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि नः ॥ १ ॥

सत्यधर्मीया — एवंगुणः एवं स्वप्रविष्टपुरुषयोषित्वघटको गुणो यस्य सः । एनं मत्कृतं प्रश्नमुद्दिश्य समाचक्ष्व । उत्तरमिति शेषः । श्रुतवतां नः परं कौतूहलं हि यतस्ततः ॥ १ ॥

छलारी — एवंगुणः पुरुषस्य स्त्रीत्वापादकगुणयुक्तः । एनं प्रश्नं प्रत्युत्तरं समाचक्ष्वेत्यर्थः ॥१॥

श्रीशुक उवाच —

एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः ।
दिशो वितिमिरा भासा कुर्वन्तस्तमुपागमन् ॥ २ ॥

सत्यधर्मीया — भासा स्वतेजसा वितिमिरा विगतान्धकाराः ॥ २ ॥

छलारी — तत्र वने । स्थितामिति शेषः । दिशो वितिमिरा निरस्तान्धकाराः कुर्वन्त इत्यर्थः । दिशो वितिमिराभासाः कुर्वन्त इति पाठे वितिमिराभासा विगतं तिमिरं विगत आभासोऽन्यप्रकाशश्च यासु तथा दिशः कुर्वन्तः सन्त इत्यर्थः ॥ २ ॥

तान् विलोक्याम्बिका देवी विवस्त्रा व्रीडिता भृशम् ।
भर्तुरङ्कात् समुत्थाय नीवीमाश्वथ पर्यधात् ॥ ३ ॥

सत्यधर्मीया — तानृषीन् । नीवीं वस्त्रं पर्यधादावेष्टयामास ॥ ३ ॥

छलारी — अङ्कात्समीपात् । समीपोत्सङ्गयोरङ्क इत्यभिधानम् । नीवीं वस्त्रं पर्यधात्परिधानं कृतवती ॥ ३ ॥

ऋषयोऽपि तयोर्वीक्ष्य प्रसङ्गं रममाणयोः ।
निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमम् ॥ ४ ॥

सत्यधर्मीया — प्रसङ्गं परस्परांगसङ्गम् । तस्मात्सुकुमारवनात् । इदानीं शिवशिवारमणविरमणाघो घटितमतः यत्र पुमांस एव वर्तन्ते तत्र गमने न चिन्ता काचिदिति मतिमन्त इमं जग्मुरित्याह ॥ नरनारायणाश्रममिति ॥ ४ ॥

छलारी — प्रसङ्गं रत्यभिनिवेशं वीक्ष्य स्त्रीप्रसङ्गकलुषितमनसः सन्तः । तत्प्रसङ्गशून्यं नरनारायणाश्रमं बदर्याख्यं जग्मुः ॥ ४ ॥

तदैवं भगवानाह प्रियायाः प्रियकाम्यया ।
स्थानं यः प्रविशेदेतत् स वै योषिद् भवेदिति ॥ ५ ॥

सत्यधर्मीया — य एतत्स्थानं प्रविशेत्स योषित्स्त्री भवेदेवं भवेदेवेति प्रियायाः सत्याः प्रियकाम्यया प्रीतीच्छयाऽऽह । वैशब्देन विना स्वप्रसादं प्रमदाभावमोचनं सूचयति । एवमङ्गीकारेऽवधारणमिति विश्वः । अत, एवमिति वा इतीति वाऽधिकमिति परास्तम् ॥ ५ ॥

छलारी — भगवान् शंभुः ॥ ५ ॥

तत ऊर्ध्वं वनं तद् वै पुरुषा वर्जयन्ति हि ।
स चानुचरसंयुक्तो विचचार वनाद् वनम् ॥ ६ ॥

सत्यधर्मीया — हि यत एवमाह हरस्तत ऊर्ध्वमुपरि पुरुषास्तद्वनं वर्जयन्ति । वा एव ॥ ६ ॥

छलारी — तद्वै तदैव । प्रासङ्गिकमुक्त्वा प्रस्तुतमनुवर्णयति ॥ स चेति । सुद्युम्नाख्याऽनुचरी-संयुक्तेति वक्तव्ये पुंस्त्वनिर्देशः भूतपूर्वगत्या ॥ ६ ॥

अथ तामाश्रमाभ्याशे चरन्तीं प्रमदोत्तमाम् ।
स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान् बुधः ॥ ७ ॥

सत्यधर्मीया — अभ्याशे समीपे । सदेशाभ्याशसविधेरित्यमरः । चकमेऽचीकमत । स चानुचरसंयुक्त इति भूतपूर्वगत्या वोत्तरत्र भववरवैभवप्राप्यपुंस्त्वविवक्षया वा स चेति पुल्लिङ्गनिर्देशः इति ज्ञेयम् । अनुचरास्तु किंपुरुषीर्भूत्वा शैलरोधसि वत्स्यथ । स्त्रियः किम्पुरुषा नाम भर्तॄंत्समुपलप्स्यथेत्युक्तेः स्त्रीभावेनैव स्थिता इति ज्ञेयम् । रामायणे च शिवशिवावरादिनोक्तिः कल्पान्तरविवक्षयेति ज्ञेयम् ॥ ७ ॥

छलारी — आश्रमाभ्याशे आश्रमसमीपे ॥ ७ ॥

साऽपि तं चकमे सुभ्रूः सोमराजसुतं पतिम् ।
स तस्यां जनयामास पुरूरवसमात्मजम् ॥ ८ ॥

सत्यधर्मीया — नैकमात्रकामनाऽर्थचारीत्यत आह ॥ साऽपीति । सोमराजसुतमित्यनेन तारातारापिपमात्रसंमत्या जातस्यास्य तदेतत्संमत्या रमणत्वेन रमणानुरूपतामभिप्रैति । पुरूरवसं तन्नामकमात्मजं पुत्रम् ॥ ८ ॥

छलारी — सा स्त्रीत्वापन्ना सुद्युम्ना । पुरूरवसं तन्नामानम् ॥ ८ ॥

एवं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृपः ।
सस्मार स्वकुलाचार्यं वसिष्ठमिति शुश्रुम ॥ ९ ॥

सत्यधर्मीया — स्वकुलाचार्यं कुलगुरुम् ॥ ९ ॥

छलारी — मानवो मनुपुत्र इति शुश्रुम इति सूतोक्तिः शुकोक्तिर्वा ॥ ९ ॥

स तस्य तां दशां दृष्ट्वा कृपया भृशपीडितः ।
सुद्युम्नस्याशयन् पुंस्त्वमुपधावत शङ्करम् ॥ १० ॥

सत्यधर्मीया — दशामवस्थाम् । आशयन् कांक्षयन् उपधावतासेवत ॥ १० ॥

छलारी — तस्यां सुद्युम्नायां तां स्त्रीत्वलक्षणाम् । कृपया, राजकुमारस्य कथमिदं स्त्रीत्वं प्राप्तमिति दययेत्यर्थः । आशयन्कामयन् । उपधावत असेवत ॥ १० ॥

तुष्टः स तस्मै भगवान् ऋषये प्रीतिमावहन् ।
स्वां च वाचमृतां कुर्वन्निदमाह विशाम्पते ॥ ११ ॥

सत्यधर्मीया — स भगवान् भवो ऋषये तदुपरि तुष्टः प्रीतस्तस्मै स्वकलत्राय च प्रीतिमावहन् स्वां वाचं स्थानं यः प्रविशेदित्यादिकां ऋतां सत्यां कर्तुमिदमाहेत्यन्वयः । तदुपधानतुष्टस्तस्मै ऋषये प्रीतिमावहन्नाहेत्यन्वयो वा ॥ ११ ॥

छलारी — ऋतां कुर्वन्स्वां च वाचम् । स वै योषिद्भवेदिति स्ववाक्यमित्यर्थः ॥ ११ ॥

श्री शङ्कर उवाच —

मासं पुमान् स भविता स्त्री मासं तपसा तव ।
इति व्यवस्थया कामं सुद्युम्नोऽवतु मेदिनीम् ॥ १२ ॥

सत्यधर्मीया — उक्तिं व्यक्तीकरोति ॥ मासमिति । स्त्री मासं भविता । लुट् । तत्र निमित्तं तव तपसेति । मासमिति कालाध्वनोरिति द्वितीया । तेन नैकक्षणव्यत्यास इत्यत्यन्तसंयोगमाह ॥ १२ ॥

छलारी — वसिष्ठभ्रातृमरीचोत्पन्नत्वात्सुद्युम्नस्तव गोत्रज इत्युक्तम् ॥ १२ ॥

श्रीशुक उवाच —

आचार्यानुग्रहात् कामं लब्ध्वा पुंस्त्वं व्यवस्थया ।
पालयामास जगतीं नाभ्यनन्दन् स्म तं प्रजाः ।। १३ ।।

सत्यधर्मीया — पुंस्त्वं तल्लक्षणं कामं स्वाभिलाषितम् । व्यवस्थयोक्तरीत्या । तं राजानम् । प्रजा नाभ्यनन्दन् जना न मुमुदिरे । अखण्डं मासं स्वामिसन्दर्शनाभावादिति भावः ।। १३ ।।

छलारी — पुंस्त्वलक्षणं कामं नाभ्यनन्दन् । स्त्रीत्वे प्राप्ते लज्जया मासं निलीयावस्थानात् । ततः परं सुद्युम्नोऽश्वमेधं कृत्वा पुमानेव बभूवेति ज्ञातव्यम् ।। तदुक्तं संग्रहरामायणे ।। अश्वमेधात्पुमानेव यज्ञश्रेष्ठो हि स क्रतुरिति ।। १३ ।।

तस्योत्कलो गयो राजन् विमलश्च सुतास्त्रयः ।
दक्षिणापथराजानो बभूवुर्धर्मवत्सलाः ।। १४ ।।

सत्यधर्मीया — तस्य सुद्युम्नस्य । दक्षिणापथराजानो दक्षिणापथस्य देशस्य राजानो बभूवुः । समासान्तटचोऽनित्यत्वाज्जानन्ति पूर्वराजान इतिवत् ज्ञेयम् । गोप्तार इति पाठस्तु नो गोप्ता ।।१४।।

छलारी — तस्य सुद्युम्नस्य दक्षिणापथराजानः पथस्य तन्नामकदेशस्य राजानः । समासान्तविधेरनित्यत्वात् दक्षिणापथराजान इति साधुः ।। १४ ।।

ततः परिणतः काले प्रतिष्ठानपतिः प्रभुः ।
पुरूरवस उत्सृज्य गां पुत्राय गतो वनम् ।। १५ ।।

इति श्रीमद्भागवते नवमस्कन्धे द्वितीयोऽध्यायः ।

सत्यधर्मीया — परिणतो वृद्धः । प्रतिष्ठानेति ग्रामनाम । तत्पतिस्तत्स्वामी । प्रतिष्ठया सर्वजनसम्माननादिना पतिर्नेति प्रतिष्ठानपतिर्वा । नाभ्यनन्दन्नित्यनुपदमभिधानात् । पुरूरवसे पुत्रायाव्यवधानप्रसूताय गां भूमिमुत्सृज्यातिसृज्य ।। १५ ।।

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे द्वितीयोऽध्यायः ।

छलारी — प्रतिष्ठानपतिः प्रतिष्ठाननामाख्यपुरपतिः प्रभुः सुद्युम्नः परिणतः सन्वृद्धः सन् स्वस्य स्त्रीत्वावस्थायां जाताय पुरुरवसे पुत्राय । गां भूमिमुत्सृज्य दत्वा ॥ १५ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे द्वितीयोऽध्यायः ॥ ९-२ ॥

॥ अथ तृतीयोऽध्यायः ॥

श्रीशुक उवाच —

एवं गतेऽथ सुद्युम्ने मनुर्वैवस्वतः सुते ।
पुत्रकामस्तपस्तेपे यमुनायां शतं समाः ॥ १ ॥

सत्यधर्मीया — सुद्युम्ने सुते एवं वनं गते सति वैवस्वतो मनुः श्राद्धदेवः पुत्रकामः शतं समाः संवत्सरान् यमुनायां तपस्तेपे चकार ॥ १ ॥

छलारी — सुते सुद्युम्ने वनं प्रति गते सतीत्यन्वयः । समा वर्षाणि ॥ १ ॥

ततोऽयजन्मनुर्देवमपत्यार्थं हरिं प्रभुम् ।
इक्ष्वाकुपूर्वजान् पुत्रान् लेभे स्वसदृशान् दश ॥ २ ॥

सत्यधर्मीया — हरिं देवं वासुदेवम् । इक्ष्वाकुः पूर्वजोऽग्रजो येषां ते तथा तान्स्वसदृशान्पुत्रान् लेभे ॥ २ ॥

छलारी — इक्ष्वाकुः पूर्वजो ज्येष्ठो येषां ते तथा । नामानि प्रथमाध्याय एवोक्तानि ज्ञेयानि ॥२॥

वृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः ।
पालयामास गा यत्तो रात्र्यां वीरासनव्रतः ॥ ३ ॥

सत्यधर्मीया — अष्टमस्यापि वृषध्रस्यानपत्यतया लघुनोपपादनाय कर्म वक्तुं शक्यमिति तदेवादौ वदति ॥ वृषध्र इति । गुरुणा वसिष्ठेन । गोपालस्तत्पालकः । एकं सहस्रं कुर्वित्याज्ञप्तो रात्र्यां यत्तः सन्नद्धो वीरासनव्रतो जाग्रद्गाः पालयामास ॥ ३ ॥

छलारी — सूचीकटाहन्यायेन वैवस्वतपुत्राणां वंशं विवक्षुरादौ तावत् वैवस्वतमनोरष्टमपुत्रस्य वृषध्रस्य वंशो नाभूदिति सहेतुकमाह ।। वृषध्र इत्यादिना । गुरुणा वसिष्ठेन गोपालः कृतो वृषध्रो गाः पालयामासेत्यन्वयः । रात्रौ खड्गपाणिस्तिष्ठतः सतो जागरणं वीरासनं तदेव व्रतं यस्य स तथा । यत्तः सन्नद्धः ।। ३ ।।

एकदा प्राविशद् गोष्ठं शार्दूलो निशि वर्षति ।
शयाना गाव उत्थाय भीतास्ता बभ्रमुर्व्रजे ।। ४ ।।

सत्यधर्मीया — निशि मेघे वर्षति सति शार्दूल एकदा गोष्ठम् । अम्बाम्बगोभूमीत्यादिना सस्य षः । गोष्ठं गोस्थानकमित्यमरः । प्राविशत् । शयाना गावो भीताः सत्य उत्थाय व्रजे बभ्रमुः ।। ४ ।।

छलारी — निशि मेघे वर्षति सति शार्दूलो व्याघ्रः । बभ्रमुर्भ्रमणं चक्रुः ।। ४ ।।

एकां जग्राह बलवान् साऽनुक्रोशमयातुराम् ।
तस्यास्तु क्रन्दितं श्रुत्वा वृषध्रोऽभिससार ह ।। ५ ।।

सत्यधर्मीया — बलवान् व्याघ्रः । बलवानेतामनु स्वयं सञ्चरणवानिति वा । सा गौः । तामभिससार । ह शोके ।। ५ ।।

छलारी — बलवान् शार्दूलः । सा गौः ।। ५ ।।

खड्गमादाय तरसा प्रलीनोडुगणे निशि ।
अजानन्नहनद् बभ्रोः शिरः शार्दूलशङ्कया ।। ६ ।।

सत्यधर्मीया — तरसा त्वरया । तरो बले च वेगे चातिरंहस्तरसीति विश्वामरौ । निशि तत्र न नक्षत्रप्रकाशोऽपीत्याह ।। प्रलीनेति । न लोपः प्रातिपादिकान्तस्येति प्रलीनेति निर्विभक्तिकनिर्देशः । उडुगणे नक्षत्रसङ्घे । प्रलीने नीरदादिना सति । गगन इति शेषो वा । बभ्रोर्गोः । बभ्रुर्गौः सौरभेयी च माहेयी गोमतुल्लकेत्यभिधानात् । शार्दूलशङ्कया व्याघ्रसंदेहेन शिरोऽहनत् । चिच्छेदेति यावत् । अजानन्नित्यज्ञाने निशि प्रलीनोडुगण इति निमित्तोक्तिः ।। ६ ।।

छलारी — बभ्रोर्गोः शिरो न्यहनत् । बभ्रुर्गौः सौरभेयी चेत्यभिधानम् । कपिला गौर्बभ्रुरिति कश्चिद्व्याख्यातवान् । प्रलीना उडुगणा यस्मिंस्तस्मिन् । आकाश इति शेषः ।। ६ ।।

व्याघ्रो विवृक्णश्रवणो निस्त्रिंशाग्रहतस्ततः ।
निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृजन् ॥ ७ ॥

सत्यधर्मीया — विवृक्णं छिन्नं श्रवणं कर्णं यस्य सः । निस्त्रिंशस्य खड्गस्याग्रं प्रान्तभागस्तेन हत इति विवृक्णश्रवणः सन्, ततो गोष्ठात् ॥ ७ ॥

छलारी — विवृक्णश्रवणः छिन्नकर्णमूलः । निस्त्रिंशस्य खड्गस्याग्रेण हतः । गां कामतो न जघानेति व्याख्यापयितुं विवृक्णश्रवण इत्युक्तम् ॥ ७ ॥

मन्यमानो हतं व्याघ्रं वृषध्रः परवीरहा ।
अद्राक्षीत् स्वहतां बभ्रुं व्युष्टायां निशि दुःखितः ॥ ८ ॥

सत्यधर्मीया — वृषध्रो निशि व्याघ्रं हतं मन्यमानो निशि व्युष्टायां प्रभातायां दुःखितः यस्तं कुलाचार्यः शशपेत्युत्तरेणान्वयः ॥ ८ ॥

छलारी — परवीरहा शत्रुसंहारकः । निशि व्युष्टायां प्रभातायाम् ॥ ८ ॥

तं शशाप कुलाचार्यः कृतागसमकामतः ।
न क्षत्रबन्धुः शूद्रस्त्वं कर्मणा भविताऽमुना ॥ ९ ॥

सत्यधर्मीया — शापमुपपादयति ॥ नेति । क्षत्रबन्धुः क्षत्रियापत्यं । नामुना कर्मणा बभ्रुमारणरूपेण शूद्रस्तद्धर्मा भवितेत्यकामतोऽनिच्छया कृतागसं तादृशमपि ॥ ९ ॥

छलारी — अकामतो बभ्रुहननेच्छाभावेऽपि कृतागसं कृतापराधम् । क्षत्रबन्धुः क्षत्रियाभासोऽपि त्वं न भविताऽपि तु शूद्रो भविता ॥ ९ ॥

एवं शप्तस्तु गुरुणा प्रत्यगृह्णात् कृताञ्जलिः ।
अधारयद् व्रतं वीर ऊर्ध्वरेता मुनिप्रियम् ॥ १० ॥

सत्यधर्मीया — किं निमिरिव प्रतिशशाप कुलाचार्यमपि तु चित्रकेतुवदांश्चक्र इत्यत आह ॥ एवमिति । तुशब्देन न मयेच्छया माहेयीहननं कृतं न दुष्कृतमतो विनेये दया विधेयेति क्षमापन-क्षमतायां सत्यायामपीति विशेषं सूचयति । शप्तेति विशेषणीभूतशापपदं द्वितीयान्तं सदन्वेति । शापं प्रत्यगृह्णान्न सन्तापेनेत्याह ॥ कृताञ्जलिरिति । इदमपि छेदस्य हस्तकार्यत्वात्तदनुरूपमिति मन्तव्यम् । ऊर्ध्वरेता वीरो मुनिप्रियं व्रतं वनवासोपवासादिकमधारयद्दधार ॥ १० ॥

छलारी — प्रत्यगृह्णात् । शापमिति शेषः । उर्ध्वरेतोव्रतं ऊर्ध्वरेतस्त्वरूपं व्रतमधारयत् ॥१०॥

वासुदेवे भगवति सर्वात्मन्यमले परे ।
एकान्तित्वं गतो भक्त्या सर्वभूतसुहृत् समः ॥ ११ ॥

सत्यधर्मीया — तच्चर्यां श्लोकचतुष्टयेनाह ॥ वासुदेव इति । सर्वभूतसुहृत्समश्च ॥ ११ ॥

छलारी — सर्वात्मनि सर्वस्वामिन्येकान्तित्वमेकान्तभूयस्त्वम् । समः सुखदुःखादिषु समः ॥११॥

विमुक्तसङ्गः शान्तात्मा संयताक्षोऽपरिग्रहः ।
यदृच्छयोपपन्नेन कल्पयन् वृत्तिमात्मनः ॥ १२ ॥

सत्यधर्मीया — संयताक्षो योग्यविषये निमीलितलोचनोऽपरिग्रहः । तर्हि जीवनं कथमित्यतः कथयति ॥ यदृच्छयेति । वृत्तिं जीविकाम् ॥ १२ ॥

छलारी — शान्तात्मा शान्तरूपे हरौ निश्चितबुद्धिः । संयताक्षो निगृहीतेन्द्रियोऽपरिग्रहोऽधिकपरिग्रहशून्यः । यदृच्छया भगवदिच्छयोपपन्नेन प्राप्तेन फलादिना ॥ १२ ॥

आत्मन्यात्मानमाधाय ज्ञानतृप्तः समाहितः ।
विचचार महीमेतां जडान्धबधिराकृतिः ॥ १३ ॥

छलारी — आत्मनि परमात्मनि । आत्मानं मन आधाय जडान्धबधिरैः सदृशात्माऽऽकृतिर्यस्य विचचारेति द्वयोरेकान्वयः ॥ १३ ॥

एवंव्रतो वनं गत्वा दृष्ट्वा दावाग्निमुत्थितम् ।
तेनोपयुक्तकरणो ब्रह्म प्राप परं मुनिः ॥ १४ ॥

सत्यधर्मीया — एवंव्रत इति बहुव्रीहिः । तेन वनानलेन युक्तकरण उपयुक्तं करणं कायो यस्य स तथा । करणं साधकक्षेत्रं कायकार्यस्थकर्मसु । क्रियाभेदेन्द्रियेषु चेति विश्वः । उपयुक्तानि तत्सम्बन्धानि करणानींद्रियाणि यस्येति वा । मुनिस्तद्व्रतीति तत्त्वम् । परं ब्रह्माप ॥ १४ ॥

छलारी — एवंव्रत एवंवृत्तिमान् । तेन दावाग्निनोपयुक्तकरणः स्वीकृतदेहो दग्धदेह इत्यर्थः । करणं साधकतमे शरीरेन्द्रिययोरित्यभिधानम् । परं ब्रह्म ॥ १४ ॥

कविस्तदाऽयं विषयेषु निःस्पृहो विसृज्य सङ्गं सह बन्धुभिर्वनम् ।
निवेश्य चित्ते पुरुषं स्वरोचिषं विवेश कैशोरवयाः परं गतः ॥ १५ ॥

सत्यधर्मीया — स्मर्तुर्धृत्यै सर्वं वृषध्रकृतं सङ्गृह्याह । कविरिति । यदा शप्तस्तदाऽयं कविर्वृषध्रो ज्ञानी । अनेनेक्ष्वाकिति श्लोके कविमिति श्रूयमाणं यथा यथा स्वविशेष्यविभक्त्यन्तं सदन्वेति । न तु स्वतन्त्रपुत्रवाचीति सूचितं भवति । नभस्तु न त्याज्यः । वंशशंसनात् । कविनामकः स्वतन्त्रः पुत्र इति व्याख्यापरो दशेति सङ्ख्याया उत्तरत्र नभपुत्रोऽथ बलवानित्यत्र पाठान्तरं दृष्ट्वा कविना सह पूरणं चिन्तितवानिति ज्ञेयम् । बन्धुभिः सह सङ्गम् विसृज्य वनं विवेश । परमनन्तरं स्वरोचिषं स्वप्रकाशं पुरुषं पूर्णषड्गुणं चित्ते निवेश्य । कैशोरवयास्तरुण एव गतः । उक्तदावाग्न्युपकरणो निवृत्तः परं गत इति वाऽन्वयः ॥ १५ ॥

छलारी — दशमपुत्रस्य कवेरपि वंशो नाभूदित्याह ॥ कविरिति । बन्धुभिः सह संगं विसृज्य तेषु ममतां विहायेत्यर्थः । वनं विवेश । ततः स्वरोचिषं पुरुषं चित्ते निवेश्य तं ध्यायन्नित्यर्थः । परं ब्रह्मेति शेषः । गतः प्राप्तः । कैशोरवयोऽल्पवयः ॥ १५ ॥

करूशान्मानवादासन् कारूशाः क्षत्रजातयः ।
उत्तरापथगोप्तारो ब्रह्मण्या धर्मवत्सलाः ॥ १६ ॥

सत्यधर्मीया — मानवान्मनुतनयात् । क्षत्रजातयः कारूशाः करूशकुमारा आसन् । क्षत्रजातय इत्यनेन नेतरवृत्त्युपजीवनं तेषामिति सूचयति ॥ १६ ॥

छलारी — करुशस्य वंशमाह ॥ करूशादिति । मानवान्मनुपुत्रात्करूशात्कारूशा इत्येव प्रसिद्धाः पुत्रा आसन्नित्यन्वयः । क्षत्रजातय इत्यनेन वृषध्रवद्गोपालत्वादिजात्यन्तरं न प्राप्ताः । किन्तु तज्जातय एवेति सूचयति । उत्तरापथनामकस्य देशस्य गोप्तारः पालकाः ॥ १६ ॥

धृष्टाद्धार्ष्टमभूत् क्षत्रं ब्रह्मभूयं गतं क्षितौ ।
नभपुत्रोऽथि बलवान् स्वातिमूलोऽभवद्वसुः ॥ १७ ॥

सत्यधर्मीया — धार्ष्टं तज्जातिर्यद्यपि तथाऽपि क्षितौ ब्रह्मभूयं ब्राह्मणत्वं गतं तद्धर्माभवदिति भावः । भुवो भाव इति क्विप् । नभस्य पुत्रः स्वातिमूलस्तस्य वसुः पुत्रोऽभवत् ॥ १७ ॥

छलारी — पञ्चमस्य वंशमाह ।। धृष्टादिति । धृष्टान्मनुपुत्रान्नाम्ना धार्ष्टं क्षत्रं क्षत्रियकुलमभूत् । तद्वृत्तमाह ।। ब्रह्मभूतमिति । ब्रह्मणि स्थितं परब्रह्मनिष्ठितमभूदित्यर्थः । क्षितौ कर्मभूतौ गतमेकाग्रचित्तत्वेन तपसि स्थितमित्यर्थः । द्वितीयस्य वंशमाह ।। मानवाच्च नृगादिति । मानवान्मनुपुत्रान्नृगराजात् । स्वातिर्नामा पुत्रस्ततः स्वातेर्ज्योतिर्नामा ततो ज्योतिषो नभस्तन्नामा पुत्रोऽभवत् । स्वातिमूलनामा नभस्य पुत्रोऽभवत् । स्वातिमूलस्येति शेषः । वसुनामा पुत्रोऽभवत् ।। १७ ।।

वसोः प्रतीकस्तत्पुत्र ओघवानोघवत्स्वसा ।
कन्या चोघवती नाम सुदर्शन उवाह ताम् ।। १८ ।।

सत्यधर्मीया — तत्पुत्रः प्रतीकतोक ओघवान्नाम्ना । ओघवतः स्वसा भगिनी चौघवती । सुदर्शनः कश्चिद्राजा तामुवाहोपयेमे ।। १८ ।।

छलारी — वसोः प्रतीकः पुत्रोऽभवत् । तत्पुत्रः प्रतीकपुत्र ओघवान् ओघवान्नामा । ओघवतः स्वसा ओघवतीनामकन्याऽभवत् । सुदर्शनो नाम राजा ।। १८ ।।

चित्रसेनो नरिष्यन्ताद् दक्षस्तस्य सुतोऽभवत् ।
तस्य मीढ्वांस्ततः कूर्च इन्द्रसेनस्तु तत्सुतः ।। १९ ।।

सत्यधर्मीया — नरिष्यन्तान्मनुसूनोः । तस्य चित्रसेनस्य दक्षः । तस्य दक्षस्य मीढ्वांस्ततो मीढ्षः कूर्चस्तत्सुतः ।। १९ ।।

छलारी — सप्तमस्य वंशमाह ।। चित्रसेनो नरिष्यन्तादिति । नरिष्यन्तान्मनुपुत्राच्चित्रसेनो नाम सुतोऽअभवत् । तस्य चित्रसेनस्थ दक्षस्तस्य दक्षस्य । ततो मीढ्वान्नामकात् । तत्सुतः कूर्चसुतः ।। १९ ।।

वीतिहोत्रस्त्विन्द्रसेनात् तस्य सत्यश्रवा अभूत् ।
उरुश्रवाः सुतस्तस्य देवदत्तस्ततोऽभवत् ।। २० ।।

सत्यधर्मीया — तस्य वीतिहोत्रस्य । तस्य सत्यश्रवसः । तत उरुश्रवसः ।। २० ।।

छलारी — तस्य वीतिहोत्रस्य तस्य सत्यश्रवसस्तत उरुश्रवसः ।। २० ।।

देवदत्तस्य भगवानग्निः स्वयमभूत् सुतः ।
कानीन इति विख्यातो जातूकर्ण्यो महानृषिः ।। २१ ।।

सत्यधर्मीया — कानीनः कन्यायाः कनीन चेति स्मरणात् । कानीनः कन्यकाजाततनय इति विश्वः । जातूकर्ण्य इति च तस्यैव नामान्तरम् । देवदत्तस्य स्वजातजातूकर्ण्येन जातूकर्ण्यङ्गनाविवाह इत्यूह आह्वयेनेति ज्ञेयम् ॥ २१ ॥

छलारी — भगवान्पूज्योऽग्निदेव एव कानीन इति जातूकर्ण्य इति विख्यातः ॥ २१ ॥

ततो ब्रह्मकुलं जातमाग्निवेश्यायनं नृप ।
नरिष्यन्तान्वयः प्रोक्तो दिष्टवंशमतः शृणु ॥ २२ ॥

सत्यधर्मीया — ततो जातूकर्ण्यात् । आग्निवेश्यायनं नाम ब्रह्मकुलं ब्राह्मणकुलं जातम् ॥ २२ ॥

छलारी — ततो जातूकर्ण्याद्ब्रह्मकुलं जातम् । आग्निवेश्यायनमिति नामान्तरेण प्रसिद्धम् । चतुर्थवंशं प्रतिजानीते ॥ दिष्टवंशमिति ॥ २२ ॥

नाभागो दिष्टपुत्रोऽन्यः कर्मणा वैश्यतां गतः ।
भलन्दनः सुतस्तस्य वत्सप्रीतिर्भलन्दनात् ॥ २३ ॥

सत्यधर्मीया — अन्योऽम्बरीषपितुः । तव्द्यापारमीरयति ॥ कर्मणेति । तस्य नाभागस्य । भलन्दनात् । जात इति शेषः ॥ २३ ॥

छलारी — अन्यो मनुपुत्रनाभागाद्दिष्टपुत्रनाभागोऽन्य इत्यर्थः । कर्मणा वाणिज्यादिकर्मणा वैश्यतां गतः । तस्य नाभागस्य ॥ २३ ॥

वत्सप्रीतेः सुतः प्रांशुस्तत्सुतः प्रमितिर्विभुः ।
खनित्रः प्रमितेस्तस्माच्चाक्षुषोऽथ विविंशतिः ॥ २४ ॥

सत्यधर्मीया — तत्सुतः प्रांशुशिशुः । तस्मात्खनित्रात् । अथ तस्माच्चाक्षुषात् ॥ २४ ॥

छलारी — तत्सुतः प्रांशसुतः । विभुरिति प्रमितेर्विशेषणम् । अथ चाक्षुषात् ॥ २४ ॥

विविंशतिसुतो रम्भः खनिनेत्रोऽस्य धार्मिकः ।
करन्धमो महाराज तस्यासीदात्मजो नृपः ॥ २५ ॥

सत्यधर्मीया — अस्य रम्भस्य । तस्य खनिनेत्रस्य ॥ २५ ॥

छलारी — अस्य रंभस्य । तस्य खनिनेत्रस्य करंधम आत्मजः ।। २५ ।।

तस्यावीक्षित् सुतो यस्य मरुत्तश्चक्रवर्त्यभूत् ।
संवर्तोऽयाजयद् यं वै महायोग्यङ्गिरस्सुतः ।। २६ ।।

सत्यधर्मीया — तस्य करन्धमस्यावीक्षित् । यस्यावीक्षितश्चक्रवर्त्यखण्डेशो मरुत्तः सुतोऽभूत् । संवर्तो महायोगीति भाविकार्योपयोगी । अङ्गिरःसुतो यं मरुत्तमयाजयद्याजयामास ।। २६ ।।

छलारी — करंधमस्य यस्यावीक्षितः । मरुत्तं विशिनष्टि ।। संवर्त इति । आङ्गिरसः सुतो महायोगी संवर्त्तो यं मरुत्तमयाजयत् ।। २६ ।।

मरुत्तस्य यथा यज्ञो न तथाऽन्योऽस्ति कश्चन ।
सर्वं हिरण्मयं त्वासीद् यत् किञ्चास्त्यतिशोभनम् ।। २७ ।।

सत्यधर्मीया — अन्यो यज्ञः कश्चन नास्ति । तन्महिमानमाह । यत्किञ्चास्त्युपकरणं सर्वं हिरण्मयमित्यतिशोभनं बहुमङ्गलमासीत् । शोभनं शुभकर्मकृत्वाख्यमतीत्य विद्यमानमुर्वरितं तद्यत्किञ्चिदस्ति क्षितिसुरैः क्षितिनिक्षिप्तमासीदिति वा । धर्मराजेनैतस्यैव स्वसवनगताया आदानात् । यथोक्तमाश्वमेधिके पर्वणि । उत्सृष्टं ब्राह्मणैर्यज्ञे मरुत्तस्य महात्मन इत्यारभ्य तत्त्वं समादाय नरेन्द्र वित्तं यजस्व देवांस्तर्पयानो निवापैरित्यन्तेन । एतेन हवा ऐन्द्रेण महाभिषेकेण सांवर्त आङ्गिरस इति । संवर्तनामा बृहस्पतिभ्राता । अङ्गिरसः पुत्र इत्याङ्गिरसः । तेन कृतं मरुत्ताभिषेकं शंसति श्लोकं चेममुदाहरति ।। तदप्येष श्लोकोऽभिगीत इति । तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसङ्गृहे आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इत्यष्टमपञ्चकपञ्चविंशतिखण्डम् । तस्यायमर्थः । तदपि तस्मिन्नपि मरुत्ताभिषेकमाहात्म्य एष वक्ष्यमाणश्लोकपादावबद्धोऽभिगीतोऽभितः सर्वैः पठितः । मरुत्तस्य तन्नामकस्य राज्ञो गृहे मरुत्संज्ञा देवाः परिवेषयन्ति भोजनकालेऽन्नादि-परिवेषस्य कर्तारः सन्त आवसन् । स किं तनय इत्यत आह ।। आविक्षितस्येति । अविक्षितोऽपत्य-माविक्षितस्तस्य । न समाना मानवास्तस्येत्याह ।। कामप्रेरिति । कामपूरस्य कक्ष्यप्राकक्ष्याभि-पूरकाविति यावत् । विश्वे देवा नायं रूढोऽखण्डःशब्दो देवताविशेषवाची किं तु द्वेपदे । विश्वे समस्ता देवाः सभासदः सभायां सीदंत्युपविंशति ते तथा । सेवन्त इति यावत् । तथा हि पर्वण्याश्वमेधके । संवर्तः ।

यदि प्रीतस्त्वमसि वै देवराजस्तस्मात्स्वयं शाधि यज्ञे विधानम् ।
स्वयं सर्वान् कुरु मार्गान् सुरेन्द्र जानात्वयं सर्वलोकश्च देव ।

व्यास उवाच ।

एवमुक्तस्त्वङ्गिरसेन शक्रः समादिदेश स्वयमेव देवान् ।
सभाः क्रियन्तामावसथाश्च मुख्याः सहस्रशश्च चित्रभृतः समृद्धाः ।
क्लृप्तस्थूणाः कुरुतारोहणानि गन्धर्वाणामप्सरसां च शीघ्रम् ।
यत्र नृत्येरन्नप्सरसः समस्ताः स्वर्गोपमः क्रियतां यज्ञवाटः ।
इत्युक्तास्ते चक्रुराशु प्रतीता दिवौकसः .. .. ।
ततो यज्ञो ववृधे तस्य राजन् यत्र देवाः स्वयमन्नानि जह्रुः ।
यस्मिन् शक्रो ब्राह्मणैः पूज्यमानः सदस्योऽभूदित्यादि ।। २७ ।।

छलारी — मरुत्तस्य यज्ञं विशिनष्टि ।। मरुत्तस्येति । अस्य यत्किञ्चित्पात्रादिकमस्ति तत्सर्वं हिरण्मयमतिशोभनमासीत् ।। २७ ।।

अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः ।
मरुतः परिवेष्टारो विश्वे देवाः सभासदः ।। २८ ।।

सत्यधर्मीया — इन्द्रः सोमेन संवर्ताज्ञया स्वयं प्रत्यक्षीभूय पीतेन । यथोक्तं तत्रैव ।

प्रत्यक्षं चैवाह्वयन्देवसङ्घान् जुहावाग्नौ मन्त्रवत्सुप्रतीतः ।
ततः पीत्वा बलभित्सोममग्र्यं ये चाप्यन्ते सोमपा देवसङ्घाः ।

अनुज्ञाताः प्रययुः पार्थिवेन यथाजोषं तर्पिताः प्रीतिमन्त इत्यादि । अमाद्यज्जहर्ष । द्विजातयो ब्राह्मणा दक्षिणाभिरमाद्यन् । इदमप्युदितं तत्र ।

ततो राजा जातरूपस्य राशीन्पदे पदे कारयामास हृष्टः । द्विजातिभ्यो विसृजन् भूरि वित्तमिति । मरुतो वायवः सर्वे विश्वेदेवाः सभासदः सभास्तारः ।। २८ ।।

छलारी — अमाद्यदहृष्यत् । द्विजातयः । अमाद्यन्निति शेषः । सभासदः सभायां सीन्दत्युपविशंतीति सभासदः प्रत्यक्षं सभायामुपविश्य सर्वं विचारयन्त इत्यर्थः ।। २८ ।।

मरुत्तस्य दमः पुत्रस्तस्यासीद् राज्यवर्धनः ।
सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः ॥ २९ ॥

सत्यधर्मीया — तस्य दमस्य । तत्सुतो राज्यवर्धनसुतः सन् जज्ञे जातः । सौधृतेयः सौधृतिसम्बन्धी नरनामा सुतो जज्ञे ॥ २९ ॥

छलारी — नरः सौधृतेयः सुधृतिपुत्र इति श्रुतः प्रसिद्धः ॥ २९ ॥

तत्सुतः केवलस्तस्माद् बन्धुमान् वेगवांस्ततः ।
बन्धुस्तस्याभवद् यस्य तृणबिन्दुर्महीपतिः ॥ ३० ॥

सत्यधर्मीया — तत्सुतो नरसुतः । तस्मात्केवलात् । ततो बन्धुमतः । ततो वेगवतो बन्धुर्यस्य बन्धोस्तृणबिन्दुः ॥ ३० ॥

छलारी — यस्य बन्धोस्तृणबिन्दुः सुतोऽभवत् ॥ ३० ॥

तं भेजेऽलम्बुसा देवी भजनीयगुणालयम् ।
वराप्सरा यतः पुत्राः कन्या चेलिबिलाऽभवत् ॥ ३१ ॥

सत्यधर्मीया — अलम्बुसा वराप्सरा अप्सरसो गतम् । यतस्तृणबिन्दोः पुत्रास्त्रयः । इलिबिला नाम्ना कन्या चैकाऽभवत् ॥ ३१ ॥

छलारी — अलम्बुषानाम वराप्सरा । तं तृणबिन्दुं भेजे । यतस्तृणबिन्दोर्यस्यां त्रयः पुत्राः । अभवन्निति शेषः । इलिबिलाख्यकन्या च ॥ ३१ ॥

यस्यामुत्पादयामास विश्रवाश्च धनाधिपम् ।
प्रदाय विद्यां परमामृषिर्योगेश्वरः पितुः ॥ ३२ ॥

सत्यधर्मीया — यस्यामिलिबिलायां विश्रवाः पुलस्त्यापत्यं धनाधिपं कुबेरम् । परमां विद्यां प्रदाय । इलिबिलापितुस्तृणबिन्दोः । तामुदूह्य तस्यामुत्पादयामास ॥ ३२ ॥

छलारी — योगेश्वरो विश्रवर्षिः पितुरिलिबिलायाः पितुस्तृणबिन्दोः परमां विद्यां प्रदाय तामुद्वाह्य । यस्यामिलिबिलायां धनाधिपं वैश्रवणमुत्पादयामासेत्यर्थः ॥ ३२ ॥

विशालः शून्यबन्धुश्च धूमकेतुश्च तत्सुताः ।
विशालो वंशकृद् राजा वैशालीं निर्ममे पुरीम् ॥ ३३ ॥

सत्यधर्मीया — पुत्रत्रिकगोत्राण्याह ॥ विशाल इति । तत्सुतास्तृणबिन्दुनन्दनाः । वंशकृद्गृहस्थाश्रमी । वैशालीं नाम्ना ॥ ३३ ॥

छलारी — तानेव पुत्रानाह ॥ विशाल इति । तत्सुतास्तृणबिन्दुसुताः ॥ ३३ ॥

हेमचन्द्रः सुतस्तस्य धूम्राक्षस्तस्य चात्मजः ।
तत्पुत्रः सहदेवस्तु कृशाश्वः सहदेवजः ॥ ३४ ॥

सत्यधर्मीया — तस्य विशालस्य । तस्य हेमचन्द्रस्य । तस्य धूम्राक्षस्य पुत्रः सहदेवः ॥३४॥

छलारी — तस्य विशालस्य । तत्पुत्रो धूम्राक्षपुत्रः ॥ ३४ ॥

कृशाश्वात् सोमदत्तोऽभूद् योऽश्वमेधैरिडस्पतिम् ।
इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रिताम् ॥ ३५ ॥

सत्यधर्मीया — इडस्पतिमन्नपतिं वाक्पतिं वा । विशेषस्तु षष्ठे ज्ञेयः । पुरुषमिष्ट्वा प्रपूज्य । योगेश्वराश्रितामग्र्यां वैकुण्ठसंज्ञां गतिमाप । गतिं ज्ञानं वा ॥ ३५ ॥

छलारी — यः सोमदत्त इडस्पतिमन्नपतिं वाक्पतिम् । पुरुषं हरिम् ॥ ३५ ॥

सौमदत्तिस्तु सुमतिस्तत्सुतो जनमेजयः ।
एते वैशालभूपालास्तृणबिन्दोर्यशोधराः ॥ ३६ ॥

इति श्रीमद्भागवते नवमस्कन्धे तृतीयोऽध्यायः ॥

सत्यधर्मीया — सौमदत्तिस्तत्सुतः । विशालभूपालकुले जाता इति वैशालभूपालाः । तृणबिन्दोर्बन्धुसुतस्य । यशोधराः । यशस्करा इति यावत् ॥ ३६ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे तृतीयोऽध्यायः ।

छलारी — सौमदत्तिः सोमदत्तसुतो वैशालभूपाला विशालवंशे जाता भूपालाः ।। ३६ ।।

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे प्रथमोऽध्यायः ।। ९-३ ।।

।। अथ चतुर्थोऽध्यायः ।।

श्रीशुक उवाच —

शर्यातिर्मानवो राजन् ब्रह्मिष्ठः सम्बभूव ह ।
यो वा अङ्गिरसां सत्रे द्वितीयमहरध्यगात् ।। १ ।।

सत्यधर्मीया — तृतीयं तद्वंशधरं शंसति ।। शर्यातिरिति । ब्रह्मिष्ठो ब्रह्म च वेदो वा वेद्यो वा तन्निष्ठः श्रेष्ठः । अङ्गिरसां तन्नामकऋषीणाम् । सत्रे बहुकालिके क्रतौ । द्वितीयमहर्द्वितीयेऽहनि शंसनीयो मन्त्रविशेषस्तत्पदेन लक्ष्यते । तत्पदलाभायाध्यगाज्जगौ ऊचिवानित्यपि सूचितः पाठः ।।१।।

छलारी — तृतीयस्य वंशमाह ।। शर्यातिरिति । ब्रह्मिष्ठो ब्रह्मनिष्ठो वेदनिष्ठो वा । तत्फलमाह ।। यो वा इति । अङ्गिरसां सत्रेऽङ्गिरो नाम ऋषिकर्तृके सत्रयागे । द्वितीयमहर्द्वितीयेऽन्हि क्रियमाणं कर्म । उवाचेति शेषः । तदह्नि पठ्यमानं मन्त्रं चाध्यगादध्यगीष्ट । यथा सत्रयागेषु षष्ठेऽहनि कर्तव्ये कर्मणि ऋषिषु मोहं प्राप्तेषु मनुपुत्रो नाभागो पित्राज्ञया तत्कर्मणि द्वे सूक्ते च शशंस । तद्वत् शर्यातिरपि शशंसेति भावः । नाभागचरितं चोपरिष्ठात्पञ्चमेऽध्याये वक्ष्यते । सैनिकानां राजसेवकानाम् ।। १ ।।

सुकन्या नाम तस्यासीत् कन्या कमललोचना ।
तया सार्धं वनगतो ह्यगमच्च्यवनाश्रमम् ।। २ ।।

सत्यधर्मीया — दुश्च्यवनहस्तम्भनादिच्यवनमाहात्म्यगर्भितत्वात्पुङ्गर्भत आदौ कन्योदन्तमाह ।। सुकन्येत्यादिना । तया कन्यया । अनेन राजप्रीतिविशेषस्तस्यां ध्वन्यते । वनं गतो हि वनगतश्च्यवनाश्रममगमदगच्छत् ।। २ ।।

छलारी — उत्तानबर्हिरानर्त इत्यादिना तस्य वंशं वक्ष्यन् आदौ तत्कन्यावृत्तान्तमाह ।। सुकन्येत्यादिना । वनं प्रति गतः ।। २ ।।

सा सखीभिः परिवृता विचिन्वन्त्यङ्घ्रिपान् वने ।
वल्मीकरन्ध्रे ददृशे खद्योते इव ज्योतिषी ॥ ३ ॥

सत्यधर्मीया — अङ्घ्रिपान्वृक्षान् । विचिन्वती मृगयन्ती । वल्मीकस्य वामलूरोः । वल्मीको वामलूरुः स्याद्दषिरोगविशेषयोरिति विश्वः । रन्ध्रे छिद्रे खद्योते इव सूर्याविव । खद्योतो लोकबान्धवः । खद्योतो ज्योतिरिङ्गण इत्युभयतश्चामरः । ज्योतिरिङ्गणः कीटविशेषः । नपुंसकता त्वार्षी । ज्योतिषी प्रकाशरूपे इव । ज्योतिषी इत्यत्रत्यो ज्यकारो लघु वं कुर्वन्सन् राज्ञस्तात्कालिकं लाघवं सूचयति ॥३॥

छलारी — अङ्घ्रिपान्पुष्पफलोपेतवृक्षान् विचिन्वन्ती मृगयन्ती । वल्मीकरन्ध्रे ज्योतिषी तेजोरूपनयने ॥३॥

दैवेन चोदिता बाला ज्योतिषी कण्टकेन सा ।
अविध्यन्मुग्धभावेन सुस्रावासृक् ततो बहु ॥ ४ ॥

सत्यधर्मीया — मुग्धभावेन मूढतया । असृग्रक्तम् ॥ ४ ॥

छलारी — सा सुकन्या मुग्धभावेन मूढत्वेन ज्योतिषी तेजोरूपे नयनेऽविध्यद्विध्याऽधात्ततो विद्धचक्षुषोऽसृक् रुधिरम् ॥ ४ ॥

शकुन्मूत्रनिरोधोऽभूत् सैनिकानां च तत्क्षणात् ।
राजर्षिस्तमुपालभ्य पुरुषान् विस्मितोऽब्रवीत् ॥ ५ ॥

सत्यधर्मीया — सैनिकानां सेनामुखानाम् । शकृन्मूत्रयोः पुरीषमूत्रयोः । निरोधः प्रतिबन्धः । तन्निरोधमुपालभ्य दृष्ट्वा ॥ ५ ॥

छलारी — राजर्षिः शर्यातिस्तं विरोधमुपालभ्य दृष्ट्वा ॥ ५ ॥

अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितम् ।
व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणम् ॥ ६ ॥

सत्यधर्मीया — अभद्रमपराधः । विचेष्टितं कृतं किम् । अकरणे न मरणकारणमेवं स्यादिति स्वयं निश्चित्य वक्ति ॥ व्यक्तमिति । नोऽस्मन्मध्ये केनापि पुंसा । अनेन मोहनाङ्गचो मोहविषया इति न तत्र राजशेमुषी प्रससारेति ध्वन्यते । सामान्ये नपुंसकमिति केनचिद्वस्तुनेति वा । तस्य च्यवनस्य । आश्रमदूषणं विचेष्टितं व्यक्तं न सन्देहः । इत्यब्रवीत् ॥ ६ ॥

छलारी — नोऽस्माकं मध्ये केनापि पुरुषेण । भार्गवस्य च्यवनस्याभद्रमपराधः । अपिशब्दः किंशब्दार्थः । न विचेष्टितं किमिति । प्रथमं सन्देहात्प्रश्नः । ततः कार्यदर्शनादभद्रं कृतमेवेति निर्धारयति ॥ व्यक्तमिति ॥ ६ ॥

सुकन्या प्राह पितरं भीता किञ्चित् कृतं मया ।
द्वे ज्योतिषी अजानन्त्या निर्भिन्ने कण्टकेन ते ॥ ७ ॥

सत्यधर्मीया — किञ्चित्कृतमिति तदेव विविच्याह ॥ द्वे ज्योतिषी इति ॥ ७ ॥

छलारी — द्वे ज्योतिषी नयने निर्भिन्ने विदारिते ॥ ७ ॥

दुहितुस्तद्वचः श्रुत्वा शर्यातिर्जातसाध्वसः ।
मुनिं प्रसादयामास वल्मीकान्तर्हितं शनैः ॥ ८ ॥

सत्यधर्मीया — जातसाध्वसः सम्भूतभीतिः । शनैर्मन्दम् ॥ ८ ॥

छलारी — जातसाध्वस उत्पन्नभयः ॥ ८ ॥

तदभिप्रायमाज्ञाय प्रादाद् दुहितरं मुनेः ।
कृच्छ्रान्मुक्तस्तमामन्त्र्य पुरं प्रायात् सहानुगः ॥ ९ ॥

सत्यधर्मीया — तदभिप्रायमाज्ञाय । याऽपराध्यति तत्प्रदानमेव निदानं कोपापनोदायेति तद्भावमवगत्य दुहितरं मुनेश्च्यवनस्य प्रादात् । कृच्छ्रान्मूत्रपुरीप्रतिबन्धजात्कष्टात् । कृच्छाद्धृद्ध इति कष्टाद्दुहितरं प्रादादित्यप्यन्वयः । उपायमेतदतिहायैतदपायपारणादर्शनादिति भावः । तं जामातरम् । आमन्त्र्य पुरं व्रजामीति पृष्ट्वा ॥ ९ ॥

छलारी — मुग्धेयं मम कन्या । अनया कृतमगः क्षम्यतामित्युक्ते । कतिवर्षाण्यस्या विवाहो जातो न वेत्यादि वाक्यैस्तदीयाभिप्रायमाज्ञाय मुनेर्मुनये कन्यां प्रादात् । तदनन्तरं कृच्छ्रात् शकृन्मूत्रनिरोधलक्षणात् कृच्छ्रान्मुक्तः । सुकन्या मुनिभ्यामिति शेषः ॥ ९ ॥

सुकन्या च्यवनं प्राप्य पतिं परमकोपनम् ।
प्रीणयामास चित्तज्ञा अप्रमत्ताऽनुवृत्तिभिः ॥ १० ॥

सत्यधर्मीया — परमकोपनमपि चित्तज्ञाऽप्रमत्ता सतीत्यनुवृत्तिभिः सेवाभिः । प्रकारभेदाद्बहुवचनम् । परमकोपित्वात्तत्समाधिः दुःसन्धिरिति सा विवक्षामपेक्षत इति शास्त्रीयोऽपि सन्ध्यभावश्चित्तज्ञा अप्रमत्तेत्यत्रत्यैतदभिसन्धिनेति ज्ञेयम् । चित्तज्ञा विनेया यथा तथेति शेषो वा । प्रमत्तं भावे क्तः । प्रमादः सन्विद्यते यासु ताश्च ता अनुवृत्तयश्चेति वा ॥ १० ॥

छलारी — तत्त्वज्ञा धर्मतत्त्वज्ञा । अनुवृत्तिभिरनुसरणैः सेवाभिरित्यर्थः ॥ १० ॥

कस्यचित् त्वथ कालस्य नासत्यावाश्रमं गतौ ।
तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ ॥ ११ ॥

सत्यधर्मीया — कस्यचित्कालस्योपरि शर्यातिगमनानन्तरम् । नासत्यावश्विनौ । न वेदा नासत्येति निपातितः । तौ पूजयित्वा पाद्याद्यैः । युवां मे वयस्तारुण्यम् । दत्तं दिशतम् । नासामर्थ्यं युवयोरिति ब्रवीति ॥ ईश्वराविति । वयः पक्षिणि बाल्यादौ वयो यौवनमात्रक इति विश्वः ॥ ११ ॥

छलारी — कस्यचित्कालस्य गच्छतः सतो गतौ प्राप्तौ हे ईश्वरौ भिषक् श्रेष्ठौ ! युवां मह्यं वयस्तारुण्यलक्षणं दत्तम् ॥ ११ ॥

ग्रहं गृहीष्ये सोमस्य यज्ञे वामप्यसोमयोः ।
क्रियतां मे वयो रूपं प्रमदानां यदीप्सितम् ॥ १२ ॥

सत्यधर्मीया — यो मर्तुकामादपि हर्तुकाम इति मुख्यं वैद्यचिह्नमिति वयोदानेन त आवयोः किमुपकुरुष इत्यतः पूर्वमेव स्वयं वदति ॥ ग्रहमिति । यज्ञे सोमस्य ग्रहं तत्पूर्णपात्रं गृहीष्ये दास्यामि । युवां सोमेन यक्ष्य इत्यर्थः । धातूनामनेकार्थत्वाद्गृह्णातेर्वितरणार्थकः । नित्यं तत्पिबतोरावयोः किं सोमेन साम तनुष इत्यत आह ॥ असोमयोरीति । असोमयोर्न विद्यते सोमो ययोस्तौ । तयोर्वामपीति । भिषक्त्वेन तद्बहिष्कृतयोरपीत्यर्थः । प्रमादानां योषितां रमणरमणोदिततोषाणां यदीप्सितं वयसा सहितं रूपं च क्रियताम् । युवाभ्यां वार्धकतयैकैव कामिनी सुकन्या नैकतया भातीति वा । लौकिकनीतिसूचनार्थं वोक्तमोदसङ्ग्रहसूचनार्थं वा प्रमदानामिति बहुवचनम् ॥ १२ ॥

छलारी — यच्छतं तव वयोदानेनावयोः किं फलमिति तत्राह ॥ ग्रहमिति । असोमयोः सोमपानशून्ययोर्युवयोर्ग्रहमाहुतिविशेषं गृहीष्ये दास्यामीति यावत् ॥ १२ ॥

बाढमित्यूचतुर्विप्रमभिनन्द्य भिषक्तमौ ।
निमज्यतां भवानस्मिन् ह्रदे सिद्धविनिर्मिते ॥ १३ ॥

सत्यधर्मीया — बाढमित्यभिनन्द्यानुमोद्य विप्रं प्रति सिद्धविनिर्मितेऽस्मिन् ह्रदे भवान्निमज्यतामित्यूचतुः ॥ १३ ॥

छलारी — भिषक्तमौ वैद्यश्रेष्ठौ । बाढमित्यभिनन्द्य । भवान् सिद्धपुरुषविनिर्मितेऽस्मिन्निमज्यतामिति विप्रमूचतुरित्यन्वयः ॥ १३ ॥

इत्युक्तो जरया ग्रस्तदेहो धमनिसन्ततः ।
ह्रदं प्रवेशितोऽश्विभ्यां स्वयं चामज्जतां ह्रदे ॥ १४ ॥

सत्यधर्मीया — इत्युक्तस्ताभ्यां, जरया ग्रस्तो देहो यस्य सः । धमनयः शिराः सन्तता यस्मिन्निति विग्रहः । धमनिसान्तत्यस्य विशेष्ये बाधात्तद्विशेषणदेहविशेषणता स्वर्गी ध्वस्तो दीप्तानलार्कद्युतिमप्रमेयमित्याद्युदाहरणपूर्वकं पूर्वं प्रपञ्चितमस्माभिर्विभावनीम् । अश्विभ्यां ह्रदं प्रवेशितः । स्वयं तौ च ह्रदेऽमज्जताम् । तस्य निस्त्राणत्वेन तं धर्तुं मज्जने संस्कारविशेषोत्पादनार्थं वा तन्मज्जनं ज्ञेयम् ॥ १४ ॥

छलारी — धमनीभिः शिरोभिः सन्ततो व्याप्तः । देह इति शेषः । प्रवेशितोऽभूत् । स्वयं चाश्विनौ चामज्जतां तं गृहीत्वा निममाषित्यर्थः(?) ॥ १४ ॥

पुरुषास्त्रय उत्तस्थुरापीच्या वनिताप्रियाः ।
रुक्मस्रजः कुण्डलिनस्तुल्यरूपाः सुवाससः ॥ १५ ॥

सत्यधर्मीया — आपीच्याः षोडशवर्षवयस्काः । कैशोरयौवनाभ्यामन्तःकाल आपीच्यमुच्यत इति प्रथमतात्पर्यात् । आपीच्यं येषामस्तीत्यापीच्या इत्यर्श आद्यच् । वनिताप्रियाः । रुक्मस्रजः सुवर्णमालाः कुण्डलिनः । तुल्यरूपाः तुल्यं समं रूपं येषां ते । सुवाससः । पुरुषास्त्रयः । अश्विनौ द्वौ च्यवनश्चैक इति त्रयः । उत्तस्थुः । ह्रदादिति शेषः ॥ १५ ॥

छलारी — आपीच्या षोडशवर्षप्रायाः । उत्तस्थुः । ह्रदादिति शेषः ॥ १५ ॥

तान्निरीक्ष्य वरारोहा सरूपान् सूर्यवर्चसः ।
अजानती पतिं साध्वी अश्विनौ शरणं ययौ ॥ १६ ॥

सत्यधर्मीया — वरारोहा वरावारोहावुरू यस्याः सा । सरूपान्समानाकारान् । पतिं च्यवनमजानत्यश्विनौ शरणं ययौ । पातिव्रत्यं रक्षयतमिति शरणं गता । तत्र हेतुः ॥ साध्वीति । वनपर्वणि प्रस्थानान्तरे नलोपाख्याने वर्णितम् । देवावनि देवलक्षणम् । क्षौणीसम्बन्धहीनत्व-तत्सम्बन्धत्वरूपादिकमजानती कन्येति सुकन्यैवं शरणं गतेति ज्ञेयम् । तथा हि । तत्साऽपश्यद्बिबुधान् सर्वानस्वैस्तब्धलोचनान्(?)। अम्लानस्रग्रजोहीनान्स्थितानस्पृशतः क्षितिमिति । तौ चेत्तत्पातिव्रत्यपरीक्षार्थं क्षणं स्वलक्षणं त्यक्त्वाऽवस्थिताविति तच्छरणगमनं वेति ज्ञेयम् । १६ ॥

छलारी — वरारोहा योषित् । सरूपान्समानरूपान् । साध्वीति हेतुगर्भम् । अश्विनौ शरणं ययौ । युवामत्र तिष्ठतो नात्र संशयः । तस्माद्युवां पृथक् स्थितौ । मत्पतिं दर्शयतमिति प्रार्थयामासेत्यर्थः ॥ १६ ॥

दर्शयित्वा पतिं तस्यै पातिव्रत्येन तोषितौ ।
ऋषिमामन्त्र्य ययतुर्विमानेन त्रिविष्टपम् ॥ १७ ॥

सत्यधर्मीया — तस्यै सुकन्यायै पतिं च्यवनम् । विमानेन त्रिविष्टपं स्वर्गं ययतुः ॥ १७ ॥

छलारी — ऋषिमामन्त्र्य ऋषिणा सह विचारं कृत्वेत्यर्थः ॥ १७ ॥

यक्ष्यमाणोऽथ शर्यातिश्च्यवनस्याश्रमं गतः ।
ददर्श दुहितुः पार्श्वे पुरुषं सूर्यवर्चसम् ॥ १८ ॥

सत्यधर्मीया — यक्ष्यमाणो यज्ञं करिष्यन् । सूर्यवर्चसं सूर्यस्य वर्च इव वर्चो यस्य स तम् । वस्तुतस्तु सूरेः स्वजामातुश्च्यवनस्य न विद्यते वर्चो यस्य तमित्यप्यर्थः । अन्तः शङ्कोच्यमाना युक्तेति ज्ञेयम् ॥ १८ ॥

छलारी — यक्ष्यमाणो यागं कुर्वन् ॥ १८ ॥

राजा दुहितरं प्राह कृतपादाभिवन्दनाम् ।
आशिषश्चाप्रयुञ्जानो नातिप्रीतमना इव ॥ १९ ॥

सत्यधर्मीया — पुत्रीत्यन्त्राणां त्रप्राविरहात्प्रीतिरप्रीतिश्च पुंश्चलीति नातिप्रीतमना इत्युक्तिः ॥ १९ ॥

छलारी — नातिप्रीतमना इव नातिप्रीतियुक्तमत्यन्तप्रीतिरहितं मनो यस्य पुरुषस्य स इव स्थितः । नसमासोऽयम् ॥ १९ ॥

चिकीर्षितं ते किमिदं पतिस्त्वया प्रलोभितो लोकनमस्कृतो मुनिः ।
या त्वं जराग्रस्तमसत्यसम्मतं विहाय जारं भजसेऽमुमध्वगम् ॥ २० ॥

सत्यधर्मीया — उष्णीषं विपोथ्य तूष्णीमासीदुवाचासहमानो मानवः किञ्चिदित्यत उवाच ॥ चिकीर्षितमिति । हे असति दूराचारे । ते तव चिकीर्षितमिदं किम् । तत्किमित्यत आह । लोकनमस्कृतो मुनिश्च्यवनः पतिस्त्वया प्रलोभितो वञ्चितो घातितो वा यत्र क्व च गर्ते पातितो वेति भावः । इति किमुपरि त्वमेवमूहयसि हेलयसि च हे पित इत्यत आह ॥ या त्वमिति । जराग्रस्तमत एवासम्मतं विहाय त्यक्त्वाऽमुमध्वगमध्वनीनं जारमुपपतिं भजसि सेवसे ॥ २० ॥

छलारी — हे असति दुर्वृत्ते त्वयेदं किं चिकीर्षितम् । प्रलम्भितो वञ्चितः । कुतः । यद्यस्माज्जरया ग्रस्तत्वात् । स्त्रीणामसंमतम् । जारं जरयत्युभयकुलमिति जारमुपपतिम् ॥ २० ॥

कथं मतिस्तेऽम्ब गताऽन्यथा सतां मार्गात्त्वियं मत्कुलदूषणं त्विदम् ।
बिभर्षि जारं यदपत्रपा कुलं पितुश्च भर्तुः पतयस्यधस्तमः ॥ २१ ॥

सत्यधर्मीया — सतां मार्गादिति पाठः ससुमार्गः । सतां मार्गादन्यथा । हे अम्ब मातस्ते इयं मतिः कथं गता । ननु सन्तु सन्तः किं तव तैस्तन्मार्गेण चास्मद्वंशे वयं बाल्ये बालांस्तरुणिमनि यूनः परिणतापीच्छामो वृद्धान्न नो गोत्रे पुत्रि क्वचिदपि सती लाञ्छनमभूदित्यादिप्रोदितवर्त्मवर्तनमेव न मच्छिरसागतमिति किं त्वं चित्तं चित्रयसीत्यत आह । इदं मत्कुलदूषणं न तव्द्यापृतिरन्ववाय अये पुत्रीति । ननु क्रोधान्धस्यासतीति तां प्रत्यंबेति सम्बोधयतश्च राज्ञः स्वसुतासम्बोधनं न सम्बद्धमिति चेत् स्मरतु भवान्नातिप्रीतमनोऽर्थस्य । अथवा । शिष्यस्तुष्यतु भवान् । अम्बगतेत्यखण्डं पदम् । अबि शब्दे भावे घञ् । अम्बशब्दं गता वाच्यतां गतेत्यर्थः । तत्र हेतुः ॥ यत्सतां मार्गादन्यथेति । मार्गमिति पाठेऽन्यथेत्येतद्विवरणम् । असतां मार्गगतेतीति योजनीयम् । प्रलापकाल इति पुनरुक्तेन सहान्यद्विधत्ते । अपत्रपा । यद्यतो जारं बिभर्षि पितुर्मे भर्तुश्च्यवनस्य च कुलमधः पातयसि प्रापयसीति । न नरकादिरधःपदार्थ इत्याह ॥ तम इति । एतत्कृत्यस्य तदेव फलमिति भावः । अधोलोकेऽनुभूयमानं तमोग्लानिं नयसीति व्याचक्षते । अधो नयसीति पितुर्मम तमोग्लानिरित्यप्यन्वयः ॥ २१ ॥

छलारी — हे अम्ब पुत्रिके! इयं तव मतिः कथमन्यथा गताऽन्यथा बभूवेत्यर्थः । अन्यथेत्युक्तं विवृणोति ॥ असतामिति । त्वमसतां मार्गं गता । इदं त्वकर्म मत्कुलदूषणम् । किं तत्कर्मेति तत्राह ॥ बिभर्षीति । अपत्रपा निर्लज्जा । यस्माज्जारं बिभर्षि तस्मात्पितुर्भर्तुश्च कुलं तमोऽन्धकारयुक्त-मधोऽधोलोकं नरकं नयसि प्रापयसीत्यर्थः ॥ २१ ॥

एवं ब्रुवाणं पितरं स्मयमाना शुचिस्मिता ।
उवाच तात जामाता तवैष भृगुनन्दनः ॥ २२ ॥

सत्यधर्मीया — स्वतः शुचिस्मिता स्मयमाना । पितुर्भ्रमसम्भ्रमतः । हे तात! तवैष जामाता त्वया वृतो जारोऽपि समारोपितजामातृत्वक इति नेत्याह ॥ भृगुनन्दन इति । जामातेति सोत्कण्ठा-कण्ठतो गदन्ती , लोके मात्रा तव पितरं पश्य, पश्य तव मातरं पुत्रेत्यादिव्यवहरणं न दोषावहमिति ध्वनयामासेति ज्ञेयम् ॥ २२ ॥

छलारी — स्मयमाना मयि दूषणं नास्तीति गर्ववती । भृगुनन्दनश्च्यवनः ॥ २२ ॥

शशंस पित्रे तत्सर्वं वयोरूपाभिलम्भनम् ।
विस्मितः परमप्रीतस्तनयां परिषस्वजे ॥ २३ ॥

सत्यधर्मीया — वयोरूपाभिलम्भनं तत्प्राप्तिर्येन तत्सर्वं पित्रे शशंस । प्राक् यः परमप्रीतः स इदानीं परमप्रीतः संस्तनयां सुकन्यां परिषस्वजे आलिलिङ्गे ॥ २३ ॥

छलारी — वयोरूपयोरभिलम्भनं प्राप्तिप्रकारम् । परिषस्वजे आलिलिङ्गे । ततः शर्यातिः सन्तोषेण स्वगृहं ययौ ॥ २३ ॥

सोमेन याजयन् वीरं ग्रहं सोमस्य चाग्रहीत् ।
असोमयोरप्यश्विनोश्च्यवनः स्वेन तेजसा ॥ २४ ॥

सत्यधर्मीया — वीरं शर्यातिं सोमेन याजयंश्च्यवनः स्वेन तेजसा तपःप्रभावेन । असोमयोः सोमपायिभिन्नयोरश्विनोरपि सोमस्य ग्रहं पात्रमाहुतिं वाऽग्रहीत् व्यतारीद्दध्रे दातुमिति वा । असोमयो-रित्यकारान्तशब्दस्य षष्ठीद्विवचनम् । अतो धातोरित्याल्लोपः । एतेन हवा ऐन्द्रेण महाभिषेकेण च्यवनो भार्गवः शर्यातिर्मानवमित्याद्यष्टमपञ्चकैकविंशतिखण्डोक्तैतत्प्रकारोऽनुसन्धेयः ॥ २४ ॥

छलारी — ग्रहं ग्रहीष्ये सोमस्येत्युक्तं तत्राह ।। सोमेनेति । वीरः समर्थश्च्यवनः । सोमेन हविषा याजयन् । स्वार्थे णिच् । यजन्नित्यर्थः । ग्रहमाहुतिविशेषमग्रहीत् अदात् ।। २४ ।।

हन्तुं तमाददे वज्रं सद्योमन्युरमर्षितः ।
सवज्रं स्तम्भयामास भुजमिन्द्रस्य भार्गवः ।। २५ ।।

सत्यधर्मीया — सद्योमन्युस्तत्क्षणे जातक्रोधः । अनेन लवलवानन्तरं गच्छत्क्रोधः शक्र इत्यप्यसूचि । अमर्षोऽसहमानः । च्यवनविशेषणं वा । हन्तुं च्यवनं, भार्गवः । सवज्रं वज्रसहितं बाहुं स्तंम्भयामास ।। उक्तं चाश्वमेधिके पर्वण्यग्निनेन्द्रं प्रति ।।

यत्र शर्यातिं च्यवनो याजयिष्यन्सहाश्विभ्यां सोममगृह्णदेकः ।
तं त्वं क्रुद्धः प्रत्यषेधीः पुरस्ताच्छर्यातियज्ञं स्मरन्तं महेंद्रम् ।

स ते विप्रः सह वज्रेण बाहुमथागृह्णादित्यादिगर्भीकृत्य मन्दानामासुरं विश्वरूपमिति चान्तरीकृत्य च न संवर्तं गन्तुमिच्छामीत्यध्यायावसित्यनुसन्धेयम् ।। २५ ।।

छलारी — शतमन्युरिन्द्रः ।। २५ ।।

अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्विनोः ।
भिषजाविति यत् पूर्वं सोमे हुत्या बहिष्कृतौ ।। २६ ।।

सत्यधर्मीया — ततो भुजस्तम्भमदनामदानवागत्यनन्तरं सर्वे सुपर्वाणोऽश्विनोः सोमं च्यवनगृहीतमन्वजानन् ॐ दिशेत्यनुज्ञातवन्तः सम्मुखं स्थित्वा भवत्वित्युक्तवन्तः । यद्यपि द्युसदामनिर्वाहा देवास्तंकारस्तथाऽपि ग्रन्थकृदन्वजानन्निति तत्सम्मानमातनोदिति ज्ञेयम् ।। यथोक्तं भारते तत्रैव ।।

मन्त्रहूतो यज्ञमिमं मयाऽद्य पश्य स्वैनं मन्त्रवित्स्तब्धकायम् ।
ततो देवैः सहितो देवराज आयाद्यज्ञदमित्यादि ।।

कुतोऽसोमत्वमश्विनोर्देवयोरपीत्यत आह ।। भिषजाविति । पूर्वं च्यवनवचनवितरणतः ।। २६ ।।

छलारी — ततः सवज्रेन्द्रभुजस्तंभानन्तरं सर्वे इन्द्रादयोऽन्वजानन् अनुज्ञातवन्तः । पूर्वं सोमग्रहाभावः कुत इत्यत आह ।। भिषजाविति ।। २६ ।।

उत्तानबर्हिरानर्तो भूरिषेण इति त्रयः ।
शर्यातेरभवन् पुत्रा आनर्ताद् रेवतोऽभवत् ॥ २७ ॥

सत्यधर्मीया — शर्यातिसुतशर्माह ॥ उत्तानबर्हिरिति । आनर्तात् । रेवतोऽभवदुदभूत् ॥ २७ ॥

छलारी — सुकन्यास्थितिमुक्त्वा शर्यातिवंशमाह । शर्यातेर्ज्येष्ठपुत्रस्य वंशाभावात् । द्वितीयपुत्रस्य वंशमाह ॥ आनर्तादिति ॥ २७ ॥

सोऽन्तःसमुद्रे नगरीं विनिर्माय कुशस्थलीम् ।
आस्थितोऽभुङ्क्त विषयानानर्तादीनरिन्दम ॥ २८ ॥

सत्यधर्मीया — समद्रे कुशस्थलीं द्वारकां नगरीं विनिर्माय । तस्यान्त आस्थित आनर्तादीन्विषयान्देशविशेषान् । अभुङ्क्तापालयत् । भुज पालनाभ्यवहारयोरिति स्मरणात् । भुजोऽनवने इत्युक्तेरात्मनेपदता त्वार्षः । यद्वा । नर्तनादीन्विषयान् जन्यपदार्थान् अभुंक्त बुभुजे । उपभोगो भुजेरर्थ इत्युक्तेः ।सैवाणीयसी गरीयसी वासुदेवेन कृतेति नैतत्कृतत्वतत्कृतत्वविरोधः॥२८ ॥

छलारी — कुशस्थलीं द्वारकामास्थितस्तत्रास्थित इत्यर्थः । आनर्तादीन्विषयांस्तन्नामकदेशान् अभुङ्क्त अपालयत् । इयं कुशस्थली कालान्तरे समुद्रे मग्नाऽभूत् । अतो द्वारवत्या न कृष्णकृतत्वप्रसिद्धिविरोधः ॥ २८ ॥

तस्य पुत्रशतं जज्ञे ककुद्मिज्येष्ठमुत्तमम् ।
ककुद्मी रेवतीं कन्यां स्वामादाय विभुं गतः ॥ २९ ॥

सत्यधर्मीया — तस्य रैवतस्य । ककुद्मिर्ज्येष्ठो यस्य तत्पुत्रशतं जज्ञे । उत्तरत्रानुवदिष्यमाणत्वात्पुत्री रैवती चैका जज्ञे इति शेषो वाद आवश्यकः । ककुद्मीति स्थाने रेवत इति पाठो बव्हनुकूलः । तथा हि दशमे । रेवतो रेवतीं सुताम् । रेवतो नाम राजाऽऽसीत् । ततस्तान् रेवतः प्राहेत्यादि महाभारततात्पर्यनिर्णये । स रैवतो बलाय तामित्युक्तेः । ककुद्मीमिति बहुकोशेषु वर्तते । कथमिति चेत् । पितामहादीनां पित्रादिशब्दवाच्यत्ववत् कार्यकारणशब्दानां गोभिः श्रीणीत मत्सरमित्यादौ जन्यजनकानां यथा ब्रह्मादिकं मुखमित्यादौ वाच्यवाचकानां महतश्चतुर्मुखादित्यभिमन्यमानाभिमानिवाचिनां साङ्कर्यदर्शनात्पुत्रनाम्ना पिता रेवतो ग्राह्यः । यमग्निं मेध्यातिथिः कण्व इत्यृग् टीकायां पितापुत्रयोरभेदोपचारात्कण्वस्य मे सुत इत्युक्तेः । स्वां कन्यामिति स्वारस्यार्थं च ककुद्मी रेवतः स्वां कन्यामादाय विभुं स्वयम्भुवं गतः ॥ २९ ॥

छलारी — तस्य रेवतस्य ककुद्मी ज्येष्ठो यस्मिंस्तत् । रेवतो रेवतीं कन्यामिति क्वचित्पाठः । तत्र रेवतपुत्रो रेवतककुद्मीत्यर्थः ॥ अत एवास्य रेवत इति नामान्तरमतो न विरोधः । विभुं ब्रह्माणम् ॥ २९ ॥

पुत्र्या वरं परिप्रष्टुं ब्रह्मलोकमपावृतम् ।
आवर्तमाने गान्धर्वे स्थितोऽलब्धक्षणः क्षणम् ॥ ३० ॥

सत्यधर्मीया — गमनप्रयोजनमाह ॥ पुत्र्या इति । वरं पतिम् । अपावृतं तदीयवराद्योग्यजनप्रतिबन्धकावरणरहितं दीप्तिमद्वा । अयोग्यपिहितप्रायं वा । अपावृतः स्वतन्त्रः स्यात्पिहिवर्चाप्यपावृत इति विश्वः । गान्धर्वे तद्धाहाहूहूसम्बन्धे गीते आवर्तमानेऽलब्धक्षणोऽप्राप्तावकाशः । क्षणं स्वविवक्षया ॥ ३० ॥

छलारी — अपावृतं प्रकाशितं ब्रह्मलोकं प्राप्य गान्धर्वे गाने आवर्तमाने सत्यलब्धक्षणोऽप्राप्तावसरः सन् क्षणमिव स्थितः ॥ ३० ॥

तदन्ते विभुमानम्य स्वाभिप्रायं न्यवेदयत् ।
तच्छ्रुत्वा भगवान् ब्रह्मा प्रहस्य तमुवाच ह ॥ ३१ ॥

सत्यधर्मीया — तदन्ते गानावसाने । गन्धर्वौ द्वौ हाहा हूहू तस्मिन् गायतां काले ग्राममूर्छविचक्षणो । गीतावसान इत्यवसानेन भागवते दशम उक्तेः । तत् श्रुत्वा तन्मुखतः प्राक् क्लृप्तवरादिकं श्रुत्वा ॥ ३१ ॥

छलारी — तदन्ते गीतावसाने रेवतीं कस्मै वराय दास्यामीति स्वाभिप्रायम् ॥ ३१ ॥

ब्रह्मा उवाच —

अहो राजन् निरुद्धास्ते कालेन हृदि ये कृताः ।
तत्पुत्रपौत्रनप्तॄणां गोत्राणि च न शृण्महे ॥ ३२ ॥

सत्यधर्मीया — ये ते हृदि वरत्वेन कृताः ॥ ३२ ॥

छलारी — ते पुरुषाः कालेन निरुद्धा मृता इत्यर्थः । न केवलं त एव न सन्ति किन्तु तत्पुत्रादयोऽपि न सन्तीत्याह ॥ तत्पुत्रेति । गोत्राणि नामानि च न शृण्महे न शुश्रुमः ॥ ३२ ॥

मुहूर्तं शृण्वतोऽश्राव्यं प्रतियातस्य तेऽनघ ।
कालोऽभियातस्त्रिनव चतुर्युगविकल्पितः ॥ ३३ ॥

सत्यधर्मीया — अश्राव्यं मनुष्यैः श्रोतुमयोग्यं मुहूर्तं शृण्वतः प्रतियातस्य प्रष्टुमेतत्स्थानं प्रति समागतस्य कालो यातः । कियान्स इत्यत आह ॥ त्रिनवचतुर्युगविकल्पित इति । त्रिनवेति सप्तविंशतिसंख्यायुतचतुर्युगैर्विकल्पितो भिन्न इत्यर्थः ॥ ३३ ॥

छलारी — प्रतियातस्यागतस्य तवाश्राव्यं नरस्य श्रोतुमयोग्यं गानं मुहूर्तं शृण्वतः कालोऽभियातोऽतिक्रान्त इत्यन्वयः । कियानिति तत्राह ॥ त्रिनवेति । सप्तविंशन्महायुगैर्विकल्पितो विभक्त इत्यर्थः ॥ ३३ ॥

तद् गच्छ देवदेवांशो बलदेवो महाबलः ।
कन्यारत्नमिदं राजन् नररत्नाय देहि भो ॥ ३४ ॥

सत्यधर्मीया — देवदेवस्य सङ्कर्षणस्यांशो यस्मिन्सः ॥ ३४ ॥

छलारी — तर्हि किं करोमि । कन्याऽऽवश्यं दातव्या । इमां कस्मै दास्यामीति तत्राह ॥ तदिति । देवदेवस्य हरेरंशः शुक्लकेशांशवान् । मत्वर्थीयोऽच्प्रत्ययः । यद्वा । देवदेवस्यांशो यस्मिन्निति विग्रहः । भो राजन् ॥ ३४ ॥

भुवो भारावताराय भगवान् भूतभावनः ।
अवतीर्णो निजांशेन पुण्यश्रवणकीर्तनः ॥ ३५ ॥

सत्यधर्मीया — स कुत इदानीं मेदिनीं गत इत्यतो वक्ति ॥ भुव इति । भारावताराय तदायतदैतेयादिसंहृत्यै । भूतभावनः पुण्यश्रवणकीर्तनो भगवान्कृष्णोऽवतीर्ण इति तत्सेवायै निजांशेन शेषांशेनावतीर्णः ॥ ३५ ॥

छलारी — तन्महिमानमाह ॥ भुव इति । अवतीर्णो बलभद्रत्वेनावतीर्णः । अथवा । यः कृष्णत्वेनावतीर्णस्तस्य । अग्रज इति शेषः ॥ ३५ ॥

श्रीशुक उवाच —

इत्यादिष्टोऽभिवन्द्याजं नृपः स्वपुरमागतः ।
त्यक्तां पुण्यजनत्रासाद् भ्रातृभिर्दिक्ष्ववस्थितैः ॥ ३६ ॥

सत्यधर्मीया — आदिष्टो रैवतः । अजं विष्णुजातं । स्वपुरं कुशस्थलीं पुण्यजनत्रासात्पुण्यजना राक्षसास्तेभ्यस्त्रासात् भ्रातृभिर्ज्ञातिभिस्त्यक्ताम् । ते तर्हि केत्यत आह ॥ दिक्ष्ववस्थितैरिति ॥ ३६ ॥

छलारी — पुण्यजनत्रासात् राक्षसभयात् । चतुर्दिक्ष्ववस्थितैर्भ्रातृभिस्त्यक्तं स्वपुरं निजपुरीमागतः । रेवतस्य तदीयानां च बहुकालावस्थानं तपस्विनां तेषां स्वच्छन्दमृत्युत्वाद्युज्यते । तदुक्तम् । स्वेच्छया मरणत्वं सः प्राप्तो नामिच्छया(?) तनुः । तस्मिन्काले त्यज्यते हि बलवद्भिर्वधं विना । अतिसक्तास्तपोहीनाः कथंचिन्मृतिमाप्नुयुरिति ॥ ३६ ॥

सुतां दत्वाऽनवद्याङ्गीं बलाय बलशालिने ।
बदर्याख्यं ययौ राजा तप्तुं नारायणाश्रमम् ॥ ३७ ॥

इति श्रीमद्भागवते नवमस्कन्धे चतुर्थोऽध्यायः ।

सत्यधर्मीया — "प्रियां निजां पुराऽपि हि । स वारुणींसमाव्हयामवाप रैवतीं प्रभुः" इत्याचार्योक्तेर्वाऽनवद्यांगीम् भाविभावविवक्षया । बलशालिन इति तथा करणसमर्थता हेतुः । तप्तुं तपः कर्तुम् ॥ ३७ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे चतुर्थोऽध्यायः ।

छलारी — अनवद्याङ्गीं सुन्दरावयवाम् । राजा रेवतः ॥ ३७ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे चतुर्थोऽध्यायः ॥ ९-४ ॥

॥ अथ पञ्चमोऽध्यायः ॥

श्रीशुक उवाच —

नाभागोऽन्यस्ततः प्राज्ञो यं मत्वा भ्रातरः कविम् ।
यविष्ठं व्यभजन् दायं ब्रह्मचारिणमाह सः ॥ १ ॥

सत्यधर्मीया — पञ्चमपञ्चकचतुर्दशखण्डंबव्हृचब्राह्मणप्रसिद्धं नाभागं तत्कर्म च शंसति ॥ नाभाग इति । ततोऽन्य उपदिष्टदिष्टपुत्रात् । अभागो भागयोग्यो नेति नेत्ययं नाभागः । प्राज्ञो ज्ञानी वस्तुतः । यं यविष्ठं कनिष्ठं स्वावरजं कविमतिक्रान्तदर्शनं मत्वा । ब्रह्मचारिणम् । विवाहानुन्मुखमिति यावत् । दायं तदीयमपि दायम् । तद्भागयोग्यमिति यावत् । व्यभजत्स्वयं व्यभज्य जग्रहुः । यदाऽदत्वा स्वस्मै स्वयं गृहीतवन्तस्तदा स नाभाग आह ॥ १ ॥

छलारी — उत्तराध्याये नाभागादम्बरीषोऽभूदित्यादिना नवमस्य मनुपुत्रस्य नाभागस्य वंशं वक्ष्यंस्तन्महिमानमाह ॥ नाभाग इति । ततस्तस्मात्पूर्वोक्तादिष्टपुत्रनाभागादन्यो नाभागाख्यमनुपुत्र आसीत् । कथम्भूतः प्राज्ञस्त्रिकालदर्शी ब्रह्मचारिणं विवाहानभिमुखं गुरुकुले वसन्तं यविष्ठं कनिष्ठं नाभागं कविं आत्मज्ञानिनं, नैष्ठिकोऽसाविति मत्वा विभागसमये विभागमप्रकल्प्यैव ज्योष्ठभ्रातरः सर्वदायं कुलपारंपर्येण प्राप्तं विभागयोगद्रव्यं व्यभजन् । स नाभागो गुरुकुलादागत्य भ्रातॄन्प्रत्याह ॥ १ ॥

भ्रातरोऽभाङ्क्त किं मह्यं भजान पितरं तव ।
किं म आर्यास्तताभाङ्क्षुर्मा पुत्रक तदादृथाः ॥ २ ॥

सत्यधर्मीया — तदेव वचनमाह । हे भ्रातरः! मे मह्यं, किमभांक्तेति श्रौतं पदम् । किं यूयमेव विभज्य गृहीतवन्त इति । ते च तमब्रुवन्निति पूरणीयम् । तत्किमित्यत आह ॥ भजानेति । तव पितरं मनुं भजान सेवस्व भज । अन चेष्टस्व । गच्छेति यावदितीति वा । सोऽपि पितरं गत्वा प्राक्षीदिति च । तदाह किमिति । हे तात । आर्या ज्येष्ठभ्रातरः किं, किं कारणम् । मे भागयोग्यस्यापि । तत्स्वयमभांक्षुरिति । तदुक्तः पिता प्राहेति च । हे पुत्रक ! तत् तद्गृहीतं यत्तद्विषये माऽयम् नादृथा आदरं न कुरु ॥ ततश्चायं खण्डखण्डः ॥ नाभानेदिष्टं शंसति । नाभानोदिष्टं वै मानवं ब्रह्मचर्यं वसन्तं भ्रातरो विभजन् सोऽब्रवीदेत्य किं मह्यमभांक्तेत्येतमेव निष्ठावं तं वदितारमित्यब्रुवंस्तस्माद्धाऽप्येतर्हि पितरं पुत्रादिष्टावोऽवदित्येवाचक्षते स पितरमेत्याब्रवीत्त्वां ह वाव मह्यं तताभांक्षुरिति तं पिताऽब्रवीन्मा

पुत्रक तदाद्दथा इति ।। तस्यार्थः ।। नाभानेदिष्ट इति तस्यैव नामान्तरम् । ततश्च नाभानेदिष्टं तं शंसति प्रतिज्ञातं नाभानेदिष्टं मानवं मनुपुत्रं ब्रह्मचर्यमाश्रमं तेन वसन्तं वेदाभ्यासार्थं गुरुकुले । तमेवाभ्यस्य तु किं तस्य धनेनेति मत्वा तद्भागं निरभजन् । अदत्वा स्वयं गृहीतवन्तः । तदानीं स नाभानेदिष्ट एत्य गुरुगेहादागत्य हे भ्रातरो मह्यं मम भागत्वेन क्लृप्तं यूयं किं किमर्थं गृहीतवन्त इत्यब्रवीत्ते चैतमित्यंगुल्या स्वपितरं निर्दिश्य निष्ठावं निष्ठा निर्णयोऽस्मिन्नस्तीति मत्वर्थे वकारप्रत्ययः । गुणार्णवः केशव इतिवत् । निर्णायिकम् । निर्णयं कृत्वेति यावत् । अववदितारम् । तवैतावदेतावत्तवेति धर्ममर्मवक्तारमिति । स एव निर्णायिकस्तं पृच्छेत्यब्रुवन् । अव आवाकूलृत्य न्यक्लृत्य वक्तारं वा । तस्मात् । हेति प्रसिद्धौ । एतर्हि सम्प्रति पुत्राः पितरं निष्ठावोऽववदितेति निर्णयेन वक्तुं शक्त इत्याचक्षत इति । स नाभागस्तदुक्तः पितरमेत्याब्रवीत् । हे तत मह्यम् । मम भागं स्वयमाभांक्षुः । त्वां च निष्ठावं निर्णायिकं चावदन्नैकान्ते ह वाव प्रसिद्धम् । तमेवं वदन्तं सुतं प्रति हे पुत्रक ! तत्तद्गृहीतवित्तमुद्दिश्य माऽऽदृथा आदरं मा कार्षीरिति पिताऽब्रवीदिति ।। २ ।।

छलारी — नाभागो भ्रातॄन्प्रति किमाहेति तत्राह ।। भ्रातर इति । हे भ्रातरो यूयं मह्यं किमभाङ्क्त व्यभजत । कं भागं मदर्थं यूयं प्रकल्पितवन्तः । नाभानेदिष्टं वै मानवं ब्रह्मचर्यं वसन्तं भ्रातरो निरभजंत्सोऽब्रवीदेत्य किं मह्यं मा भांक्तेति ब्राह्मणवाक्यसूचनायाभांक्तेत्यादिपदप्रयोगः । भ्रातर उत्तरमाहुः ।। भजेति । हे नाभाग तव पितरं वैवस्वतमनुं प्रति । अन गच्छ । अन चेष्टायामिति धातोः । ततः पितरं भज । यदि तव विभागापेक्षा स्यात्तर्हि गत्वा तं प्रसाद्य विचारय । वयं चागत्य पृच्छाम इत्यर्थः । स नाभागो भ्रातृभिः सह गत्वा पितरमपृच्छत् । पृच्छन्किमिति तत्राह ।। किं म इति । हे तत तात । पितः मे आर्या ज्येष्ठा मयि प्रोषिते सति किं वस्त्वाभांक्षुर्भागं चक्रुः । पिता प्राह ।। मा पुत्रकेति । हे पुत्रक । तदित्यव्ययम् । तस्मिन्दायविभागे । माऽऽदृथा आदरं मा कार्षीरिति । ।। २ ।।

इम अङ्गिरसः सत्रमासतेऽद्य सुमेधसः ।
षष्ठं षष्ठमुपेत्याहः कवे मुह्यन्ति कर्मणि ।। ३ ।।

सत्यधर्मीया — तात तर्हि मम जीविकोपायं कथयेत्यतः कथयति ।। इम इति । अद्येदानीं सुमेधसः सु शोभना मेधाः धीर्येषां ते सुमेधसः । नञ् दुःसुभ्यः प्रजामेधयोरिति असुन् । अङ्गिरसस्तदभिधा ऋषयः । सत्रं बहुकालिकं क्रतुमासते तत्र दीक्षितास्तिष्ठन्ति । ते सन्तु, मम किमित्यत आह ।। कव इत्यादिना । षष्ठं षष्ठं प्रतिषष्ठमहरुपेत्य कर्मणि तद्दिने अनुष्ठीयमाने मुह्यन्ति विचित्ता भवन्ति । विस्मरन्तीतीति यावत् ।। ३ ।।

छलारी —— तर्हि मम जीवनोपायः क इति नाभागेन पृष्टः पिता तं प्रत्याह ।। इम इति । हे कवे सुमेधसः शोभनप्रज्ञा इमेऽङ्गिरसः सत्रमासते सत्रयागं कुर्वन्ति । ते ऋषयः षष्ठं षष्ठमहरुपेत्य तस्मिन्नहनि कर्तव्ये वैश्वदैवत्ये कर्मणि पठनीये सूक्ते च मुह्यन्ति भ्रान्ताः ।। ३ ।।

तांस्त्वं शंसय सूक्ते द्वे वैश्वदेवे महात्मनः ।
ते स्वर्यन्तो धनं सत्रपरिशेषितमात्मनः ।। ४ ।।

सत्यधर्मीया —— तत्कर्मशर्माह ।। वैश्वदेव इति । तान्महात्मनः । द्वे वैश्वदेवे विश्वदैवत्ये शंसय ब्रूहि ।- स्मारयेति यावत् । तेऽङ्गिरसः स्वः स्वर्गं यन्तो प्राप्नुवन्त आत्मनः सत्रपरिशेषितं कृत्वा क्रतुमुर्वरितं धनम् ।। ४ ।।

छलारी —— त्वं महात्मानस्तान्प्रति ज्ञातव्ये द्वे सूक्ते शंसय ब्रूहि । तेऽङ्गिरसः स्वर्गं प्रति यन्तो गच्छन्तः सन्तः । आत्मनः । जात्यैकवचनम् । आत्मनां सत्रपरिशेषितं स्वसत्रेऽवशिष्टं द्रव्यम् ।।४।।

दास्यन्ते तेऽथ तान् गच्छ तथा स कृतवान् यथा ।
तस्मै दत्वा ययुः स्वर्गं ते सत्रपरिवेषणम् ।। ५ ।।

सत्यधर्मीया —— तुभ्यं दास्यन्ति । अथ मदुक्त्यनन्तरं तान् गच्छ । स नाभागो यथा पित्रोक्तं तथा कृतवांस्तत्समीपं गत्वा ते सूक्ते शशंसेत्यर्थः । ते च सत्रपरिवेषणमिष्ट्युच्छिष्टम् । तस्मै नाभागाय दत्वा तेऽङ्गिरसः स्वर्गं ययुः ।। ५ ।।

छलारी —— ते तुभ्यं दास्यन्ति । कालक्षेपमन्तरेण त्वं तानृषीन्प्रति गच्छेति । पिता प्राहेति शेषः । स नाभाग आत्मने पित्रा यथोक्तं तथा कृतवानित्यर्थः । तथेत्यादि शुकवाक्यम् । सत्रपरिशेषितं सत्रपरिशिष्टम् ।। ५ ।।

तं कश्चित् स्वीकरिष्यन्तं पुरुषः कृष्णदर्शनः ।
उवाचोत्तरतोऽभ्येत्य ममेदं वास्तवं वसु ।। ६ ।।

सत्यधर्मीया —— कश्चित्कृष्णदर्शनः पुरुषस्तद्वसु स्वीकरिष्यन्तं तं नाभागमुत्तरतो दिक्तोऽभ्येत्यागत्य । वास्तवं यज्ञशालालक्षणवास्तौ भवम् । वातेर्डः । गतम् । त्यक्तमिति यावत् । श्रौतहानार्थकहकारानुकूल्यात् । वसु धनं ममेत्युवाच ।। ६ ।।

छलारी — कृष्णदर्शनः कृष्णवर्णतया प्रतीयमानः कश्चित् लोकविलक्षणः पुरुषो रुद्रः । यज्ञशालाया उत्तरत उत्तरदिग्भागात् । अभ्येत्य सत्रपरिशेषितं द्रव्यं स्वीकरिष्यन्तं तं नाभागं प्रत्युवाच । कथमिदं वास्तवं यज्ञशालालक्षणवास्तुभवं वसु द्रव्यं ममेति । वित्तं वस्तु वसु द्रव्यमित्यभिधानम् ॥ ६ ॥

ममेदमृषिभिर्दत्तमिति तर्हि स्म मानव ।
स्यान्नौ ते पितरि प्रश्नः स गतः पितरं तथा ॥ ७ ॥

सत्यधर्मीया — हे मानव मनुपुत्र! यैर्हि ऋषिभिर्दत्तमिति ममेदमिति वदसि तर्हि ते पितरि ताते । नौ तव मम चेत्यावयोर्विवादे प्रश्नः स्यात् । तं पृच्छेत्यर्थः । स गतः पितरं पप्रच्छ । स तथेत्याह । शेषं ग्रन्थकृदुक्तिः । शुकोक्तिर्वेति ज्ञेयम् ॥ ७ ॥

छलारी - तर्हि स्म तदैव ममेदं ऋषिभिर्दत्तमिति । मानवो नाभाग उवाच । पुनश्च रुद्र उवाच । हे मानव नौ आवयोरस्मिन्विवादे ते पितरि प्रश्नः स्यात् । त्वत्पितरं पृच्छेति यावत् । गत्वा तं पृष्ट्वा निश्चित्य सत्यं मां ब्रूहीत्युक्तः स नाभागः पितरं गतः । तथा पृष्टवानिति शेषः ॥ ७ ॥

यज्ञवास्तुगतं सर्वमुच्छिष्टमृषयः क्वचित् ।
चक्रुर्हि भागं रुद्राय स देवः सर्वमर्हति ॥ ८ ॥

सत्यधर्मीया — तत्प्रकारमाह ॥ यज्ञेति । क्वचिद्दक्षाध्वरध्वंससमये यस्मादृषयो यज्ञवास्तुगतं सर्वमुच्छिष्टं रुद्राय भागं चक्रुः । अनेन स मन्निवारकस्तात क इति प्रश्नावसरमददान एव पिता तन्नाम सूचयामासेति ध्वनितम् । स देवः सर्वमर्हति । मयोक्तमपि नान्यथा भविष्यति । गच्छेति तात्पर्यं श्रुतिमनुसृत्य ज्ञेयम् ॥ ८ ॥

छलारी — नाभागेन पृष्टः पिता प्राह ॥ यज्ञेति । क्वचिद्दक्षाध्वरे ऋषयो यज्ञवास्तुगतं सर्वमुच्छिष्ठमवशिष्टं रुद्राय भागं चक्रुः । हि यस्मात्सो देवो रुद्रः सर्वमवशिष्टं धनमर्हति ॥ ८ ॥

नाभागस्तं प्रणम्याह तवेश किल वास्तुगम् ।
इत्याह मे पिता ब्रह्मन् शिरसा त्वां प्रसादये ॥ ९ ॥

सत्यधर्मीया — गत्वा नत्वा तमाहेत्याह ॥ नाभाग इति । तं पुरुषं प्रणम्य । ईश वास्तुगतं सर्वं तव किलेति मम पिताऽऽह । अतो मदपराधस्त्वया क्षन्तव्य इत्याह ॥ ब्रह्मन्निति । हे ब्रह्मन् पूर्ण ! त्वां शिरसा प्रसादये, दया विधेया ॥ ९ ॥

छलारी — नाभागस्तं रुद्रं प्रणम्याह । हे ईश! वास्तुगतं तव किलेति मे पिता प्राह । तस्मादहं शिरसा प्रणम्य त्वां प्रसादये । क्षमस्वेति ॥ ९ ॥

यत् ते पिताऽवदद् धर्मं त्वं च सत्यं प्रभाषसे ।
ददामि ते मन्त्रदृशो ज्ञानं ब्रह्म सनातनम् ॥ १० ॥

सत्यधर्मीया — पिताऽपि ते यद्यतो धर्ममवदत् । त्वं च सत्यं यथातथं प्रभाषसे ततस्तुष्टोऽहं मन्त्रदृशो वैश्वदेवमुक्तद्वयं दृष्टवतस्ते सनातनमपौरुषेयं ब्रह्म वेदं तदर्थभगवत्ज्ञानं च विनाऽध्ययनं प्रतिभानं ददामि । ज्ञेयं ज्ञानं सनातनं ब्रह्म ददाम्युपदिशामीति वा ॥ १० ॥

छलारी — स रुद्रो नाभागं प्रत्याह ॥ यदिति । यद्यस्मात्तव पिता सत्यलक्षणं धर्ममवदत्त्वं च सत्यं वदसि । तस्मान्मन्त्रदृशो मन्त्रद्रष्टुर्वैश्वदेवसूक्तं दृष्टवत इति यावत् । ते तव सनातनं ब्रह्म तद्विषयज्ञानम् । ज्ञायतेऽनेनेति ज्ञानम् । शास्त्रं ददाम्युपदिशामि ॥ १० ॥

गृहाण द्रविणं दत्तं यत् सत्रपरिवेषितम् ।
इत्युक्त्वाऽन्तर्हितो रुद्रो भगवान् भक्तवत्सलः ॥ ११ ॥

सत्यधर्मीया — शर्वः सर्वज्ञ इति धर्मस्य पितुरपि वचः सत्यं व्यतानीदित्याह ॥ गृहाणेति । यत्सत्रपरिवेषितं दत्तं प्रागृषिभिस्तन्मयाऽपि द्रविणं तद्दत्तं गृहाण स्वीकुरु । भक्तवत्सलो भगवान् रुद्र इत्युक्त्वा नाभागं प्रत्यंतर्हितोऽन्तर्निगूढः अप्रत्यक्षोऽभूत् ॥ ११ ॥

छलारी — किञ्च यत्सत्रपरिवेषितं द्रव्यं यन्मया दत्तं त्वं गृहाणेत्युक्तोऽन्तर्हितस्तिरोभूत् ततस्तत्स्वीकृत्य गृहस्थाश्रमं लेभे इत्यवगन्तव्यम् । उत्तराध्यायेन नाभागस्य वंशकथनात् ॥ ११ ॥

य एतत् संस्मरेत् प्रातः सायं च सुसमाहितः ।
कविर्भवति मन्त्रज्ञो गतिं चैव तथाऽऽत्मनः ॥ १२ ॥

इति श्रीमद्भागवते नवमस्कन्धे पञ्चमोऽध्यायः ।

सत्यधर्मीया — ततश्चायमुर्वरितखण्डः ॥ अङ्गिरसो वा इमे स्वर्गाय लोकाय सत्रमासते । ते षष्ठं षष्ठमेवाहरागत्य मुह्यन्ति तान्येते सूक्ते षष्ठेऽहनि शंसय । तेषां यत्सहस्रं सत्रपरिवेषणं तत्ते स्वर्यतो दास्यंतीति । तथेति तानुपैत् । प्रतिगृह्णीत मानवं सुमेधस इति तमब्रुवन् किं कामो वदसीतीदमेव वः

षष्ठमहः प्रज्ञापयानीत्यब्रवीदथ यद्ध एतत्सहस्रं सत्रपरिवेषणं तन्मे स्वर्यंतो दत्तेति तथेति तानेते सूक्ते षष्ठेऽहन्यशंसत्ततो वै ते प्रयज्ञमजानन्। विप्रः स्वर्गं लोकम्। तद्यदेते सूक्ते षष्ठेऽहनि शंसति यज्ञस्य प्रजात्यै स्वर्गस्य लोकस्यानुख्यात्या इति। ते स्वर्यंतोऽब्रुवन्नेतत्ते ब्राह्मण सहस्रमितीति। तदेनं समाकुर्वाणं पुरुषः कृष्णशवास्युत्तरत उपोत्थायाब्रवीन्मम वा इदं ममैवास्तुहमितीति। सोऽब्रवीन्मह्यं वा इदमदुरिति। तमब्रवीत्तद्वै नौ तवैव पितरि मनः प्रश्न इति स पितरमैत्। पिताऽब्रवीन्नु ते पुत्रकादुरित्यदुरेव म इत्यब्रवीत्तत्तु मे पुरुषः कृष्णशवास्युत्तरत उपोद तिष्ठन्मन वा इदं मम वै वास्तुहमित्यादितेति तं पिताऽब्रवीत्तस्यैव पुत्रक तत्तु स तुभ्यं दास्यतीति स पुनरेत्याब्रवीत्तव ह वाव किल भगव इदमिति मे पिताऽऽहेति सोऽब्रहीत्तदहं तुभ्यमेव ददामि। य एवं सत्यमवादीरिति तस्मादेवं विदुषां सत्यमेव वेदितव्यमिति। स एव सहस्रसनिर्मंत्रोऽयं नाभानेदिष्टमुपैनं सहस्रं नमति षष्ठेनाह्ना स्वर्गं लोकं जानाति य एवं वेदेति ॥ छ ॥ अस्यार्थः। ते च सर्वे गृहीतवन्तो न मद्धस्तेऽस्ति धनं तत उपायमेकं कथयिष्यामीत्याह ॥ अंगिरस इति। इमेंऽगिरनामका ऋषयः। मम इति तत्सामीप्यं ध्वनयति। स्वर्गाय लोकाय तदवास्यै सत्रमासतेऽनुतिष्ठन्ति। ते तदुपक्रम्य षष्ठं षष्ठमहरागत्य तत्र मन्त्रबाहुल्येन मुह्यन्ति भ्रमचित्ताः सन्तः सत्रसमाप्तिमसामाप्य क्लिश्यन्ति। तान् षष्ठेऽहनि त्वं गत्वा इदमित्येति ये यजेतेति वै ते उभे सूक्ते शंसय। तेषां ऋषीणां यत्सहस्रसंख्याकं सत्रपरिवेषणं तदिष्ट्यनुष्ठानानन्तरमवशिष्टं धनं तत्ते ऋषयः स्वर्यंतः स्वर्गं प्राप्नुवन्तः। इणो रूपम्। ते दास्यन्तीति पितोवाच। तथेति च नाभानेदिष्ट ओंचकार। अनन्तरं तानृषीनुपैत्प्राप।

तांश्चोवाच। किमाहेत्यत आह। हे सुमेधसो मानवं मनुतनुजनिं मां प्रतिगृभ्णीत। हृगृहोर्भच्छंदसीत्यब्रुवन्। इदमेव यत्र मोहो युष्माकं तत् षष्ठमहस्तत्र पठनीये सूक्ते प्रज्ञापयानि। लोट्। स्मारयामीत्यब्रवीत्। तव किमुपकुर्म इत्यत आवेदयति। अथ तच्छंसनानंतरम्। युष्मत्सवोदवसनान्तरम्। यद्ध एतत्सहस्रं सत्रपरिवेषणं स्वर्यंतो दत्तेति। तथेति तैरुक्ते सति। तानेते प्रागुदाहृते द्वे सूक्ते षष्ठेऽहन्यशंसत्। ततस्तच्छंसनतां गतायाः। छन्दसि परोऽपि व्यवहितश्चोक्तेः प्रयज्ञमित्यत्रत्यस्य प्रस्याजानन्नित्यनेनान्वयः। एवमुत्तरत्रापि। यज्ञं प्रकर्षेणाजानन् साङ्गं ज्ञातवन्तः। स्वर्गं लोकमपि प्रजानन्। साङ्गफलसम्पादकतया सूक्ते प्रशस्य तद्विधिं निगमयति ॥ तद्यदेते इति। यद्यस्मादङ्गीरोभिर्यज्ञः स्वर्गश्च प्रज्ञातस्तस्माद्धोता तदुभयं शंसति शंसेत्। तच्छंसनं यस्य प्रजात्यै स्वर्गस्यावगमाय भवति। प्रजात्या इत्यनुवदन्वेह एव वेदयामास प्राक् प्रस्य यज्ञपदाव्यवधानावर्तिनो जानातिनान्वय इति। का कथोत्तरत्र वृत्तेत्यतः कथयति। ते तं स्वर्यन्तः। हे ब्राह्मण अपरोक्षज्ञानिन्। ते इदं सहस्रं परिवेषितं गृहाणेत्यब्रुवन्। तत्समाकुर्वाणं गोसहस्रं, शाखान्तरे

चैवमाम्नायते ते सुवर्गं लोकं यंतो य एषां पशव आसंस्तानस्मान्नददुस्तं पशुभिश्चरन्तं यज्ञवास्तौ रुद्र आगच्छदिति तृतीयाष्टकप्रथमाध्याये । सम्यगात्मसात्कुर्वन्तमेकत्र मिलितं कुर्वाणं वा । एनं नाभानेदिष्टम् । कश्चित्पुरुषस्तम् । सवावनेरुत्तरत उपोत्थाय समीपैवोद्गतो भूत्वाऽब्रवीत् । स किं लक्षणक इत्याह ॥ कृष्णशवासीति । कृष्णो वर्णः सोऽस्त्यस्येति । मत्वर्थे शः । स चातिशायने । तथा चातिशयेन कृष्णवर्णं वस्त इति कृष्णशवासी तथाविधवस्त्रधारी णिनिरयम् । पशुस्वामी रुद्रः । किमवादीदित्यतो वदति ॥ मम वा इति । मम वास्तुहमिति । वास्तुहं वास्तौ यज्ञभूमौ हं हीनम् । त्यक्तमिति यावत् । ममैव । सर्वसांमत्यमवधारणेनाह । इति तेनोक्तः सः मह्यं अदू ऋषय इत्यब्रवीत् । तं पुमान् रुद्रः हे नाभानोदिष्ट । त्वदीयत्वमदीयत्वसन्देहे । नौ आवयोरपि तवैव पितरि मनो प्रश्नोऽस्तु । स एवमुक्तः पितरमैदागतवान् । अप्राक्षीच्च । स पिता हे पुत्रक बालक ! ते तुभ्यमङ्गिरसोऽदुर्ननु दत्तवन्तः किम् ? कम्पः प्रश्नार्थः ! एवं पित्रा पृष्टो मे मह्यामदुरेवेत्यब्रवीत्पितरं पुत्रः । अरे पुरतः किमभूदित उदीरयेत्युदित उदीरयति ॥ तत्त्विति । तत्कश्चित्पुरुषो मलिनवासा उत्तरत ममैव वास्तौ हीनत्वादित्युदीर्य । आदितादानं कृतवानहार्षीदित्यर्थः । इतः परं स न त्यक्षतीति निर्धार्यादितेत्युदितवान् । एवं वदन्तं पुत्रं प्रति तद्वास्तौ हीनं तस्यैव रुद्रस्यैव । तस्य पश्वीशत्वात् । एतस्य च तदीयत्वेन क्लृप्तत्वाच्च । भ्रातरो न दत्तवन्त इदमपि पशुपतेर्जातं, जातस्य त्वत्तो मम गतिः केत्यत आह ॥ तदिति । तत् सत् । स एव तुभ्यं दास्यतीति पितोवाच । स नाभानेदिष्टः पुनस्तं कश्चित्पुरुषमेत्य । हे भगवंस्तवेदं किलेति पिताऽऽहेत्यब्रवीत् । सदाशिवस्तुभ्यमेव तदहं ददामीत्यब्रवीत् । तत्र निमित्तमाह ॥ यस्त्वं सत्यमवादीरितीति । अनेन पितुर्धर्मिष्ठता च ध्वनिता । अतो लोके लोकैरित्थं कर्तव्यमित्याह ॥ तस्मादिति । सत्यवचनस्य श्रेयःसाधनत्वं विदुषा जानता सत्यमेव वेदितव्यम् । सर्वस्योपाख्यानस्य तात्पर्यमाख्याति । नाभानेदिष्टेन दृष्टो यो मन्त्रः स एषः सहस्रसनिः सहस्रस्य पुमर्थस्य सनिर्लाभो यस्मिन्स इति । एनं वदितारं सहस्रं स्वयमुपनमति । षष्ठेनाह्नानुष्ठितेन स्वर्गं प्रजानाति चेति । ग्रन्थकृत्तु नेयद्रोसहस्रं फलं पद्मरागस्य तंडुलमुष्टिः कथितं कृषेरिव पलालकुलमितिवदिति मन्वानो ददामि ते मन्त्रदृशो ज्ञानमित्याद्युदितवानिति श्रुत्युपोद्बलनमकृतेति मन्तव्यम् । खण्डान्त उक्तां फलश्रुतिमनुकुर्वन्नाह ॥ य इति । सुसमाहितः प्रातः सायं च यः स्मरेत्स कविर्मन्त्रज्ञः सन् आत्मनो गतिं प्राप्यस्थानं हरिमेति प्राप्नोति ॥ १२ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे पञ्चमोऽध्यायः ।

छलारी — अस्याख्यानस्य मरणकाले फलमाह ॥ य एतदिति । संस्मरेद्भक्तिपूर्वकं ध्यायेदित्यर्थः । कविस्तत्त्वज्ञानी मन्त्रज्ञो ऋग्वेदतात्पर्यज्ञानी । आत्मनः परमात्मनो गतिं ज्ञानं च । आप्नोतीति शेषः ॥ १२ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे पञ्चमोऽध्यायः ॥ ९-५ ॥

॥ अथ षष्ठोऽध्यायः ॥

श्रीशुक उवाच —

नाभागादम्बरीषोऽभून्महाभागवतः कृती ।
नास्पृशद् ब्रह्मशापोऽपि चक्रप्रतिहतः क्वचित् ॥ १ ॥

सत्यधर्मीया — नाभागादम्बरीषस्तन्नामा कुमारोऽभूत् । अनेन रुद्रद्रविणवितरणानन्तरं सकृद्विवाहो गृहस्थाश्रमधर्म इति कटाक्षयति । कृती सुकृती । कुशल इति यावत् । क्वचित्कदाचिद्ब्रह्मशापः । अपिनेतरापारणीयतां तस्येरयति । चक्रप्रतिहतः । नास्पृशन्न बबाधे ॥ १ ॥

छलारी — नवमस्य वंशमाह ॥ नाभागादिति । क्वचिदपि । प्रतिहत इति शेषः । ब्रह्मशापोऽपि ब्राह्मणेन दुर्वाससा निर्मितः कृत्यानलोऽपि चक्रप्रतिहतश्चक्रेण सुदर्शननाम्ना प्रतिहतो निरस्तः सन्नास्पृशत् । यमिति शेषः । अतोऽसौ महाभागवतोऽत एव कृती । महापुण्यवांश्चेति यावत् । कोपजन्यत्वविशेषाद्ब्रह्मशाप इत्युक्तम् ॥ १ ॥

राजोवाच —

भगवंच्छ्रोतुमिच्छामि राजर्षेस्तस्य धीमतः ।
न प्राभूद् यत्र निर्मुक्तो ब्रह्मदण्डो दुरत्ययः ॥ २ ॥

सत्यधर्मीया — स ब्राह्मणः कः, कीदृशश्च शापः, कथं स च चक्रप्रतिहत इदं केनापि प्रकारेणापहार्यम् । ऋषिकुमारशापस्य ममेदं चित्तं चित्रयति तव्द्यासपुत्र सम्यक् कीर्तयेति परीक्षित्पृच्छतीत्याह ॥ राजेति । यत्र यस्मिन्दुरत्ययो ब्रह्मदण्डो निर्मुक्तो न प्राभूत्समर्थो न बभूव । धीमतो राजर्षेः कर्म श्रोतुमिच्छामीति ॥ २ ॥

छलारी — तस्य श्रोतुमिच्छामि । चरितमिति शेषः । ब्रह्मदण्डो दुर्वाससा प्रयुक्तः कृत्यानलो न प्राभून्न समर्थो बभूव ॥ २ ॥

श्रीशुक उवाच —

अम्बरीषो महाभागः सप्तद्वीपवतीं महीम् ।
अव्ययां च श्रियं लब्ध्वा विभवं चातुलं भुवि ॥ ३ ॥

सत्यधर्मीया — महाभागवत इति प्रागभिहितं तदेवमिति तदुपयुक्तां विरक्तिं वक्ति ॥ अम्बरीष इति । अव्ययां श्रियं दीर्घकालिकीं सम्पदम् । विभवो निभृतिरस्यास्तीति । विभवो भृत्युवर्गस्तं चातुलं लब्ध्वा । विभवो निभृतौ धन इति विश्वः । अनेन श्रियमित्यनेन नास्य पुनरुक्तता । सामान्य-विशेषभावश्चागतिका गतिरिति सुधाभिधाना क्लिष्टः । सोऽप्यावश्यक इति श्लिष्टः । विविधं भवो भवनं यस्य तं पुत्रादिकमतुलमिति वा ॥ ३ ॥

छलारी — प्रथमतस्तस्य विरक्तिमाह ॥ अंबरीष इति । पुंसामपि दुर्लभमपि मह्यादिकं तत्सर्वं स्वप्नसंमितं स्वप्नवदनित्यं मेनेत्यन्वयः । अव्ययां दीर्घकालीनां श्रियं कोशादि संपदं विभवं राजादिविभवम् ॥ ३ ॥

मेनेऽतिदुर्लभं पुंसां सर्वं तत् स्वप्नसम्मितम् ।
विद्वान् विभवनिर्वाणं तमो विशति यत् पुमान् ॥ ४ ॥

सत्यधर्मीया — पुंसामितरेषां विभवनिर्वाणं संसाराद्विभवान्निर्वाणं मोक्षमतुलं विद्वान् । तत्सर्वं मह्यादिकं स्वप्नसंमितमस्थिरं मेन इत्यन्वयः । तत्सर्वं कुर्वत्किमित्यत आह । यद्येन पुमान् अधिकारी स्थिरतया विहितेन तमो विशति तत्सर्वमिति ॥ ४ ॥

छलारी — एतदेव स्पष्टयति ॥ विद्वानिति । कथंभूतः ॥ विभवनिर्वाणम् । हिरण्यादिसंपदां नाशं विद्वान् । जानन् यद्येन विभवेन पुमांस्तमो विशति मोहे मज्जतीत्यर्थः ॥ ४ ॥

वासुदेवे भगवति तद्भक्तेषु च साधुषु ।
प्राप्तो भावं परं विश्वं येनेदं लोष्ठवत् स्मृतम् ॥ ५ ॥

सत्यधर्मीया — भावो भक्तिरित्यादेः परं भावं महतीं भक्तिम् । प्राप्तः । येन भावेनेदं विश्वं लोष्ठवत्पांसुपिण्डवत्स्मृतम् ॥ ५ ॥

छलारी — पुनः कथंभूतः । परं भावमुत्कृष्टभक्तिं प्राप्तः । येन भावेनेदं विश्वं समस्तं सुवर्णादिकं लोष्ठसदृशं स्मृतं बभूव ॥ ५ ॥

स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने ।
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥ ६ ॥

सत्यधर्मीया — स्मर्तॄणामंहोनिर्हरणं भवतीति तत्कृत्यं वितत्य वक्ति ॥ स वा इति । यद्यपि हरेरित्येकयोक्त्या मनआदीनां तदीयत्वे ज्ञातुं सुशके पुनस्तत्र तत्र कृष्ण वैकुण्ठाच्युत मुकुन्देत्याद्युक्तिः सर्वथेतरत्र नैतद्वियोगः कार्य इति द्योतनार्थं स इति ज्ञेयम् । सत्कथोदये तच्छ्रवणे । महामन्त्ररूपता कथायास्तत्र नियोज्यो दक्षिणः कर्ण इति श्रुतिमित्येकवचनमुपपद्यते ॥ ६ ॥

छलारी — भक्तिमेव सर्वेन्द्रियाणां भगवत्परत्वकथनेन प्रपञ्चयति ॥ स वा इति त्रिभिः । वैकुण्ठो हरिः । अच्युतस्य सत्कथारूपाभ्युदयश्रवणे । श्रुतिं श्रोत्रं चकारेत्यस्य सर्वत्रानुषङ्गः ॥ ६ ॥

मुकुन्दलिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गम् ।
घ्राणं च तत्पादसरोजसौरभश्रीमत्तुलस्यां रसनां तदर्पिते ॥ ७ ॥

सत्यधर्मीया — लिङ्गानि प्रतिमाः तद्युक्तालयस्य । सौरभेण श्रीमती या तुलसी तस्याम् । रसनां जिव्हां तदर्पितेऽन्ने ॥ ७ ॥

छलारी — मुकुन्दस्य लिङ्गानां शङ्खचक्रादीनामालयाश्चलाचलप्रतिमास्तद्दर्शने । मुकुन्दलिङ्गानां वेङ्कटेशप्रतिमादीनामालयाः स्थानानि वेङ्कटेशादिक्षेत्राणीत्यर्थः । तेषां दृशौ नेत्रे । तद्भृत्यानां गात्रस्पर्शेऽङ्गमर्दनादौ । अङ्गसङ्गमङ्गानां सङ्गः सम्बन्धो यस्य तत्त्वगिन्द्रियम् । इन्द्रियाणां प्रकृतत्वात् । तत्पादसरोजसौरभश्रीमत्तुलस्यां भगवतः पादसरोजसौरभेण युक्तायां तुलस्यां तदर्पिते तन्निवेदितान्नादौ चकार ॥ ७ ॥

पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने ।
कामं तु दास्ये न तु कामकाम्यया तथोत्तमश्लोकजनाश्रयां रतिम् ॥ ८ ॥

सत्यधर्मीया — क्षेत्रपदं तत्स्थानम् । तदनुसर्पणं गमनं तस्मिन् । दास्ये दासत्वे । काममिच्छन् । कामकाम्यया, विषयतृषावैचित्र्यादुक्तिः । उत्तमश्लोकजनानाश्रयतीति सा तथा तां रतिं प्रीतिम् ॥८॥

छलारी — क्षेत्रपदानुसर्पणे क्षेत्रतीर्थमार्गानुगमने । उत्तमश्लोकस्य हरेर्जनानाश्रयतीति जनाश्रया तां रतिं चकार ॥ ८ ॥

एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्षजे ।
सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह ॥ ९ ॥

सत्यधर्मीया — परेऽधियज्ञेऽधोक्षजे भगवति श्रीहरौ । कर्मकलापं तत्समूहम् । सर्वात्मभावं सर्वात्मना भक्तिं च विदधत्कुर्वाणः न स्वेच्छया किंतु वेदितृमुखत इत्याह ॥ तन्निष्ठविप्राभिहित इति । तस्मिन् भगवति निष्ठा येषां ते तैरभिहिस्तच्छिक्षितो महीं शशास । हेत्याश्चर्यम् ॥ ९ ॥

छलारी — आत्मनः स्वस्य कर्मकलापं कर्मसमूहम् । अधियज्ञे यज्ञमधिकृत्य विद्यमानेऽधोक्षजे विदधत्समर्पयत् । भगवति सर्वात्मना सर्वप्रकारेण भावं भक्तिं च विदधत्कुर्वन् सन् तन्निष्ठैर्भागवतैर्विप्रैरभिहितः शिक्षितः सन् शशास ॥ ९ ॥

ईजेऽश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचिताङ्गदक्षिणैः ।
ततैर्वसिष्ठासितगौतमादिभिर्विद्वानभिस्रोतमसौ सरस्वतीम् ॥ १० ॥

सत्यधर्मीया — अधियज्ञं यज्ञेशम् । महाविभूत्या महैश्वर्येणोपचिताऽभिवृद्धाऽङ्गदक्षिणा स्वाङ्गभूता दक्षिणा येषां ते तथा तैः । अश्वमेधैस्ततैर्यज्ञशालं व्याप्योपविष्टैः । वसिष्ठश्चासितश्च गौतमश्चेत्येते आदयो येषां ते तथा तैः । सरस्वतीं सरस्वत्या अभिस्रोतम् । स्रोतोऽम्बुवेगोऽद्रिपयोरिति विश्वोक्तस्रोतःशब्दपर्यायोऽयं स्रोतशब्दः । अम्बुवेगाभिमुखम् । विद्वान् असावीजेऽयजत् । ततैर्वातवदसंगैरिति वा । ततं वीणादिवाद्ये च पवमाने ततः पुनरिति विश्वः ॥ १० ॥

छलारी — सरस्वतीं सरस्वत्या अभिस्रोतमभिमुखम् । सप्तसु प्रथमा षट्सु द्वितीयेत्युक्तेः । यज्ञनिपुणैर्वसिष्ठादिऋत्विग्भिः कर्तृभिरुपचिता संवर्धिता यज्ञस्याङ्गभूता दक्षिणा येषु तैरश्वमेधैः करणैरधियज्ञं यज्ञाधिष्ठातारमीश्वरमीजे आराधयामासेत्यर्थः ॥ १० ॥

यस्य क्रतुषु गीर्वाणैः सदस्या ऋत्विजो जनाः ।
तुल्यरूपाश्चानिमिषा व्यदृश्यन्त सुवाससः ॥ ११ ॥

सत्यधर्मीया — गीर्वाणैर्गीरिव वाण्येव वाणोऽस्त्रं येषां ते तथा तैः । यस्य क्रतुषु सदस्या ऋत्विजो जनाः समं तुल्यं रूपं येषां ते । अनिमिषा यत्र क्व च यत्किञ्चिद्व्यत्यस्तं न भवेदिति

निरीक्षणोन्मीलितलोचनाः सुवाससो व्यदृश्यन्त । येऽनिमिषास्तेषां गीर्वाणैर्वाग्बाणैस्तुल्यं समं रूपं ग्रन्थवृत्तिर्येषां ते तथा । रूपं स्वभावे सौन्दर्ये चालोके पशुशब्दयोः । ग्रन्थवृत्तौ नाटकादाविति विश्वः । क्रतुषु व्यदृश्यंतेति वा ॥ ११ ॥

छलारी — किञ्च यस्य सदस्यादयो गीर्वाणैः सह । तुल्यरूपा रूपयौवनवस्त्रादिभिः समानवेषा व्यदृश्यन्त । न च देवानां निमेषाभावादेतेषां तद्भावाद्वैलक्षण्यमिति वाच्यम् । यतोऽनिमिषाश्च व्यदृश्यन्त । परमाश्चर्यदर्शनेन तेषां निमेषोपरमादिति भावः । यस्येत्यस्य स इत्थमिति चतुर्थेनान्वयः ॥ ॥ ११ ॥

स्वर्गो न प्रार्थितो यस्य मनुजैरमरप्रियः ।
शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितम् ॥ १२ ॥

सत्यधर्मीया — यस्य मनुजैर्यद्देशनिवासिमानवैरमरप्रियः स्वर्गोऽपि न प्रार्थितः । तदपेक्षया सुखविकासकारणमाह ॥ शृण्वद्भिरित्यादिना ॥ १२ ॥

छलारी — यस्य मनुजैर्यदीयैर्मनुजैरपि स्वर्गोऽपि न प्रार्थितः । तस्य तु का कथा तत्र किं कारणमित्यत आह ॥ शृण्वद्भिरिति । अनेन मुकुन्दचरितश्रवणादिभ्योऽधिकं स्वर्गसुखं न भवति । अतः स्वर्गो न प्रार्थित इत्युक्तं भवति ॥ १२ ॥

समृद्धा यस्य नो कामाः स्वाराज्यपरिभाविताः ।
दुर्लभा अपि सिद्धानां मुकुन्दं हृदि पश्यतः ॥ १३ ॥

सत्यधर्मीया — स्वाराज्यपरिभाविताः स्वाराज्यं स्वर्गसम्पदादिकं परिभावितं तिरस्कृतं यैस्ते । दुर्लभा अपीतरेषां कामा विषयाः सिद्धानामेकान्तिनामिवेति लुप्तोपमा । मुकुन्दं हृदि पश्यतो यस्याम्बरीषस्य समृद्धा नो नाभूवन्निति योजना । अपिसिद्धानां ये गर्हिताः सिद्धास्तथा भासमानास्ते स्वाराज्यपरिभाविता दुर्लभाः इतरैः समृद्धास्तेऽपि मुकुन्दं हृदि पश्यतो यस्य कामाः काम्या अपेक्षणीया नो इति वा ॥ १३ ॥

छलारी — मुकुन्दं हृदि पश्यतो यस्य । यस्येति षष्ठी तृतीयार्थे । येन समृद्धा अपि कामा नो वाञ्छिताः । कथम्भूताः । स्वाराज्येन स्वरूपसुखेन परिभावितास्तिरस्कृताः । अस्य सुलभत्वेप्यन्येषां दुर्लभा इत्याह ॥ दुर्लभा इति ॥ १३ ॥

स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिव ।
स्वधर्मेण हरिं प्रीणन् सङ्गान् सर्वाञ्छनैर्जहौ ॥ १४ ॥

सत्यधर्मीया — हृषीकेशविषयं यज्ज्ञानं तत्फलमालपति ॥ स इति । तपोयुक्तेन कायक्लेशसहितेनालोचनेन युतेन वा । प्रीणन्प्रीणयन्सर्वान्सङ्गान् स्वधर्महिंसकान्सङ्गान् दारादिद्वारकान् । शनैर्जहौ । शनैरिति झडिति तेषां त्यागोऽसुलभ इति द्योतयति । शनैः स्वैरैर्मुनिभिरित्थमुपदिष्ट इति वा । शनैः शनैश्चरे स्वैर इति विश्वः ॥ १४ ॥

छलारी — एवं भगवदाराधनपरस्य कामादित्यागो नैव चित्रमित्युपसंहरति ॥ स इति ॥ स्वधर्मेण प्रजापालनलक्षणेन सर्वान्सङ्गान्वित्तेषणादीन् ॥ १४ ॥

गृहेषु दारेषु सुतेषु बन्धुषु द्विपोत्तमस्यन्दनवाजिपत्तिषु ।
अक्षय्यरत्नाभरणायुधादिष्वनन्तकोशेष्वकरोदसन्मतिम् ॥ १५ ॥

सत्यधर्मीया — बहुवचनेन सङ्गबाहुविध्यं सूचितम् । तत्किञ्चिद्विविच्याह ॥ गृहेष्वित्यादिना । अनन्तकोशेष्वपरिमितैतदादिधनसद्मसु । असन्मतिमसंतोऽस्थिरा इति मतिमकरोत् । अनन्तकोऽनन्तो हरिरेव कं सुखरूपो यस्यानन्तेन कं यस्य स वा । अनन्तको मनोवचनकर्मणाऽहिंसको वाऽशेष्वशनेष्वपीति वा । अशेषु न विद्यते शं सुखं यैस्तेषु दुःखदेषु प्राप्तेषु तत्राप्यसन्मतिमकरोदिति वा ॥ १५ ॥

छलारी — तदेव विशदयति ॥ गृहेष्विति । द्विपोत्तमा गजोत्तमाः । असन्मतिममङ्गलान्यनर्थकराणीति मतिं बुद्धिं चकार ॥ १५ ॥

तस्मा अदाद्धरिश्चक्रं प्रत्यनीकभयावहम् ।
एकान्तभक्तियोगेन प्रीतो भूत्वाऽभिरक्षणम् ॥ १६ ॥

सत्यधर्मीया — चक्रवर्तीति पार्थिवप्रथना वृथाभाव्येत्येतदाराधनाद्बोधितकरुणपरवश ईश ममेतरानङ्कुरितमनुग्रहमकरोदित्याह ॥ तस्मा इति ॥ प्रत्यनीकानि प्रतिभटसेनास्तेषाम् । अनीकं तु रणे सैन्य इति विश्वः । तन्निमित्तमेकान्तभक्तियोगेन प्रीतो भूत्वेति वा । न केवलं तेनानिष्टनष्टिः किन्तु तदिष्टलाभश्चेत्याह । अभिरक्षणमभितो रक्षणं येन तत् । अभिरक्षयतीति तत्तथेति वा ॥ १६ ॥

छलारी —— एतादृशेऽम्बरीषे हरेरनुग्रहविशेषं कथयति । तस्मा इति । भृत्याभिरक्षणं भक्तरक्षणं चक्रम् । तस्मै अदादित्यन्वयः । प्रत्यनीकं शत्रुसैन्यम् ॥ १६ ॥

आरिराधयिषुः कृष्णं महिष्या तुल्यशीलया ।
युक्तः सांवत्सरं वीरो दधार द्वादशीव्रतम् ॥ १७ ॥

सत्यधर्मीया —— आरिराधयिषुः पुनः प्रकारान्तरेणाराधनं कर्तुमिच्छुः । तुल्यशीलया तुल्यं शीलं स्वभाव आचारो वा यस्याः सा । तया महिष्या भार्यया सह । सांवत्सरं संवत्सरसम्बन्धि-सङ्कल्पविशेषतो व्रतविशेष एवायं न तु संवत्सर एवानन्तरं नेति नेत्यर्थः । द्वादशीव्रतम् । दशम्यामेकवारं भुक्तिरेकादश्यामुपाषेणम् । साधनसाधनमेका भुक्तिर्द्वादश्याम् । त्रयोदश्यामनुपारणं चेति द्वादशीव्रतम् । दधार सङ्कल्पपूर्वकं स्वीकृतवान् । एवं व्रतवृतोऽपि क्षितिरक्षणक्षम इति बोधयति । वीर इति ॥ १७ ॥

छलारी —— तदेवं तस्य वैराग्यादिकं भक्तिं चोक्त्वा ब्रह्मदण्डो यत्र न प्राभूदिति यदुक्तं तदेव द्वादशीव्रतनिष्ठां कथयन्नाह ॥ आरिराधयिषुरित्यादिना । कृष्णमारिराधयिषुराराधनं कर्तुमिच्छुर्वीरो वरिष्ठो महिष्या भार्यया युक्तः सन् प्रतिपक्षं दिनत्रयव्रतम् । कुर्वन्नपीति शेषः । सांवत्सरं संवत्सरसम्बन्धि । प्रतिसंवत्सरमेकस्मिन्मासे महोत्सवेन क्रियमाणमिति यावत् । द्वादशीव्रतं दशम्यादिदिनत्रयव्रतम् । कार्तिके मासि शुक्लद्वादश्यां दधार । बहुकालं वक्ष्यमाणरीत्या महाभिषेकाद्युत्सवेन चकार । अयमाशयः । सर्वदा दिनत्रयव्रतं कुर्वन्नप्ययं जनो वर्षमध्ये एकस्मिन्मासि कार्तिके वा श्रावणे वोत्सवं कुर्यात् । तत्र मण्टपनिर्माणं क्षेत्रविधानेन हरेः पूजां ब्राह्मणभोजनं स्वयं च पारणं कुर्यादिति विधिरिति । एतत्तु नारायणपण्डिताचार्यैर्योग-दीपिकायामुक्तमस्ति । नित्यं संप्रीतये विष्णोराचरन्वासरव्रतम् । कार्तिके श्रावणे मासे माघे वा पूजयेद्धरिम् । इत्यादिना चतुर्षु पटलेषु विस्तरेणाभिहितम् । अनेन यावज्जीवं त्रिदिनात्मकैकादशीव्रतं कुर्वन्नपि प्रतिसंवत्सरमुक्तमासेष्वन्यतरमासेषु संवत्सरव्रतान्ते एकादश्युद्यापनरूपहरिपूजारूपोत्सवं समाप्य पुनरारम्भं कुर्यादित्युक्तं भवति ॥ तदुक्तं स्कान्दपुराणे ॥ शृणुष्व नृपशार्दूल एकादश्या व्रतं शुभमित्युपक्रम्य पुरासीद्भगवान्विष्णुर्नारदाय यदुक्तवान् । तत्तेऽहं संप्रवक्ष्याम्युद्यापनविधिं शुभम् । मार्गशीर्षादिमासेषु द्वादशीषु नरोत्तम । आदावन्ते तथा मध्ये व्रतस्योद्यापनं स्मृतम् । उद्यापनं न कुर्याद्यः कुष्टी चान्धश्च जायते । तस्मादुद्यापनं कुर्याद्यथा विभवमादरादिति ॥ १७ ॥

व्रतान्ते कार्तिके मासि त्रिरात्रं समुपोषितः ।
स्नातः कदाचित् कालिन्द्यां हरिं मधुवनेऽर्चयत् ॥ १८ ॥

सत्यधर्मीया — त्रिरात्रमुक्तप्रकारेण । संख्यापूर्वकत्वादच् । व्रतान्ते संवत्सरान्ते कालिंद्यां सूर्यतनयायां यमुनायां स्नातः । मधुवनेऽर्चयदाचर्यत् ॥ १८ ॥

छलारी — तत्कृतं पूजाविशेषं प्रपञ्चयति ॥ व्रतान्त इति । त्रिरात्रं त्रिदिनात्मकं व्रतम् । सर्वदा कुर्वन्निति शेषः । कदाचित्कस्मिंश्चित्संवत्सरे । संवत्सरव्रतान्ते कार्तिके शुक्लपक्षे प्रबोधिन्यां समुपोषितः । द्वादश्यां कालिंद्यां यमुनायां स्नातः सन्मधुवने हरिमर्चयत् । अडभावः छान्दसः ॥१८॥

महाभिषेकविधिना सर्वोपस्करसम्पदा ।
अभिषिच्य वराकल्पैर्गन्धमाल्यार्हणादिभिः ॥ १९ ॥

सत्यधर्मीया — सर्वोपस्करसम्पदा । सम्पर्युपेभ्यः करोतेरिति सुट् । सर्वसाधनसम्पद्युक्तेन महाभिषेकविधिना हरिमभिषिच्य । वराकल्पैरुत्तमाभरणैः । गन्धमाल्यार्हणादिभिर्गन्धाश्च माल्यानि चेतराण्यर्हणानि योग्यान्यादयो येषां तानि तैः ॥ १९ ॥

छलारी — महाभिषेकविधिना अथात ऐन्द्रो महाभिषेक इति श्रुत्युक्तसाम्राज्याभिषेकविधिनेत्यर्थः । अभिषिच्य सर्वोपस्करसंपदा सर्वसाधनसंपदा । वराकल्पैरुत्तमाभरणैर्गन्धमाल्यार्हणादिभिर्माल्यानि पुष्पाणि पुष्पदामानि च । माल्यं पुष्पे पुष्पदाममित्यभिधानम् । अर्हणशब्देन धूपदीपनैवेद्यादिसङ्ग्रहः । आदिपदेन गीतवाद्यादिसङ्ग्रहः ॥ १९ ॥

तद्व्रतान्तरभावेन पूजयामास केशवम् ।
ब्राह्मणांश्च महाभागान् सिद्धार्थानपि भक्तितः ॥ २० ॥

सत्यधर्मीया — तद्व्रतान्तरभावेन तद्व्रतो हरिसमर्पित आन्तरस्य मनसो भावो वृत्तिर्येन । सिद्धार्थानपि पूर्णकामानपि । एतेनैतद्दयैवार्हणग्रहणं नाभिलाषेणेति सूच्यते । पूजयामासेत्यन्वयः ॥ ॥ २० ॥

छलारी — तद्व्रतान्तरभावेन श्रीहरिनिष्ठमनस्कत्वेन केशवं पूजयामास । सिद्धार्थान्पूजानपेक्षानपि ब्राह्मणान् भक्तितः पूजयामासेत्यन्वयः ॥ २० ॥

गवां रुक्मविषाणीनां रूप्याङ्घ्रीणां सुवाससाम् ।
पयःशीलवयोरूपवत्सोपस्करसम्पदाम् ॥ २१ ॥

सत्यधर्मीया — रुक्ममययन्त्रखचितविषाणवतीनाम् । एवमेव रूप्यांघ्रीणाम् ॥ २१ ॥

छलारी — रुग्मविषाणीनां स्वर्णशृङ्गाणां रूप्याङ्घ्रीणां रूप्यखुरीणाम् । पय:शीलादिसंपदो यासां तासां गवाम् ॥ २१ ॥

प्राहिणोत् साधुविप्रेभ्यो गृहेषु न्यर्बुदानि षट् ।
भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तरम् ॥ २२ ॥

सत्यधर्मीया — गृहेषु तावत्सु निर्मितसद्मसु । विप्रेभ्यः षट् न्यर्बुदानि शतकोटिर्न्यर्बुदं तानि षट् प्राहिणोत्प्रेषयामास । धरासुरा धारापूर्वकं सौरभेयादिकं प्रायेण न स्वीकुर्वन्तीत्यभिप्रायेण प्राहिणोदित्युक्तिरिति ज्ञेयम् । अग्रे प्राक् ॥ २२ ॥

छलारी — षट्न्यर्बुदानि । शतकोटिसङ्ख्यान्यर्बुदमित्युच्यते । तादृशेषु षट्न्यर्बुदानीत्यर्थः । न्यर्बुदानि षट् । षट् कोटिरिति कश्चिद्व्याख्यातवान् । स्वस्वगृहेषु स्थितेभ्यः प्राहिणोत्प्रेषयामास । षट् रसोपेतम् ॥ २२ ॥

लब्धकामैरनुज्ञप्तः पारणायोपचक्रमे ।
तस्य तर्ह्यतिथिः साक्षाद् दुर्वासा भगवानभूत् ॥ २३ ॥

सत्यधर्मीया — लब्धकामैरनुज्ञप्तः आज्ञप्तः । तर्हि तदा साक्षात् दुर्वासा भगवानतिथिरभूत् ॥ २३ ॥

छलारी — तर्हि तदैव दुर्वासा अतिथिः साक्षात्प्रत्यक्षोऽभूत् ॥ २३ ॥

तमानर्च्यातिथिं भूयः प्रत्युत्थानासनार्हणैः ।
ययाचेऽभ्यवहाराय पादमूलमुपागतः ॥ २४ ॥

सत्यधर्मीया — महाकोपन इति भूय इत्युक्तिः । अभ्यवहाराय भोजनाय ययाचे ॥ २४ ॥

छलारी — आनर्च्यार्चितवान् । अर्हणान्यर्घ्यादीनि । अभ्यवहाराय भोजनाय । पादमूलमुपागतो नमस्कुर्वन् ॥ २४ ॥

प्रतिनन्द्य स तद्याञ्चां कर्तुमावश्यकं गतः ।
निममज्ज बृहद् ध्यायन् कालिन्दीसलिले शुचौ ॥ २५ ॥

सत्यधर्मीया — स दुर्वासास्तद्यांचां अम्बरीषप्रार्थनां प्रतिनन्द्य ओमित्यनुमोदनं कृत्वा । आवश्यकं संध्यादि । बृहद्ब्रह्म वर्तमाने पृषन्महद्बृहज्जगच्छन्तुवच्चेति शत्रंतवद्भावेन निपातितः गालवमतेन ॥ २५ ॥

सत्यधर्मीया — तद्याञ्चां तत्प्रार्थनारूपं वचनं श्रुत्वा तत्प्रतिनन्द्य । आवश्यकं नित्यकर्म कर्तुं बृहद्गुणपूर्णं ब्रह्म ॥ २५ ॥

मुहूर्तार्धावशिष्टायां द्वादश्यां पारणं प्रति ।
चिन्तयामास धर्मज्ञो द्विजैस्तद्धर्मसङ्कटे ॥ २६ ॥

सत्यधर्मीया — धर्मसङ्कटे धर्मापदि प्राप्तायाम् ॥ २६ ॥

छलारी — धर्मसङ्कटे धर्महानौ प्राप्तायां सत्यां तत् तादृशं धर्मसूक्ष्मं चिन्तयामास ॥ २६ ॥

ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे ।
यत् कृत्वा साधु मे भूयादधर्मो वा न मां स्पृशेत् ॥ २७ ॥

सत्यधर्मीया — तमेव सङ्कटं प्रकटयति ॥ ब्राह्मणेति । आमन्त्रितब्राह्मणातिक्रमे च दोषः प्रत्यवायः यद्यस्माद्द्वादश्याम् । तन्मध्येऽपारणे च दोषः । एवमनु सङ्कटद्वये प्राप्ते यत्कृत्वा मम श्रेयो भूयात् । अधर्म एकातिक्रमप्रयुक्तदोषो मां न स्पृशेत् । निमन्त्रितोऽयं मन्त्रपरो नायातः । न च तमतिहाय पारणं कार्यम् । न हापनीया च द्वादश्यतः कथं कर्तव्यमिति द्विजैः सह चिन्तयामास ॥ ॥ २७ ॥

छलारी — धर्मसङ्कटमेवाह ॥ ब्राह्मणेति । आमन्त्रितब्राह्मणातिक्रमदोषः श्रीहरिप्रियद्वादशी-भोजनाकरणे दोषो व्रतवैगुण्यलक्षणो यत्कृत्वा मे साधु भूयादुभयदोषपरिहारेण श्रेयः स्यात् । उभयोरेकातिक्रमलक्षणोऽधर्मो वा मां न स्पृशेदिति । तद्धर्मसूक्ष्मं चिन्तयामासेत्यन्वयः ॥२७॥

अम्भसा केवलेनाद्य करिष्ये व्रतपारणम् ।
आहुरब्भक्षणं विप्रा ह्यशितं नाशितं च यत् ॥ २८ ॥

सत्यधर्मीया — स्वयं विपश्चिच्चित्ते निश्चित्य विप्रान्सम्बोध्य प्राह ॥ अम्भसेति । केवलेनान्नामिश्रेणोदकेन व्रतपारणं साधनानतिक्रमसाधनरूपम् । अद्येदानीं करिष्ये । तेन कथं व्रतानतिक्रमो न अतिक्रमश्च ब्राह्मणस्येत्यत आह ॥ हे विप्रा इति । यद्यस्मादब्भक्षणमशितं नाशितं चेति प्राहुस्ततो न व्रतघातो नापि द्विजं वर्जयित्वा भोजनमिति । वेदाद्या इति शेषः । अपोऽश्नाति वै तन्नैवाशितं तेनैवाशितमिति श्रुतिः । अशितानशिता ह्याप इत्याद्याः स्मृतयश्च । विप्रा मेधाविनः प्राहुरिति वा । हीति श्रुत्यादिप्रसिद्धिमाह ॥ २८ ॥

छलारी — एवं द्विजैः सह विचार्य निश्चिनोति ॥ अंभसेति । केवलेनान्नरहितेन व्रतपारणं तत्समाप्तिम् । तत्र किं प्रमाणमिति तत्राह ॥ प्राहुरिति । हे विप्राः । अब्भक्षणमंभसां पारणमशितं भुक्तम् । पूर्वव्रतपारणार्थं भुक्तं भवतीत्याहुः । वेदा इति शेषः । नाशितमिति नसमासः ॥ २८ ॥

इत्यपः प्राश्य राजर्षिश्चिन्तयन् मनसाऽच्युतम् ।
प्रत्याचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः ॥ २९ ॥

सत्यधर्मीया — राजर्षिरम्बरीषोऽच्युतं मनसा चिन्तयन्नपः प्राश्य स द्विजागमनमेव प्रत्याचष्ट प्रत्यैक्षत ॥ २९ ॥

छलारी — इति विचार्यापः प्राश्याच्युतं चिन्तयन् । अथाऽपि ब्राह्मणः कुपितश्चेत्त्वमेव मम शरणमित्यच्युतं ध्यायन्नित्यर्थः । प्रत्याचष्ट प्रत्यैक्षत ॥ २९ ॥

दुर्वासा यमुनाकूलात् कृतावश्यक आगतः ।
राज्ञाऽभिच्छन्दितस्तस्य बुबुधे चेष्टितं धिया ॥ ३० ॥

सत्यधर्मीया - कृतमावश्यकं येन सः कृतावश्यकः । अभिछन्दितः स्वमनआनुकूल्येन सत्कृतः । तस्य राज्ञश्चेष्टितं कृतं पानीयपानं धिया बुबुधे विषयीकृतवान् ॥ ३० ॥

छलारी — अभिच्छन्दितः । उत्थानादिनेति शेषः । धिया ज्ञानदृष्ट्या ॥ ३० ॥

मन्युना प्रचलद्गात्रो भ्रुकुटीकुटिलाननः ।
बुभुक्षितश्च सुतरां कृताञ्जलिमभाषत ॥ ३१ ॥

सत्यधर्मीया — बुभुक्षित इति सुतरां मन्युना च प्रचलत्कम्पमानं गात्रं शरीरं यस्य सः भ्रुकुट्या भ्रूग्रन्थिना कुटिलं आननं वक्त्रं यस्य स तथा सन् कृताञ्जलिं राजानमभाषत ॥ ३१ ॥

छलारी — मन्युना क्रोधेन भृकुट्या भ्रूविभ्रमेण कुटिलाननेन बुभुक्षितः क्षुधितः ।। ३१ ।।

अहो अस्य नृशंसस्य श्रियोन्मत्तस्य पश्यत ।
धर्मव्यतिक्रमं विष्णोरभक्तस्येष्टमानिनः ।। ३२ ।।

सत्यधर्मीया — श्रियोन्मत्तस्य नृशंसस्य । धर्मव्यतिक्रमं पश्यत । अहो आश्चर्यम् । विष्णोरभक्तस्य चेदपीष्टमानिनः प्रियोऽहमित्यभिमानवतः ।। ३२ ।।

छलारी — अभक्तस्यातिथौ भक्तिशून्यस्य । विष्णोरहमिष्ट इत्यभिमानवतः ।। ३२ ।।

यो मामतिथिमायातमातिथ्येन निमन्त्र्य च ।
अदत्वा भुक्तवांस्तस्य सद्यस्ते दर्शये फलम् ।। ३३ ।।

सत्यधर्मीया — को धर्मव्यतिक्रम इत्यत आह ।। य इति । आतिथ्येन निमन्त्र्य चाभ्यवहाराय याचित्वाऽन्नमदत्वा स्वयं भुक्तवान् । यस्तस्य ते इव फलं सद्यो दर्शये । एतत्फलं तु तवेव तवेत्यनुपमता ध्वन्यते । कोपोपतापेनाङ्गस्मरणाभावात्तस्य त इत्युक्तिर्वेति नातिरेकः ।। ३३ ।।

छलारी — आतिथ्ये निमन्त्र्य । आयान्तमित्यनुषङ्गः । अयं ममातिथ्यं करिष्यतीत्याशयाऽऽगतमित्यर्थः । अदत्वा अन्नमिति शेषः ।। ३३ ।।

एवं ब्रुवाण उत्कृत्य जटां रोषविदीपितः ।
तया स निर्ममे तस्मै कृत्यां कालानलोपमाम् ।। ३४ ।।

सत्यधर्मीया — जटाम् । मूर्ध्न इति शेषः । तयोत्कृतजट्या । कृत्यामभिचारिकीं देवताम् । कृत्याऽपि देवताभेद इति विश्वः । तस्मै तमुद्दिश्य । तत्सामर्थ्यमाह ।। कालानलोपमामिति ।। ३४ ।।

छलारी — जटामुत्कृत्य । स्वशिरस इति शेषः । तस्मा अम्बरीषाय । तद्धननार्थमित्यर्थः । कृत्यां भूतविशेषम् ।। ३४ ।।

तामापतन्तीं ज्वलतीमसिहस्तां पदा भुवम् ।
वेपयन्तीं समुद्वीक्ष्य न चचाल पदा नृपः ।। ३५ ।।

सत्यधर्मीया — ज्वलतीं ज्वलन्तीम् । असिहस्तां पदा भुवं वेपयन्तीं कम्पमानाम् । तामापतन्तीं समुद्वीक्ष्य नृपो न पदा चचाल । नेयदेव किन्तु समुत्समोदो वीक्ष्येति वा ।। ३५ ।।

छलारी — यदा भुवं वेपयन्तीम् । पदात्स्वस्थानात् ॥ ३५ ॥

आदिष्टं भक्तरक्षायां पुरुषेण महात्मना ।
ददाह कृत्यां तच्चक्रं क्रुद्धाहिमिव पावकः ॥ ३६ ॥

सत्यधर्मीया — महात्मना पुरुषेण भगवता भक्तरक्षायामम्बरीषरक्षणे । आदिष्टं चक्रं पावकः क्रुद्धाहिं क्रुद्धं सर्पमिव ददाह ॥ ३६ ॥

छलारी — पुरुषेण हरिणाऽऽदिष्टं चक्रम् । क्रुद्धाहिं पावको दावाग्निरिव ॥ ३६ ॥

तदभिद्रवदुद्वीक्ष्य स्वप्रयासं च निष्फलम् ।
दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया ॥ ३७ ॥

सत्यधर्मीया — तावतैव न शान्तिरिति शंसति ॥ तदिति । तच्चक्रं स्वं प्रत्यभिद्रवत् । उद्वीक्ष्य स्वप्रयासं निष्फलं चोद्वीक्ष्य दुर्वासा भीतः प्राणपरीप्सया प्राणत्राणेच्छया दिक्षु दुद्रुवे ॥ ३७ ॥

छलारी — कृत्यां दग्ध्वा स्वात्मानमभिद्रवत् । तच्चक्रम् । स्वप्रायासं स्वप्रयत्नं च निष्फलमुद्वीक्ष्य प्राणपरीप्सया स्वजीवनरक्षणेच्छया ॥ ३७ ॥

तमन्वधावद् भगवद्रथाङ्गं दावाग्निरुद्भूतशिखो यथाहिम् ।
तथाऽनुषक्तं मुनिरीक्षमाणो गुहां विविक्षुः प्रससार मेरोः ॥ ३८ ॥

सत्यधर्मीया — भगवद्रथाङ्गं तं दुर्वाससम् । उद्भूतशिख उद्भूता शिखा यस्य सः दावाग्निरहिं सर्पं यथा धावति तथाऽन्वधावत् । अनुषक्तं स्वपृष्ठलग्नं वीक्ष्यमाणो मेरोर्गुहां विविक्षुः प्रससार ॥३८॥

छलारी — उद्भूताः शिखा ज्वाला यस्य स दावाग्निर्यथाऽहिं प्रतिधावति तथा तं चक्रं प्रत्यन्वधावदित्यन्वयः । अनुषक्तं पृष्ठतः संलग्नम् । मेरोर्गुहां विविक्षुः प्रवेष्टुमिच्छुः प्रससाराधावत् ॥ ॥ ३८ ॥

दिशो नभः क्ष्मां विवरान् समुद्राँल्लोकान् सपालांस्त्रिदिवं गतः सः ।
यतो यतो धावति तत्र तत्र सुदर्शनं दुष्प्रसहं ददर्श ॥ ३९ ॥

सत्यधर्मीया — विवरान्सुतलादीन् । यतो यतो यत्र यत्र धावति तत्र तत्र ॥ ३९ ॥

छलारी — चक्रानुयातो दुर्वासा एतानि स्थानानि बभ्रामेत्याह ॥ दिश इत्यादिना । विवरान्पातालान्गतः सन् । यतो यतो यत्र यत्र धावति । दुष्प्रसहं सोढुमशक्यम् ॥ ३९ ॥

अलब्धनाथः स यदा कुतश्चित् संत्रस्तचितोऽरणमेषमाणः ।
देवं विरिञ्चं समगाद् विधातस्त्राह्यात्मयोनेऽजिततेजसो माम् ॥ ४० ॥

सत्यधर्मीया — अरणं शरणमेषमाणः काङ्क्षन् । हे विधातस्त्राहीति तु गतम् । अजिततेजसो माम् । हे आत्मयोने । आत्मा परमात्मा योनिः कारणं यस्येति तत्सम्बुद्धिः । हे विरिञ्च । त्राहीति त्रायस्वेति विरिञ्चं समगाच्छच्छरणं जगाम ॥ ४० ॥

छलारी — अलब्धो नाथो रक्षको येन सः कुतश्चित्पुरुषादरणं शरणम् । रक्षणमिति यावत् । एषमाण इच्छन्सन् । विरिञ्चं समगात् । ततस्तं प्रार्थयामासेति शेषः । अजितस्य हरेस्तेजो-रूपाच्चक्रात् । यद्वा । केनाप्यजितस्य सुदर्शनचक्रस्य तेजसो दाहात् ॥ ४० ॥

श्रीब्रह्मोवाच —

स्थानं मदीयं सह विश्वमेतत् क्रिडावसाने द्विपरार्धसंज्ञे ।
भ्रूभङ्गमात्रेण हि सन्दिधक्षोः कालात्मनः पश्यति को भविष्यत् ॥ ४१ ॥

सत्यधर्मीया — स च चतुराननः किमवादीद्दुर्वाससं प्रतीत्यतो वदति ॥ ब्रह्मेति । सहविश्वमिति पदमेकम् । विश्वेनेतरप्रपञ्चेन सहितम् । वोपसर्जनस्येत्युक्तेः । मदीयं स्थानं द्विपरार्धसंज्ञे द्विपरार्धेति संज्ञा यस्य तस्मिन् ममायुषोंऽते । प्रलयलव इति यावत् । क्रीडावसानेऽस्माभिः सहवासो वासुदेवस्य लीलामूलक इति तदवसाने भ्रूभङ्गमात्रेण केवलं विक्षेपेण सन्दिधक्षोर्दग्धुमिच्छोः कालात्मनस्तद्रूपिणो भविष्यतस्तस्माद्यद्भावि तत्कर्म कः पश्यति । न कोऽपि जानाति । अज्ञातप्रमेये प्रवर्तमानोऽहं प्रत्यवेयामिति भावः । हीत्यसन्देहं सूचयति । कालात्मनस्तव यद्भविष्यत्कर्म तत्कः पश्यतीति वा ॥ ॥ ४१ ॥

छलारी — ब्रह्मा किमवादीदिति तत्राह ॥ स्थानमिति । द्विपरार्धसंज्ञे ममायुःपूर्तिलक्षणे हरिक्रीडावसाने । प्रलय इति यावत् । सहविश्वं चराचरप्रपञ्चसहितम् । एतन्मदीयं स्थानं सन्दिधक्षोः सन्दग्धुमिच्छोर्हरेर्भविष्यत्कर्म पश्यति को जानाति ॥ ४१ ॥

अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः ।
सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्नाऽर्पितं लोकहितं वहामः ॥ ४२ ॥

सत्यधर्मीया — वयं किङ्कराः किं करवाम तव गतिं त्वमेव विलोकयेत्यर्थात्सूचयति ।। अहमिति। भव इति यदुद्भवस्तव तद्दशेदृशीति ध्वनयितुम् । तदाऽच्युतो भवसाचिव्यमचरदिति तदध्वरध्वंसः कृतो न स्वसामर्थ्येनेति ध्वनयितुं दक्षेत्युक्तिः । त्वयि याते तमेव शरणं सोऽवेच्छान्तमूर्तिरिति ध्वनयितुं कृतपदाहतिरपि महोन्नतिर्जात इति भृगूदीरणमिति ज्ञेयम् । अभ्यर्हितत्वाद्दक्षपुरस्कृतिः । एतौ दक्षभृगू प्रधानौ येषां ते । सुरेशादेर्मुख्यत्वेप्युक्तहेतुनैवानन्तरग्रहणमिति ज्ञेयम् । इति वयं सर्वे यन्नियमं त्वमेवं वर्तस्व त्वमेवमित्याज्ञालक्षणं व्रतम् । प्रपन्ना ओमिति शरणागताः सन्तस्तेनैवार्पितं मूर्ध्ना वहामः । लोकहितं तदुद्दिश्येति वा नियमविशेषणम् । इदं प्रमेयं लोकहितं लोकविततमिति वा । हि गतौ वृद्धौ चेत्युक्तेः ।। ४२ ।।

छलारी — प्रजेशः कश्यपो भूतेशो यक्षादिः भूतपतिः कुबेरः सर्वे वयम् । यन्नियमं यदाज्ञां शिरसा वहामः । तद्भक्तद्रोहिणं त्वां रक्षितुम् । न समर्था इत्यध्याहारेण सम्बन्धः । कीदृशा वयम् । मूर्ध्ना । पादमूलमिति शेषः । शरणं प्रपन्नाः । कथं भूतं नियमम् । लोकहितमर्पितम् । सप्तसु प्रथमेति सूत्रात् । लोकहिताय स्वेनैव निरूपितमित्यर्थः ।। ४२ ।।

श्रीशुक उवाच —

प्रत्याख्यातो विरिञ्चेन विष्णुचक्रोपतापितः ।
दुर्वासाः शरणं यातः शर्वं कैलासवासिनम् ।। ४३ ।।

सत्यधर्मीया — यद्यपि भव इति स्वयंभुवा तदा सदाशिवोऽपि न त्वत्पालक इति प्रत्याख्यातस्तथाऽपि प्राणाशा बलवती तदातुराणां नाङ्गस्मरणमिति शरणं शर्वं गत इति वक्ति ।। प्रत्याख्यात इति । विष्णुचक्रोपतापितः । अनेन तस्य कामाभिमन्यमानकतया स्ववैरमप्येवं सिसाधयिषुश्चेति ध्वन्यते । तथोक्तम् । रथाङ्गत्वमवाप कामः । तावेव जातौ भरतश्च साक्षाच्चक्रतनुरित्याचार्यैर्महातात्पर्यनिर्णये तृतीयनवमयोरध्याययोः ।। ४३ ।।

छलारी — प्रत्याख्यातो निराकृतः । विष्णुचक्रेण तापितः सन्तापितः ।। ४३ ।।

श्रीशङ्कर उवाच —

वयं न तात प्रभवाम भूम्नो भवन्ति काले न भवन्ति हीदृशाः ।
यस्मिन् परेऽन्येप्यजजीवकोशाः सहस्रशो यत्र वयं भ्रमामः ।। ४४ ।।

सत्यधर्मीया — शङ्करोऽपि किं करोमि किङ्करस्तस्याहमरे वत्स तमेवोपगच्छेत्युपायमुपादिशदिति शंसति ॥ शङ्कर इत्यादिना । हे तातेति स्वपोतताप्रेमविशेषतः सम्बोधनं । वयं न प्रभवाम तवावने न समर्थाः स्यामः । कुत इत्यत आह ॥ भूम्न इति । पूर्णस्य । भावभवित्रोरभेदादेवमुक्तिः । ईदृशा मादृशाः काले सृष्टिकाले भवन्ति न भवन्ति च काले संहारकाले । यस्मिन्सहस्रशो वयं भ्रमामस्ते यत्र परे विष्णौ । अन्येऽप्यज इत्यन्वयः ॥ ४४ ॥

छलारी — शङ्करोऽपि स्वां शक्तिं वक्तीत्याह ॥ वयमिति । हे तात । वयं न प्रभवाम । सुदर्शनं निवारयितुं न समर्थाः । कुतः । यस्माद्भूम्नो गुणपूर्णाद्धरेरीदृशा वर्तमाना ब्रह्माण्डसदृशा अन्येऽपि भूतभविष्यतोऽजजीवकोशा अजस्य चतुर्मुखस्य जीवकोशाः जीवाख्यधननिधानस्थानभूत ब्रह्माण्डाख्यकोशाः सृष्टिकाले भवन्ति प्रलयकाले नश्यन्ति । यत्र ब्रह्माण्डकोशेषु भ्रमामस्ते ब्रह्माण्डकोशा यस्मिन्परे परमात्मनि । संतीति शेषः । परोरिपरमात्मनोरित्यभिधानम् । तमेव शरणं याहीति वक्ष्यमाणेनान्वयः ॥ ४४ ॥

अहं सनत्कुमारश्च नारदो भगवानजः ।
कपिलोऽपान्तरतमा देवलो धर्म आसुरिः ॥ ४५ ॥

सत्यधर्मीया — इतःपरं परं रक्षकं कमपि मत्वा न व्रजेति तदाशाभ्रमणभ्रमं भ्रंशयति ॥ अहमिति । अजो भगवान् ब्रह्मा । कपिलोऽयं भगवतोऽन्यः साधुः । अपान्तरतमा इति सार्वत्रिकः पाठः । अपान्तरतमोदेवल इति पाठे काचित्के अपान्तरतमसा सहितश्चासौ देवलश्चेति विग्रहः ॥४५॥

छलारी — भवान्सर्वपूज्योऽजोऽपि ब्रह्माऽपि । अपान्तरतमस्तन्नामा मुनिरहमादयः सर्वे यस्य हरेर्मायामिच्छां किं विषयामिति न विदामेत्यर्थः ॥ ४५ ॥

मरीचिप्रमुखाश्चान्ये सिद्धेशाः पारदर्शिनः ।
विदाम न वयं सर्वे यन्मायां माययाऽऽवृताः ॥ ४६ ॥

सत्यधर्मीया — पारदर्शिनः पर्याप्तज्ञानत्वेन संप्रतिपन्ना वयं सर्वे । मायया तदिच्छयाऽऽवृता इति तन्मायां न विदाम न जानीमः ॥ ४६ ॥

छलारी — पारदर्शिनो वेदशास्त्रपारङ्गताः । सर्वज्ञा अपीति यावत् । मायया प्रकृत्याऽऽवृता बद्धाः ॥ ४६ ॥

तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः ।
तमेव शरणं याहि हरिस्ते शं विधास्यति ॥ ४७ ॥

सत्यधर्मीया — तस्य विश्वेश्वरस्य । इदं शस्त्रं नो दुर्विषहं सोढुमशक्यम् । स्वयमसमर्थतामुक्त्वाऽऽशीराशास्त इत्याह ॥ हरिस्ते शं विधास्यतीति ॥ ४७ ॥

छलारी — शस्त्रं चक्रं दुर्विषहं सोढुमशक्यम् ॥ ४७ ॥

ततो निराशो दुर्वासाः पदं भगवतो ययौ ।
विकुण्ठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह ॥ ४८ ॥

सत्यधर्मीया — ततस्त्रिलोचनवचनतः । निराशो गन्तव्यस्थानान्तरविरहादाशाशून्यः । यत् श्रीनिवासः । नोपलक्षणमिदमिति वदति ॥ श्रिया सहेति । अधिशीङ्स्थासांकर्मेति यदिति द्वितीया । तद्वैकुण्ठाख्यं भगवतः पदं ययौ ॥ ४८ ॥

छलारी — विकुण्ठाख्यं वैकुण्ठाख्यम् । यतो यस्मिन्वैकुण्ठेऽध्यास्ते वसति ॥ ४८ ॥

सन्दह्यमानोऽजितशस्त्रवह्निना तत्पादमूले पतितः सवेपथुः ।
आहाच्युतानन्त सदीप्सित प्रभो कृतागसं मामव विश्वभावन ॥ ४९ ॥

सत्यधर्मीया — तत्पादमूलेऽजितपादपीठे । अच्युतानन्त सदीप्सित विश्वभावन प्रभो । कृतागसं कृतमागोऽपराधो येन स तम् । मामवेति पतित इत्यन्वयः ॥ ४९ ॥

छलारी — अजितशस्त्रं चक्रं तस्य वह्निना । सवेपथुः सकम्पः सतामीप्सित इष्टद । हे विश्वभावन विश्वोत्पादक ॥ ४९ ॥

अजानता ते परमानुभावं कृतं मयाऽघं भवतः प्रियाणाम् ।
विधेहि तस्यापचितिं विधातर्मुच्येत यन्नाम्न्युदिते नारकोऽपि ॥ ५० ॥

सत्यधर्मीया — मम कोऽपराधो भवता कृतो येनायमुपरोधस्तवायात इत्यतो वदति ॥ अजानतेति । ते परमानुभावमजानताऽविदुषा मया । भवतः प्रियाणाम् । यद्यप्येकोऽम्बरीषस्तथाऽपि मुमूर्षोर्भ्रमन्नर एव प्रेतनाथदूता इवेत्याभाणकवद्बहूपहतिहेतुतया बह्वात्मा भासत इति प्रियाणामिति

बहुवचनम् । यद्वा । पानीयपारणानुमतिकृद्विजसमाजविवक्षया बहुवचनम् । अघं पापप्रापकविरुद्धाचरणं कृतम् । तथा चेत्त्वं ते च मिलित्वा गर्त्ते पतत मम किमित्यतस्त्वय्येव कृतप्रायमित्यभिप्रायतोऽप्याहं ।। अजानतात इति । अजश्च चतुराननश्चानश्च प्राणश्च तयोस्ताते । त्वद्विषय एवेति यावत् । अघं कृतम् । तस्य तत्पापस्यापचितिं प्रायश्चित्तं विधेहि कुरु । प्राप्ताया आपदः परिहारो यन्नाममात्रोच्चारतो भविष्यति भविष्यतोऽनर्थस्य साक्षात्तव दर्शनं कथं न भवेन्मथकं मधुमथनेति कथयति । यन्नाम्न्युदिते उच्चारिते नारकोऽपि नरकलोकस्थोऽपि लोकस्तस्मान्मुच्येताच्युत कियन्ममोचनं तवेति भाव इति । हे अजानता ब्रह्मानत अशब्दवाच्येति वा । हे विधातरिति सामर्थ्यं करण आह । यतस्त्वन्नाम्नीयं विधा प्रकारोऽस्ति । ईहितस्य मच्चेष्टितस्य विधातः कर्तरिति वा ।।५०।।

छलारी — अपराधं निवेदयन्प्रार्थयते ।। अजानतेति । अघं पापरूपाय राज्ञेऽघं दुःखम् । तद्भक्तद्रोहे प्रायश्चित्तं न पश्यामीति चेत्तत्राह ।। यन्नाम्नीति । तस्य तव किमशक्यमिति भावः ।।५०।।

श्रीभगवानुवाच —

अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ।
साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ।। ५१ ।।

सत्यधर्मीया — दुर्वाससा स्वमोचनार्थं याचितः स्वत एतर्हि तद्दुर्घटयन्काश्चिद्धार्टीं नटयति ।। अहमिति । हे द्विज । अस्वतन्त्र इव नत्वस्वतन्त्रः । भक्तपराधीनः । पराधीनशब्दोऽखण्डोऽधीनमात्रमाह । भक्ताधीन इत्यर्थः । ननु यदि त्वं भक्तपराधीनो हन्त अहं हे हरे किं न तव भक्त इति रक्तनेत्रो न भव, प्रकृते त्वेतदुदयकृद्योऽहमिति विजानीहीत्यप्याह ।। भक्तपराधीन इति । भक्तादन्नात्परं विलक्षणमशितानशितरूपं यस्य स भक्तपरोऽम्बरीषस्तस्याधीन इति वा । भिस्सा स्त्री भक्तमन्धोन्नमित्यमरः । किमिति स्वतन्त्रस्यास्वतन्त्रवद्भवनमित्यतस्तदुपपादयति ।। साधुभिरिति । साधुभिर्भक्तैः । ग्रस्तहृदयो ग्रस्तं हृदयं यस्य स तथा । हृदयं च मनोऽभिप्रायो वा । भक्तजनाश्च प्रिया यस्य सः । इदानीं न दयासमयस्त्वयीति तथा सम्बोधयति ।। अहं भक्तेति । अहं तावद्भक्तेति वा ।। ५१ ।।

छलारी — अस्वतन्त्र इव न त्वस्वतन्त्रः । ग्रस्तहृदयो वशीकृतान्तःकरणः ।। ५१ ।।

नाहमात्मनमाशासे मद्भक्तैः साधुभिर्विना ।
श्रियं चात्यन्तिकीं ब्रह्मन् येषां गतिरहं परा ।। ५२ ।।

सत्यधर्मीया — साधुभिर्मद्भक्तैर्विनाऽऽत्मानमपि नाशासे । छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिमिति भगवदुक्तेः । तात्पर्यं तु नैतद्द्वन्द्वं सम्भवीति ज्ञेयम् । आत्यन्तिकीं सदाऽवियोगिनीं श्रियं रमामपि नाशास इति किं वक्तव्यमिति भावः । येषामहं परागतिस्तैः ॥ ५२ ॥

छलारी — ग्रस्तहृदयत्वं नाम किमित्यतस्तद्विवृणोति ॥ नाहमिति ॥ नाशासे नेच्छामि । आत्यन्तिकीमत्यन्तप्रीतिविषयाम् ॥ ५२ ॥

ये दारागारपुत्रादीन् प्राणान् वित्तमिदं परम् ।
हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥ ५३ ॥

सत्यधर्मीया — तन्महिमानमाह ॥ य इति । इदं मह्यादिकं परं स्वर्गादिकम् । उत्सहे क्षमः स्याम् ॥ ५३ ॥

छलारी — इमं लोकं परं स्वर्गलोकं च हित्वेत्यर्थः ॥ ५३ ॥

मयि निर्बद्धहृदयाः साधवः समदर्शिनः ।
वशीकुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥ ५४ ॥

सत्यधर्मीया — निर्बद्धं नितरां बद्धं हृदयं येषां ते । सत्यः स्त्रियः सत्पतिं यथा तथा भक्त्या मां वशीकुर्वन्ति । वशीत्यव्ययं पदद्वयम् । तथाऽप्यव्यवधानप्रयोगो नु प्रयोगस्थल इव ज्ञेयः । विस्तृतं चैतद्भाष्यदीपिकायुक्तिवात्यायामस्मत्कृतायामनुसन्धेयम् । सत् स्त्रियः सत्पतीन्यथेति वक्तव्ये यदवादीदेकवचनान्तं सत्पदं तेनैकस्यापि बहुयोषिद्विवाहयोग्यताऽस्तीति द्योतयामास । तथा च तृतीयपञ्चकं ब्राह्मणम् । एकस्य बह्व्यो जाया भवन्ति । नैकस्यै बहव इति ॥ ५४ ॥

छलारी — तदत्यागे भक्त्या वशीकरणमेव कारणं नान्यदित्याह ॥ मयीति । निर्बद्धहृदया एकाग्रचित्ताः ॥ ५४ ॥

मत्सेवया प्रदिष्टं च सालोक्यादिचतुष्टयम् ।
नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत् कालविप्लुतम् ॥ ५५ ॥

सत्यधर्मीया — तज्जनात्यजने तन्मद्भजनमेव कारणं नेतरदितीरयति ॥ मत्सेवयेति । तया प्रसन्नेन मया प्रदिष्टमतिसृष्टं सालोक्यादिचतुष्टयम् । चतुर्विधं निर्वाणम् । शाश्वतिकसुखं तदपि

नेच्छन्ति । तर्हि किं तृप्ता इत्यत आह ।। सेवया पूर्णा इति । अन्यत्कालविप्लुतं स्वर्गादि नेच्छन्तीति कुतो वक्तव्यमवचनेऽपि तल्लाभादिति भावः ।। ५५ ।।

छलारी — इदं चात्यागे कारणमित्याह । मत्सेवयेति । प्रदिष्टं चादिष्टम् । मया प्राप्तमपीति यावत् । कालेन विप्लुतं नष्टम् । स्वर्गादि नेच्छन्तीति कुतः किं वक्तव्यमित्यर्थः ।। ५५ ।।

साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् ।
मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपि ।। ५६ ।।

सत्यधर्मीया — तत्कोपयापनं नाल्पीयसा जल्पनेन भविष्यतीति निजभजकस्वभावं पुनरावेदयति ।। साधव इति । मह्यं मम हृदयं प्रियाः । एवमन्यत्रापि मदन्यत्ते न जानन्ति । पुत्रात्प्रेयोवित्तात्प्रेयः सर्वस्मात्प्रेय इत्यादि । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मत इत्यादिस्मृतेः । अहं मनागपीत्युक्त्या कदाचिन्मम मायावृतास्त इति व्यत्यासेऽपि न मम तदनावृतत्वादनन्यथाभावस्तत्र निदर्शनं त्वं त्वामेव विलोकयेति ध्वन्यते । कुतस्तद्ग्रस्तत्वमित्यत आह ।। नाहंतेभ्य इति । न विद्यते हन्ता येषां ते नाहन्ताः । नसमासः । तेषामिभ्यः स्वामीति ।।५६।।

छलारी — इतोऽपि मदन्यापेक्षा तेषां नास्तीत्याशयेनाह ।। साधव इति । साधवो ज्ञानिनो मह्यं मम हृदयं प्रियाः । तुशब्दो हेतौ । साधवो मम हृदयम् । अहं साधूनां हृदयमिति यस्मात्तस्मात्ते मदन्यं प्रियं न जानन्ति । अहमपि तेभ्यः साधुभ्यो मनागप्यल्यमपि प्रियमन्यं न जानामीत्यन्वयः ।। ५६ ।।

उपायं कथयिष्यामि तव विप्र शृणुष्व तत् ।
अयं ह्यात्माभिचारस्ते यतस्तं यातु वै भवान् ।। ५७ ।।

सत्यधर्मीया — दिक्परिभ्रमसम्पादितश्रमं प्रति सम्प्रतीयत्या कथाकंथया किमच्युता-त्पापात्प्रच्युतिं वदेत्यत आह ।। उपायमिति । आत्माभिचार आत्मना स्वेनैव कृतोऽभिचारः कृत्यारूपो यतो यन्निमित्तकः ।। ५७ ।।

छलारी — प्रकृते किमायातमित्यत आह ।। उपायमिति । आत्मनस्तवैवाभिचारो हिंसा यतोऽभूत्तमेव शरणं यातु । अथवा आत्मना त्वया कृतोऽभिचारः कृत्याप्रयोगो यतो यस्मै कृतस्तम् ।। ५७ ।।

साधुषु प्रहितं तेजः प्रहर्तुः कुरुते भयम् ।
तपो विद्या च विप्राणां निःश्रेयसकरे उभे ।। ५८ ।।

सत्यधर्मीया —सा च तस्मै प्रयुक्तेति न युक्तं मम बाधनं तस्या इत्यतो बोधयति ।। साधुष्विति । साधुष्वेततदादिसदाचारिषु प्रहितं प्रेषितं तेजः क्षुद्रं मन्त्रसहितमर्चिः सृतिहेतुदेवतारूपं ज्योतिर्वा । तेजो बले प्रभावेऽन्ने ज्योतिष्यर्चिषि रेतसीत्यभिधानम् । प्रहर्तुः प्रयोक्तुः भयं कुरुते । यत्तपोविद्यायुजो ममेयं दशा कुत ईशेति न शंसति ।। तप इति । निःश्रेयसं मोक्षः । अयतुरनिपातः ।। ५८ ।।

छलारी — तस्मै प्रयुक्तं स्वात्मानं कथं बाधत इति तत्राह ।। साधुष्विति । प्रहितं प्रत्युक्तम् ।। ५८ ।।

त एव दुर्विनीतस्य कल्प्येते कर्तुरन्यथा ।
ब्रह्मंस्तद् गच्छ भद्रं ते नाभागतनयं नृपम् ।
क्षमापय महाभागं ततः शान्तिर्भविष्यति ।। ५९ ।।

सत्यधर्मीया — यद्यपि तथाऽपि दुर्विनतिस्य ते तपोविद्ये कर्तुरविनयधाटीमाटीकमानस्य । अन्यथेदृशदशायै कल्प्येते । विद्या हि विनयावाप्त्यै विनयो हि भूषयति सर्वरसमित्यादेः । परीक्षार्थं यतस्तं यातु वै भवानिति भगवानुक्तवाननन्तरमनन्तस्तनुयाद्दयां स्वयमिति न मतिस्तव भूयादियमेवेदानीं सर्वथा क्षेमगमनिकेति निगमयति ।। ब्रह्मन्निति । नाभागतनयम् । अनेन प्रह्लादादि-वदयं न स्वमात्रपर्याप्तभक्तः किन्तु पारंपर्येण महानुभाव इति ध्वनयति ।। ५९ ।।

छलारी — क्षुद्रोपलक्षणं तेजः प्रहर्तुः प्रयोक्तुः । तपोविद्यासम्पन्नस्य मम कथमनर्थः समजनीति मा स्म विस्मयं मा कार्षीरित्याह ।। तप इति । दुर्विनीतस्याविनीतस्य परेषामन्यथा कर्तुः पुरुषस्यान्यथा कल्प्येते इत्यनुषङ्गः । नाभागतनयमम्बरीषम् । शान्तिस्तापशान्तिः ।। ५९ ।।

श्रीशुक उवाच —

एवं भगवताऽऽदिष्टो दुर्वासाश्चक्रतापितः ।
अम्बरीषमुपावृत्य तत्पादौ दुःखितोऽग्रहीत् ।। ६० ।।

सत्यधर्मीया — तत्पादावम्बरीषचरणौ ।। ६० ।।

छलारी — अम्बरीषं प्रत्युपावृत्य प्रमत्यावृत्य ।। ६० ।।

तस्य तद् व्यसनं वीक्ष्य पादस्पर्शविलज्जितः ।
अस्तावीत् तद्धरेरस्त्रं कृपया पीडितो भृशम् ॥ ६१ ॥

सत्यधर्मीया — विलज्जितः स्वस्य वर्णतोऽवरत्वात् । यः स्वेनेडितः स्तुतोऽपि ईडितः पीडित इति द्वेधा वृत्ती ज्ञेये । दुर्वासास्तद्व्यसनं वीक्ष्य कृपया भृशं पीडितः । हरेरस्त्रमस्तावीदस्तौषीत् ॥६१॥

छलारी — अस्तावीत्स्तुतिं चकार । अस्त्रं चक्रायुधम् ॥ ६१ ॥

अम्बरीष उवाच —

त्वमग्निर्भगवान् सूर्यस्त्वं सोमो ज्योतिषां पतिः ।
त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेन्द्रियाणि च ॥ ६२ ॥

सत्यधर्मीया — ज्योतिषां नक्षत्रादीनाम् । मात्राः शब्दाद्याः ॥ ६२ ॥

छलारी — चक्रं चक्रान्तर्यामिणं भगवन्तं भक्त्युद्रेकात्सङ्कल्य्य स्तौति ॥ त्वमग्निरित्यादिना । अग्न्यादयः सर्वे त्वदधीनसत्तादिमन्त इत्यर्थः । ''यदधीना यस्य सत्ता तत्तदित्येव भण्यत'' इत्युक्तेः । त्वच्छक्त्यैव अग्न्यादयः स्वस्वकार्यं कुर्वन्तीति भावः । ''तमेव भान्तमनुभान्ति सर्वं तस्य भासा सर्वमिदं विभाती''ति श्रुतेः । ज्योतिषां नक्षत्राणां पतिः सोमस्त्वम् । मात्राः शब्दादय इन्द्रियाणि श्रोत्रादीनि ॥ ६२ ॥

सुदर्शन नमस्तुभ्यं सहस्राराच्युतप्रिय ।
सर्वास्त्रघातिन् विप्राय स्वस्ति भूयादिडस्पते ॥ ६३ ॥

सत्यधर्मीया — सहस्रमराणि दलानि यस्य तत्सम्बुद्धिः । सर्वास्त्राणि प्रतिभटमुक्तानि घातयितुं शीलमस्यास्तीति तेषां घातोऽस्यास्तीति वा । विप्राय दुर्वाससे । इडस्पते अन्नस्वामिन् अन्नमूलोऽयं कलह इति तच्छान्त्या भाव्यमित्येवमुक्तिः । गतम् ॥ ६३ ॥

छलारी — सहस्राण्यराणि दलानि यस्य हे सहस्रार । विप्राय दुर्वाससे । इडस्पते पृथ्वीपते ॥ ६३ ॥

त्वं धर्मस्त्वं धृतिः सत्यं त्वं यज्ञोऽखिलयज्ञभुक् ।
त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परम् ॥ ६४ ॥

सत्यधर्मीया — सर्वत्रानुपपद्यमानमन्तर्यामिण्यन्वेतव्यम् । पुरुषो हि हरिस्तत्सम्बन्धि ॥ ६४ ॥

छलारी — ब्राह्मणरक्षणं तव युक्तमेवेत्याह ॥ त्वं धर्म इति ॥ सर्वात्मा सर्वस्वामी । पौरुषं पुरुषस्य हरेः सम्बन्धि परं तेजः परमं बलं त्वमेव । भगवत्सामर्थ्याभिव्यञ्जकमित्यर्थः । तेजो बले प्रभावे चेत्यभिधानम् ॥ ६४ ॥

नमः सुनाभाखिलधर्मसेतवे अधर्मशीलासुरधूमकेतवे ।
त्रैलोक्यगोपाय विशुद्धवर्चसे मनोजवायाद्भुतकर्मणेऽस्तु ते ॥ ६५ ॥

सत्यधर्मीया — सुनाभ शोभना नाभिः प्रान्तभागो यस्य तत् । नाभि प्राण्यंगके क्षेत्रे चक्रप्रान्ते चक्रवर्तिनीति विश्वः । नाभिरक्षत्रिये क्षेत्रे उभावन्यत्र पुंसि । नाभिर्मुख्यनृपे चक्रमध्ये क्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात्स्त्रियाम् कस्तूरिकामद इति । रभसश्च मुख्यराट् क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामद इति लिङ्गानुशासनकोशैः शोभना नाभिर्यस्येति सुनाभं तत्सम्बुद्धिः । गतम् । अखिलधर्मसेतवे समस्तधर्ममर्यादास्थापकाय । अधर्मशीला ये असुरास्तेषां धूमकेतुर्धूमध्वजोऽग्निस्तस्मै । त्रैलोक्यगोपाय त्रिलोकीरक्षकाय । मनसो जव इव जवो यस्येति वा मनसोऽपि जवो यस्येति वा तस्मै ते नमोऽस्तु ॥ ६५ ॥

छलारी — सुनाभ सुदर्शन । अखिलधर्माणां सेतुस्थानीयाय धर्मरक्षकायेत्यर्थः । अधर्मशीलानामसुराणां धूमकेतवे दाहकायेत्यर्थः । त्रैलोक्यं गोपायतीति तथा तस्मै । गुपु रक्षण इति धातोः । विशुद्धमत्युज्वलं वर्चस्तेजो यस्य तस्मै ॥ ६५ ॥

यदा विसृष्टस्त्वमनञ्जनेन वै बलं प्रविश्योर्जितदैत्यदानवम् ।
बाहूदरोर्वङ्घ्रिशिरोधराणि वृक्णन्नजस्रं प्रधने विराजसे ॥ ६६ ॥

सत्यधर्मीया — अनंजनेन न विद्यतेऽञ्जनं दोषो यस्मिन्सोऽनञ्जनो निर्दोषस्तेन हरिणा यदा विसृष्टो मुक्त ऊर्जिता दैत्यदानवाश्च यस्मिंस्तद्बलं प्रविश्य प्रधने युद्धे । बाहूदराणि च तान्यूर्वङ्घ्रिशिरोधराणि च । अतो गलः शिरोधरः कण्ठ इति धनञ्जयविरोधाभावः प्राण्यङ्गैकवद्भावाभावौ ज्ञेयौ । तानि वृक्णन् छिन्दन् । अजस्रं निरन्तरं विराजसे ॥ ६६ ॥

छलारी — अनंजनेन निरंजनेन हरिणा यदा विसृष्टः प्रेषितस्तदोर्जिता दैत्यदानवा यस्मिंस्तद्बलं प्रविश्य प्रधने युद्धे तेषां बाव्हादीन्वृक्णन् छिन्दन्विराजसे । शिरोधरं कण्ठः ॥ ६६ ॥

त्वत्तेजसा धर्ममयेन संहृतं तमः प्रकाशश्च दृशोर्महात्मनाम् ।
दुरत्ययस्ते महिमा गिराम्पते त्वद्रूपमेतत् सदसत् परावरम् ॥ ६७ ॥

सत्यधर्मीया — धर्ममयेन त्वत्तेजसा तमोऽज्ञानमन्धकारश्च संहृतम् । महात्मनां दृशोः । माहात्मा माहात्मा महात्मा चेति विग्रहान्तर्गतैकवचनान्तमहात्म्यैकपदबोध्यं महाव्यक्तेरीदृग्द्वयमिति दृशोरित्युक्तिः । त्वत्तेजसैव प्रकाश उभयविधो भवति । हे गिरां पते महिमा दुरत्ययः केनापि त्यक्तुमशक्यः । एतत्परावरं सदसन्मूर्त्तामूर्त्तं जगत्त्वद्रूपं त्वं रूपं प्रतिष्ठापयितृ यस्य तत्तादृक् । यद्वा सनादीनां द्वित्वविवक्षया जातिः प्रायेणेति वामनोक्तेर्जात्यभिप्रायेणेति वा द्विवचनम् । आह च माघः । प्रकाशकार्कस्य गुणौ दधानाः । स्तनौ तरुण्याः परिवव्रुरेतमिति ॥ ६७ ॥

छलारी — त्वत्तेजसा तमः संहृतम् । महात्मनां सूर्यादीनां प्रकाशो दृशश्च संहृतः स्तंभितः । कथं भूतेन । धर्ममयेन देदीप्यमानेनेत्यर्थः । धृक्षरणदीप्त्योरिति धातोः । गिरां पते ऋगादिवेदप्रतिपाद्य । परं चापरं चेति द्वन्द्वः । ज्ञानवत्त्वेन । परं चेतनं तद्रहितत्वेनावरमचेतनम् । चेतनाचेतनात्मकमित्यर्थः । सदसत्स्थूलसूक्ष्मरूपम् । एतदिदं जगत्त्वद्रूपं त्वत्प्रतिमा ॥ ६७ ॥

स त्वं जगत्राणखलप्रहाणये निरूपितः सर्वसहो गदाभृता ।
विप्राय चास्मत्कुलदैवहेतवे विधेहि भद्रं तदनुग्रहो हि नः ॥ ६८ ॥

सत्यधर्मीया — हे जगत्त्राण । जगतस्त्राणं रक्षणं येन तत्सम्बुद्धिः । खलप्रहाणये खलानां प्रहाणिर्हतिस्तस्मै । सर्वं सहत इति सर्वसहः । गदाभृता भगवता निरूपितो विनियुक्तः स त्वम् । अस्मत्कुलदैवहेतवे तत्प्रीत्यर्थं विप्राय मङ्गलं धेहि । तेन किमित्यत आह । तदेतद्विधानां हि यतो नोस्माकमुपर्यनुग्रहः कृतो भवति ॥ ६८ ॥

छलारी — किञ्च भगवन्नियुक्तेन त्वया खलानामेव दण्डः कार्यः साधवस्तु रक्षणीया अतो विप्ररक्षणेनास्माननुग्रहाणेत्याह ॥ स त्वमिति । हे जगत्त्राण । गदाभृता निरूपितो नियुक्तः सर्वसहो भक्तापराधसहनशीलो अस्मत्कुलदैवहेतवे । भाग्यलाभाय विप्राय । भद्रं विधेहि तदेव ममानुग्रहः ॥ ६८ ॥

यद्यस्ति दत्तमिष्टं वा सधर्मो वा स्वनुष्ठितः ।
कुलं नो विप्रदैवं चेद् द्विजो भवतु विज्वरः ॥ ६९ ॥

सत्यधर्मीया — आपरोक्ष्येणोक्त्वा परोक्षतोऽपि चिन्तयति ।। यदीति । दत्तम् । इष्टमिष्टिः नः कुलं विप्रदैवं विप्रा दैवं यस्य तत् । चेद्यदि द्विजोऽयं दुर्वासाः । विज्वरोऽनुपतापो भवतु ।। ६९ ।।

छलारी — सर्वसुकृतार्पणेन विप्ररक्षां प्रार्थयते ।। यद्यस्तीति द्वाभ्याम् । विप्रो दैवं दैवता यस्मिन् । विज्वरः सन्तापरहितः ।। ६९ ।।

यदि मे भगवान् प्रीत एकः सर्वगुणाश्रयः ।
सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ।। ७० ।।

सत्यधर्मीया — सर्वगुणाश्रयः । एको मुख्यः । भूतानां स्वामीति । भावो भक्तिस्तेन प्रीतश्चेत् । द्विजो विज्वरो भवतु ।। ७० ।।

छलारी — सर्वभूतात्मभावेन सर्वभूतानामयमात्मा स्वामी । सर्वोत्कृष्ट इति भावेन भक्त्या । यद्येकः प्रधानो भगवान् प्रीतः ।। ७० ।।

श्रीशुक उवाच —

इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनम् ।
अशाम्यत् सर्वतो विप्रं प्रदहद् राजयाञ्चया ।। ७१ ।।

सत्यधर्मीया — राज्ञः संस्तुवतः सतः । विष्णुचक्रं सर्वतः प्रदहदपि । सुदर्शनं शोभनं दर्शनं सत् । अभीकरमिति यावत् । अशाम्यत् शान्तकरमभवत् । तत्र तत्र राजयाञ्चयेति ।। ७१ ।।

छलारी — संस्तुवतः सतः प्रार्थयतः सत इत्यपि ज्ञेयम् । राजयाञ्चया राजस्तुत्या चेत्यपि ज्ञेयम् । अशाम्यदित्यन्वयः । सर्वतो दिक्षु विप्रं प्रदहत् ।। ७१ ।।

स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः ।
प्रशशंस तमुर्वीशं युञ्जानः परमाशिषः ।। ७२ ।।

सत्यधर्मीया — अस्त्रस्याग्निस्तत्तापेन । स्वस्तिरस्यास्तीति वा स्वस्त्यस्यास्तीति वा विग्रहः । क्षेमवान्परमाशिषः । अविफला इति परमाश्च ता आशिषश्च । ततः परम् । आशिष इति वा ।। ७२ ।।

छलारी — अस्त्राग्निः सुदर्शनाग्निः ।। ७२ ।।

दुर्वासा उवाच —

अहो अनन्तदासानां महित्वं दृष्टमद्य मे ।
कृतागसोऽपि यद् राजन् मङ्गलानि समीहसे ॥ ७३ ॥

सत्यधर्मीया — मे मया । अनन्तदासानाम् । महित्वं माहात्म्यमद्य दृष्टम् । महित्वमस्तु वज्रिण इत्यृग्भाष्यटीकाटिप्पणीषु । तस्यैवास्तु महित्वं महत्त्वं पूर्णत्वम् । महेरौणादिक इप्रत्ययः । महेर्भावो महित्वमितीत्युक्तेः । यद्यस्माद्राजन् कृतागसोऽपि मे मद्विषये मङ्गलानि समीहसे इच्छसीति ॥ ७३ ॥

छलारी — समीहसे इच्छसि ॥ ७३ ॥

दुष्करं किन्नु साधूनां दुस्त्यजं वा महात्मनाम् ।
यैः सङ्गृहीतो भगवान् सात्वतामृषभो हरिः ॥ ७४ ॥

सत्यधर्मीया — यैर्भगवान् सात्वतामृषभः सङ्गृहीतः स्वामित्वेन स्वीकृतस्तेषां साधूनां दुष्करं किं न किमपि । तेषां महात्मनाम् । दुस्त्यजं वा किम्विति ॥ ७४ ॥

छलारी — ममानिष्टकरणं तवासाध्यं न भवति समर्थत्वादित्याह ॥ दुष्करमिति । साधूनां क्षमया साधूनां स्वतः समर्थानामित्यर्थः । मदागमनपर्यन्तमन्यैर्दुस्त्यजाहारस्य त्यागस्य कृतत्वात्त्वन्माहात्म्यं किं वर्णनीयमित्याशयेनाह ॥ दुस्त्यजं वेति । महात्मानां महानात्मा मनो येषां ते मनोजयवतामित्यर्थः । सङ्गृहीतो वशीकृतः ॥ ७४ ॥

यन्नामश्रुतिमात्रेण पुमान् भवति निर्मलः ।
तस्य तीर्थपदः किं वा दासानामवशिष्यते ॥ ७५ ॥

सत्यधर्मीया — तीर्थपदस्तस्य दासानां । किमवशिष्यते । शुभेषु प्राप्यत्वेन शिष्टं भवेत् । सर्वं ते लभंत इति भावः ॥ ७५ ॥

छलारी — पुमान्भक्तिरहितोऽपि । तीर्थपदस्तीर्थपादस्य । दासानां भक्तानां किं पापमवशिष्यते । न किमपीत्यर्थः ॥ ७५ ॥

राजन्ननुगृहीतोऽहं त्वयाऽतिकरुणात्मना ।
ममाघं पृष्ठतः कृत्वा प्राणा यन्मेऽभिरक्षिताः ॥ ७६ ॥

सत्यधर्मीया — यद्राजन् । मे प्राणा ममाघं कृत्यादिकृत्यजं पृष्ठतः कृत्वा पश्चात्कृत्य । अलक्षीकृत्येति यावत् । अतिकरुणात्मनाऽभिरक्षितास्ततोऽहमनुगृहीतः ॥ ७६ ॥

छलारी — अतिकरुणात्मनाऽतिकरुणवता । अघमपराधम् ॥ ७६ ॥

राजा तमकृताहारः प्रत्यागमनकाङ्क्षया ।
चरणावुपसंगृह्य प्रसाद्य समभोजयत् ॥ ७७ ॥

सत्यधर्मीया — तदेव भक्षयिष्यामि कामिनि कवाटमुद्धाटयेति नीत्याऽयमायात इत्यनादरं न तव नांबरीष इति शुको द्वाभ्यां ब्रवीति ॥ राजेति । चरणावुपसंगृह्य समभोजयद्भोजयामासेति ॥ ७७ ॥

छलारी — राजेत्यादिश्लोकद्वयं शुकोक्तिः ॥ ७७ ॥

सोऽशित्वाऽऽहृतमानीतमातिथ्यं सार्वकामिकम् ।
तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरम् ॥ ७८ ॥

सत्यधर्मीया — सर्वकामिकमीप्सितं सर्वेष्टसम्बन्ध्यातिथ्यमतिप्रियमन्नमानीतमशित्वा भुक्त्वा तृप्त आत्मा मनो यस्य स सन् । सादरं भुज्यतामिति प्राह ॥ ७८ ॥

छलारी — अशित्वा भुक्त्वा । आतिथ्यमतिथिप्रियमन्नम् । सार्वकामिकं सर्वेषां कामिकमपेक्षाविषयम् । जनस्य राजयोगित्वादिति भावः । तृप्तात्मा सन्तुष्टमना दुर्वासाः ॥ ७८ ॥

प्रीतोऽस्म्यनुगृहीतोऽस्मि तव भागवतस्य वै ।
दर्शनस्पर्शनालपैरातिथ्येनात्ममेधसा ॥ ७९ ॥

सत्यधर्मीया — मेधाशब्दपर्यायोऽयं मेधःशब्दः । आत्मशब्दस्य नञ् दुसुभ्यः । प्रजामेधयोरित्यनुशिष्टान्यतमत्वाभावात् । आत्ममेधसा हरिमत्या । स्वधियेति वा । यया आत्ममेधसा आत्मनो मम मेधा यस्याहमेव तेन मयैव । मद्धेतुकामया सा हिंसा । तस्या मोचित इत्यनुगृहीत इति वा । सा तु हिंसायामिति विश्वः ॥ ७९ ॥

छलारी — सन्तोषोद्रेकात्पुनरपि वदति ॥ प्रीतोऽस्मीति श्लोकद्वयेन । आत्ममेधसा परमात्मज्ञानेन त्वमग्निरित्यादिना सुदर्शनस्तुतिकरणेन तज्ज्ञानस्याभिव्यक्तत्वादिति भावः ॥ ७९ ॥

कर्मावदातमेतत् ते गायन्ति स्वःस्त्रियो मुहुः ।
कीर्तिं परमपुण्यां च कीर्तयिष्यति भूरियम् ॥ ८० ॥

सत्यधर्मीया — स्वःस्त्रियः स्वर्गगांगनाः । अवदातं निर्मलम् । ते कर्म गायन्ति । इयं भूस्तत्स्थो जनः ॥ ८० ॥

छलारी — स्वर्गस्त्रियः । अवदातं शुभ्रम् । शुद्धं गायन्ति । भूरियं तत्रस्थो जनः ॥ ८० ॥

श्रीशुक उवाच —

एवं संकीर्त्य राजानं दुर्वासाः परितोषितः ।
ययौ विहायसाऽऽमन्त्र्य ब्रह्मलोकमहैतुकम् ॥ ८१ ॥

सत्यधर्मीया — अहैतुकं तात्कालिकं स्थिरं ॥ ८१ ॥

छलारी — विहायसाऽऽकाशमार्गेण । अहैतुकं हेतुकादिदुर्जनैरप्राप्यम् ॥ ८१ ॥

संवत्सरोऽत्यगात् तावत् यावत्तं नागतो गतः ।
मुनिस्तद्दर्शनाकाङ्क्षी राजाऽब्भक्षो बभूव ह ॥ ८२ ॥

सत्यधर्मीया — दूर्वासोगमनप्रत्यागमनयोः कियानन्तरागतः समय इत्यत आह ॥ संवत्सर इति। यावद्गतो मुनिस्तं प्रति नागतस्तावत् । संवत्सर एकोऽत्यगादतीतोऽभूत् । भूपः कथमवर्ततेत्यतः कीर्तयति । तद्दर्शनाकांक्षी राजा । अब्भक्षो नीरपारणो बभूवाभवदिति ॥ ८२ ॥

छलारी — तस्य धैर्यातिशयमाह ॥ संवत्सर इति । इतो गतो मुनिर्यावत्तं नृपं नागतस्तावत्संवत्सरोऽत्यगादन्तिक्रान्तोऽभूत् । मुनिदर्शनाकांक्षो राजा च तावदब्भक्षोऽभूत् ॥ ८२ ॥

गतेऽथ दुर्वाससि सोऽम्बरीषो द्विजोपभोगातिपवित्रमाहरन् ।
ऋषेर्विमोक्षं व्यसनाच्च बुद्ध्या मेनेऽस्ववीर्यं च परानुभावम् ॥ ८३ ॥

सत्यधर्मीया — द्विजोपभोगेन तद्भुक्तशेषतयाऽतिपवित्रं । आहरन् राजा बुध्या । अस्ववीर्यं मम न विद्यते सामर्थ्यं यस्मिंस्तम् । परानुभवं भगवतोऽनुभावो यस्य तं च ऋषेर्व्यसनाद्विमोक्षं मेने विषयीकृतवान् ॥ ८३ ॥

छलारी — उपभोगं भोजनं तेनातिपवित्रम् । अन्नमिति शेषः । आहरन् भुञ्जानो बुद्ध्या स्ववीर्यं च धैर्यादिलक्षणम् । परानुभावं भगवतः प्रभावं मेने ॥ ८३ ॥

एवंविधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे ।
क्रियाकलापैः समुवाह भक्तिं यया विरिञ्चादिमधश्चकार ॥ ८४ ॥

तात्पर्यम् – 'ब्रह्मादिभक्तिकोट्यंशादंशो नैवाम्बरीषके । नैवान्यस्य च कस्यापि तथापि हरिरीश्वरः । तात्कालिकोपचेयत्वात्तेषां यशस आदिराट् । ब्रह्मादयश्च तत्कीर्तिं व्यञ्जयामासुरुत्तमाम् । मोहनाय च दैत्यानां ब्रह्मादेर्निन्दनाय च । अन्यार्थं च स्वयं विष्णुर्ब्रह्माद्याश्च निराशिषः। मानुषेषूत्तमत्वाच्च तेषां भक्त्यादिभिर्गुणैः । ब्रह्मादेर्विष्ण्वधीनत्वज्ञापनाय च केवलम् । दुर्वासाश्च स्वयं रुद्रस्तथाप्यन्याय्यमुक्तवान् । तस्याप्यनुग्रहार्थाय दर्पनाशार्थमेव चे'ति गारुडे ॥ ८४ ॥

सत्यधर्मीया — एवंविधानेकगुण इति श्लोके यया विरिञ्चादिमधश्चकारेति भक्त्या विध्याद्यधःकरणमम्बरीषस्य प्रतीयते । तच्चेयदामननादित्यधिकार्यवधित्वेन श्रुतो विधिरिति दूर्वासा अपि साक्षात्त्र्यक्ष इति च प्रमाणबाधित इत्यतो मानमेवोदाहृत्य तदवमानयति ॥ ब्रह्मादीति । ब्रह्मादिभक्तिकोट्यंशाद्ब्रह्मादिषु विद्यमानाया भक्तेस्तत्सम्बन्धी यः कोट्यंशस्तस्मादंशो लेशोऽम्बरीषके नैव नैवास्ति । तत्रापि तरतमभावो ज्ञेयः । अन्यस्यापि कस्यचिद्राज्ञोपि वा । अन्यस्यापि कस्यचित्साधनस्य सकाशादित्यपि योजयन्ति । तथाऽपि सत्यप्येवमीश्वर एवं कर्तुं समर्थः । हरिरादिराट् । तेषामम्बरीषादीनां यशस्तात्कालिकोपचेयत्वात्तात्कालिकं यदुपचेयमुन्नहनीयत्वं तस्माद्ब्रह्मादयश्चोत्तमां तत्कीर्तिं व्यञ्जयामासुः । हरिहिरण्यगर्भादयश्च तद्यशो व्यञ्जनार्थमेवैवं चक्रुरित्युक्तिरियमित्येका गतिः । कृपानिमित्ता या भक्तिर्नीचभक्तेषु साऽधिकेत्यादेः । माहेनाय च दैत्यानां ग्रन्थकर्तुः प्रयोजनं च तद्दैतेयगतियापनं ज्ञेयम् । इति द्वितीयगतिः । अत्र मोहितास्ते किं समीहन्त इत्यत आह ॥ ब्रह्मादेर्निंदनाय चेति । ते चासमर्थाः समर्थोऽम्बरीष इति तन्निन्दनाय । केचिदिदमुद्ग्रन्थं स्वतन्त्रफलोपलम्भकतयाऽपि शक्तेः किं नोर्जिता कीर्तिरुपार्जितेत्यतः स तु कीर्तिपूर्तिः स्वतोऽन्ये तु तन्निघ्ना इत्याह । स्वयं विष्णुरन्यार्थं परयशआद्यर्थम् । एतदप्यायानतन्याः कीर्तेरभावादिति भावः । ब्रह्माद्याश्च निराशिषो न विद्यत आशीरभिलाषो येषां ते तथा । हरीच्छानुसरीच्छावन्त इत्यर्थः । मानुषेषूत्तमत्वाच्च तेषामम्बरीषादीनाम् । तृतीया वा चतुर्थी वा गतिरनेनोक्ता । तत्र निमित्तं भक्त्यादिभिर्गुणैरिति । अनेन मूलं च विरिञ्च आदिः कारणं यस्य स्थावरप्रपञ्चस्य तमधश्चकारेत्यपि योज्यमिति सूचयति । ननु दूर्वासाः साक्षात्त्र्यक्षः परोक्षतः कृतमब्भक्षणं कथं ज्ञातवान्न ज्ञातवांश्चेममनर्थं भाविनमित्यत आह ॥ ब्रह्मादेरिति । के मम बलं न

बलं तद्रूपा भवेयुरिति जानन्दुर्वासाः । तत्र हेतुः स्वयं रुद्र इति । ब्रह्मादेः केवलमित्यप्यावृत्त्या योज्यम् । केवलं विष्ण्वधीनत्वज्ञापनाय च । तथाऽपि मनोनियामकरुद्रत्वेऽपि । अन्याय्यमनशिताशितमपि पानीयमशितत्वेनैवेति न्यायादपेतमुक्तवान् । अनेन ज्ञान्येवमतनोद्दैत्यानां मोहनाय चेत्यादिकं योग्यं सर्वमत्राप्यनुसन्धेयं सिंहावलोकननीत्याऽऽह ॥ तस्यापीति । स्वयं विष्णुस्तस्यापि दुर्वाससस्तदुपर्यनुग्रहार्थाय दर्पनाशार्थमेव च न मोचयामास ॥ ततश्चायं श्लोकार्थः ॥ एवंविधाः अनेकगुणा यस्य स तथा । क्रियाकलापैः कर्मसमूहैः परमात्मनि वासुदेवे ब्रह्मणि तां भक्तिं समुवाह । यथा भक्त्या विरिञ्चादिं ब्रह्मादिप्रपञ्चं सुरमोहनाद्यर्थं हरिरधःकारयामास स च चकार । ब्रह्मादिः कारणं जनक इति यावत् । यस्य तं शिवावतारं दुर्वाससमधःकारयामास चकार ॥ ८४ ॥

छलारी — एवमम्बरीषमुपवर्ण्य तत्कीर्तिं विष्णुब्रह्मादयो व्यञ्जयामासुरित्याह ॥ एवं विधानेकगुण इति । एवं विधा अनेका गुणा यस्य सः राजांऽबरीषः । परमात्मनि परश्चासावात्मा चेति कर्मधारयस्तस्मिन्सर्वोत्तमे चेतने । अथवा । सर्वेषां ब्रह्मादीनामात्मनि नियामके ब्रह्मणि पूर्णगुणे वासुदेवे श्रीकृष्णे । यद्वा । मुक्तिप्रदे वासुदेवनामके ब्रह्मणि परब्रह्मणि ॥ तदुक्तं तात्पर्यनिर्णये ॥ ''इत्थं विचिन्त्य परमः स तु वासुदेवनामा बभूव निजमुक्तिपदप्रदाते''ति । समर्पितैरिति शेषः । ब्रह्मार्पणं ब्रह्म हविरित्याद्युक्तप्रकारेण समर्पितैः क्रियाकलापैरश्वमेधादिक्रियासन्दर्भैर्निमित्तैस्तां भक्तिं समुवाह सम्यक् प्राप । यया भक्त्या विरिञ्चादिं विरिञ्चरुद्रेन्द्रादिमधश्चकार ब्रह्माद्यपेक्षयाऽधिकभक्तिमान् । इत्यम्बरीषराजकीर्तिं विष्णुब्रह्मादयश्च । व्यञ्जयामासुरिति शेषः । स शरणागतदुर्वाससो रक्षणाधिकरणेन ब्रह्माद्यपेक्षयाऽम्बरीषादीनां भक्तिरधिकेति कीर्तिं प्रख्यापयामासुरिति भावः । अत्र प्रमेयविशेषस्तु ब्रह्मादिभक्तिकोट्यंशादित्यादितात्पर्येणावगन्तव्यम् ॥ ८४ ॥

श्रीशुक उवाच —

अथाम्बरीषस्तनयेषु राज्यं समानशीलेषु विसृज्य धीरः ।
वनं विवेशात्मनि वासुदेवे मनो दधद् ध्वस्तगुणप्रवाहः ॥ ८५ ॥

सत्यधर्मीया — अथ धीरोऽम्बरीषः समानशीलेषु समानं शीलं येषां तेषु तनयेषु विसृज्यातिसृज्य वासुदेवे आत्मनि सर्वस्वामिनि मनो दधद्दधानो ध्वस्तगुणप्रवाहः स वनं विवेश प्राविशत् । ॥ ८५ ॥

छलारी — दधद्दधानः । ध्वस्तः सत्त्वादिगुणजन्यो रागादिः प्रवाहो यस्य ॥ ८५ ॥

इत्येतत् पुण्यमाख्यानमम्बरीषस्य भूपतेः ।
सङ्कीर्तयन्ननुध्यायन् भक्तो भगवतो भवेत् ॥ ८६ ॥

इति श्रीमद्भागवते नवमस्कन्धे षष्ठोऽध्यायः ।

सत्यधर्मीया — एतदाख्यानफलमाख्याति ॥ इत्येतदिति । पुण्यं तद्वत् । तत्प्रदमिति यावत् । सङ्कीर्तयन् ध्यायन् । अथ मननं च कुर्वाणो भगवतो भक्तो भवेत् ॥ ८६ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे षष्ठोऽध्यायः ।

छलारी — आख्यानफलमाह ॥ इतीति । आख्यानं माहात्म्यम् ॥ ८६ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे षष्ठोऽध्यायः ॥ ९-६ ॥

॥ अथ सप्तमोऽध्यायः ॥

श्रीशुक उवाच —

विरूपः केतुमाञ्छम्भुरम्बरीषसुतास्त्रयः ।
विरूपात् पृषदश्वोऽभूत् तत्पुत्रस्तु रथीतरः ॥ १ ॥

सत्यधर्मीया — तनयेष्वित्युक्तास्ते कियन्त इत्यत आह ॥ विरूप इति । विरूपः केतुमान् शम्भुरिति अम्बरीषसुतास्त्रयः । तत्पुत्रः पृषदश्वसुतः । रथीतरस्तन्नामा ॥ १ ॥

छलारी — मनुपौत्रस्याम्बरीषस्य वंशमाह ॥ विरूप इति । इतिशब्दोऽध्याहारार्थः । तन्तवे सन्तानाय । अङ्गिरो नामा मुनी रथीतरेणार्थितः सन् । रथीतरभार्यायां जनयामासेति ज्ञेयम् ॥ १,२ ॥

रथीतरस्याप्रजस्य भार्यायां तन्तवेऽर्थितः ।
अङ्गिरा जनयामास ब्रह्मवर्चस्विनः सुतान् ॥ २ ॥

सत्यधर्मीया — अप्रजस्य प्रजारहितस्य । गतम् । भार्यायां तन्तवे सन्तानार्थं तेनैवार्थितोऽङ्गिरा ब्रह्मवर्चस्विनः सुतान् जनयामास । वर्चो येषामस्ति ते वर्चस्विनः । अस्माया मेधास्रजो विनिः । ब्रह्मणो वर्चस्विनो ब्रह्मवर्चस्विनः ॥ २ ॥

एते क्षत्रप्रसूता वै पुनश्चाङ्गिरसः स्मृताः ।
रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥ ३ ॥

सत्यधर्मीया — क्षत्रक्षेत्रप्रसूताः पुनश्च त एवाङ्गिरसा अङ्गिरसोऽपत्यानि । आङ्गिरसा एते क्षेत्रप्रसूता इति च पठन्ति ॥ ३ ॥

छलारी — येऽङ्गिरसा जनितास्ते रथीतरस्य क्षेत्रप्रसूतत्वेन रथीतरगोत्राः सन्तोऽङ्गिरसो वीर्येण प्रसूतत्वादाङ्गिरसश्च स्मृताः । रथीतराणां रथीतरसन्ततिजातानां प्रवराः प्रमुखा अतः क्षत्रोपेताः क्षत्रियत्वोपेता ब्राह्मणा इत्यर्थः । उभयधर्मोपेता इति यावत् ॥ ३ ॥

क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः ।
तस्य पुत्रशतं ज्येष्ठा विकुक्षिनिमिदण्डकाः ॥ ४ ॥

सत्यधर्मीया — तुशब्दो वंशान्तरकथारम्भसूचकः । मनोः श्राद्धदेवस्य । क्षुवतः क्षुतं कुर्वतो घ्राणतस्तदिन्द्रियात् । इक्ष्वाकुः सुतो जज्ञे । तस्येक्ष्वाकोः पुत्रशतं जज्ञे । तत्र विकुक्षिनिमिदण्डका ज्येष्ठाः आर्याः । दक्षस्यैकस्यैव प्रचेतसश्चतुराननजत्ववच्छ्रद्धायां जनयामास पुत्रानिक्ष्वाकित्यादि-नोक्तस्य श्राद्धदेवाच्छ्रद्धायां, क्षुवतो घोणायां च जन्मतः सम्भवात् । अथवा जीवद्वयतायाः सम्भवाद्दशेति निर्देशस्योपपत्तिर्यथाकथञ्चिदेकस्यानौन्येनापि सम्भवतीति वौपचारिकश्रद्धापुत्रत्वेन वा छत्रिन्यायेन वा सम्भवान्न पूर्वोत्तरविरोध इति ज्ञेयम् ॥ ४ ॥

छलारी — तदेवं मनोर्दशपुत्रादिषु वृषध्रः कविश्च विरक्तत्वान्न वंशप्रवर्तकौ । करूशादीनां सप्तानां वंशास्तारतम्यक्रमेणोक्ताः । इदानीमतिविततमिक्ष्वाकोर्वंशमाह ॥ क्षुवतस्त्वित्यादिना यावत्सोमवंशप्रस्तावः । क्षुतं कुर्वतो मनोर्घ्राणत ईक्ष्वाकुर्जज्ञे । यद्यपि मनोः सकाशाच्छ्रद्धायां नवैव पुत्राः जाताः । तथाऽपि श्रद्धायां जनयामास दशपुत्रान् स आत्मवानिति पूर्वोक्तं छत्रिन्यायेनेति द्रष्टव्यम् । बहुत्वाभिप्रायेणेत्यप्याहुः । तस्येक्ष्वाकोः पुत्रशतमभूत् । तत्र विकुक्ष्यादयस्त्रयो ज्येष्ठाः ॥४॥

तेषां पुरस्तादभवन् आर्यावर्ते नृपा नृप ।
पञ्चविंशति पश्चाच्च त्रयो मध्येऽपरेन्यतः ॥ ५ ॥

सत्यधर्मीया — तेषां शतसुतानां मध्ये । आर्यावर्ते आसमुद्रात् पुरस्तात्तु आसमुद्राच्च पश्चिमात् । तयोरवान्तरं गिर्योरार्यावर्तं प्रचक्षत इति वचनादार्यावर्तशब्दार्थो ज्ञेयः । पञ्चविंशति तत्सङ्ख्याः । हे नृप । नृपाः पूर्वदिगधिपा अभवन् । पश्चात्पश्चिमदिग्भागे पञ्चविंशतिनृपा अभवन् । विन्ध्यहिमवन्मध्ये । त्रयोऽभूवन् । अन्यतो दक्षिणोत्तरदिग्भागयोः परे शिष्टाः सप्तचत्वा-रिंशत्सङ्ख्याका नृपा अभवन्निति योजना ॥ ५ ॥

छलारी — आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोरित्युक्तार्यावर्तदेशे पुरस्तान्मण्डलविभागे पञ्चविंशतिनृपा अभूवन् । हे नृप तथैव पश्चाच्च पञ्चविंशतिनृपा अभूवन् । मध्ये तु ज्येष्ठास्त्रयोऽपराऽवशिष्टाः सप्तचत्वारिंशन्नृपाः । अन्यतोऽन्यत्र दक्षिणोत्तरादिषु नृपा अभूवन् ॥ ५ ॥

स एकदाऽष्टकाश्राद्ध इक्ष्वाकुः सुतमादिशत् ।
मांसमानीयतां मेध्यं विकुक्षे गच्छ मा चिरम् ॥ ६ ॥

सत्यधर्मीया — स इक्ष्वाकुः । मेध्यं शुद्धम् ॥ ६ ॥

छलारी — विकुक्षिरेव शशादेति विश्रुत इति वक्ष्यति । तत्र हेतुमाह ॥ स एकदेत्यादिना । अष्टकाश्राद्धो षण्णवतिश्राद्धान्तर्भूत इत्यर्थः । मेध्यं पवित्रम् ॥ ६ ॥

तथेति सवनं गत्वा मृगान् हत्वा क्रियार्हणान् ।
श्रान्तो बुभुक्षितो वीरः शशमाददपस्मृतिः ॥ ७ ॥

सत्यधर्मीया — क्रियार्हणान् क्रियायामर्हणं योग्यता येषां ते तथा तान् । अपस्मृतिर्भुक्तं चेन्मया नोपयुक्तं भवेत् शिष्टं वशिष्ठाद्युपभुक्तय इत्यङ्गस्मरणरहितः । शशं पशुविशेषम् । शशो गन्धरसे लोध्रे पशौ च पुरुषान्तर इति विश्वः । तत्कालातिसुखरूपं बुभुक्षाक्षयादिति भावं कटाक्षयति शशमिति शंशनेनेति ज्ञेयम् । आददभक्षयत् ॥ ७ ॥

छलारी — बुभुक्षितः क्षुधितः क्रियार्हकान् । आददभक्षयत् । अद भक्षण इति धातोः । अपस्मृतिर्विवेकरहितः ॥ ७ ॥

शेषं निवेदयामास पित्रे तेन च तद्गुरुः ।
चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकम् ॥ ८ ॥

सत्यधर्मीया — शेषं स्वभुक्तोच्छिष्टम् । तद्गुरुरिक्ष्वाकुशिक्षको वसिष्ठः । प्रोक्षणाय शङ्खजलसेचनपूर्वकं देवनिवेदनाय चोदितः इक्ष्वाकुप्रेरित एतन्मांसं दृष्टम् । तद्दौष्ट्यं स्पष्टयति ॥ अकर्मकमिति । अष्टकादिर्कर्मयोग्यं नेति वा । कर्मणा विप्रसमर्पणरूपेण कं येन तदिति कर्मकं नेति वेत्याह ॥ ८ ॥

छलारी — तद्गुरुर्वसिष्ठः प्रोक्षणाय श्राद्धोपचितसंस्काराय । अकर्मकं कर्मायोग्यम् ॥ ८ ॥

ज्ञात्वा पुत्रस्य तत्कर्म गुरुणाऽभिहितं नृपः ।
देशान्निस्सारयामास सुतं त्यक्तविधिं रुषा ॥ ९ ॥

सत्यधर्मीया — गुरुणा ज्ञानदृष्ट्या विषयीकृत्याभिहितं कर्म पुत्रस्येति ज्ञात्वा तं विकुक्षिं सुतं देशाद्रुषा निस्सारयामास बहिष्कृतवान् ॥ ९ ॥

छलारी — तत्कर्म मांसभक्षणरूपं कर्म । त्यक्तविधिमाचारशून्यम् ॥ ९ ॥

स तु विप्रेण संवादं जापकेन समाचरन् ।
त्यक्त्वा कलेवरं योगी स तेनावाप यत्परम् ॥ १० ॥

सत्यधर्मीया — जापको नाम्ना कर्मणाऽपि तेन विप्रेण संवादं वासुदेवविषयं समाचरन्कुर्वाणस्तेन संवादेन योगी ज्ञानाद्युपायवान्परं यद्ब्रह्म तदवाप । उक्तं च मोक्षधर्मे । भीष्मः ।

इक्ष्वाकोः सूर्यपुत्रस्य यद्वृत्तं ब्राह्मणस्य च ।
कालस्य मृत्योश्च तथा यद्वृत्तं तन्निबोध मे ।

षडङ्गविन्महाप्राज्ञः पैप्पलादिः सकौशिक इत्यारभ्योपाख्यानसमाप्तिपर्यन्तेन ग्रन्थेनेति । श्रीधरो वसिष्ठ इति विशिष्टज्ञ इव कथं व्याचक्रे वा न जानीमः ॥ १० ॥

छलारी — तत इक्ष्वाकुणा किमकारीत्यत आह ॥ स इति । इक्ष्वाकुर्नाम्ना जापकेन विप्रेण ऋषिणा । यद्वा । जापकेन वसिष्ठेन संवादं तत्त्वविषयं समाचरन् । तेन संवादजनितज्ञानेन यत्परं ब्रह्म तदवापेत्यन्वयः ॥ १० ॥

पितर्युपरतेऽभ्येत्य पृथिवीशासनं कृतम् ।
शासन्नीजे हरिं यज्ञैः शशाद इति विश्रुतः ॥ ११ ॥

सत्यधर्मीया — स च पुनरागत्य गां जुगोपेति वदति ।। पितरीति । उपरते मृते यज्ञैर्हरिमीजे आराधयामास । कर्मशर्मैतदित्याह ।। शशाद इतीति ।। ११ ।।

छलारी — पुनर्विकुक्षिणा किमकारीति तत्राह ।। पितरीति । पितरीक्ष्वाकुनृपौ मृते सति । अभ्येत्य । देशान्तरादिति शेषः ।। ११ ।।

पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः ।
ककुत्स्थ इति वाप्युक्तः शृणु नामानि कर्मभिः ।। १२ ।।

सत्यधर्मीया — तस्य विकुक्षेः पुरञ्जय इन्द्रवाहः ककुत्स्थ इति । कर्मभिस्तन्निमित्तानि त्रीणि । शृणु यथाऽऽप्तानि तच्छृणु । स्वस्य विवक्षाऽस्तीति ध्वनितवानिति ज्ञेयम् ।। १२ ।।

छलारी — तस्य विकुक्षेः सुतोऽभूत् । स च पुरंजय इत्युक्त इन्द्रवाह इतीरितः । ककुस्थ इति चाप्युक्तः । यैः कर्मभिः पुरंजय इन्द्रवाहः ककुस्थ ति नामानि प्राप्तानि तानि कर्माणि शृणु ।।१२।।

कृतान्त आसीत् समरे देवानां सह दानवैः ।
पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः ।। १३ ।।

सत्यधर्मीया — तन्नामप्रयोजकानि कर्माणि सप्तभिः श्लोकैराह ।। कृतान्त इति । कृतयुगान्ते कृतान्तो यमगमक इति वा । पार्ष्णिं गृह्णातीति स तथा । सहाय इति यावत् । वृतस्तत्त्वेन याचितः । याचने निमित्तं तत्राप्येतद्याचने चाह । दैत्यपराजितैर्देवैर्वीर इति ।। १३ ।।

छलारी — तान्येवाह ।। कृतान्त इत्यादिना । कृतयुगस्य अन्त इत्यर्थः । वीरः पुरंजयः पार्ष्णिग्राहः सहायो वृतो देवैः सहाय्यत्वेन स्वीकृत इत्यर्थः ।। १३ ।।

वचनाद्देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः ।
वाहनत्वे वृतस्तस्य बभूवेन्द्रो महावृषः ।। १४ ।।

सत्यधर्मीया — वाहनत्वे त्वं वासव वाहश्चेदाहवमहं कुर्यामित्युक्त इन्द्रो महावृषो बभूव । कथमहं वाहः स्यामिति किञ्चित्सङ्कुचितचित्तम् । हे हरिहय भववाह इति हरिवचनात्तत्त्वमापेत्यर्थादाह । देवदेवस्य विश्वात्मनः प्रभोः विष्णोर्वचनाद्बभूवेति । विश्वानि समस्तानि । विश्वं समस्तजगतोरिति विश्वः । आत्मानः शरीराणि नानाविधहीनमीनादीनि यस्य तस्य मम निर्ममस्यापि तत्तत्समय-तत्तद्दाक्षिण्येन हीनजनिस्तव वासव का कथेत्यनेन ध्वन्यते । वेदबोधितं वृषभवाहककुत्स्थादिनामेति

तदनुसारेण वृषभतादियाचनं च हरिप्रेरणयैव । दैत्याश्च नन्दिवहप्रिया अहमपि तज्जातिजातवाहः स्यामिति युक्त्या चेति ज्ञेयम् ।। १४ ।।

छलारी — इन्द्रो विष्णोर्वचनान्महावृषो बभूवेत्यन्वयः । इन्द्रो, यदि मम वाहनं स्यात्तर्हि दैत्यान्हनिष्यामीति राज्ञा वाहनत्वेन प्रार्थितः सन् लज्जया तदनङ्गीकुर्वन्विष्णोर्वचनात्पुरंजयस्य वाहनत्वाय महावृषो बभूवेति भावः ।। १४ ।।

स सन्नद्धो धनुर्दिव्यमादाय विशिखान् शितान् ।
स्तूयमानस्तमारुह्य युयुत्सुः ककुदि स्थितः ।। १५ ।।

सत्यधर्मीया — शितान्निशितान्विशिखान् बाणान् । गतम् । ककुदि ककुद्वत्ककुदं श्रेष्ठे वृषाङ्गे राजलक्ष्मणीति विश्वात्तत्स्कन्धे स्थित उपविष्टः ।। १५ ।।

छलारी — सः पुरंजयः शितान्निशितान्विशिखान् शरान् । तं पृथं, ककुदि स्थितो वृषभस्योर्ध्वभूतो भुजः ककुदित्युच्यते । तत्रोपविष्ट इत्यर्थः ।। १५ ।।

तेजसा व्यापितो विष्णोः पुरुषस्य परात्मनः ।
प्रतीच्यां दिशि दैत्यानां न्यरुणत् त्रिदशैः पुरम् ।। १६ ।।

सत्यधर्मीया — विष्णोस्तेजसा व्यापितः पूरितः । दैत्यानां पुरं त्रिदशैः सह प्रतीच्यां दिशि न्यरुणद्रुरोध ।। १६ ।।

छलारी — परमात्मनः पुरुषस्य परमपुरुषस्य विष्णोस्तेजसा व्यापितो हरिस्तस्य बलपूर्त्यर्थं व्यंजयामासेत्यर्थः । न्यरुणद्रुरोध ।। १६ ।।

तैस्तस्य ह्यभवद् राजन् सङ्ग्रामो रोमहर्षणः ।
यमाय भल्लैरनयद् दैत्यान् ये युयुधुर्मृधे ।। १७ ।।

सत्यधर्मीया — भल्लैर्यमाय युयुधुस्तान्मृधेऽनयत् ।। १७ ।।

छलारी — भल्लैर्बाणविशेषैः । यमस्य लोकमिति शेषः । तान् । अनयदित्यन्वयः ।। १७ ।।

तस्येषुपाताभिमुखं युगान्ताग्निमिवोल्बणम् ।
विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयम् ।। १८ ।।

सत्यधर्मीया — युगान्ताग्निमिवोल्बणमिषुपाताभिमुखम् । हन्यमाना दैत्याः स्वमालयं विसृज्य दुद्रुवुः । पुरमिति पुरोदीर्यात्रालयमिति वचनेन तत्र स्थितौ आ लयो निश्चयान्नाशो येन तमित्यप्यर्थं कटाक्षयतीति मन्तव्यम् ॥ १८ ॥

छलारी — तस्य पुरंजयस्येषूणां पातः संपातो धारातस्य पातस्याभिमुखं प्रत्यवस्थानं विसृज्य । युगांताग्निं प्रलयाग्निम् ॥ १८ ॥

जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये ।
प्रत्ययच्छत् स राजर्षिरिति नामभिराहुतः ॥ १९ ॥

सत्यधर्मीया — पुरं जित्वेति पुरञ्जयाव्हम् । इन्द्रस्यैव वृषभत्वादिन्द्रवाहस्तत्रापि ककुत्स्थत्वात्ककुत्स्थ इति नामत्रयमिति ज्ञेयम् । सर्वमयच्छदिति पाठो नाच्छः । सश्रीकमिति च सश्रीकः । प्रत्ययच्छद्दत्तवान् । पाघ्राध्मेति यच्छादेशः । इति नामभिस्त्रिभिराहूतः ॥ १९ ॥

छलारी — पुरं जित्वा । सश्रीकं गजतुरगादिश्रीसहितं सर्वंधनं प्रत्ययच्छद्दत्तवान् । स राजर्षिर्दैत्यपुरजयात्पुरंजय इति नाम्नाऽऽहूतः । वृषरूपेन्द्रस्य वाहनत्वादिन्द्रवाह इति नाम्नाऽऽहूतः । वृषभककुदि स्थितत्वात्ककुस्थ इति नाम्नाऽऽहूतः ॥ १९ ॥

पुरञ्जयस्य पुत्रोऽभूदनेनास्तत्सुतः पृथुः ।
विश्वगन्धिस्ततश्चन्द्रो युवनाश्वस्तु तत्सुतः ॥ २० ॥

सत्यधर्मीया — अनेनाः नाम्ना । वस्तुतस्तु न विद्यते एनः पापं यस्य स इति नामान्वर्थकं च ज्ञेयम् । तत्सुतोऽनेनस्तनयः । ततः पृथोः । तत इत्युत्तरत्राप्यन्वेति । ततो विश्वगन्धेश्चन्द्रः ॥ २० ॥

छलारी — अनेन तन्नामकस्ततः पृथोर्विश्वगन्धिस्ततो विश्वगन्धेश्चण्डः । तत्सुतश्चण्डसुतो युवनाश्वः ॥ २० ॥

शावस्तिस्तत्सुतो येन शावस्ती निर्मिता पुरी ।
बृहदश्वस्तु शावस्तेस्ततः कुवलयाश्वकः ॥ २१ ॥

सत्यधर्मीया — तत्सुतो युवनाश्वसुतः । शावस्तिर्येन शावस्तिना । शावस्ती नाम्नी पुरी निर्मिता । ततो बृहदश्वात् ॥ २१ ॥

छलारी — शावस्तिस्तत्सुतो युवनाश्वसुतो, येन शावस्तिना ॥ २१ ॥

यः प्रियार्थमुदङ्कस्य धुन्धुं नाम्नाऽसुरं बली ।
सुतानामेकविंशत्या सहस्रैरहनद् वृतः ॥ २२ ॥

सत्यधर्मीया — यः कुवलयाश्वकः । उदङ्कस्य मुनेः प्रियार्थम् । प्रीत्यै नाम्ना धुन्धुमसुरं सुतानामेकविंशत्या सहस्रैर्वृतः सन्नहनदहन् । अत्रैकविंशतिसहस्रसुतोक्तिश्च मोक्षधर्मे शतसुतानां कथमिति चेत् । सत्यम् । तच्छतं तत्सहस्रमिति श्रुतेः शतशब्दो बहुवाची सन्नेतत्सङ्ख्यो ज्ञेय इति न विरोधः ॥ २२ ॥

छलारी — सः कुवलयाश्वक एव । धुन्धुनामासुरं हतवान् ॥ २२ ॥

धुन्धुमार इति ख्यातस्तत्सुतास्ते प्रजज्वलुः ।
धुन्धोर्मुखाग्निना सर्वे त्रय एवावशेषिताः ॥ २३ ॥

सत्यधर्मीया — एतद्धुन्धुमारार्थको वामनावतारे साक्षाद्द्वाभ्यां समग्रजगव्द्यापनमेकेन समुद्रान्तस्तन्निमज्जनमेतन्मुखेन मारणमिति च कथाविशेषोऽपि भगवतोक्तो ज्ञेयः । अतो धुन्धुमार इति च ख्यातः । कर्मशर्मैतत् । धुन्धोर्मुखाग्निना ते तत्सुताः प्रजज्वलुर्दग्धाः । एकविंशत्सहस्रमध्ये त्रय एवावशेषिता उर्वरिताः ॥ २३ ॥

छलारी — तत्सुताः कुवलयाश्वकसुता धुन्धोर्मुखाग्निना प्रज्वलिता दग्धा इत्यर्थः । इतीत्यस्य त्रय एवावशेषिता इत्यन्वयः ॥ २३ ॥

दृढाश्वः कपिलाश्वश्च भद्राश्व इति भारत ।
दृढाश्वपुत्रो हर्यश्वो निकुम्भस्तत्सुतः स्मृतः ॥ २४ ॥

सत्यधर्मीया — तेषां शिष्टानां नाम स्पष्टयति ॥ दृढाश्व इत्यादिना । तत्सुतो हर्यश्वसुतः ॥२४॥

बर्हणाश्वो निकुम्भस्य कृशाश्वोऽथास्य सेनजित् ।
युवनाश्वोऽभवत् तस्य सोऽनपत्यो वनं गतः ॥ २५ ॥

सत्यधर्मीया — अस्य कृशाश्वस्य । तस्य सेनजितः । स युवनाश्वः । वनं गतः । अत्र निमित्तमनपत्य इति ॥ २५ ॥

छलारी — अथ तस्माद्बर्हिणाश्वात्कृशाश्वः । अस्य कृशाश्वस्य ॥ २५ ॥

भार्याशतेन निर्विण्ण ऋषयोऽस्य कृपालवः ।
इष्टिं स्म वर्तयाञ्चक्रुरैन्द्रीं ते सुसमाहिताः ॥ २६ ॥

सत्यधर्मीया — भार्याशतेन । शतेऽपि सतीनां सुतो न जात इति निर्विण्णः । ऐन्द्रीमिन्द्रसम्बधिनीमिष्टिं वर्तयाञ्चक्रुः । वर्तयां चक्रुरिति द्वे पदे ॥ २६ ॥

छलारी — भार्याशतेन निर्विण्णः सन् । वनं गत इति पूर्वेण सम्बन्धः । अस्य पुत्रोत्पत्त्यर्थमिति शेषः । ऐन्द्रीमिन्द्रदैवत्यामिष्टिं वर्तयांचक्रुः प्रवर्तयामासुः ॥ २६ ॥

राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः ।
दृष्ट्वा शयानान् विप्रांस्तान् पपौ मन्त्रजलं स्वयम् ॥ २७ ॥

सत्यधर्मीया — निशि रात्रौ तर्षितस्तृष्णायुतो मन्त्रजलं भार्यायै देयं मन्त्रपूतं पानीयं स्वयं पपावपिबत् ॥ २७ ॥

छलारी — राजा युवनाश्वो तर्षित उदन्यायुतः । पत्न्यै देयं मन्त्रपूतं जलं स्वयं पपौ ॥ २७ ॥

उत्थितास्ते निशाम्याथ व्युदकं कलशं प्रभो ।
पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलम् ॥ २८ ॥

सत्यधर्मीया — प्रभो हे परीक्षित् । व्युदकं विगतमुदकं यस्मात्तं कलशं पप्रच्छुः । पुंसवनं जलं पीतं किल कस्येदं कर्मेति पृष्टवन्तो लोकदृष्ट्या ॥ २८ ॥

छलारी — निशाम्य दृष्ट्वा । व्युदकं जलरहितम् । पुंसवनं पुत्रदम् ॥ २८ ॥

राज्ञा पीतं विदित्वाऽथ ईश्वरप्रहितेन ते ।
ईश्वराय नमश्चक्रुरहो दैवबलं बलम् ॥ २९ ॥

सत्यधर्मीया — ईश्वरप्रहितेन प्रेरितेन राज्ञा युवनाश्वेन । दैवबलमेव बलमहो विचित्रमितीश्वराय नमश्चक्रुः ॥ २९ ॥

छलारी — ईश्वरप्रहितेन दैवप्रेरितेन । दैवबलमेव मुख्यं बलं पुरुषबलं तु न किञ्चन न किञ्चिदिति वदन्त ईश्वराय नमश्चक्रुरित्यन्वयः ॥ २९ ॥

ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणम् ।
युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ॥ ३० ॥

सत्यधर्मीया — ततः काले दशमे मासि जायत इति श्रौते समये उपावृत्ते आयाते युवनाश्वस्य दक्षिणं कुक्षिं कुक्षेर्दक्षिणभागं पिचण्डकुक्षी जठरोदरतुन्दमित्यमरः । निर्भिद्य भित्वा चक्रवर्ती तनयः सुतो जजानाजायत । हेत्याश्चर्ये ॥ ३० ॥

छलारी — जजानाजनि ॥ ३० ॥

कं धास्यति कुमारोऽयं स्तन्यो रोरूयते भृशम् ।
मान्धातर्वत्स मा रोदीरितीन्द्रो देशिनीमदात् ॥ ३१ ॥

सत्यधर्मीया — भृशं स्तन्यः स्तनापेक्षावान् पयःपानार्थं रोरूयतेऽतिशयेन रौति । अयं कुमारः कं धास्यति । स्त्रीजनस्य कस्य कस्य स्तनं धास्यति । धेट् पाने । पास्यति । इति ऋषिषु चिन्तयत्सु सत्सु । अध्वराराधित इन्द्रो हे वत्स मान्धातः पोत मा रोदीः । पदद्वयम् । रोदनं मा कार्षीरिति वदन्निन्द्रो देशिनीं तर्जनीम् । तर्जनी स्यात्प्रदेशिनीत्यमरः । अदादास्ये स्थापयामास । तेन मान्धातेत्यभिधानं तस्याभूदिति भावः ॥ ३१ ॥

छलारी — स्तन्यः स्तनपानेच्छुरयं बालो भृशं रोरूयते पुनः पुनरत्यन्तं रोदनं करोति । कं धास्यति कस्य स्त्रीजनस्य स्तनं धास्यति पास्यति । धेट् पान इति धातोः । इति दुःखितैर्ऋषिभिरुक्ते सति तस्यामिष्ट्यामाराधित इन्द्रः । हे वत्स मा रोदी रोदनं मा कार्षीरित्युक्त्वा । मांधातर्वत्स पानाभावे पानं कुर्विति ब्रुवन् । देशिनीं तर्जनीमदात् । अतो मान्धातेति नामाभूत् ॥ ३१ ॥

न ममार पिता तस्य विप्रदेवप्रसादतः ।
युवनाश्वोऽथ तत्रैव तपसा सिद्धिमन्वगात् ॥ ३२ ॥

सत्यधर्मीया — विप्राः प्रार्थयितारो देवाश्च तत्प्रार्थितास्तेषां प्रसादतः । ततो मान्धातृपिता न ममार न मृतः । अथ कुक्षिभेदानन्तरं तत्रैव सत्रसदन एव तपसा सिद्धिमन्वगात् ॥ ३२ ॥

छलारी — तस्य मान्धातुः पिता युवनाश्वो भिन्नकुक्षिरपि न ममार । किं त्वथ कालान्तरे । तत्र यज्ञसदने तपसा सिद्धिमन्वगान्ममारेत्यर्थः ॥ ३२ ॥

त्रसद्दस्युरितीन्द्रोऽङ्ग विदधे नाम तस्य वै ।
यस्मात् त्रसन्ति ह्युद्विग्ना दस्यवो रावणादयः ॥ ३३ ॥

सत्यधर्मीया — तस्य मान्धातुः । त्रसद्दस्युरितीन्द्रो नाम विदधे । मूलकृन्नाममूलं निर्वचनं स्वयमाह ॥ यस्मादिति । उद्विग्ना विह्वलाः । रावणादयो विश्रवसोऽपत्यं रावणः । विश्रवसो विश्रवणरवणाविति रवणादेशे णिच् । रावण इति भवति । त्रसन्ति भीता भवन्तीति । त्रसन्तो दस्यवो यस्मात्स त्रसद्दस्युः । वाल्मीकिरामायणे रावणमान्धात्रोः साम्योक्तिः कादाचीत्की । वस्तुतस्तु सदातनो मान्धातृत्रासो रावणस्येति न विरोधः । अतद्गुणसंविज्ञानो बहुव्रीहिर्वा । क्वचित्त्रसदस्युरित्येकदकारकः पाठो दृश्यते तस्य पृषोदरादिलोप इति ज्ञेयम् ॥ ३३ ॥

छलारी — मान्धातुर्महिमानमाह ॥ त्रसद्दस्युरित्यादिना । हे अङ्ग राजन् ॥ ३३ ॥

यौवनाश्वोऽथ मान्धाता चक्रवर्त्यवनीं प्रभुः ।
सप्तद्वीपवतीमेकः शशासाच्युततेजसा ॥ ३४ ॥

सत्यधर्मीया — युवनाश्वस्यापत्यं यौवनाश्वः । अच्युतस्य स्वाविष्टस्य हरेस्तेजसा सामर्थ्येन ॥ ३४ ॥

छलारी — अच्युततेजसाऽच्युतस्य प्रतिष्ठाविभूतिरूपस्य तेजसा प्रकाशेनाच्युतं च तत्तेजश्च तेनेति वा ॥ ३४ ॥

ईजे च यज्ञं क्रतुभिरात्मविद् भूरिदक्षिणैः ।
सर्वदेवमयं देवं सर्वात्मकमतीन्द्रियम् ॥ ३५ ॥

सत्यधर्मीया — यज्ञं तन्नामकं हरिमात्मवित्परमात्मज्ञानी भूरिदक्षिणैर्भूरि दक्षिणा येषां तैर्भूरि सुवर्णं दक्षिणा येषामिति वा । सर्वदेवमयं तत्प्रधानम् । मयं प्रधानमिति बृहद्भाष्योक्तेः । सर्वेषामात्मनां कं यस्मात्तम् । अतीन्द्रियं विना स्वप्रसादमिन्द्रियागोचरम् ॥ ३५ ॥

छलारी — यज्ञं यज्ञनामकं श्रीहरिम् । सर्वदेवमयं सर्वदेवप्रधानम् । सर्वात्मकं मन्त्रतन्त्र-द्रव्यादिसर्वपदार्थव्यापिनम् ॥ ३५ ॥

द्रव्यं मन्त्रो विधिर्यज्ञो यजमानस्तथार्त्विजः ।
धर्मो देशश्च कालश्च सर्वमेतद् यदात्मकम् ॥ ३६ ॥

सत्यधर्मीया — एतद्द्रव्यादिकं सर्वं यदात्मकं यत्स्वामिकं तमीज इत्यन्वयः ।। ३६ ।।

छलारी — तस्यानुसन्धानप्रकारमाह ।। द्रव्यमिति । विधिर्विधानम् । यज्ञो यज्ञपुरुषो यदात्मकं यदधीनसत्तात्मकम् । इत्यनुसन्धानं कृतवानिति शेषः ।। ३६ ।।

यावत् सूर्य उदेति स्म यावच्चन्द्रः प्रतिष्ठति ।
सर्वं तद् यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ।। ३७ ।।

सत्यधर्मीया — प्रतिष्ठति अस्तमेति । क्षेत्रं भूः ।। ३७ ।।

छलारी — यावत्सूर्य उदेति यावति प्रदेशे सूर्यप्रकाशो भवति । चन्द्रः प्रतिष्ठति । प्रकाशेनेति शेषः ।। ३७ ।।

शशबिन्दोर्दुहितरि बिन्दुमत्यामधान्नृपः ।
पुरुकुत्समम्बरीषं मुचकुन्दं च योगिनम् ।
तेषां स्वसारः पञ्चाशत् सौभरीं वव्रिरे पतिम् ।। ३८ ।।

सत्यधर्मीया — नृपो मान्धाता शशबिन्दोर्दुहितरि स्वभार्यायाम् । शशबिन्दुरित्यनेन सोऽपि प्रसिद्ध इति तत्कुलशुद्धिमभ्यधत्तेति ज्ञेयम् । अम्बरीषं पुरुकुत्सं मुचकुन्दं चेत्यधात् । तेषां त्रयाणां स्वसारो भगिन्यः पञ्चाशत्सङ्ख्याकाः सौभरिं नाम्ना ऋषिं पतिं वव्रिरे ।। ३८ ।।

छलारी — बिन्दुमत्यां भार्यायां नृपो मान्धाताऽधाज्जनयामास । तेषां स्वसारः मान्धातुः कन्याः ।। ३८ ।।

यमुनान्तर्जले मग्नस्तप्यमानः परं तपः ।
निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः ।। ३९ ।।

सत्यधर्मीया — स तापसः क, क च ताः कन्यास्तासामस्य च सङ्गमः कथं, तत्रापि सर्वाः कथमेकं नाथं वव्रिरे, बभ्राम च खेददवैषयिकेसुखे कथं, मुनिरेकश्च कथं तासां रतिमतीवावहदिति सर्वस्योत्तरमीरयति ।। यमुनान्तर्जल इत्यादिना । परं तपस्तप्यमान आचरन् । मैथुनं धर्मो व्यापारः सोऽस्यास्तीति मैथुनधर्मी । इन्नन्तः । मैथुनधर्मण इति पाठे धर्मादनिचूकेवलादित्यनिजन्तः । मीनराजस्य मीनानां राजा मीनराजः । राजाहस्सखिभ्य इति टच् । निर्वृतिं महानन्दं वीक्ष्य तच्चेष्टोपर्यूहेन ज्ञात्वा तदानन्दस्य तदनुभवमात्रवेद्यत्वात् ।। ३९ ।।

छलारी — ननु महातापसस्य सौभरेः कुतो विवाहप्रसङ्गः । कथं वा जराझर्झरं राजकन्या वव्रिरे इति तत्राह ।। यमुनान्तर्जल इत्यादिना ।। निर्वृतिं परमानन्दम् ।। ३९ ।।

जातस्पृहो नृपं विप्रः कन्यामेकामयाचत ।
सोऽप्याह गृह्यतां ब्रह्मन् कामं कन्या स्वयंवरे ।। ४० ।।

सत्यधर्मीया — जातोत्पन्ना स्पृहाऽऽकाङ्क्षा यस्य स तथा । नृपं मान्धातारम् । सोऽपि राजाऽपि । नेत्युक्तौ कुप्यति मह्यमोमित्युक्तौ कामिन्यसम्मतिरिति मतिमान्पर्यायेणामुमभिनिवेशं शंसयितुमाह । कन्या स्वयंवरे कामं गृह्यतां त्वयेत्याहेति ।। ४० ।।

छलारी — नृपं मान्धातारम् । सोऽपि मान्धाता स्वयंवरे कामं कन्या गृह्यतामित्याह ।। सोऽपीति ।। ४० ।।

स विचिन्त्याप्रियः स्त्रीणां जरठोऽयमसम्मतः ।
वलीपलित एजत्क इत्यहं प्रत्युदाहृतः ।। ४१ ।।

सत्यधर्मीया — जरठ इति कामं कामिन्यकामित इतीदमपदेशेन नेत्यभिप्रायवान्प्रभुरयमिति विदित्वा स इत्थमतनोदित्याह ।। स इत्यादिना । वलीपलितो वलीभिर्लम्बमानधमनीभिः सहितानि पलितानि श्वेतलोमानि यस्य सः । पलितं शैलजे तापे पाण्डुकेशे च कर्दम इति विश्वः । एजत्कम्पमानं कं शिरो यस्य स जरठो वृद्ध इति स्त्रीणामप्रियः । धवीभवनायोग्य इत्यसम्मतोऽयमिति विचिन्त्य राज्ञेति चाहं प्रत्युदाहृतो मुखतोऽप्रत्याख्यानं प्रत्याख्यानं चार्थत इति प्रत्युदाहृत इति विचिन्त्येत्यप्यन्वेति । यमसम्मतोऽवकाशदानेन तेन नेतुं सम्मत इति वेति यमस्य सम्मतः ।। ४१ ।।

छलारी — सः सौभरिः ''अयं मुनिः स्त्रीणामसंमतो जरठः वृद्धः एजत्क एजत्कंपमानं कं शिरो यस्य स तथा । वलीपलितो वलीभिर्लम्बमानचर्मभिर्युक्तः पलितः शुक्लकेशयुक्तश्चात एव स्त्रीणामप्रियः । इति विचिन्त्यानेनाहं प्रत्युदाहृतो निराकृतः स्वयंवरे गृह्यतामिति प्रोक्तोऽतस्तथाऽऽत्मानं साधयिष्य इत्युत्तरेणान्वयः ।। ४१ ।।

साधयिष्ये तथाऽऽत्मानं सुरस्त्रीणामभीप्सितम् ।
किं पुनर्मनुजस्त्रीणामिति व्यवसितः प्रभुः ।। ४२ ।।

सत्यधर्मीया — आत्मानं मां तथा साधयिष्य इत्यन्वयः । तथेत्युक्तमुत्कोचयति ॥ सुरस्त्रीणामिति ॥ सुरस्त्रीणामभीप्सितं कामितं मनुजस्त्रीणां तु किमिति व्यवसितो निश्चयवान् । दुर्बलनिश्चयमात्रेण कथमबलालाभ इत्यतः प्रभुरिति । तथा कर्तुं समर्थः । प्राभवादिति वा प्रभुः ॥ ४२ ॥

छलारी — यथेत्यस्य प्रपञ्चः । सुरस्त्रीणामपीप्सितमितीति व्यवसितः । तथा कृतवांश्चेत्यपि ग्राह्यम् ॥ ४२ ॥

मुनिः प्रवेशितः क्षत्त्रा कन्यान्तःपुरमृद्धिमत् ।
वृतश्च राजकन्याभिरेकः पञ्चाशता वरः ॥ ४३ ॥

सत्यधर्मीया — क्षत्रा ऋद्धिमत्कन्यान्तःपुरं प्रवेशितः । क्षत्ता स्यात्सारथौ द्वाःस्थे वैश्यायामपि शूद्रज इत्यमरात्सारथिर्द्वाःस्थो वा । पञ्चाशता राजकन्याभिरेको वरः पतिर्वृत इति शेषः ॥ ४३ ॥

छलारी — क्षत्त्रा द्वारपालकेन कन्याऽन्तःपुरं प्रवेशितः । पञ्चाशता पञ्चाशत्संख्याकाभिः राजकन्याभिः स एक एव वरो वृतः । स्वीकृतोऽभूदिति शेषः ॥ ४३ ॥

तासां कलिरभूद् भूयांस्तदर्थेऽपोह्य सौहृदम् ।
ममानुरूपो नायं व इति तद्गतचेतसाम् ॥ ४४ ॥

सत्यधर्मीया — तदर्थे मुनिपरिणयनरूपेऽर्थे । तद्गतचेतसां तद्गतं मुनिसंलग्नं चेतो यासां तासाम् । स्त्रीणां ममायमनुरूपो योग्यो वो युष्माकं नेति परस्परात्सौहार्दं सोहार्दमपोह्य परित्यज्य कलिः कलहोऽभूत् । भूयानित्यनेन विनैतद्विवाहं कलहस्योन्नहनमाह ॥ ४४ ॥

छलारी — भूयान् बहुलः कलिः कलहोऽभूत् । सौहृदं सुहृद्भावमपोह्य परित्यज्य ॥ ४४ ॥

स बह्वृचस्ताभिरवारणीयश्रिया विराजत्सपरिच्छदेषु ।
गृहेषु नानोपवनामलाम्भःप्रसूनसौगन्धिककाननेषु ॥ ४५ ॥

सत्यधर्मीया — स बह्वृचो ऋग्वेदी । अवारणीयश्रिया केनापि वारयितुमशक्या श्रीः सम्पत्तया । परिच्छदैः सहितानि राजन्ति च तानि सपरिच्छदानि च तेषु गृहेषु तथा नानोपवनेषु । नानोपवनामलाम्भःप्रसूनयुक्तेषु सरस्सु । नानासौगन्धिकानां कल्हाराणां काननानि वनानि च तेषु रेम इत्यन्वयः ॥ ४५ ॥

छलारी — तस्य गार्हस्थ्यं वर्णयति ।। स बह्वृच इत्यादिना । बह्वृच इति मन्त्रसामर्थ्यमुक्तम् । ऋग्मन्त्रदृष्टा सः सौभरिस्ताभिः सह रेमे इत्युत्तरेणान्वयः । क्व रेमे । आवरणीयं यत्तपस्तस्य श्रिया संपदा । तपःसामर्थ्येनेति यावत् । अनर्घ्याः परिच्छदा येषु तेषु गृहेषु । तथा नानाविधेषूपवनेषु चामलान्यंभांसि येषु तेषु सरःसु च । सौगन्धिकानां कल्हारपुष्पाणां काननेषु च रेमे ।। ४५ ।।

महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः ।
स्वलङ्कृतस्त्रीपुरुषेषु नित्यदा रेमेऽनुगायद्द्विजवृन्दबन्दिषु ।। ४६ ।।

सत्यधर्मीया — महार्हशय्यासनादिसहितेषु स्वलङ्कृतस्त्रीपुरुषेषु गेहेषु द्विजानां पक्षिणां वृन्दानि निकुरम्बानि तान्येवानुगायन्तो बन्दिनो येषु तेषु काननेषु । जामातृतपसः साम्राज्यं दृष्टवतो मान्धातुः श्वशुरस्य निर्वेदो जातः ।। ४६ ।।

छलारी — कथम्भूतेषु गृहादिषु । स्वलंकृताः स्त्रियः पुरुषाश्च येषु । पुनः कथम्भूतेषु । अनुगायन्तो द्विजः पक्षिणश्च भृंगाश्च वन्दिनश्च येषु । कथम्भूतः सौभरिः । महार्हशय्यादिभिः । उपलक्षित इति शेषः । रेमे इत्युपलक्षणम् । गार्हस्थ्योचितयावद्धर्मांश्चकारेत्यपि बोध्यम् । उत्तरत्र यद्गार्हस्थ्यं चेत्यनुवादात् ।। ४६ ।।

यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः ।
विस्मितः स्तम्भमजहात् सार्वभौमश्रियान्वितः ।। ४७ ।।

सत्यधर्मीया — तेन कियन्मम गार्हस्थ्यमिति जहौ मोहमित्याह ।। यदिति ।। यस्य सौभरेर्गार्हस्थ्यं गृहस्थधर्मं वीक्ष्य सप्तद्वीपवती भूमिस्तस्याः पतिर्विस्मित इयत्तपः परिकल्पितमिति साश्चर्यः, सार्वभौमश्रिया सर्वभूमिपृथिवीभ्यामणत्रावित्यण् । अनुशतिकादित्वादुभयपदवृद्धिः । अन्वितोऽपि स्तम्भम् । अहमेव गार्हस्थ्यधर्म इति गर्वमजहात्तत्याज ।। ४७ ।।

छलारी — यद्गार्हस्थ्यं यस्य सौभरेर्गार्हस्थ्यं पञ्चाशद्भार्याभिः सह गृहस्थधर्मानुष्ठानं महार्हशय्यादिमहाभोगसाधनं महाभोगं चेत्यर्थः । सप्तद्वीपवतीपतिर्मान्धाता श्वशुरः । स्तम्भं गर्वम् । अहमेव गार्हस्थ्ययावद्धर्मानुष्ठानवान्, अहमेव महार्हशय्यादिमहाभोगसाधनवान्, अहमेव महाभोगवांश्च मत्समः कोऽपि नास्तीत्यहंकारमित्यर्थः । सार्वभौमश्रिया साम्राज्यलक्ष्म्याऽन्वितः समन्वितः ।।४७।।

एवं गृहेष्वभिरतो विषयान् विविधैः सुखैः ।
सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः ।। ४८ ।।

सत्यधर्मीया — विषयान् शब्दादीन्सेवमानोऽसौ सौभरिर्विविधैः कायनिकायानुभूयमानैः सुखैरनलोऽग्निराज्यस्तोकैराज्यस्य स्तोकाः । स्तोकेऽल्पे चातक इति विश्वः । बिन्दुभिरिति यावत् । यथा न तुष्यति तथा नातुष्यदित्यन्वयः ॥ ४८ ॥

छलारी — गृहेषु । बहुवचनमाद्यर्थे ॥ गृहादिषु सुखैः सुखसाधनैर्न चातुष्यदलंबुद्धिं न प्राप । आज्यस्तोकैर्घृतबिन्दुभिः ॥ ४८ ॥

स कदाचिदुपासीन आत्मापह्नवमात्मना ।
ददर्श बह्वृचाचार्यो मीनसङ्गसमुत्थितम् ॥ ४९ ॥

सत्यधर्मीया — स मीनसङ्गसमुत्थितं कदाचिदात्मना स्वेनैवात्मापह्नवं नाशं मनसा मार्गात्स्खलनम् । अपलाप इति यावत् । अपह्नवे ज्ञोऽत्यन्तापह्नवे लिङ् वक्तव्य इति सूत्रवार्तिकयोरपह्नवशब्दो निह्नवार्थकः स चापलापः । अपलापस्तु निह्नवः इत्यमरः । केचिदमरेऽपलापस्त्वपह्नव इति पठन्ति । तदा तु न क्लेशः । चन्द्रालोके चापह्नवालङ्कारषट्कप्रस्तावे व्याजाद्यैर्निह्नुतपदैर्निह्नवोऽपह्नव इत्येकार्थौ । ददर्शानुसन्दधे ॥ ४९ ॥

छलारी — इदानीं तस्यानुतापप्रकारमाह ॥ स कदाचिदित्यादिना । बह्वृचानामाचार्यो ऋग्मन्त्रव्याख्याकृदित्यर्थः । आत्मनो मनसः । मनोदोषादिति यावत् । आत्मापह्नवमात्मनो नाशम् । तपोहानिमिति यावत् । ददर्श ॥ ४९ ॥

अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ।
अन्तर्जले वारिचरप्रसङ्गात् प्रस्रावितं ब्रह्म चिरं धृतं यत् ॥ ५० ॥

सत्यधर्मीया — मनसाऽनुसंहितं बहिराविष्करोति ॥ अहो इति ॥ ओदिति प्रगृह्यसंज्ञायां प्रकृतिभावः । इमं सर्वसाक्षिसिद्धम् । तपस्विनः सच्चरितव्रतस्य । सन्ति चरितानि व्रतानि यस्य सद्भिश्चरितानि तानि यस्येति वा यस्य विनाशं पश्यत । जले तत्राप्यन्तर्वारिचरस्य नीरचारिणो मीनस्य प्रसङ्गात्तद्व्यापारविशेषविलोकनरूपाद्विनाशोऽत्र विस्रवणं तच्च विशेषणं तपसि ज्ञेयम् । चिरं धृतमपरोक्षीकृत्य मनसि स्थापितं यद्ब्रह्म श्रीहर्यात्मकं तत्त्वं विस्रावितं जवनिकान्तर्वर्तिपदार्थवत्परोक्षजातमहो आश्चर्यम् । वारिचरप्रसङ्गात्समुद्रशायिप्रसङ्गाच्चिरं धृतं तद्विषयत्वेन क्लृप्तं ब्रह्म वेदादिकं यत् तद्विस्रावितमतद्विषयजातमिति वा । ब्रह्म तत्त्वं तपो वेद इति विश्वः । मम योनिरप्स्वन्तः समुद्र इति श्रुतेः ॥ ५० ॥

छलारी — सच्चरितं सदाचारः । तस्मिन्नियमयुक्तस्येत्यर्थः । अथवा । संश्चासौ (चरित) व्रतश्चेति विग्रहः । तस्य । यद्वा । चरितानि सत्कर्माणि वैष्णवव्रतानि च यस्य । यच्चिरं ब्रह्मतपस्त-त्प्रस्रावितं च्युतं नष्टमित्यर्थः । ब्रह्म वेदतपस्त्वित्यभिधानम् ।। ५० ।।

सङ्गं त्यजेत मिथुनव्रजिनान्मुमुक्षुः
सर्वात्मना न विसृजेद् बहिरिन्द्रियाणि ।
एकश्चरन् रहसि चित्तमनन्त ईशे
युञ्जीत तद्व्रतिषु साधुषु चेत् प्रसङ्गः ।। ५१ ।।

सत्यधर्मीया — अपरोक्षतो जानन् लक्षीकृत्येमं पश्यतेति स्वयं सविनाशं संशयित्वाऽन्येनापि सज्जनेन तत्संसज्जनेन भवितव्यमिति परोक्षतः शिक्षयति ।। सङ्गमिति । मिथुनव्रजिनाद्व्यवायधर्मात्या-सक्तिजनितादेनसः । वृजिनं व्रजिनं दुःखमितीर्यत इति बृहदारण्यकभाष्योक्तेर्व्रजिनेति संयुक्तो व्रकारः । न च छन्दस्त्वेन न छन्दश्छेददोषो वृजिनेत्येव वाच्यमिति । शिवस्तुतौ न किञ्चन व्रजिनमस्त्यभस्मीभवदित्यत्राप्येतद्व्रतेस्त्वयाऽपि चिन्तनीयत्वात् । व्रजधातूपरि रूपस्य सुनीरूपत्वात् । मुमुक्षुः सङ्गं त्यजेत त्यजेत् । तत्त्यागः कथमित्यतः कथयति ।। सर्वात्मनेति । बहिः शब्दादिविषये-ष्विन्द्रियाणि न विसृजेत् । एकश्चरन्सञ्चरन् एवं जानन्वा । ईशे लक्ष्म्यध्यक्षेऽनन्तेऽपरिच्छिन्ने चित्तं युञ्जीत । यदि प्रसङ्गोऽपि त्वयाङ्गीकार्यस्तर्हि कार्योऽत्रेत्याह ।। तद्व्रतिष्विति । तद्व्रतिषु साधुषु । कार्यः स चैक इति प्रागभिहितैकत्वाविरोधी मत्यैक्यविवक्षयेति हृदयम् ।। ५१ ।।

छलारी — मिथुनवृजिनात्स्त्रीपुरुषसङ्गोद्भूतात्पापान्मुमुक्षुः सङ्गं त्यजेत । बहिः शब्दादिषु । एक एव तपश्चरन् । एकस्तपो द्विरध्यायीत्युक्तेः । प्रसङ्गश्चेद्यदि प्रसङ्गोऽपेक्षितस्तर्हि तस्मिन्हरौ रतिर्येषां ते तद्व्रतयस्तेषु साधुषु प्रसङ्गः स्यादित्यर्थः ।। ५१ ।।

एकस्तपस्व्यहमथाम्भसि मत्स्यसङ्गात्
पञ्चाशताऽथ सुतपञ्चसहस्रसङ्गः ।
नान्तं व्रजाम्युभयकृत्यमनोरथानां
मायागुणैर्हृतमतिर्विषयेऽर्थभावः ।। ५२ ।।

सत्यधर्मीया — स्ववृत्तान्तं स्वयमेवाह ।। एक इति । एकोऽहं तपस्वी । अम्भसि जले मत्स्यसङ्गात्तं वीक्ष्य स्थितस्य पञ्चाशता सतीभिः सङ्गः । अथानन्तरं पञ्चाशता तत्समसङ्ख्येन शरीरेण सङ्गः । केवलं पञ्चाशतेत्युक्तिस्वारस्यान्मानाननिभालनेनापि कलेवरग्रहः ।

सौभरिस्तु महायोगी पश्चाशज्जन्मसंसृतिम् ।
विज्ञाय दिव्यज्ञानेन भाविजन्मफलं पुनः ।

एकदैव तपःसिद्धो राहुमुक्त इवोडुराडिति वचनात् । अथ सुतपश्चसहस्रसङ्गः । उभयकृत्यमनोरथानाम् । उपनयनपरस्परपरिणयनाद्युभयकृत्यमनोरथानाम् । अनन्तमवसानं न व्रजामि । तत्र तन्त्रमाह ॥ मायागुणैरिति । भगवदिच्छासहकृतप्रकृतिगुणैर्हृतमतिरपहृतधीरर्थ इति पुरुषार्थ इति भावोऽभिप्रायो यस्य सः । स च न हरौ किन्त्वत्रेत्याह ॥ विषय इति । अन्ततो गत्वा विषयात्मके तत्प्राये शब्दादौ । विस्तृतं प्रागनुसन्धेयम् ॥ ५२ ॥

छलारी — वारिचरप्रसङ्गादित्युक्तदोषं प्रपश्चयति ॥ एक इति । अहमेक एव तपस्वी । अंभसि मत्स्यसङ्गान्मत्स्यानां मिथः सङ्गं दृष्ट्वा । अथानन्तरम् । पश्चाशत्स्त्रीभिः सह सुरतप्रसङ्गेन सुतपश्चसहस्रसङ्गः । अर्श आदिभ्योऽच् । पश्चसहस्रसुतसङ्गवानित्यर्थः । आसम् । अथवा । मम सुतपश्चसहस्रसङ्गः । आसीदिति शेषः । प्रत्येकं तासु पुत्रशतं बभूवेति भावः । अथोभयकृत्यं पुत्राणां विवाहादिः कन्यानां प्रदानादिरित्युभयकृत्यानि । तत्र ये मनोरथास्तेषामन्तमवसानं न जानामि । तत्रेदं निमित्तमित्याह ॥ मायेति । मायागुणैः प्रकृतिगुणैः सत्त्वादिकार्यैः रागादिभिरित्यर्थः । विषयेऽर्थभावः शब्दादौ पुरुषार्थबुद्धिः ॥ ५२ ॥

एवं वसन् गृहे कालं विरक्तो न्यासमाश्रितः ।
वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ॥ ५३ ॥

सत्यधर्मीया — एवं निर्विण्णः किमतनोन्मुनिरित्यत आह ॥ एवमिति । न्यासं सर्वविषयत्यागं न तु यतित्वम् । तत्पत्न्योऽनुययुरित्युत्तरप्रातिकूल्यापत्तेः ॥ ५३ ॥

छलारी — एवं विरज्य किमकार्षीदिति तत्राह ॥ एवमिति । कालं बहुकालम् । कालाध्वनोरत्यन्तसंयोगे द्वितीया । न्यासं वित्तगृहादिसंगत्यागलक्षणम् ॥ ५३ ॥

तत्र तप्त्वा तपस्तीक्ष्णमात्मकर्शनमात्मवित् ।
सहैवाग्निभिरात्मानं युयोज परमात्मनि ॥ ५४ ॥

सत्यधर्मीया — तत्र वने आत्मकर्शनं शरीरशोषकं, विषयोपभुक्त्यासक्त्या नरकादिपतिष्यदात्मनः कर्शनं ततः कर्षकमुत्तारकं तप इति यावदिति वा । अग्निभिः पश्चाशद्देहानुष्ठितेष्टिसम्बन्धिभिः सहात्मानं देहं युयोज । दाहानन्तरमात्मानमित्यावर्तते । स्वमात्मनि श्रीहरौ च

युयोज। तत्सायुज्य युक्तोऽभवदिति भावः । क्वचित् षष्ठिसङ्ख्या सौभरिदेहानां श्रूयते । सा चात्रानवधारणेन पञ्चाशतेत्युक्तेरविरुद्धेति ज्ञेयम् ॥ ५४ ॥

छलारी — आत्मकर्शनं देहस्य कृशत्वापादकम् । सहैवेत्यत्र सः ह एवेति पदच्छेदः । आत्मानमित्यस्यावृत्तिः । सः सौभरिरात्मानमन्तःकरणं परमात्मनि युयोज । आत्मानं देहं श्रौताग्निभिर्युयोज । ददाहेति यावत् । इत्येतद्ध प्रसिद्धम् ॥ ५४ ॥

ताः स्वपत्युर्महाराज निरीक्ष्याध्यात्मिकीं गतिम् ।
अन्वीयुस्तत्प्रभावेण शान्तमग्निमिवार्चिषः ॥ ५५ ॥

सत्यधर्मीया — तास्तत्पत्न्यः स्वपत्युः स्वपतेराध्यात्मिकीमध्यात्मनः सर्वाधिकात्मनो भगवतः सम्बन्धिनीं गतिं निरीक्ष्य तत्प्रभावेण तत्तपःशक्त्या । तत्प्रभावेनेति पाठे पातिव्रत्यप्रभावेनेत्यर्थः । शान्तमग्निं तस्यार्चिषो विष्फुलिङ्गा यथाऽन्तर्निलीना भवन्ति तथाऽन्वीयुरन्वगच्छन् । ताश्च पत्युरित्यत्युन्नतः पाठः । हे स्व स्वामिन्निति तमीयुरिति वा । पतिः समास इति न घिसंज्ञा तदभावप्रयोजककार्षता चेति ज्ञेयम् ॥ ५५ ॥

छलारी — अधिकश्चासावात्मा च अध्यात्मा हरिस्तत्सम्बन्धिनीं गतिं ज्ञानम् । ज्ञानपूर्वकरमणमिति यावत् ॥ ५५ ॥

मान्धातृपुत्रप्रवरो योऽम्बरीषः प्रकीर्तितः ।
मातामहेन प्रवृतो युवनाश्वस्तु तत्सुतः ॥ ५६ ॥

सत्यधर्मीया — कन्यास्थितिमत्याश्चर्यावहामादावुदाहृत्य मान्धातृपुत्रत्रिकमध्ये मध्यमस्याम्बरीषस्य सूचीकटाहन्यायेनान्वयमाह ॥ मान्धात्रिति । प्रवरपदपरवशाः प्रवरत्वादौत्सुक्यातिशयेन मध्यमस्यापि वंश आदावप्युच्यत इत्यप्यवतारयन्ति । पुरुकुत्साम्बरीषमुचकुन्दाभिधेषु मातामहेन शशबिन्दुना प्रवृतः प्रगृहीतः । पुत्रतया तत्सुतोऽम्बरीषसुतः । पितामहेनेति पठित्वा मान्धात्रा पौत्र एव पुत्रत्वेन तन्माहात्म्यवेदित्रा कृत इत्यपि योजयन्ति । मान्धातृप्रवरास्तत्प्रवर्ग्यादिति स्वारस्यादिति युक्तिमपि वदन्ति । दुर्ज्ञेयं प्रमेयमिति वयं न निर्णयाय प्रभवामः । मान्धाता प्रवरः श्रेष्ठो येषां ते तथा ॥ ५६ ॥

छलारी — एवं मान्धातृराजकन्यास्थितिमुक्त्वा तत्सुतेषु पुरुकुत्साम्बरीषमुचकुन्देषु पुरुकुत्सस्य ज्येष्ठत्वेऽपि सूचीकटाहन्यायेनाम्बरीषस्य वंशमाह ।। मान्धात्रिति । मातामहेन शशबिन्दुना । युवनाश्वस्तत्सुतस्तस्याम्बरीषस्य सुतः ।। ५६ ।।

हरितस्तस्य पुत्रोऽभून्मान्धातृप्रवरा इमे ।
नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय चोरगैः ।। ५७ ।।

सत्यधर्मीया — पुरुकुत्सस्य वंशं शंसति ।। नर्मदेति । शर्मणा नर्मदा भ्रातृभिरुरगैः पुरुकुत्साय दत्ता । अनेन पिता तस्यास्तदानीं नासीदिति सन्नप्यजागलस्तनायित इति वा वनगो वा हंसो वेति ध्वनितम् । इमे यौवनाश्वाम्बरीषहरितानां मान्धातृगोत्रस्य प्रवरा अवान्तरविशेषप्रवर्तकाः । पितामहेन मान्धात्रा सहार्षेयवरणे प्रवृत्तो मान्धाता प्रवरो येषां त इमेऽम्बरीषयौवनाश्वहरिताः यथाऽऽहाश्वलायनः । हरितकुत्सपिङ्गधर्मभैमगवानामङ्गिरसाम्बरीषयौवनाश्वाश्वेति । मान्धातारं ह्येके पठन्तीत्याङ्गिरसं मान्धात्राम्बरीषयौवनाश्वेतीति इति व्याकुर्वन्ति ।। ५७ ।।

छलारी — तस्य युवनाश्वस्य मान्धाता प्रवरो येषां ते तथा । पुरुकुत्सवंशं कथयिष्यन् आदौ तावत्तस्य विवाहप्रभवं चाह ।। नर्मदेति । भ्रातृभिरुरुगैः । पुरुकुत्साय मान्धातृज्येष्ठपुत्राय । नर्मदा तन्नामिका नागकन्या ।। ५७ ।।

तया रसातलं नीतो भुजगेन्द्रप्रयुक्तया ।
गन्धर्वान् सोऽवधीत् तत्र वध्यश्वान् विष्णुशक्तिधृक् ।। ५८ ।।

सत्यधर्मीया — तया नर्मदया रसातलम् । श्वशुरालयम् । भुजगेन्द्रा भ्रातरस्तैः प्रयुक्ता प्रेरिता तया नीतः । माययाऽऽनयनमनेन द्योत्यते । नयनप्रयोजनमाह । स वध्र्यश्वान्नाम्ना गन्धर्वान् । तदुपद्रवदांस्तत्रावधीत् जघान । वध्रयो वधार्हा वैरिणामश्वा येषामिति विग्रहः । वध्यानिति परधृतः पाठस्तत्प्रकृतपराक्रमाननुगुणो घातकौन्नत्यानावह इत्युपेक्ष्यः । वैरिणामित्यपूरणे स एव दोषः । वृष्णो वध्रिः प्रतिमानमित्यृग्भाष्यटीकाटिप्पणीषु निरुक्तो वध्रिशब्दः । वध्रिर्वधयोग्योऽथ नीच इति । वधेः कर्मणि रिप्रत्यये वधयोग्यो वधहता इत्यस्मात्कर्मण्यौणादिके रिप्रत्यये वध्रिरितीति । अथवा नीचा न्यग्भावमधःस्थत्वादाप्ता वध्रय इति वा । अथवा रूढ्या नीचो वेति टीकोक्तेः । नीचावयव इत्यत्र नीचस्थान इति तत्रैव व्याकृतेः । वधिश्छिन्नमुष्क इति वेदनिघण्टुकोक्तेर्वध्रयस्तथाविधा अश्वाः परपुरगमने निश्शब्दीभवने तथाकृता येषामिति वा । यथोक्तमेतदृग्व्याख्यापरभाष्ये वध्रिश्छिन्नमुष्क इति । अथवा वध्री बद्धा अश्वा येषां ते तथा तान् । दौष्ट्यात्तस्य च तथाकरणे गुणरूपत्वात् ।

नध्रीवध्रीवरत्रा स्यादित्यमरः । बन्धनरज्जुः ॥ विष्णुशक्तिधृक् । तद्दत्तशक्त्याऽऽयुधयुक्तो वा । विशेषसन्निधानयुत इति वा । तत्तेज उत्तेजित इति यावत् ॥ ५८ ॥

छलारी — भुजगेन्द्रैर्भ्रातृभिः प्रयुक्तया तया नर्मदया रसातलं नीतः । सः पुरुकुत्सस्तत्र रसातले । वध्र्यश्वान् वध्र्यश्वनामकगन्धर्वान्दुष्टान् । गन्धर्वजातत्वाद्गन्धर्वनामकान् । अवधीत् । विष्णुशक्त्याख्यायुधधृक् । अथवा । विष्णुसामर्थ्यधृक् । विष्णुस्तत्र विशेषेण संनिहित इत्यर्थः ॥५८॥

नागाल्लब्धवरः सर्पादभयं स्मरतामिमम् ।
त्रसद्दस्युः पौरुकुत्सो योऽनरण्यस्य देहकृत् ॥ ५९ ॥

सत्यधर्मीया — गन्धर्वगन्धेनानुबन्धेन च सुकृतं तिष्ठतु तुष्टैराशीविषैः किमैहिकं लब्धवानित्यतो लोकोपकृत्येदं वव्र इत्याह ॥ नागाल्लब्धवर इति । इमं स्वविजयं स्मरतां जनानां सर्पात् । तद्दंशनादिति यावत् । अभयं भयाभाव इति लब्धो वरो येन सः । इतिशब्दाध्याहारेणान्वये नैकदेशान्वयदोष इति ज्ञेयम् । नागान्नागेभ्यो लब्धोऽलब्धः । अडभावश्छान्दसः । वरः श्रेष्ठः । सर्पादभयं भयाभावम् । नागात्स्वभार्यादिसर्पेभ्य इति वा । याचितो वरस्तैरप्योङ्कृतस्तथाऽपि नानुभवपथमगात्स इति नेत्यप्याह । सर्पादभयं स्मरतामिति प्रसक्तं जनम् । सर्पादभयं सर्पाणामदोऽदनं दंशनमिति वा महाजगरनिगरणं वा तद्भयं नागान्नागच्छत् । इयदेव न फलमित्यप्याह ॥ नेति । ना स्मरन्नरः । अं नारायणमनन्तरं इं स्वापेक्षितं मोक्षं चागात् । इं काममिति गतम् । सर्पादित्यावृत्तिमात्रेणाभिमतसिद्धौ यन्नागादिति पुनराह तेनायमर्थः सूचित इति ज्ञेयम् । पौरकुत्सः पुरकुत्सकुमारो यस्त्रसद्दस्युः । अनरण्यस्य तन्नामकस्य राज्ञो देहकृत्तातः ॥ ५९ ॥

छलारी — स च पुरुकुत्सो नागाद्भुजगेन्द्राल्लब्धवरोऽभूत् । वरमाह ॥ इमं स्मरतां सर्पादभयं भूयादिति । इमं गन्धर्ववधलक्षणं पुरुकुत्सविक्रमम् । पुरुकुत्सवंशमाह ॥ त्रसद्दस्युरिति । पुरुकुत्सस्यापत्यं पौरुकुत्सः । यस्त्रसद्दस्युः । अनरण्यस्य देहकृत्पिता । अनरण्यस्त्रसद्दस्युपुत्र इत्यर्थः ॥ ५९ ॥

हर्यश्वस्तत्सुतस्तस्मादरुणोऽथ त्रिबन्धुरः ।
तस्य सत्यव्रतः पुत्रस्त्रिशङ्कुरिति विश्रुतः ॥ ६० ॥

सत्यधर्मीया — तत्सुतोऽनरण्यसुतः । तस्माद्धर्यश्वात् । अथ त्रिबन्धुरोऽरुणसुतः । तस्य त्रिबन्धुरस्य । सत्यव्रतः पुत्रः स एव त्रिशङ्कुः । त्रयः शङ्कवः कीललक्षणा दोषा यस्य सः । यथोक्तं हरिवंशे । पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च । अप्रौक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रम इति विश्रुतः प्रसिद्धः ॥ ६० ॥

छलारी — अथारुणात् । तस्य त्रिबन्धुरस्य सुतः सत्यव्रतः स एव त्रिशंकुरिति विश्रुतः ॥६०॥

प्राप्तश्चण्डालतां शापाद् गुरोः कौशिकतेजसा ।
सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते ॥ ६१ ॥

सत्यधर्मीया — गुरोर्वसिष्ठस्य परिणीयमानकन्यापहाररुष्टस्य शापाच्चण्डालतां प्राप्तः । अनेनानेककर्मणा चण्डालस्त्वं भवेति शापस्वरूपं सूचितं भवति । यद्वा गुरुर्गुरुपुत्रसङ्घः । यथोक्तं बालकाण्डे वाल्मीकीये । गुरुपुत्रास्तु तच्छ्रुत्वा वाक्यं घोराभिसंहितम् । शेपुः परमसङ्क्रुद्धाश्चण्डालत्वं गमिष्यसीत्यादि । कौशिकस्य कुशिककुमारस्य विश्वामित्रस्य तेजसा प्रभावेन सशरीरः स्वर्गं गतो दिव्यद्यापि दृश्यते । मनुजैरिति शेषः ॥ ६१ ॥

छलारी — त्रिशङ्कुर्गुरोः शापात्परिणीयमानविप्रकन्याप्रहरणात्क्रुद्धस्य मुनेर्वसिष्ठस्य शापादित्यर्थः कौशिकस्य विश्वामित्रस्य तेजसा प्रभावेन सशरीरो मानुषशरीरः स्वर्गं गतः । अद्यापि दिवि व्योम्नि दृश्यते । मनुष्यैरीति शेषः ॥ ६१ ॥

पातितोऽर्वाक्शिरा देवैस्तेनैव स्तम्भितो बलात् ।
त्रैशङ्कवो हरिश्चन्द्रो विश्वामित्रवसिष्ठयोः ॥ ६२ ॥

सत्यधर्मीया — स्वर्गगः कथं कथयाद्यापि दिवि दृश्यत इत्यत आह ॥ पातित इति । देवैरर्वाक्शिरा अधःशिरस्कः पातितो बलात् । यथोक्तं रामायणे ।

> अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः ।
> दैवतान्यपि स क्रोधात्स्रष्टुं समुपचक्रम इत्यादि ।

तपोबलात् । स्तम्भितस्तत्रैव स्थितः । तत्रैवोक्तमदोऽपि ।

> अर्वाक्शिरास्त्रिशङ्कुश्च तिष्ठत्वमरसन्निभः ।
> अनुयास्यन्ति चैतानि ज्योतींषि नृपसत्तम ।

कृतार्थं कीर्तिमन्तं च स्वर्गलोकं गतं यथा इति । त्रिशङ्कवोऽयं स्वर्गस्त्रैशङ्कवः । त्रिशङ्कुकुमारो हरिश्चन्द्रः ॥ ६२ ॥

छलारी — स्वर्गं गतः कथं मानवैर्दृश्यते तत्राह ॥ पातित इति । अर्वाक् शिरा अधःकृतशिराः तेन विश्वामित्रेण बलात्स्तंभितः स्तंभनं प्राप्तः । तथैव स्थित इति यावत् । त्रिशंकोर्वंशमाह ॥ त्रैशंकव इति । हरिश्चन्द्रस्त्रैशङ्कवस्त्रिशङ्कोरपत्यम् ॥ ६२ ॥

यन्निमित्तमभूद् युद्धं पक्षिणोर्बहुवार्षिकम् ।
सोऽनपत्यो विषण्णात्मा नारदस्योपदेशतः ॥ ६३ ॥

सत्यधर्मीया — यन्निमित्तं यो हरिश्चन्द्रो निमित्तं यस्य तत् । पक्षिणो राजसूये विश्वामित्रो दक्षिणाव्याजेन राजतः सर्वमुपजहार तेन परस्परं शापोपयाताडीबकजन्मनोर्विश्वामित्र-वसिष्ठयोर्बहुवार्षिकं वर्षस्या भविष्यतीत्युत्तरपदवृद्धिः । बहुवर्षेषु भवं बहुवार्षिकम् । प्रसिद्धा चेयं कथा भारते हरिवंशे । पूर्वमाडीबके युद्ध इत्यादौ । मार्काण्डेयपुराणे हरिश्चन्द्रोपाख्याने वसिष्ठः ।

तस्माद्दुरात्मा ब्रह्मर्षिर्यज्विनामवरोऽपि ताम् ।
उत्कोपोपहतो मूढः स बकत्वमवाप्स्यति ।

पक्षिण ऊचुः ।

श्रुत्वा शापं महातेजा विश्वामित्रोऽथ कौशिकः ।
त्वमप्याडी भवस्वेति प्रतिशापमयच्छत ।
अन्योन्यशापात्तौ प्राप्तौ तिर्यक्त्वं परमे द्युती ।
वसिष्ठश्च महातेजा विश्वामित्रश्च कौशिकः ।
अन्यजातिसमायोगं गतामप्यमितौजसौ ।
युयुधाते सुसंरब्धौ महाबलपराक्रमौ ।
योजनानां सहस्रे द्वे प्रमाणे नाडिरुच्छ्रितः।
षण्णवत्यधिकं ब्रह्म सहस्रत्रितयं बक इति ।

पक्षिणोः सहसहाययोः । पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिष्विति यादवः । यन्निमित्तं यस्त्रिशङ्कुर्निमित्तं यस्य तमिति वेति प्राचीनाः । स हरिश्चन्द्रोऽनपत्यो न विद्यतेऽपत्यं यस्य सः । विषण्णात्मा खिन्नमनस्कः ॥ ६३ ॥

अत्र सप्तमपञ्चकतृतीयाध्यायः सर्वोऽप्येतन्मूलभूतः । तस्य खण्डार्थः । तथा हि । वैधसो विधेर्गोत्रापत्यं मरीचिर्मनसस्तस्येत्यादिना विधिसम्बन्धबोधनात् । स च वेधसस्तदभिधस्य नृपतेः पुत्र इति साक्षात्तत्पिता ऐक्ष्वाक इति गोत्रपुत्रतयेति वेद्यम् । स पुत्र आस । न चान्या कन्या कुतस्ते नोदूढेति मूढयति शङ्कितारं तस्य ह शतं जाया बभूवुरिति । जायाशब्दनिर्वचनं वेदः स्वयमेव पुरत आवेयदति । तस्य गृहे पर्वतनारदौ तन्नामानौ । मातुलः पर्वतस्तद्भागिनेयो नारद इति तौ ऊषतुः । एकदाऽऽगत्य निवासं चक्रतुः । तयोर्मध्ये स नारदं पप्रच्छ । वक्ष्यमाणयैकया गाथयाऽपृच्छत् ।

तामाह ॥ यन्विममिति । तस्या अर्थः । ये विजानन्ति देवमानवादयः । ये च पश्वादयः । न ज्ञानहीनाः । एते विदोविदश्च सर्वे यद्यस्मात् । नु क्षिप्रं पुत्रमिच्छन्ति । पुत्रेण किञ्चित्फलं विन्दते लभते । पिता । यद्यपि ये विजानन्तीत्याद्यनुरोधेन विन्दन्ते तन्ममाचक्ष्वेति वक्तव्यं तथाऽपि स्वस्यापुत्रतया तत्फलाकलनमुत्सुकतयैकवचनमिति ज्ञेयम् ।

स नारदो दशभिर्वक्ष्यमाणाभिर्गाथाभिः प्रति भूपतिं प्रत्युवाच । तामाह ॥ ऋणमस्मिन्निति । पिता जीवतो जातस्य पोतस्य मुखं पश्येच्चेत्तदैवास्मिन् जाते पोते तातो ऋणं सोढुं पित्र्यादिऋणत्रिकं सन्नयति तं प्रापयति । पुत्रादिभिर्लौकिकं वैदिकं तु सत्रादिभिरवतारयति । एतच्च कर्म सम्पत्तिरित्युच्यते । आम्नातं च तद्वाजसनेयके । अथातः सम्पत्तिर्यदा प्रैष्यन्मन्यते अथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति । पितृवाक्यम् । स पुत्रः प्रत्याह । अहं ब्रह्माऽहं यज्ञोऽहं लोक इति पुत्रवचः । ब्रह्म वेदाध्ययनं मया कर्तव्यं कर्तव्याश्च यज्ञाः सम्पाद्या लोकाश्चेत्येतत्सर्वं त्वया सम्पाद्यमिति पितृवाक्यार्थः । तथा करोमीतीतरस्य । एवमृणं पुत्रे प्रतिनिधाय । तथा च श्रुतिः । सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयत इत्यादिका । अथ चामृतत्वं मुक्तिं च गच्छति प्राप्नोति ॥ १ ॥

द्वितीयामाह ॥ यावन्त इति । पृथिव्यां यावन्तो भोगा ग्रामागारधान्यदिरूपा जातवेदस्यग्नौ चतुर्विधान्नपचनादयोऽप्सु स्नानपानादयस्ततस्तेभ्यो भोगेभ्योऽपि पितुः पुत्रे भूयानतिमहान् । भोग इत्येकवचनेन पृथिव्यादिसर्वभोगप्राप्तिसुखं पुत्रेण प्राप्यत इति ध्वनयति । तथा चाहुः । पुत्रान्नापरं सुखमिति ॥ २ ॥

तृतीयामाह ॥ शश्वदिति । पितरः पितृपितामहप्रपितामहादयः । पितामहाद्यास्तु पितरो नाम कीर्तिता इत्यैतरेयभाष्योक्तेः । पुत्रेणोत्पन्नेन शश्वत्पुत्रोत्पत्तौ फलत्वेन शाश्वतिकं बहुलं तमोऽज्ञानमत्र लोकं च । परत्र तदत्यायन्नतिक्रान्ता भवन्ति । तथा च बोधायनः ।

पुदिति नरकस्याख्या दुःखं च नरकं विदुः ।
पुत्तस्त्राणात्ततः पुत्रमिहेच्छन्ति परत्र चेति ।

स्मृतिश्च । पुन्नाम्नो नरकात्त्राता पुत्र इत्यभिधीयत इति । तोषविशेषहेतुमाह ॥ हि यस्मादिति । आत्मनः स्वस्मादात्मा स्वयमेव जज्ञ उत्पन्न इत्यर्थः । स्वयं स्वकीयं दुःखं परिहर्तुं यतते । तथाऽयं सुतोऽपि दुःखनाशक इति प्रेमपात्रमिति भावः । इरा अन्नमापो वा अन्नमिति श्रुतेः । इरा वारि

तद्वत्युदन्वति । अतितारिणी पारयित्री नौकेव । यथा पोतो नदीनदपत्यादिभ्यस्तारयति तथाऽयमपि पोतो दुःखात्तारयतीति भावः ।। ३ ।।

चतुर्थीमाह ।। किन्विति । अत्र मलाजिनश्मश्रुतपःशब्दैः क्रमात्, मलं गार्हस्थ्यं शुक्ररक्तरूप-मलसङ्कलनात् । अजिनं ब्रह्मचर्यं कृष्णाजिनसम्बन्धात् । श्मश्रूणीति क्षौरविरहितत्वात् । वानप्रस्थाश्रमस्तपः परमहंसाश्रमः । तथा च मलं गार्हस्थ्यम् । किन्नु किं सुखदम् । न किमपि सुखं करिष्यतीति । एवमुत्तरत्रापि । हे ब्रह्माणो विप्रक्षत्राद्याः सर्वे यूयं पुत्रमिच्छध्वम् । अनेन किं मलमिति निषेध्यं गार्हस्थ्यं अनपत्यगृहस्थसम्बन्धीति द्योत्यते । अन्यथा पुत्रमिच्छध्वमित्यनुज्ञावमाप्रसङ्गात् । व्यत्ययो बहुलमितीच्छध्वमिति पदव्यत्ययः । चान्द्रादिमते चात्मनेपदम् । तत्र ज्ञानिसम्मतिमाह । स वदावदो वाग्मी लोको ज्ञानी वै । इत्थमाहेति शेषः । वदावदो वाग्मीत्यमरः । सः वै । एवं प्रघट्टेन तेन कथ्यते न कथ्यते इत्यवदावदः । वदो वाच्यो निन्द्यो नेत्यवदो निन्दनानर्ह इत्यर्थ इति व्याकुर्वन्ति । लोको लोकप्रापक इति च । केचितु मलं पुत्रगात्रं पङ्किलं चेत्किम् । अजिनं चर्ममात्रं चेत्किम् । श्मश्रूणि देहं व्याप्य सन्तु चेत्किम् । तस्य जानुलग्नजम्बालस्य बालस्य लालनोत्थाप-नाङ्गालिङ्गनादौ तप आलोचनं किं कुतः । स वै यादृशस्तादृशो बालको लोको लोक्यो दृश्यो गद्गदवागपि वदावदो वाग्येव कुतो लोकोऽवलोकयति स्वर्गादिकं भगवन्तं वा स तथेत्यवश्यकं तत्साम्पादनमिति वर्णयन्ति । यत्र प्रष्टा हरिश्चन्द्र एक एवेति ब्रह्माण इच्छध्वमिति बहुवचनं कथमिति चेन्न । किं न सा सभा नोपविष्टाः शिष्टाः । नारदोऽपि किं न दीनजनमन्दारः । न चैकाधिकारिकं शास्त्रम् । तन्मुखेनेतरोपदेशस्य सम्भवात् ।। ४ ।।

पञ्चमीं प्रपञ्चयति ।। अन्नमिति । अन्नं प्राणस्तदेव स्थापकत्वात् । हेति सर्वत्र प्रसिद्धिद्योतकः । वासो वस्त्रं शरणं गृहरूपं शीतातपवारकत्वात् । हिरण्यं कटकमुकुटादिरूपं दृश्यताहेतुत्वात्प्रियम् । पशवो गवाश्वम् । विवाहाः कृष्यादिनिर्वाहकत्वेन वाहकत्वेन च विवाहाः । जाया सखा तत्तुला । स्त्र्यपत्यं चेत्कथमित्यतः कथयति ।। दुहिता पुत्री कृपणं दैन्यदेति । तथा च स्मर्यते ।

सम्भवे स्वजनदुःखकारिका सम्प्रदानसमयेऽर्थहारिका ।
यौवने च बहुदोषकारिका दारिका हृदयदारिका पितुरिति ।

न हि निन्दानयेन पुमपत्यात्यौन्नेये तात्पर्यम् । अथवा दुहिताऽकृपणं कार्पण्याभावप्रापिकेति साऽपि प्रार्थनीया । तथा च-

पुत्राच्छतगुणं पुत्री यदि पात्रे प्रदीयते ।
कन्योदिता बत कुलद्वयतारिणीत्यादि सङ्गच्छते ।

इयता तातेन पोतः प्रार्थ्य इत्याह ॥ हि यतः पुत्रः परमे व्योमन्स्वर्गादिस्थाने । तत्प्राप्ताविति यावत् । ज्योतिर्नामैकदेशे नामग्रहणम् । विस्तृतं चैतत्सुधायां ज्योतिरिति व्याख्यावसरे । महाभाष्येऽपि प्रविश पीण्डीमित्यादिना पदे पदैकदेशं वाक्ये वाक्यैकदेशं प्रयुञ्जानो न दुष्यतीत्युक्तेर्ज्योतिःशब्दो ज्योतिष्टोमनामा । ज्योतिष्टोमसमानः । यद्वा परमे व्योमन् आकाशस्तल्लिङ्गादित्यादेर्हरौ तत्प्राप्तिविषये ज्योतिर्ज्ञानरूप इत्यपेक्ष्य इत्यर्थ इति । अमृतत्वं च गच्छतीति प्रागुक्तं सल्लग्नम् ॥ ५ ॥

षष्ठीं स्पष्टयति ॥ पतिरिति । पत्युर्भार्यायाश्चाकारद्वयम् । पुरुषाकार एको रेतोरूपेण गर्भाकार एकः । जायाकारः पतिं प्रति भार्याया गर्भरूपापत्याकारं प्रति मातृत्वाकार इति । पतिर्जायां प्रविशत्यतः स भाविपुत्राकारस्य च मातरं गर्भो भूत्वा प्रविशति । तस्यां स्वभार्यायां पुनर्नवो नूतनतनुर्भूत्वा दशमे मासि । मासीति स्वतन्त्रशब्दो वा पद्दन्नित्यादेशरूपो वा न नः काचित्क्षतिः । माश्चन्द्रमसि मासे चेति धनञ्जयोक्तेः । जायते । आत्मा वै पुत्रनामासीदित्यादेः । यथा पुनर्नवो वृष्ट्या एधते तथा वर्धमानः पुनर्नवो भूत्वेत्यावृत्त्या विशेषो ज्ञेयः । यथोक्तं सङ्ग्रहरामायणे । तर्पितः सकलो लोकः पुनर्नव इवाबभाविति । बिले गणजलित्यपभ्रष्टभाषया । पुनर्नवा तु शोथघ्नीत्यमरः॥६॥

सप्तमीमाह ॥ तज्जायेति । यद्यतोऽस्यां भार्यायां पुनः स्वयं जायते तत्तस्मात् । जाया जायतेऽस्यामिति व्युत्पत्त्या जाया तच्छब्दवाच्या भवति । किञ्चैषा योषा भूत्याभूतिशब्दवाच्या भवत्यस्यां पतिः पुत्ररूपेणेति भूतिः । रोतोरूपेणाभवत्यस्यां स इत्याभूतिश्च । सर्वत्रापि सम्भावकमाह ॥ बीजमिति । एतदेतस्यां बीजं रेतो निधीयते निक्षिप्यतेऽतो जायाभूत्याभूत्यादयः शब्दा उक्ता युक्ताः ॥ ७ ॥

अष्टमीं स्पष्टयति ॥ देवाश्चेति । एतामेतस्यां देवाश्च ऋषयश्च महत्तेजस्तेजोरूपं समभरन्नपूरयन् । तत्सम्पत्त्यनन्तरं देवाश्च ऋषयश्च मनुष्यान्प्रत्यब्रुवन् । तद्वचनमाह ॥ पुनर्जननीति । पुत्ररूपेण पुनर्जातानां वो युष्माकमेषा जननीति ॥ ८ ॥

नवमीमाह ॥ नापुत्रस्येति । अपुत्रस्य लोके न नास्तीति यत्तत्सर्वे पशवोऽपि विदुः किं पुनर्नराः । लोकः तज्जन्यं सुखं लोकसुखं न जानन्तो ये तेऽपि विदुः । पुत्रसौख्यमात्रं तत्केनोह्यत इत्यत आह ॥ तस्मात्त्विति । मातरं स्वजननीं स्वसारं स्वभगिनीं चाधिरोहति । अपत्योत्पादनार्थमिति शेषः ।

अन्यथैवं पारवश्यप्रवृत्तिर्न स्यादिति भावः । तुशब्दः पशुजातावपि न केचनेत्थम्भावा इति विशेषसूचकः । इदमेकस्मिन्नश्वे मातृष्वस्राद्युपर्युत्सृष्टे पुरुवारमगमनं गमनं चेतरतुरङ्गीषु बहुशः साक्षिसिद्धमिति न चित्रयितव्यं चेतः ॥ ९ ॥

दशमीं दर्शयति । एष पन्था इति । पुत्रिणः पुत्रवन्तः । प्राशस्त्यं मतुबर्थः । ते विशोकाः शोकविकला देवादयो यं पन्थानं मार्गमाक्रमन्ते प्राप्नुवन्ति । एषः पन्थाः सुतसौख्यानुभवमार्गः । उरुगाय उरुभिः शास्त्रज्ञैर्महद्भिर्गीयत इत्युरुगायः गै शब्दे आदेचः । आतो युकूचिण्कृतोरिति युगागमः । तद्गीतः सुसेवः सुष्ठु सेवनीय इति सुसेवः सुखकृत् । पृथुप्रगामा सुसेवः । सुसेवकृत् सुसेवं यस्माद्भवति तत्तथोक्त इत्यृग्यभाष्यटीकायां शोभनं सेवमिति षेवृ सेवायामित्यस्मात्कर्मण्यका-रप्रत्यये धात्वादेः षस्य छान्दसे शतरि च निष्पन्नस्य सेवशब्दस्य सर्वसेव्यसुखपरत्वमिति भाव इति टिप्पणीषु । तमज्ञा अपि पशवः । गोमहिष्यादयो वयांसि पक्षिणश्च सम्पशयन्ति जानते । तस्माज्ज्ञानादेव ते पश्वादयो मात्रा अप्यतत्कृतियोग्या अपि मिथुनीभवन्ति । रत्यै संयुज्यन्ते पुत्रगार्ध्यादिति भावः । श्रुतिः स्वयं नारदभारतीं निगमयति ॥ इति ह स्मा आख्यायेति । अवस्थित इति शेषः स्मै प्रसिद्धौ ।

इति प्रथमः खण्डः ॥

अथ द्वितीयः खण्डः

अथैनमित्यारभ्य तेन त्वा यजा इत्यन्तं नारदवचनम् । तथेत्यारभ्य तेन त्वा यजा इत्यन्तं राज्ञो वचनम् । तथेतीति वरुणस्य । हे वरुण पुत्रो जायताम् । यदि जातस्तेन सुतेन । एवं किमर्थमूच इति चेत् । बहुबुद्धिमानसि । तत्रापि त्वं न निद्रित इति भवेरनुयोक्ता । अनादिवेदसिद्धप्रमेये शङ्कैव नाङ्कूरणीया । अथाऽपि तुष्यतु भवान्प्रेष्यः । हरिरेतोमयत्वात्तोयस्य वरुणस्य च तद्धरत्वादपत्यादेश्च तत्कारणकत्वादेवमुक्तिरिति युक्तिमवेहि । तर्ह्यत्रैव पुत्रार्थं मित्रावरुणादिदेवताराधनोक्तिः कथमिति चेत् । तर्ह्युक्तं स्मरेत्युत्तरम् । तथेति वरुणेनोक्ते सति तस्य रोहितो नाम्ना पुत्रो जातः ॥ १,२ ॥

सुतो जातोऽनेन मां यजस्वेति । स वरुणोऽब्रवीत् । हरिश्चन्द्रमेत्येति शेषः । वेदे च यथेन्द्रशत्रुः स्वरतोऽपराधादितिवत् । मामनेनेति प्रयोक्तव्ये माऽनेनेत्यानुपूर्व्याऽनेन मा न यजेति भाविकार्यं सूचितमिति मन्तव्यम् । अत्र निर्दशः नु अस्त्विति च्छेदः । त्वा यजा इति राजवचनम् । तथेतीति वरुणवचः ॥ ३ ॥

स ह निर्दश आसेति ब्राह्मणब्राह्मीवरुण इति शेषः । इति राजा तथेति वरुणः । एवं तत्र तत्रानुसन्धेयम् ॥ ४ ॥

अज्ञताजनिषत । मन्त्रे घसव्हरण शवृदहाद्वृचृकृगमिजनिभ्यो लेः । मन्त्रग्रहणं ब्राह्मणोपलक्षणार्थम् । अज्ञत वाऽस्य दन्ता इति वैदिककौमुद्योक्तेः । तन्मनोरमायां चाजनिषतेत्युक्तेः । लुङ् पथमपुरुषबहुवचनम् । अजनि अज्ञातां अज्ञतेति रूपम् । अस्य सुतस्य यजस्व माऽनेनेति यदाऽस्य पशोर्दन्ताः पतन्ति । अथ स मेध्यो भवेदिति प्रत्याहेत्यन्वयः ॥ ५ ॥

अपत्सत पतिताः अपत्त अपत्सातां अपत्सत वा । अस्य पशोर्निपतिता दन्ता मां यजस्वेत्याह सः । अस्य पशोः पुनर्दन्ता जायन्ते । अथ तदनन्तरं स पशुः शुचिः ॥ ६ ॥

पुनर्जाता दन्ता इत्यादिकं सोऽब्रवीत् । सन्नाहो धनुरभ्यासादिस्तत्सहितः सान्नाहुकः ॥ ७ ॥

हे तत तात सुत । मह्यं त्वामयं वरुणोऽददात् दत्तवान् । हन्त खेदे ॥ ८ ॥

स प्राणप्रेप्सुर्नेत्युक्त्वा धनुराधायारण्यमुपातस्थौ संवत्सरमरण्ये चचार ॥ ९ ॥

इति द्वितीयः खण्डः

अथ तृतीयः खण्डः

वेदपुरुषस्तद्ग्रहणं स्वयं वेदयति । तस्येति । तत्पितृग्रहणम् । आगन्तुं कृत निश्चय इत्येवमुक्तिः ।

तमिन्द्रः पुरुषरूपेण पुरुषाकारेण प्रशस्तरूपेण । प्रशंसायां रूपप्रत्ययः । एत्य पर्युवाचेत्यन्वयो वा । अपपरी वर्जन इत्युक्तेर्निषेधपूर्वमभाषतेत्यर्थः । यद्वोत्तरत एव निषेधस्य स्पष्टं प्रतीतेः पर्येत्येत्यखण्डं पदम् । तद्वचनप्रकारमाह ॥ नानेति । अनाश्रान्ताय तीर्थयात्रादिकायक्लेशरहिताय । शुश्रुमेति साम्प्रदायिकतामाह । अयं जनो नृषद्वर उक्तं गुर्वादिना कुर्वाणो नृषत्, वरोऽनुक्तकारीत्यभिधानम् । नृषु सीदतीति नृषद्वा । नृषद्वरसदित्येतत्काठकभाष्यव्याख्यानात् । स मनुष्यवरः सन्नपि पापस्तद्वान् । सदेरिति ष्वरच् । सदिरप्रतेरिति षत्वम् । नृषद्वरस्तु जम्बाल इत्यमरश्च । नृषद्वरो जम्बालानिकोपद्रवयुक्तो मार्गः । नृषद्वरस्तु जम्बाल इति विश्वः । अत एव पापः क्लेशिष्टः । अहं त्वजनः सहायरहित इत्यत आह ॥ इन्द्र इदिति । चरतः पुंस इन्द्र इत् इन्द्र एव सखा रक्षक इति चरैव चरैवेति मां ब्राह्मणोऽपरोक्षज्ञानी कश्चिदवोचदिति प्रथमे वत्सरे पर्येत्योवाचेत्यन्वयः । अनेन सम्प्रदायप्रवर्तकोऽपि तेनोपदिष्ट इति ज्ञेयम् । अजनेऽरण्य इति वा ॥ १ ॥

चरतः पुरुषस्य जङ्घे यथा पुष्पिण्यौ वृक्षशाखालते पुष्टेऽन्तः सारसहिते दृश्येते । तथा बलवत्यौ भवत आत्मा मध्यदेहश्च भूष्णुः । भूष्णुर्भविष्णुर्भवितेत्यमरः । वर्धिष्णुरिति यावत् । फलस्य विशरणस्य ग्रहो हि निग्रहः । स एव ग्रहिर्यस्य निगृहीताङ्गविशरणः । त्रिफला विशरण इति

स्मरणात् । न केवलं कलेवरपीवरतामात्रावाप्तिः किन्तु दुरितदुरितोऽपि भवतीत्याह ।। शेर इति । अस्यैवं चरतः सर्वे पाप्मानः प्रथमे तीर्थयात्रार्थकमार्गे श्रमेणाटव्यटनघटितेनाङ्गश्रान्त्या शेरे भवन्ति । पुनश्च हता नष्टा भवन्ति हताः श्रमप्रतिहताः शेरे शेरते । अकार्यकारिणः शयना भवन्तीति वा । पूर्ववदुर्वरितम् ।। २ ।।

एवं द्वितीये गाथापर्याये तृतीयमपि पर्यायमाह ।। तृतीयमिति । आसीनस्य चरणमनाचरत एकत्रोपविष्टस्य भग ऐश्वर्यादिषट्कमास्तेऽनभिवृद्धः संस्तावानेवास्ते । न वर्धत इति यावत् । तिष्ठत उत्थितस्य भगः स्वयमूर्ध्वं तिष्ठति वृध्द्युन्मुखो भवति । निपद्यमानस्य शयानस्य स्वयं शेते तत्प्राय इत्यभिप्रायः । यदाऽयं स्वपिति तदा चोरयन्ति चोरा इति भगभङ्ग इति भावः । चरतश्चेद्धनसमेधनार्थं व्रजतश्चेत्सोऽपि चराति चरति ।। ३ ।।

चतुर्थमाह ।। चतुर्थमिति । निद्रा जागरणमुत्थानं चरणं चेति चतस्रोऽवस्थाः पुरुषस्य । ता एतच्चतुर्युगीरूपा आसुः । उत्तमत्वाच्चतुर्थी त्वयाऽनुष्ठेयेति । सञ्जिहानः शय्यां परित्यजन् । गतम् । इतरदवगतभागः ।। ४ ।।

पञ्चमं प्रपञ्चयति ।। पञ्चममिति । चरन्नरः क्वचिन्महीरुहादौ मधु क्षौद्रं लभते क्वचित्स्वादु सुरसमुदुम्बरं जन्तुफलादिफलम् । तद्विश्वाससम्पत्त्यै सर्वजनीनं निदर्शनं दर्शयति । यो न तन्द्रयते न विलासयत्यलसतां तस्य सूर्यस्य श्रेमाणं श्रेष्ठत्वं जगद्वन्द्यत्वं पश्य, चरणेनैव रवे खे हीयन्महीयस्त्वमिति त्वं च चर ।

इन्द्रकृता तन्द्रेणोपदेशेन देशांश्चरतो रोहितस्य क्षेमे क्षेमे च हरिश्चन्द्रस्य राजर्षेर्हेतुभूतं सत्सङ्गमङ्गलमालपति ।। षष्ठमिति । चचार । सञ्चरन् अजीगर्तं नाम्ना सौयवसिं सूयवसस्य ऋषेः पुत्रस्तम् । अरण्ये उपेयाय प्राप्नोत् । तत्स्वरूपमाह ।। अशनया परीतं समाने लोप इति । मधुनि लिल्युः । गुहाशयमित्यादाविवैकयकारलोपो नकारह्रस्वश्च ज्ञेयाविति केचित् । तन्न । गौरवग्रासात् । एकपद्यपद्यायां नकारह्रस्वतामात्रं छान्दसमिति लघुता ज्ञेया । अन्नाद्यभावात्खिन्नम् ।

अथ का कथा वृत्तान्तयोरित्यतः कथयति ।। तस्य हेति । तदभिधामभिधास्यति ।। शुनःपुच्छ इति । शेफःशब्दपर्यायोऽयं शेपशब्दः । यथोक्तमृग्भाष्यटीकादौ । यद्वा शेप उतानृपं शेफजं चापि शेफः शब्दपर्यायोऽयं शेपशब्द इति । प्रहराम शेफमिति श्रुतेः । अदन्तावप्येताविति भानुः । शेपपुच्छेति वार्तिकात्क्वचित्फान्तोऽप्यदन्तः । तं पुत्रत्रिकवन्तमृषिमतिरोहितस्वजीवनोपायरहितोपायो रोहित उवाच । हे ऋषे ते तुभ्यं शतं ददामि गवामिति शेषः । किं प्रतियच्छामि त

इत्यस्यावकाशमनाददानः स्वयमेवाह रोहितः । येषां त्रयाणां पुत्राणां मध्ये एकेन सुतेनात्मानं मां निष्क्रीणै । वरुणाय दत्वाऽऽत्मानं मोचयामीति तात्पर्यम् । सोऽजीगर्तो जीवनार्तो ज्येष्ठं शुनःपुच्छं निगृह्णान आकृष्य हस्ते गृह्णन् इमं मत्प्रेमपात्रं नो ददामि । एवं माता कनिष्ठं शुनोलाङ्गूलं नो एव सर्वात्मना न वितरामीति तन्निगृह्णानोवाच । तौ मातापितरौ मध्यमेऽनुभयप्रेमधाम्नि शुनःशेपे दानं सम्पादयाञ्चक्रतुः । पदद्वयम् । अङ्गीचक्रतुः । स रोहितस्तस्याजीगर्तस्य शतं दत्वा स तं शुनःशेपं सा हिंसाऽस्य भविष्यन्ती तत्प्रसक्तिरस्तीति सः । सश्चासौ स च सतम् । पदमेकम् । सा तु हिंसायामिति विश्वः । अतो न तच्छब्दातिरेकः । स रोहितः पितरं हरिश्चन्द्रं राजर्षिम् । यथाऽऽह पाणिनिः । प्रस्कण्वहरिश्चन्द्रावृषी इति ।

एत्य उवाच । तद्वचनं विवेचयन्नाह ॥ तत तातेति । हन्त हर्षे । अनेन शुनःशेपेनात्मानं मां निष्क्रीणै इति । स हरिश्चन्द्रो वरुणं राजानमुपससार । तदुपसरणप्रकारमाह ॥ अनेन त्वा त्वां यजामीति । अने मम मम कुमारस्य वा । अने प्राणप्रेप्सुरिति प्रागुक्तेः । प्राणत्राणविषये । नत्वा त्वां नमस्कृत्य यजा इति वा । एवं वरुणे । वरुणः कथं कृतवानित्यतः कथयति । तथेतीति । सङ्कल्पितादन्योऽयमिति न मनोविकल्पो ममापि त्वनीषत्तोष इति भाषते ॥ भूयानिति । क्षत्रियात्तमपेक्ष्य ब्राह्मणो भूयान् श्रेष्ठः प्रीतिपात्रं तस्मै राज्ञे करणीयत्वेन राजसूयमुवाच । सोऽपि तमुपक्रम्य तस्य यज्ञस्य मध्ये क्रतुरभिषेचनीयो हय एकाहसोमयागस्तस्मिन्यज्ञो भगवांस्तद्विषयकं क्रतुं प्रोवाच तं विक्रीतमेतमत्र स्थितं शुनःशेपं पुरुषं पशुमालेभे । आलब्धुं निश्चयादेवमुक्तिः ॥ १५ ॥

इति तृतीयः खण्डः

अथ चतुर्थः खण्डः

हरिश्चन्द्राध्वराध्वर्य्वादीनाह ॥ तस्य हेति । विश्वामित्रः । मित्रे चर्षाविति दीर्घः । तथा च ब्राह्मणम् । होताऽऽसीज्जमदग्निरध्वर्युर्ब्रह्मा वशिष्ठ उद्गाता सामोद्गानकृदयास्य उपाकृताय तस्मै । अभिषेचनीये सोमयागे जमदग्निस्तं पशुत्वेनोपाकृतवान् । कुशासंहितप्लक्षशाखया मन्त्रपुरःसरमुपस्पर्शने स्वीकार उपाकरणं तथाकृतस्य नियोक्तारं तत उपरि रशनया बन्धनं नियोजनम् । तत्कर्ता हि नियोक्ता तं न विविदुर्न लेभिरे । अस्य च वेदविदितृत्वात्तस्य च कर्मणः क्रूरत्वान्नाध्वर्युजनो नियोजने मानसं नियुयोजेति यदा तदा स तस्य पिताऽजीगर्तः सौयवसिर्मह्यमपरं पुरा दत्तादितरच्छतम् । हे हरिश्चन्द्र तथा ऋत्विजो दत्त दिशत । अहमेनं शुनःशेपं नियोक्ष्यामि । नियोजनं बन्धनं करिष्यामीति तेनोक्ते तस्मा अजीगर्ताय शतं गवां ददुः । सङ्गृहीतगोशतस्तं शुनःशेपं निनियोज । युजेर्लिटि द्विर्भावाभावश्छान्दसः । तथा निनियोजेत्यत्रोपसर्गाद्विर्भावोऽपीति केचित् । वस्तुतस्तु

निकारमेकमुत्कृत्य दत्तेत्यनेन वोवाचेत्यनेन वाऽन्वये सम्भवति छान्दसता स्वच्छन्देनाङ्गीकार्या न । न चोत्कर्षोऽपि विना छान्दसतां न सतां सम्मत इति सा न कथं सम्मतेति वाच्यम् । सा च द्वयीं गतिमवलम्बते । लाक्षणिक्यलाक्षणिकी चेति तत्र द्वितीया तु जघन्या नान्या । छन्दसि परेऽपि व्यवहिताश्चेति लक्षणछन्दस्त्वोक्तेः । इममेवाभिप्रायं टीकाकारो दीदर्शयिषुरभाषत ऋग्भाष्यटीकायाम् । अलक्षणिकं छान्दसमिति बहुशः । न च कर्मनिर्णयभाष्ये प्रप्रप्रकर्षेण प्रकर्षेणातितरामिति द्वयोः प्रकारयोरर्थविशेषद्योतकतया व्याकरणवदत्रापि नितरां नितरामित्यर्थकतया सार्थक्यस्य विलोक्यत्वादुत्कर्षो नोत्कर्षत इति वाच्यम् । वाक्यस्य भेत्तुमशक्यत्व एव तत् । यथोक्तम् । नियेन मुष्टिहत्ययेत्यृग्भाष्यटीकयोरावृत्त्यैवोपसर्गस्य क्रियावृत्तिर्भविष्यति ।

ननु येन वृत्राण्यरींश्च मुष्टिहत्ययाऽर्वता च निरुणधामहा इत्येकमेव वाक्यं कस्मान्न क्रियत इत्यत आह ॥ आवृत्त्यैवेति । अत्र नीत्युपसर्गस्य त्रिधावृत्त्या रुधामाह इति क्रियायां धातोरप्यावृत्तिरङ्गीकर्तव्यैव । उपसर्गाः क्रियायोग इति क्रियायोग एवोपसर्गत्वश्रवणात् । वाक्यभेदेन सम्यगन्वयसिद्धावभ्यासकल्पनानुपपत्तेः । प्रप्रवस्त्रिष्टुभमित्यादौ वाक्यस्य भेत्तुमशक्यत्वात्तत्कल्पनम् । आपश्चभ्यः प्रयोक्तव्या उपसर्गा मनीषिभिरित्यपि विजातीयापेक्षमिति षष्ठाष्टके षष्ठेऽध्याये चतुर्थे वर्गे प्रप्रवस्त्रिष्टुभम् । तथा पञ्चमे द्वितीयाध्याये दशमवर्गे प्रप्रायमग्निर्भरतस्येत्यादौ पदैक्यस्य दर्शनमिवात्र तत्प्रसक्तेरभावाच्च ।

अत विशसनप्रवृत्तिं शंसति ॥ तस्मा इति । उपकरणनियोजने पूर्वमुक्ते आप्रीताय । एकादशसङ्ख्याभिराप्रीसंज्ञिताभिः प्रयाजयाज्याभिर्यद्यजनं तदाप्रीणनम् । तत्संस्कृताय तथोल्मुकेन त्रिःप्रदक्षिणीकरणं यत्तत्पर्यग्निकरणं चेति पर्यग्निकृतायाप्रीतिभिरितो ह्याप्रीतः परितोऽग्निः कृतोऽयं यस्य वेत्युभयत्र विग्रहो ज्ञेयः । तथाह्यनुक्रमणिका । समिद्धा आप्रिय इति । द्वितीयाष्टकेऽध्याये । समिद्धोऽद्य राजसीत्यारभ्य स्वहाकृतीषु राजत इत्यन्ताष्टमनवमप्रवर्गाद्विकगता एकादश ऋच आप्रीया ज्ञेयाः । तत्सूक्तसंस्कारविशेषसहितायेति यावत् । आहत्य संस्कारचतुष्टयवतस्तस्य शुनःशेपस्य तं विशसितारं हिंसितारं पुरुषं पुरुरुषं पूर्ववन्न विविदुः । यदाऽसावजीगर्तः सौयवसिर्मह्यमपरं गोशतं दत्ताहमेनं विशिष्यामीत्युवाचेति शेषः । तस्मा अजीगर्तायापरं शतं ददुः । स अशिं निशानो निशितं कुर्वाणः पुत्रमेधाय प्रापत् । अथ पितुरपि मारणोपसरणानन्तरं शुनःशेप ईक्षाश्चक्रे चित्त एवमालुलोच ।

तदेवावेदयति ॥ अमानुषमिवेति । अमानुषं मनुष्या मानुषा मर्त्या इत्यमरादमानुषमजादिकमिव मा मां विशिष्यन्ति हिंसिष्यन्ति हन्त कष्टमिति । अत उत्तरं किं त्वं करिष्यसीत्यत आह ॥ अहमिति ।

देवता उपधावाम्युपासे । इत्यालोच्य प्रजापतिं ब्रह्माणमुपससार । प्रथमतस्तदुपसरणे निमित्तं देवतानां प्रथमं मुख्यमिति । तामृचं प्रतीकयति । कस्य नूनं कथमस्यामृतानामितीति । विवृतेयं हरिहिरण्यगर्भादिविषये ऋग्भाष्यटीकादिष्विति विस्तरदरतो नेह व्याख्यायते । एवमुत्तरत्रापि । तं शुनःशेपमग्निर्देवानां मध्ये नेदिष्ठः । अन्तिकशब्दादतिशायने तमबिष्ठनावितीष्ठन्यन्तिकबाढयोर्नेद-साधाविति नेदादेशः । तावां नेदिष्ठमीमह इति ऋग्भाष्यटीकयोः । नेदिष्ठत्वं समीपत्वं तौ नेदिष्ठ क्षिप्रमिति व्याख्यातम् । यद्यप्ययं समीपमात्रबोधकस्तथाऽपि योग्यतयाऽतिक्षिप्रकारीत्यर्थक इति ज्ञेयम् । अतस्तमुपधावेत्युवाच । अत्रोत्तरत्र शक्तैरशक्तं सेवोक्तिस्तेषां तेषां भागस्य क्लृप्तेरिति ज्ञेयम् । सोऽग्निमुपससार । तां प्रतीकं सत्यृचम् । अग्नेर्वयं प्रथमस्यामृतानामितीति । सवितृशब्दनिरुक्तिं स्वयमेव वेदपुरुषो दर्शयति । प्रसवानामीशे प्रसूते सर्वसर्वाभीष्टमितीति । ईशे ईशो भवति । अभि त्वा देव सवितरित्येतेन तृचेन । तिसृणामृचां समाहारस्तृचम् । ऋक्पूरब्धूरित्यप्रत्ययः । हे शुनःशेप त्वं वरुणाय राज्ञे नियुक्तो यूपे बद्धोऽस्यतस्तमुपास्वेति सवित्रोक्तोऽतः सवितृविषयादभित्वा देव सवितरित्युक्तात् तृचात् । उत्तराभिरेकत्रिंशत्सङ्ख्याभिर्ऋग्भिर्वसिष्वा हीत्यारभ्योक्तैरग्निर्बृहद्भानुरिति प्रथमाष्टकद्वितीयाध्यायवर्गीयसङ्ख्याभिर्वरुण उवाच । अग्निर्वै देवानां मुखं तत्स्थानीयः । द्वारभूत इति यावत् । तन्मुखत एव हविर्हरणात् । सर्वैः सुपर्वभिः । अत एव सुहृदयतमोऽतिप्रेमपात्रम् । तमग्निं नु क्षिप्रं प्रस्तुहि । अथानन्तरं त्वा उत्सृक्ष्याम इत्युक्तो वरुणेन सोऽग्निं प्रजापतिवचनात्स्तुतं पुनरपि तुष्टाव । अत एताभ्यः पूर्वोक्ताभ्यो ऋग्भ्य उत्तराभिर्द्वाविंशतिसङ्ख्याभी ऋग्भिर्वसिष्वा-हीत्यादिकं दशर्चं सूक्तम् । अश्वं नत्वेति त्रयोदशर्चं सूक्तम् । तत्र त्यक्त्वात्यामवशिष्ठाभिः सूक्तद्वयगताभिरग्निस्तं विश्वान्देवान्स्तुहीत्याश्वासयति ॥ विश्वानिति । समस्तान्देवानित्यर्थः । विश्वे सर्वे देवाः । पदद्वयम् । नायं गणवाची विश्वेदेवशब्दोऽखण्डः । अन्यथा नमो महद्भ्यो नमो युवभ्यो नम आशनेभ्यः । यजाम देवान् यदि शक्नुवामेत्येतन्नियोगायोगापत्तेः । इन्द्रो देवानां मध्ये ओजो दीप्तिर्बलं दाक्ष्यं प्रसह्यकरणं सहसुजनः सन् पारयिष्णुरुपक्रान्तसमाप्तिकृदिति वचनात्क्रमात्पदार्थो ज्ञेयः । तत्र तत्रादिशय इष्टनूतमपूप्रत्ययाभ्यां बोध्यत इति बोध्यम् । एतत्सर्वं रथादिदानसमर्थताहेतुः । स शुनःशेपो यच्चिद्धि सत्यसोमपा इति चैतेन सूक्तेन यच्चिद्धीत्यारभ्य तुवीमघेत्यन्तं सप्तर्चं सूक्तम् । उत्तरस्मिन्सूक्ते आव इन्द्रमित्यादिनः शचीभिरित्यन्तद्वाविंशत्यृचे सूक्ते पञ्चदशसङ्ख्याभिर्ऋ-ग्भिस्तुष्टाव । स्तूयमान इन्द्रस्तस्मै प्रीतियुक्तेन चेतसा हिरण्यरथं सुवर्णमयं स्यन्दनं ददौ । तुष्टेः कारणं प्राक् स्वप्रोक्तरोहितचरणाभ्यनुज्ञानात्तत्प्रतिनिधितेति ज्ञेयम् । सङ्कल्पं चक्र इति वदन्ति । तं रथमनुग्रहमैन्द्रमतन्द्रोवेत्य । एतया प्रागुक्तपञ्चदशसङ्ख्येभ्यो ऋग्भ्य उत्तरया शश्वदिन्द्रपोप्रुथुद्भि-रित्यृचं मनसेत्यत्राप्यन्वेति मनसा प्रतीयाय जगाम । अश्विनौ स्तुह्यथ त्वोत्स्राक्ष्याम इतीन्द्रवचनम् ।

स एवमुक्तः । अतः शश्वदिन्द्र इत्यस्या उत्तरेणाश्विना इत्यारभ्य यदीय इत्यन्तेन ऋचेन । तं शुनःशेपमश्विना अश्विना ऊचतुरित्यत्र लोपः शाकल्यस्येति वलोपः । उषसं स्वयोषितमतो यदीयत इति तृचादुत्तरेण वस्त्र उषः प्रिय निधारयेत्यन्तेन तृचेन । तस्य तृचस्य तत्सम्बन्धिन्यामृचि एकैकस्यामेकैकः पाश इति ऋकृत्रिके उक्ते पाशत्रिकं त्रुटितम् । ततः स विपाशो विगतपाशः सन् मुमुचे मुक्तोऽभूत् । पाशो विमुमुचे विमुक्तोऽभूदित्यन्वयो वा । सामान्यतश्छिन्न इत्यर्थः । ऐक्ष्वाकस्य हरिश्चन्द्रस्योदरं कनीयोऽत्यल्पं भवत्यभवत् । क्रमेणाणु भवद्भवदभवत् । अन्यथा यागकरणायोगात् । उत्तमस्यामौषस्यामन्तिमायामृच्युक्तायां विपाशो विमुमुचे ऐक्ष्वाकश्चागदो न विद्यते गदो रोगो यस्य स तथा । आ आस सम्यगभूत् । सङ्कल्पमात्रेणाल्पं भवदुदरं यथा पूर्वं तथाऽभूदिति भावः । अत एव भागवते मुक्तोदरो यजन् देवानित्युक्तिः ।

छलारी — पक्षिणोः पक्षस्थयोः सहायिनोर्वसिष्ठविश्वामित्रयोः । हरिश्चन्द्रं निमित्तीकृत्य यदर्थं युद्धमभूत् । तद्ग्रन्थान्तरादेव ज्ञेयम् । यो हरिश्चन्द्रः निमित्तं यस्य यद्यन्निमित्तमिति विग्रहः । श्रुतिप्रसिद्धं हरिश्चन्द्रचरितमाह ॥ सोऽनपत्य इत्यादिना । नापुत्रस्य लोकोऽस्तीति वाक्यार्थज्ञानात् । विषण्णमना अनपत्यः सः हरिश्चन्द्रो नारदोपदेशात् । हे प्रभो मम पुत्रो जायतामिति निवेद्य । वरुणं शरणं इत्यन्वयः । तदेव विवृणोति ॥ यदीति । हे महाराज यदि वीरः । पुत्रो जायेतेति शेषः । तेन पुत्रेण त्वां यजे ॥ ६३,६४ ॥

वरुणं शरणं यातः पुत्रो मे जायतां प्रभो ।
यदि वीरो महाराज तेनैव त्वां यजे इति ॥ ६४ ॥

सत्यधर्मीया — हे प्रभो वरुण! मे पुत्रो जायताम् । यदि जातस्तेन सुतेन जातेन त्वां यजे । तमेव पशुं कृत्वेति यावत् । इत्येतदभिप्रायेण वरुणं शरणं यातः । अत्र सुतवीर्यं पितृदुर्गतिपरिहारकतामात्रेणेति ज्ञेयम् । श्व ईश्वरो वर्तत इति नीत्यैवोक्तिः । अनेन जातस्य पोतस्य तत्काल आलम्भने को लाभ इति च प्रत्युक्तम् ॥ ६४ ॥

तथेति वरुणेनोक्ते पुत्रो जातस्तु रोहितः ।
जातः सुतो ह्यनेनाङ्ग मां यजस्वेति सोऽब्रवीत् ॥ ६५ ॥

सत्यधर्मीया — तथेति वरुणेनोक्ते सति रोहितो नाम्ना पुत्रो जातः । ततोऽङ्ग हे राजन् । सुतो जातः । अनेन मां यजस्वेति स वरुणोऽब्रवीत् । हरिश्चन्द्रमेत्येति शेषः ॥ ६५ ॥

छलारी — पुरुषपशुना त्वां यक्ष्य इति हरिश्चन्द्रेनोक्ते वरुणेनापि तथाऽस्त्वित्युक्ते । नाम्ना रोहितः पुत्रो जात इत्यन्वयः । अथ वरुण आगत्य हरिश्चन्द्रमवादीदित्याह ॥ जात इति । हे अङ्ग ते सुतो जातोऽनेन पुत्रेण मां यजस्वेति हरिश्चन्दोक्तः सोऽब्रवीदिति ॥ ६५ ॥

यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति ।
निर्दशे च समागत्य यजस्वेत्याह सोऽब्रवीत् ॥ ६६ ॥

सत्यधर्मीया — यदा पशुस्तत्त्वेन त्वां प्रति क्लृप्तो निर्दशो निर्गता दश तिथयो यस्य सः । सङ्ख्ययाव्ययेति बहुव्रीहौ । बहुव्रीहौ सङ्ख्येय इति डच् । अतिक्रान्तदशदिनश्चेत्स मेध्यो भवेदिति । पिता तथेति वरुणो निर्दशे जाते सति समागत्य स मां यजस्वेत्यब्रवीत् ॥ ६६ ॥

छलारी — निर्दशो निर्गतदशदिवसः । मेध्यः शुद्धः । पशोर्निर्दशे सतीत्याह । वरुण इति शेषः ॥ ६६ ॥

दन्ताः पशोर्यज्जायेरन्नथ मेध्यो भवेदिति ।
जाता दन्ता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् ॥ ६७ ॥

सत्यधर्मीया — यद्यदा पशोर्दन्ता जायेरंश्चेदथ स मेध्यो भवेदिति पुनर्जनकोऽब्रवीदिति शेषः । दन्ता जाता इति वचनमन्थरता कुत इति जाता दन्ता इत्युक्तिरिति ज्ञेयम् । स वरुणोऽब्रवीदित्यन्वयः ॥ ६७ ॥

छलारी — यद्यदि पशोर्दन्ता जायेरन् । अथ तदा पशुः शुचिः स्यात् । अनन्तरं त्वां यक्ष्य इत्यब्रवीत् ॥ ६७ ॥

यदा पतन्त्यस्य दन्ता अथ मेध्यो भवेदिति ।
पशोर्निपतिता दन्ता यजस्वेत्याह सोऽब्रवीत् ॥ ६८ ॥

सत्यधर्मीया — यदाऽस्य पशोर्दन्ताः पतन्त्यथ स मेध्यो भवेदिति प्रत्याहेत्यन्वयः । पशोर्निपतिता दन्ता मां यजस्वेत्याह सः ॥ ६८ ॥

छलारी — यदा पतन्ति । बालानामष्टवर्षानन्तरं सुप्रसिद्धमिति भावः ॥ ६८ ॥

यदा पशोः पुनर्दन्ता जायन्तेऽथ पशुः शुचिः ।
पुनर्जाता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् ॥ ६९ ॥

सत्यधर्मीया — यदा पशोः पुनर्दन्ता जायन्ते । अथ तदनन्तरं स पशुः शुचिः शुद्धः । पुनर्जाता दन्ता इत्यादिकं सोऽब्रवीत् ॥ ६९ ॥

छलारी — पशोः पुरुषपशोः पुनर्जाता दन्ताः ॥ ६९ ॥

सान्नाहुको यदा राजन् राजन्योऽथ पशुः शुचिः ।
इति पुत्रानुरागेण स्नेहयन्त्रितचेतसा ।
कालं वञ्चयता तं तमुक्तो देवस्तमैक्षत ॥ ७० ॥

सत्यधर्मीया — राजन्निति वरुणसम्बुद्धिः । राजन्यो राज्ञ्यां राज्ञो जातः । अन्यस्यां जातस्तु राजनः । स चेत्सर्वानर्ह इति सूचयति । सूचयति च न ममतैवमुत्पद्येत राज्ञ इति । हरिश्चन्द्रोऽपि किमित्यवञ्चयद्वरुणमित्यत आह ॥ इतीति । निर्दशेत्यारभ्य सान्नाहकः स्यादिति पर्यन्तम् । स्नेहयन्त्रितचेतसा स्नेहपाशबद्धमनसा राज्ञा तं कालं वञ्चयता । उक्तो देवो वरुणः पुत्रानुरागेण नृपशुर्मम भविष्यतीत्यतिरोहितस्नेहेन तं तं कालमैक्षत ॥ ७० ॥

छलारी — राजन् हे वरुण । यदा राजन्यः क्षत्रियः सन्नाहुकः सन्नाहस्य योग्यः शस्त्रास्त्रग्रहणयोग्यः । ननु हरिश्चन्द्रः किमर्थं कालमाक्षिपदिति तत्राह ॥ इतीति । स्नेहयन्त्रितचेतसा । जातेनेति शेषः । पुत्रानुरागेण युक्तेन दशाहादिलक्षणं तं कालं वञ्चयिता हरिश्चन्द्रेणोक्तो वरुणदेवस्तं कालमैक्षत प्रत्यैक्षत ॥ ७० ॥

रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितम् ।
प्राणप्रेप्सुर्धनुष्पाणिररण्यं प्रत्यपद्यत ॥ ७१ ॥

सत्यधर्मीया — पितुः सकाशात्पितुश्चिकीर्षितं कर्म स्वसंहाररूपमभिज्ञाय मन्त्रिमुखेन ज्ञात्वा प्राणप्रेप्सुः प्राणान्प्रेप्सुरिच्छुः । न लोकेति षष्ठीनिषेधात् । धनुष्पाणिः । सन्नाहन्नु प्राप्नोदित्युक्तेः । अरण्यं वनं प्रापद्यताप ॥ ७१ ॥

छलारी — पितुः पित्रा चिकीर्षितमात्मना पशुना वरुणयजनरूपं कर्माभिज्ञाय प्राणप्रेप्सुरात्मजीवनेच्छुः रोहितो धनुरादाय वनं प्राप ॥ ७१ ॥

पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरम् ।
रोहितो ग्राममेयाय तमिन्द्रः प्रत्यषेधत ॥ ७२ ॥

सत्यधर्मीया — जातमहोदरं जातं महदुदरं यस्य तम् । अनेन केवलमुदरं जज्ञ इति व्याकृत इति ज्ञेयम् । यद्वा तस्य होदरमित्यस्यां श्रुतौ तस्य ह उ उदरमिति छेदः । श्लोके तदर्थो महदिति । एयायायातुमुद्यतोऽभूत् । तमागच्छन्तमिन्द्रः पुरुषरूपेण पर्युवाचेत्यस्यार्थः प्रत्यषेधतेति ॥ ७२ ॥

छलारी — स्वगमनेन वरुणग्रस्तमत एव जातमहोदराख्यरोगं श्रुत्वा । एयाय ग्रामं प्रति जगाम । इन्द्रो वृद्धविप्रो भूत्वा तं रोहितमेत्य प्रत्यषेधत ग्रामं प्रति गन्तव्यमित्युक्तवानित्यर्थः ॥७२॥

भूमेः पर्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः ।
रोहितायाऽदिशच्छक्रः सोऽप्यरण्येऽचरत् समाम् ॥ ७३ ॥

सत्यधर्मीया — क्षेत्रतीर्थनिषेवणैर्भूमेः पर्यटनं पुण्यं तत्प्रापकमादिशदुपदिदेश । सोऽपि रोहितोऽप्यरण्ये समामेकं संवत्सरम् । समा इत्यत्र नित्यबहुवचननियमो नेति प्रागभिधानोदाहरणे-नोपपादितमष्टमे समां सहस्रमित्यनुसन्धेयम् । समा इति पाठोऽपि संवत्सरमेकमेवेत्यर्थः । संवत्सरमिति द्वितीयं संवत्सरमिति चेदंमुद्रणात् । सामान्योक्तिर्वा ॥ ७३ ॥

छलारी — तीर्थक्षेत्रनिवेषणादिभिर्भूमेः पर्यटनं पुण्यमिति रोहितायादिशदित्यन्वयः । इन्द्रेणो-पदिष्टो रोहितः किं चकारेति तत्राह ॥ सोऽपीति । समाः कतिचिद्वत्सरान् अरण्येऽचरत् ॥ ७३ ॥

एवं द्वितीये तृतीये चतुर्थे पञ्चमे तथा ।
अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाऽऽह वृत्रहा ॥ ७४ ॥

सत्यधर्मीया — एवं द्वितीये गाथापर्याये तृतीये चतुर्थे पञ्चमे रोहितमभेत्याभ्येत्य पुनः पुनः सङ्गम्य वृत्रहा इन्द्रः स्थविरो विप्रो भूत्वोचे रे चरैवेत्याह ॥ ७४ ॥

छलारी — एवं द्वितीयादौ वर्षे संग्रामं गच्छन्तम् । रोहितमिति शेषः । वृत्रहेन्द्र आह । प्रत्यषेधत । स्थविरो भूत्वा वृद्धो भूत्वा ॥ ७४ ॥

षष्ठं संवत्सरं तत्र चरित्वा रोहितः पुरीम् ।
उपव्रजन्नजीगर्तादक्रीणान्मध्यमं सुतम् ।
शुनःशेपं पशुं पित्रे प्रदाय समवन्दत ॥ ७५ ॥

सत्यधर्मीया — षष्ठं संवत्सरं तत्र वने उपव्रजन्नागच्छन् मध्येऽध्वमजीगर्तात् । सौयवसेर्ऋषेर्मध्यमं मात्रा पित्रा च त्यक्तं सुतम् । तन्नामाह ॥ शुनःशेपमिति । पशुं स्वप्रतिनिधिं पित्रे प्रदाय समवन्दत नमश्चकार ॥ ७५ ॥

छलारी — एवं शिक्षितस्तत्रारण्ये षष्ठं संवत्सरं चरित्वा पुरीं प्रत्युपव्रजन् आगच्छन् । रोहितोऽजीगर्तात्तन्नामकर्षेः सकाशान्मध्यमं सुतं शुनःशेपम् । अक्रीणाद्गवां शतं दत्वा स्वीकृतवानित्यर्थः । स्वीकृत्य च शुनःशेपाख्यं पशुम् । हरिश्चन्द्राय पित्रे प्रदाय पितरं समवन्दतेत्यन्वयः ॥ ७५ ॥

ततः पुरुषमेधेन हरिश्चन्द्रो महायशाः ।
मुक्तोदरो यजन् देवान् वरुणादीन् महाक्रतौ ॥ ७६ ॥

सत्यधर्मीया — पुरुषमेधेनातद्रूपपशुविशंसनसेवनेन वरुणादीन् देवान् यजन्मुक्तोदरः क्रमाद्ध्रस्वीभवदुदरोऽभवत् । अयजद्देवानिति पाठः स्फुटार्थः ॥ ७६ ॥

छलारी — ततः पुरुषपशुप्राप्त्यनन्तरं हरिश्चन्द्रः पुरुषमेधेन पुरुषपशुहिंसालक्षणयज्ञेन वरुणादीन्देवान् अयजत् । ततो मुक्तोदररोगोऽभवदित्यर्थः ॥ ७६ ॥

विश्वामित्रोऽभवत् तस्मिन् होताध्वर्युरथात्मवान् ।
जमदग्निरभूद् ब्रह्मा वसिष्ठोऽयास्यसामगः ॥ ७७ ॥

सत्यधर्मीया — तस्मिन्यज्ञे आत्मवान्मनस्वी जमदग्निरध्वर्युरभूत् । वसिष्ठो ब्रह्मजो ब्रह्माऽयास्यसामगः । अयास्येति लुप्वसुकं पदम् । अयास्यः सामग उद्गाता । अयास्य एव सामगोऽयास्यसामग इति वा ॥ ७७ ॥

छलारी — तस्मिन्यज्ञे आत्मवानात्मज्ञानी जमदग्निरध्वर्युरभूत् । वसिष्ठो ब्रह्माऽभूदित्यनुषङ्गः । आयास्य सामग इत्यत्र विसर्गलोपश्छान्दसः । आयास्यो मुनिः सामग इत्यर्थः । कर्मधारयो वा । सामं गायतीति सामग उद्गातेत्यर्थः ॥ ७७ ॥

तस्मै तुष्टो ददाविन्द्रः शातकुम्भमयं रथम् ।
शुनःशेपस्य माहात्म्यमुपरिष्टात् प्रचक्षते ॥ ७८ ॥

सत्यधर्मीया — शातकुम्भमयं सुवर्णात्मकं रथं ददौ । मनसा यदा यमपेक्षते तदागच्छन्तं । शातकौम्भमयमिति पाठे स्वार्थेऽणूप्रत्ययः । उपरिष्टाच्चतुर्दशेऽध्याये तत्र विश्वामित्रपुत्रप्रस्तावे ॥७८॥

छलारी — तस्मिन्यज्ञे शुनःशेपनामकपुरुषपश्वालंभनसमये शुनःशेपेन क्रियमाणं स्तोत्रं श्रुत्वा तन्माहात्म्यं दृष्ट्वा सन्तुष्टो देवेन्द्रस्तस्मै शुनःशेपाय सुवर्णमयं रथं ददावित्यर्थः । उपरिष्टात्प्रचक्षते चतुर्दशेऽध्याये ॥ ७८ ॥

सत्यसारं धृतिं दृष्ट्वा सभार्यस्य च भूपतेः ।
विश्वामित्रो भृशं प्रीतो ददावविहतां गतिम् ॥ ७९ ॥

सत्यधर्मीया — गुणपात्रमात्रप्रेमा विश्वामित्रो वधोज्ज्ञां(?) विद्यामुपदिदेश हरिश्चन्द्रमित्याह ॥ सत्यसारमिति । यत्सतां हितमत्यन्तं तत्सत्यमिति कीर्तितमिति वचनात् सद्धिते सारं स्थिरांशम् । सारो बले स्थिरांशे चेति विश्वः । धृतिं विपदि धैर्यं सभार्यस्य भूपतेः । अनेन साऽपि तत्सहधर्मिणीति द्योत्यते । अविहतां गतिमतिबद्धां विद्यां ज्ञानं वा ॥ ७९ ॥

छलारी — हरिश्चन्द्रे गुणान्दृष्ट्वा विश्वामित्रो ज्ञानोपदेशं चकारेत्याह ॥ सत्यसारमिति । सत्यसारं सत्ये सद्धिते सारं सारत्वं दार्ढ्यमित्यर्थः । यत्सतां हितमत्यन्तं तत्सत्यमिति कीर्तितमिति वचनात् । धृतिमलौकिकमार्गादचलनरूपं धैर्यम् । अविहतां कुतर्कैरप्रतिहताम् ॥ ७९ ॥

मनः पृथिव्यां तामद्भिस्तेजसाम्भोऽनिलेन तत् ।
खे वायुं धारयंस्तं च शब्दादौ तन्महात्मनि ॥ ८० ॥

सत्यधर्मीया — उपासनावसरे जडानां भिन्नानां चेतनेषु प्रवेशः । तत्तदात्मकानां तत्तदेकीभावश्चिन्तनीय इत्यतस्तत्प्रकारमाह ॥ मन इति । अन्नमयं हि सौम्य मन इति श्रुतेः । पृथिव्यधिकारेति सूत्रभाष्ये पृथिवी वाऽन्नमित्युक्तेश्चान्नं पृथिवी । तदुपचितं चेतः । पृथिव्यां लीयत इति मनो धारयंस्तां पृथिवीम् । अद्भिरिति तृतीया सप्तम्यर्थे । अप्सु । तदम्भस्तेजसाऽग्नौ तत्तेजोऽनिलेन वायौ । अनिले न इवेति वा । तं वायुं खे आकाशे तच्च खं शब्दादावाकाशोपादानभूतशब्दस्यादौ कारणेऽहङ्कारतत्त्वे तदहङ्कारं महात्मनि महत्तत्त्वे । महात्मनि तत्त्वमुख्याव्यक्तत्वे । शब्दादाविति वदता पृथिव्याः सोपादानगन्धतन्मात्राद्वारा विलयः । तासां च रसतन्मात्राद्वारा तेजसि तस्य च रूपतन्मात्राद्वाराऽनिले तस्य स्पर्शतन्मात्राद्वारा खे तस्य च शब्दतन्मात्राद्वाराऽहङ्कारतत्त्वे लयश्चिन्तनीय इति विशेषः सूचित इत्यवगन्तव्यम् । विस्तृतं चैतद्द्वितीये ॥ ८० ॥

छलारी — ज्ञानिभिरुत्क्रान्तिकाले पृथिव्यादितत्त्वानां जडानां स्वस्वकारणेषु जडेषु तत्त्वेषु लयस्तदभिमानिदेवानां भिन्नानां भिन्नेषु देवेषु प्रवेशलक्षणो विलयः । तत्तदन्तर्गतभगवद्रूपाणां तत्तदन्तर्गतभगवद्रूपेष्वेकीभावलक्षणो विलयश्चिन्तनीय इति सज्जनानां शिक्षयितुं विश्वामित्रोपदेशेन प्राप्ततत्त्वज्ञानस्य हरिश्चन्द्रस्योत्क्रान्तिकाले तत्त्वलयप्रकारं वदन्मुक्तिमाह ।। मनः पृथिव्यामिति । अन्नमयं हि सौम्य मन इति श्रुतेः । अन्नं पृथिवी पृथिव्युपचितं मनः पृथिव्यां विलीयत इति मनो धारयन्ध्यानं कुर्वन्नित्यर्थः । तां पृथिवीमप्सु लीनामिति । अम्भो जलं तेजसि लीनमिति । तत्तेजोऽनिले वायौ लीनमिति । तं वायुं खे आकाशे लीनमिति । धारयन्नित्यस्य सर्वत्रानुषङ्गः । तच्च खं शब्दादावाकाशोपादानभूतशब्दकारणेऽहंकारतत्त्वे लीनमिति । तन्महात्मनीत्यस्यावृत्तिः । तदहंकारतत्त्वं महात्मनि महत्तत्त्वे लीनमिति । तन्महत्तत्त्वं महात्मनि तत्त्वप्रधानेऽव्यक्ततत्त्वे लीनमिति ध्यायन् । उक्रान्तोऽभूत् । तच्च शब्दादावित्यनेन पृथिव्याः सोपादानभूतगन्धतन्मात्राद्वाराऽप्सु लयश्चिन्तनीयः । एवमेवापां रसतन्मात्राद्वारा तेजसि । तेजसो रूपतन्मात्राद्वाराऽनिले । अनिलस्य स्पर्शतन्मात्राद्वाराऽऽकाशे । आकाशस्य शब्दतन्मात्राद्वाराऽहंकारतत्त्वे लयश्चिन्तनीय इत्ययं विशेषः सूचित इत्यवगन्तव्यम् । शब्दादिभ्य आकाशादिसृष्टिः द्वितीयस्कन्धादौ स्पष्टा । भूतादाविति क्वचित्पाठः । तस्मिन्पक्षे भूतादावित्यस्याहङ्कारतत्त्व इत्यर्थः ।। ८० ।।

तस्मिन् ज्ञानकलां ध्यात्वा तया ज्ञानं विनिर्दहन् ।
हित्वा तां स्वेन भावेन निर्बाणसुखसंविदा ।
अनिर्देश्याप्रतर्क्येण तस्थौ विध्वस्तबन्धनः ।। ८१ ।।

इति श्रीमद्भागवते नवमस्कन्धे सप्तमोऽध्यायः ।

सत्यधर्मीया — अहन्तत्त्वाभिमानिनं रुद्रं महत्तत्त्वे तदभिमतिमतिधारति । तस्मिन्महति ज्ञानकलां तदभिमानिनीं सरस्वतीम् । तन्महात्मनि सर्वेश्वरे हरौ । ज्ञानकलां ज्ञानांशम् । प्रतिपत्तिविवक्षयांऽशशंसनं ज्ञेयम् । ज्ञानपदं सर्वगुणोपलक्षणम् । ज्ञानानन्दादिगुणानिति वा । तया ब्रह्मसायुज्यभाजा सरस्वत्या तदभिमन्यमानज्ञानेनाज्ञानं निर्दहन् । ततो भगवज्ज्ञान-कलापरोक्षीकरणानन्तरं तयाऽपरोक्षदृशाऽज्ञानं तद्धेतुकां संसृतिं निर्दहन् तां संसृतिरूपां लिङ्गाङ्गं हित्वा स्वेन भावेन भक्त्या विध्वस्तं समस्तबन्धनं येन स तथा सन् निर्बाणसुखसंविदा प्राकृतशरीराभोग्यसुखज्ञानयुतेन स्वभावेन स्वरूपदेहस्थित्याऽनिर्देश्याप्रतर्क्येण हरिणा सह तस्थौ । सान्तानिकनामलोकेषु जीवन्मुक्तः संस्तस्थौ । मुक्ततुल्योऽभूदिति भावः । एतद्भाणमवष्टभ्य

विधारयामीत्यादेर्बाणं शरीरम् । अनिर्देश्याप्रतर्क्यं स्वस्वरूपं तेन तस्थाविति वा । उक्तमुक्तशरीरस्य पूर्वमनिर्देश्याप्रतर्क्यतासम्भवादिति ॥ ८१ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे सप्तमोऽध्यायः ।

छलारी — ततः किं चकारेत्यतोऽपि प्राप्तम् ॥ तन्महात्मनीति ॥ तेषां तत्त्वानां मुख्यतो नियामके तस्मिन्हरौ । ज्ञानकलां ज्ञानांशम् । ज्ञानपदं गुणान्तरोपलक्षकम् । ज्ञानानन्दादिगुणानिति यावत् । ध्यात्वा स्वयोग्यगुणोपसंहारपूर्वकं ध्यात्वेत्यर्थः । ततस्तमपरोक्षतो दृष्ट्वेति शेषः । तयाऽपरोक्षदृशाऽज्ञानमज्ञाननिमित्तां संसृतिं विनिर्दहंस्तां लिङ्गशरीरलक्षणां संसृतिं हित्वा विध्वस्तबन्धनो मुक्ताविद्यादिबन्धनः सन् । निर्बाणे । बवयोरभेदात् । निर्वाणे प्राकृतशरीराजन्ये । स्वरूपभूत इति यावत् । सुखसंविदौ यस्य स तथा । तेनानिर्दिश्येनेदं मुक्तस्वरूपमेतादृशमिति निर्देष्टुमशक्येन लोकविलक्षणेन स्वभावेन स्वरूपेण सान्तानिकलोकेषु जीवन्मुक्तः सन् तस्थौ । मुक्ततुल्योऽभूदित्यर्थः । एतद्बाणमवष्टभ्य धारयामीति श्रुतेर्बाणं शरीरम् ॥ ८१ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे सप्तमोऽध्यायः ॥ ९-७ ॥

॥ अथ अष्टमोऽध्यायः ॥

श्रीशुक उवाच —

हरितो रोहितादासीच्चम्पस्तस्माद् विनिर्मिता ।
चम्पापुरी सुदेवोऽतो विजयो यस्य चात्मजः ॥ १ ॥

सत्यधर्मीया — रोहिताद्धरितस्तन्नामा । तस्माद्धरितात् । तस्मादित्यावर्तते । तस्माच्चम्पादत एतस्माच्चम्पादिति वा । चम्पापुरी तन्नाम्नी नगरी विनिर्मिता । सुदेवः । यस्य सुदेवस्यात्मजो विजयः ॥ १ ॥

छलारी — हरिश्चन्द्रस्य वंशं कथयति ॥ हरित इति । रोहिताद्धरिश्चन्द्रपुत्रात् । तस्माद्धरितात् । चंप आसीत् । तस्माच्चंपात् । चंपापुरी निर्मिता । अतश्चंपात्सुदेवः । यस्य सुदेवस्य ॥ १ ॥

तरुकस्तत्सुतस्तस्माद् वृकस्तस्यापि बाहुकः ।
सोऽरिभिर्हृतराज्यस्तु सभार्यो वनमाविशत् ॥ २ ॥

सत्यधर्मीया — तत्सुतो विजयजस्तरुकः । तस्माद्वृकस्तस्य वृकस्य बाहुकः ॥ २ ॥

छलारी — तत्सुतो विजयसुतः । स बाहुकः ॥ २ ॥

वृद्धं तं पञ्चतां प्राप्तं महिष्यनु मरिष्यती ।
और्वेण जानताऽऽत्मानं प्रजावन्तं निवारिता ॥ ३ ॥

सत्यधर्मीया — तं वृद्धं पञ्चताम् । प्रपञ्चितं प्राक् । मृतिं प्राप्तं गतम् । महिषी शीर्षाभिषिक्ता अनु तमनु मरिष्यती मरणं कर्तुमिच्छती । आत्मानं देहं प्रजावन्तं जानता ज्ञानवता । इयं गर्भिणीति ज्ञानिनेत्यर्थः । और्वेण तन्नामकेन मुनिना वारिता निवारिता ॥ ३ ॥

छलारी — अनु मरिष्यती सहगमनं कर्तुमिच्छती । प्रजावन्तं पुत्रवन्तं तस्या आत्मानं देहं जानता । ज्ञानिनौर्वेण ऋषिणा निवारिता ॥ ३ ॥

आज्ञायास्यै सपत्नीभिर्गरो दत्तोऽत्र साहसः ।
सह तेनैव सञ्जातः सगराख्यो महायशाः ॥ ४ ॥

सत्यधर्मीया — गरः । गरं विषे च करणे गरमिति विश्वः । सया हिंसया सह वर्तत इति सहसः स एव साहसः । तत्क्षणे मारक इति यावत् । कवयितुश्च हसस्य हासस्याभावो अहसः दुःखं तन्मात्रेण सहितस्तत्काले न तु हिंसक इत्यान्तरङ्गिको भाव इति ज्ञेयम् । कार्यानुकूल्यादिति तेन सपत्नीदत्तगरेण सहैव सञ्जात इति सगर इत्याख्या नाम यस्य स तथा ॥ ४ ॥

छलारी — आज्ञाय गर्भे पुत्रं सम्यक् ज्ञात्वाऽस्यैव बाहुकभार्यायै सहसा हन्तीति साहसस्तेन विषेण सह संजातोऽत एव सगराख्यः ॥ ४ ॥

सगरश्चक्रवर्त्यासीत् सागरो यत्सुतैः कृतः ।
यस्तालजङ्घान् यवनाञ्छकान् हैहयबर्बरान् ॥ ५ ॥

सत्यधर्मीया — यस्य स्यादाज्ञया पृथिवी चक्रवर्ती स इत्युक्तेश्चक्रवर्ती । यत्सुतैः कृत इत्यब्धिः सागरस्तच्छब्दवाच्यः । सगरस्येमे सागरास्तेषामयं सागर इति निरुक्तिः सूचिता । येन मुख्येन

प्रयोजकेन सुतैः करणैः कृत इति सगरस्यायं सागर इति वा । प्राक् स सूक्ष्मोऽभूदिमे स्थूलं कृतवन्त इति भावः । यः सगरः । दुर्यवनादिभेदमाह नामतस्तालजङ्घानित्यादिना ॥ ५ ॥

छलारी — सागरः समुद्रः पूर्वं सूक्ष्मो यत्सुतैः स्थूलः कृतः । सगरस्य प्रभावमाह ॥ य इति । तालजङ्घादयो दुष्टा यवनाः । म्लेंछविशेषाः ॥ ५ ॥

नावधीद् गुरुवाक्येन चक्रे विकृतवेषिणः ।
मुण्डान् श्मश्रुधरान् कांश्चिन्मुक्तकेशार्धमुण्डितान् ॥ ६ ॥

सत्यधर्मीया — गुरुरौर्वः । विकृतवेषिणश्चक्रे । तमेव वेषमाह ॥ मुण्डानित्यादिना किमेभिर्दुर्बलैश्चिह्न मात्रं कृत्वा त्यज राजन्निति गुरुवाक्येनेति भावः ॥ ६ ॥

छलारी — गुरुवाक्येनौर्ववचनेन । कांश्चिदहत्वैव विकृतवेषिणश्चक्रे । तदेवाह । मुण्डान् श्मश्रुधरानिति । अर्धप्रदेशे युक्तकेशान् अर्धमुण्डितांश्चेति ॥ ६ ॥

अनन्तर्वाससः कांश्चिदबहिर्वाससोऽपरान् ।
सोऽश्वमेधैरयजत् सर्ववेदसुरात्मकम् ॥ ७ ॥

सत्यधर्मीया — अनन्तर्वाससोऽन्तर्वस्त्रहीनान् । तथा बहिर्वाससो बहिरौत्तरीयरहितान् चक्र इत्यन्वयः । अद्यापि तत्तद्देशे ते ते, तथा वर्तध्वमित्याज्ञप्तास्तथैव वर्तन्त इति भावः । सर्ववेदसुरात्मकं वेदप्रतिपाद्यं देवस्वामिनं च ॥ ७ ॥

छलारी — अनन्तर्वाससोऽन्तःपरिधानवस्त्रशून्यान् । नग्नानिति यावत् । अबहिर्वासस आवरणवस्त्ररहितान् । सः सगरो सर्ववेदसुरात्मकं सर्वे वेदाः सर्वे सुराश्चात्मा देहः प्रतिमा यस्य तमात्मानं सर्वस्वामिनम् ॥ ७ ॥

और्वोपदिष्टयोगेन हरिमात्मानमीश्वरम् ।
तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरन्दरः ॥ ८ ॥

सत्यधर्मीया — आत्मानं विषविषमीकरणेनात्मनो अनाः प्राणा येन तमीश्वरं हरिमौर्वेपदिष्टयोगेन वाऽश्वमेधैरयजदपूजयत् । पशुमश्वमुत्सृष्टं मन्त्रयित्वा देशप्रदक्षिणार्थं त्यक्तं यज्ञे तदर्थं पुरन्दरो जहार । अनेन शतमन्योः शतमन्युसङ्कल्पजो मन्युस्तेनायं हयापहार इति ध्वन्यते ॥८॥

छलारी — औवर्वोपदिष्टयोगेन ज्ञानेनायजत् । उत्सृष्टं भूप्रदक्षिणार्थं प्रेषितम् ॥ ८ ॥

सुमत्यास्तनया दृप्ताः पितुरादेशकारिणः ।
हयमन्वेषमाणास्ते समन्तान्न्यखनन् महीम् ॥ ९ ॥

सत्यधर्मीया — तस्य द्वे भार्ये । सुमतिरिति वनितासुतैकैका च केशिनीति । तत्र सुमत्या दृप्तास्तनयाः पितुः सगरस्यादेशकारिण आदेशमाज्ञां कुर्वन्तीति ते तथा हरिहयनीतं हयमन्वेषमाणा मार्गयन्तो महीं समन्तान्न्यखनन् खातवन्तः ॥ ९ ॥

छलारी — सगरस्य सुमतिः केशिनीति द्वे भार्ये । तत्र ज्येष्ठपत्न्याः षष्ठिसहस्रपुत्राणां प्रभावमाह ॥ सुमत्या इति । दृप्ता उच्छृङ्खलाः ॥ ९ ॥

प्रागुदीच्यां दिशि हयं ददृशुः कपिलान्तिके ।
एष वाजिहरश्चोर आस्ते मीलितलोचनः ॥ १० ॥

सत्यधर्मीया — प्रागुदीच्यामीशान्यां कपिलस्य श्रीहरेरन्तिके मीलितलोचनः किमप्यकुर्वन्निव मीलिते लोचने यस्य सः । तपश्चरणव्यपदेशेनास्त इति यावत् ॥ १० ॥

छलारी — प्रागुदीच्यामीशान्याम् ॥ १० ॥

हन्यतां हन्यतां पाप इति षष्ठिसहस्रिणः ।
उदायुधा अभिययुरुन्मिमेष तदा मुनिः ॥ ११ ॥

सत्यधर्मीया — षष्टिसहस्रिणः षष्टिसहस्रं सङ्ख्यापरिच्छेदकं येषामस्ति ते तथा । यदोदायुधाः सन्तोऽभिययुस्तदा मुनिर्यावदुन्मिमेष नेत्रे विकासयामास ॥ ११ ॥

छलारी — षष्टिसहस्रसङ्ख्या येषामस्तीति षष्टिसहस्रिणः सुमत्यास्तनयाः । इति ब्रुवन्त इति शेषः । उन्मिमेष नेत्रं विकासं कृतवान् ॥ ११ ॥

स्वशरीराग्निना तावन्महेन्द्रहृतचेतसः ।
महद्व्यतिक्रमहता भस्मसादभवन् क्षणात् ॥ १२ ॥

सत्यधर्मीया — महेन्द्रहृतचेतसो महेन्द्रेण हृतं चेतो येषां ते तथा मोहं प्रापिता इत्यर्थः । महव्यतिक्रमहता महतो हरेर्व्यतिक्रमश्चोरोऽयं हन्यतां हन्यतामित्यादिदुरुक्तिलक्षणोऽपराधस्तेन हताः स्वशरीरस्थेनैवाग्निना तावत्क्षणाद्भस्मसाद्गताः तदधीना अभवन् ॥ १२ ॥

छलारी — स्वशरीराग्निना क्षणाद्भस्मसादभवन्नित्यन्वयः । तावत्तत्काल एव । महेन्द्रेण हृतं चेतो येषां ते तथा मुग्धा इत्यर्थः । महद्व्यतिक्रमेण हन्यतामित्यादिवचनलक्षणस्वापराधेनैव हता न तु मुनिकोपदग्धा इत्यर्थः । केंचित्तु कपिलस्य कोपाग्निना दग्धा इति वदन्ति ॥ १२ ॥

न साधुवादो मुनिकोपभर्जिता नृपेन्द्रपुत्रा इति सत्वधामनि ।
कथं तमो रोषमयं विभाव्यते जगत्पवित्रात्मनि खे रजो भुवः ॥ १३ ॥

सत्यधर्मीया — यद्यप्यतीतपद्ये तत्सदवद्यत्वेन विवरं वितरितं मया तत्प्रत्तचित्तानां कश्चिदविपश्चिदनवधानमानसः सोऽपि कपिलकोपोपतापिता नृपसुता इति मनुयात्तनुयाच्च स्वं सैनसमिति तदुद्दिधीर्षुर्ऋषिः स्वयमेव विशदमुपदिशति ॥ नेति । मुनिः कपिलस्तत्कोपलक्षणाशुशुक्षणिस्तेन भर्जिता नृपेन्द्रस्य सगरस्य पुत्राः षष्टिसहस्रमिति साधुवादस्तत्स्वरूपवेदितृवादो न न भवति । कुत इत्यत आह ॥ सत्त्वधामनि बलज्ञानसमाहारमूर्ताविति । रोषमयं तमो रोषप्रापकमज्ञानं कथं विभाव्यतां रोषस्य मय आगमनं येन तत्तम इति । अयं साधुवादो नेत्यन्वयः । अरोषमराणां दोषाणामुषो दाहो यथा भवति तथाऽयं विभाव्यते । तस्मिन्सत्त्वधामनि तमः कथं विभाव्यत इति वा । निमित्तान्तरमप्याह ॥ जगत्पवित्रात्मनीति । जगत्पवित्रयतीति स तथा । आत्मा स्वभावो यस्य तस्मिन् । न साधुवाद इत्यत आवृत्तो नञ् इवार्थे मुनिकोपभर्जिता इवेति साधुवाद वा तदन्वयः । वस्तुतस्तु स्वपापभर्जिता नैतत्कोपत इति तदर्थः । चक्रं न वृत्तमिति यथा । यद्वा खे भुवस्तत्सम्बन्धि रजो धूलिर्न यथाऽसम्बद्धं तथा क्रोधो माधवेऽसम्भावित इति । ननु नेति प्रतिषेधार्थो भाषायाम् । उभयमन्वध्यायम् । नेन्द्रं देवममंसतेति प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य यत्प्रतिषेध इति । दुर्मदासो न सुरायामित्युपमार्थो य उपरिष्टादुपचारस्तस्य येनोपमीयत इति यास्कनिरुक्तेः पूर्वतनस्य नेत्यस्य भाषायां प्रतिषेधार्थता । परतः प्रयुज्यमानस्य तत्पदार्थप्रतियोगिकसादृश्यप्रतिषेधोभयार्थता भाषायामिति ज्ञायते । तत्कथं नैरङ्कुश्येन यत्रकुत्रत्यस्य सम्बन्धमङ्गीकृत्येवार्थकता वर्ण्यत इति चेत् । सत्यम् । भोसयुध्यछन्दस्त्वेन यथा स्वच्छन्दमन्वयसम्भवात् । यथोक्तं कर्मनिर्णयगतार्भको न कुमारक इत्यृग्भाष्ये कुमारक इवेति तट्टीकायां च मा भूत्स्थितशब्दाध्याहार इति प्रकारान्तरेण व्याचष्टे ॥ कुमारक इवेति । शिशुरिव । यद्यपि परं नेति पदमिवार्थे प्रसिद्धं तथाऽपि क्वचिंत्पूर्वस्यापि भवति । सर्वे विधयश्छन्दसि विकल्प्यन्त इति वचनात् । अस्मिन्पक्षे न वाऽधिष्ठानवचनेन पूर्वपरित्यागोऽर्थात्सिद्ध इति । एतेनैव वयोनवसनीरूपपक्षिणो वसतीर्यद्वत् सहवत्सा धेनुर्धेनुर्न न धेनुरिवेत्यादि ऋग्भाष्यादिटीकाटिप्पणादिकमुक्तव्याकर्तव्र्यगतिकम् । भक्तिपादीयखलेनपर्षान्प्रतिहन्मि भूरि किंमानिन्दन्ति शत्रवोऽनिन्द्रा इत्यनुव्याख्याव्याख्यासुधावाक्यार्थचन्द्रिका तु सम्भवदन्वयं नञमुत्तरं

गृहीत्वा टीकोक्तं क्वचित्पदमिव च प्रसिद्धमुपजीव्य प्रवृत्तेति नैतद्विसंवादिनीति ज्ञेयम् । भोः पर, न तु तनुतरं तव मनः । यन्व्याचकार तावकीनो माधवोऽष्टमाष्टकपञ्चमाध्यायद्वितीयवर्गगता अत्रसन्नथ-स्पृशो नाश्वा रथे नियुक्ता अश्वा इव । ते यथा पलायन्त इति ।

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ।

इति कारिका न भाषा भाषा विवेक्री नपूर्वत्रोत्तरत्रेति च विवेक्री किन्तूदास्त इति यथायथमन्वयार्थौ सम्भवत इति काऽत्र कथन्ता । लुप्तोपमा वा । केचित्तु तमःशब्दस्य तमोगुणवाचकतामभ्युपेत्य तत्र काम एष क्रोध एष रजोगुणसमुद्भव इति गीताविरोधमुद्भाव्य तद्रजोगुणाभिरञ्जिततमोगुणरञ्जिताङ्गी-करणेन तमपनिन्युः । तत्रान्यथा महापाप्मत्वात्मतायास्तमःकार्यभूताया अनिरूपणीयता स्यादिति युक्तिरुपन्यस्ता तैरिति ज्ञेयम् ॥१३॥

छलारी — तन्निराकरोति ॥ नेति । कुत इत्यत आह ॥ सत्त्वधामनीति । सत्त्वं निर्दोषत्वं तस्य धामन्याश्रये । सत्त्वादिगुणशून्ये भगवति । रोषमयं क्रोधमयं तमस्तमोगुणकार्यं कथं विभाव्यते संभाव्यते । असंभावनायां दृष्टान्तो भुवो रजः कथं खे सम्भाव्यत इति । ननु तमो रोषमयमिति क्रोधस्य तमोगुणजन्यत्वमित्युच्यते । तदयुक्तम् । ''काम एषः क्रोध एष रजोगुणसमुद्भव'' इति गीतायां रजोगुणजन्यत्वोक्तेस्तद्विरोधादिति चेन्न । क्रोधस्य रजोगुणप्रविष्टतमोगुण-जन्यत्वाङ्गीकारात् ॥ १३ ॥

यस्येरिता साङ्ख्यमयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययम् ।
भवार्णवं मृत्युपथं विपश्चितः परात्मभूतस्य कथं पृथङ्मतिः ॥ १४ ॥

सत्यधर्मीया — कैमुत्येनाज्ञानहैन्यमाह ॥ यस्येति । यस्य येनेरिता साङ्ख्यमयी शुद्धात्मतत्त्वविज्ञानप्रापिकेति । तथा ग्रन्थरूपिणी सैवेह दृढा नौस्तरिः । यया मुमुक्षुरधिकारी दुरत्यय मेतामतिहायातार्यं भवार्णवं संसारसागरं मृत्युमार्गं तरते तरति । तस्य विपश्चितो ज्ञानात्मकस्य परात्मभूतस्य सकलजीवस्वामिनः पृथङ्मतिर्मतिः सुमतेः पृथग्भूता मतिरमतिः कथं विभाव्यते । तमोऽमतिरिति वाऽवदन्वदंश्च पृथङ् मतिरिति भिन्ना यन्न मतिर्विभौ भावयितुं योग्या कथा का दुर्मतिर्न विभाव्येति ध्वनयामास । एवं धर्मानित्यादेः यो मुमुक्षुर्मृत्युपथं भवार्णवम् । हे य यतस्त्वं तर ते इयं दृढा नौः कदाऽपि न मग्ना भग्ना वा भवती तरी या इतरास्तर्यः कदाचिदत्ययं नाशं स्वविशरणेनाशरणे सत्यदुर्दत्तवत्यः । इयं न तथेति दृढेत्यनेन सूचयति । यो यातरि च दातरीति रत्नकोशो विश्वोऽप्येवम् । यातेर्डः ॥ १४ ॥

छलारी — इतोऽपि तमोगुणकार्यस्य कोपस्य हरावनवसर इत्याशयेनाह ॥ यस्येति । येन कपिलेन हरिणा साङ्ख्यमयी ज्ञानमयी । नौर्यया ईरिता ग्रन्थरूपेण कथिता साङ्ख्यशास्त्रं कृतमित्यर्थः । दृढाऽपेक्षितफलदानाय समर्था । अन्यत्र नूतनत्वेन बलिष्ठा । यया ज्ञाननावा मुमुक्षुर्मृत्युपथं मृत्योर्मार्गं दुरत्ययं ज्ञाननावमन्तरेणात्येतुमशक्यं भवार्णवं तरते तस्य परमात्मभूतस्य साक्षान्नारायणावतारस्य विपश्चितः शुद्धज्ञानवतः श्रीकपिलस्य पृथङ्मती रोषरूपितामतिः कथं संभाव्यत इत्यन्वयः ॥ १४ ॥

योऽसमञ्जस इत्युक्तः स केशिन्या नृपात्मजः ।
तस्य पुत्रोंऽशुमान् नाम्ना पितामहहिते रतः ॥ १५ ॥

सत्यधर्मीया — हे नृप! केशिन्या आत्मजो यः सोऽसमञ्जस इत्युक्तः । तस्यैवासमञ्जेति नामान्तरम् । तस्यासमञ्जस्य पुत्रोंऽशुमान्नाम्ना । पितामहस्य सगरस्य ॥ १५ ॥

छलारी — तदेवं सुमत्याः पुत्रेषु मृतेषु सुकेशिन्याः पौत्रेणांशुमताऽश्वः समानीतः पितृव्योद्धरणयत्नश्च कृत इति दर्शयितुमुपोद्घातमाह ॥ योऽसमंजस इति । यः केवलमज्ञैरसमंजस इत्युक्तः । वस्तुतस्तु समंजस एवेति ज्ञापयितुमित्युक्त इत्युक्तम् । स तु सगरभार्यायाः सुकेशिन्या आत्मजः । पितामहः सगरः ॥ १५ ॥

असमञ्जस आत्मानं दर्शयन्नसमञ्जसम् ।
जातिस्मरः पुरा सङ्गाद् योगी योगाद् विचालितः ॥ १६ ॥

सत्यधर्मीया — इत्युक्त इत्यनेन ध्वनितं तत्समञ्जसत्वमञ्जसाऽऽह ॥ असमञ्जस इति । असमञ्जसमसमीचीनं दुराचारमिति यावत् । दर्शयन्नज्ञानिनाम् । तथा प्रदर्शने निमित्तं दर्शयति ॥ जातिस्मर इति । पुरा योगी योगाभ्यासनिपुणः सङ्गादङ्गनादिसङ्गाद्योगाद्भगवदुपासनालक्षणाद्विचालितः । योगभ्रष्टोऽभिजायत इत्यादेः । अन्यथाकृत इत्यर्थः । तथाऽपि तद्योगमाहात्म्येन स्मरतीति स्मरो जातेः स्मरो जातिस्मरः । जातेः स्मरः स्मरणं यस्येति वा तम् ॥ १६ ॥

छलारी — पुरा पूर्वजन्मनि योगाभ्यासनिपुणोऽसमंजसः सङ्गाद्धेतोः । योगादीश्वरोपासनालक्षणाद्विचालितो हि यस्मात्तस्माज्जातिस्मर इदानीं पूर्वजातिस्मृतिमान्सन् आत्मानमसमंजसं असमीचीनम् । नृशंसमिति यावत् । दर्शयन् । सङ्गं जहाविति शेषः ॥ १६ ॥

आचरन् गर्हितं लोके ज्ञातीनां कर्म विप्रियम् ।
सरय्वां क्रीडतो बालान् प्रास्यदुद्वेजयञ्जनम् ॥ १७ ॥

सत्यधर्मीया — गर्हितं गर्हितत्वेन प्रतीयमानं ज्ञातीनामपि विप्रियं विरुद्धं सोढुमशक्यमिति यावत्। आचरन् । तदाचरितं चरितमेवंरूपमिति निरूपयति ॥ सरय्वामिति । जनं स्वं परं च पामरमित्यान्तरङ्गिको भावः । गतम् । उद्वेजयन्भीषयन् क्रीडतो बालान्प्रास्यच्चिक्षेप ॥ १७ ॥

छलारी — असमंजसत्वं दर्शयति ॥ आचरन्निति । ज्ञातीनां विप्रियमप्रियं लोकैर्गर्हितं कर्माचरन् जनमुद्वेजयन्भीषयन् बालान् सरय्वां प्रास्यत् ॥ १७ ॥

एवंवृत्तः परित्यक्तः पित्रा स्नेहमपोह्य वै ।
योगैश्वर्येण बालांस्तान् दर्शयित्वा ततो ययौ ॥ १८ ॥

सत्यधर्मीया — एवं वृत्तमाचारो यस्य स तथा । स्नेहमपोह्य परित्यक्तो योगैश्वर्येण योगसम्पदा तान्स्वेन स्वरय्वां क्षिप्तान्बालान्दर्शयित्वा तान्प्रत्येते युष्मद्बाला इति दर्शयित्वा ततस्तत्स्थानाद्ययौ । अततः सञ्चरतो बालानित्यप्यन्वयः ॥ १८ ॥

छलारी — ततः किमभूदिति तत्राह ॥ एवमिति । एवंविधं वृत्तं कर्म यस्य सः । योगैश्वर्येण युष्मद्बाला एत इति तान्नदीजलमग्नान्दर्शयित्वा । ततः स्थानाद्ययावित्यर्थः ॥ १८ ॥

अयोध्यावासिनः सर्वे बालकान् पुनरागतान् ।
दृष्ट्वा विसिस्मिरे राजन् राजा चाप्यन्वतप्यत ॥ १९ ॥

सत्यधर्मीया — विसिस्मिरे विस्मिता अभवन् । अथासमञ्जसे गते सति राजा सगरो योगित्यागेनान्वतप्यत पश्चात्तप्तो बभूव ॥ १९ ॥

छलारी — विसिस्मिरे विस्मयं चक्रुः । अथासमंजसे गते । राजा सगरोऽन्वतप्यत पश्चात्तापं प्राप्त इत्यन्वयः ॥ १९ ॥

अंशुमांश्चोदितो राज्ञा तुरङ्गान्वेषणे ययौ ।
पितृव्यखातानुपथं भस्मापि ददृशे हयम् ॥ २० ॥

सत्यधर्मीया — पितरि प्रोषितेंऽशुमान् किं पितृमार्गमनुवव्राजाथवा पितामहनिघ्नो वर्तत इत्यत आह ॥ अंशुमानिति । राजा सगरेण चोदितः प्रेरितश्चोदितो बोधित इति वा । पितृव्याः षष्टिसहस्रसङ्ख्यास्तातमात्रन्तरजास्तैर्यत्खातं पन्थानमनुसृत्यानुपथम् । खातमनु यः पन्थास्तमनुययौ । भस्म पितृव्यशरीरसम्बन्धि हयमपि ददृशेऽपश्यत् ॥ २० ॥

छलारी — पितरि गतेंऽशुमता किमकारीति तत्राह ॥ अंशुमानिति । पितृव्या असमंजसभ्रातरस्तेषां खातानुपथं तमनुययौ । पितृव्याणां शरीरंभस्मरहयमपि ददर्शेत्यन्वयः ॥ २० ॥

तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजम् ।
अस्तौत् समाहितमनाः प्राञ्जलिः प्रणतो महान् ॥ २१ ॥

सत्यधर्मीया — तत्र भस्माश्वसहितप्रदेशे कपिलाख्यं कपिलमित्येवालपन् लपंश्च कपिलाख्यमिति श्रौतत्वं नाम्नोऽध्वनयत् । तथा च गीताभाष्यप्रमेयदीपिकाटिप्पणेषु । सिद्धानां कपिलो मुनिः सुखरूपः । पाल्यते लीयते जगदनेनेति कपिलः । प्रीतिः सुखं कमानन्द इत्यभिधानात् । प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति च । ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् । सुखादनन्तात्पालनाल्लापनाच्च यं वै देवं कपिलमुदाहरन्तीति बाभ्रव्यशाखायाम् । सिद्धानां कपिलो मुनिरिति कपिलशब्दं व्याचष्टे ॥ सुखेति ॥ सुखरूप इति कः । पाल्यते जगदनेनेति पिः । लीयते जगदनेनेति लः । लीङ् श्लेषण इत्यस्माड्डः । ला आदान इत्यतो वा कः । ततः कर्मधारयः । कशब्दस्य सुखवाचित्वेऽभिधानं प्रयोगं च पठति ॥ प्रीतिरिति । समग्रार्थे श्रुतिमाह ॥ ऋषिमिति । तं भगवन्तमृषिं कपिलं च पश्येत् । कथमृषिः सर्वज्ञत्वादित्युच्यते । यः प्रसूतं पूर्वकल्पेषु जातं जायमानं वर्तमानं चैवमागामि च जगज्ज्ञानैर्बिभर्ति जानातीति यावत् । कथं कपिल इत्यत उक्तं सुखादिति । यच्छब्दद्वयस्य तमित्यनेनान्वयः । सुखरूप इत्यनन्तरं भाष्ये कपिल इति निर्देशघटनाय शेषमाह ॥ इति क इति । किः औणादिकः । ततश्चातो लोप इटि चेत्याकारलोप इति भावः । यद्यपि पाल्यत इति भाष्ये पाल रक्षण इति धातुर्गृहीतः । पा रक्षण इत्येतत्तस्यार्थानुवाद इति भावेन पा रक्षण इत्यतः किरित्युक्तमिति केचित् । वस्तुतस्तु पा रक्षण इत्यस्य णाविति वर्तमाने पातेर्लुग्वक्तव्य इति णिचि परतो लुगागमे कर्मणि यकि च पाल्यत इति रूपमिति भावेनैवमुक्तम् । लीङ् श्लेषण इत्यत्र श्लेषणं स्वस्वकारणेषु मेलनं स्वोदरसंश्लिष्टतापादनमित्यर्थः । अस्माद्धातोर्विभाषा लीयतेरित्यात्वेऽर्तिह्रीत्यनेन पुगागमे ल्युटि लापनादिति भाष्ये रूपम् । क्वचिद्भाष्ये लापानादिति पाठस्तत्र दीर्घत्वं छान्दसमित्याहुः । ला आदान नपुंसकलिङ्गो निर्दिष्ट इति सुखं रूपमिति कमित्येवानुवादः कर्तव्यः । तथाऽपि कं सुखं स्वरूपत्वेनास्यास्तीत्यर्श आदिभ्य इति मत्वर्थीयाच्प्रत्यये क इति रूपमिति द्योतयितुं भाष्ये सुखमिति वक्तव्ये सुखरूप इति पुल्लिङ्गप्रयोग इति तदनुसारेणैव क इति पुल्लिङ्गोऽनूदितः । कं ब्रह्मेति श्रुतौ कशब्दः सुखविशिष्टाभिधानादेव चेति सूत्रे सुखार्थो व्याख्यात इति प्रकृतसिद्धिः । समग्रार्थो कपिलशब्दस्योक्त इति शेषः । चशब्दसमुच्चेयमाह ॥ आगामि चेति । कथमनेन सार्वज्ञ्यलाभ इत्यत उक्तं जानातीति ॥ यावदिति । यच्छब्दद्वयस्य, यो ज्ञानैर्बिभर्ति यं च

पश्येदिति यच्छब्दद्वयमिति । सुखरूप इत्यनन्तरमित्यारभ्य यच्छब्दद्वयमितिपर्यन्तं सुमतीन्द्रतीर्थटिप्पणवाक्यम् । तत्र काचन चर्चायते ।

यद्यपि ते सुमतीन्द्राश्चैवमेव भान्ति नामतो नार्थात् ।
बृहदारण्यकभाष्यादिकमपि नालोकि यैर्न चालोचि ॥ १ ॥
गुर्वर्थदीपिकाकृद्रोहो द्रोहोऽपि भावबोधेभ्यः ।
लघुरप्यलघुः फलतो महदिह दत्तं महद्भ्यो यत् ॥ २ ॥
यद्विषमपि पीयूषतया मतमिति मृतिहन्न जातु जायेत ।
रूपं यत्त्वनुरूपं पदमिति गदितं न सन्धितं स्यात्तैः ।
लोके साक्षिणि कोशे मत्वर्थे सत्यचीतिके सार्थे ॥ ४ ॥
कपिलेयैरवलेपाल्लेखोलेखेड्वचस्यहो
ऊहो नवमेऽर्थैरनवमे कथामात्रं प्रथायते ।
परिश्रमो विश्रमायामत्सराणां भवेत्सताम् ॥ ५ ॥

तथा हि । बृहदारण्यकभाष्ये संसाराप्लुतानां मुक्तानां कानि सुखानि लोका रोचमानानि कानि । लोकाः लीनं सुखं क इत्युक्तं कं नाम क्षीयतेऽत्र यदिति । स्वतः कशब्दस्य पुल्लिङ्गतोक्तेति कपिल इति गीताभाष्यप्रमेयदीपिकायां सुखरूप इति क इत्यत्रार्शआद्यच्प्रत्ययकल्पनेनावक्रे वक्रतां प्रदर्श्य न समाधिर्विधेयः । न च नच विधेयः । तत्रैव लीनं संसारदशायां तदनन्तरमभिव्यक्तं यत्सुखं तत्रैव क इति कशब्दपुल्लिङ्गता लीनं सुखं क इत्युक्तमित्यंशेन शंसिता न च सदाऽभिव्यक्तसुखमुखविग्रहे सम्भवति भगवति लीनतालाप इति न तदुदाहरणधरणिरियमिति । अहो आयुष्मंस्तनुषे शेमुषीमुपर्येव न मनुषे उत्तरग्रन्थे त्वद्धृदयग्रन्थिमालोच्य लोकोऽनुयोक्ता भवेदिति । तथा हि । कं नाम क्षीयतेऽत्र यदित्यंशे । अत्र संसारे यत्क्षीयते स्थीयते तत्सुखं कमित्युक्तमित्युक्तेः किं कंसारेः संसारोऽस्ति येन तत्र कमिति नपुंसकलिङ्गकशब्दवाच्यं सुखमपि सुखेनाङ्गीकर्तुमुचितं स्यादिति । तत्र तं प्रति त्वया वक्तव्ये न विवक्षानुसारेण षण्डसार्थाङ्गनाभामित्यादिशब्दवद्विशेषणस्यावश्यं सामान्यपरतोररीकार्येत्यनेन त्वां त्वं समाधत्स्व । निरवकाशेन प्रकाशनाच्च छान्दोग्यभाष्ये । तथा हि । क इत्यानन्द उद्दिष्ट उश इच्छा प्रकीर्तितेति । तर्हि गीताभाष्ये कमानन्दः कं ब्रह्मेत्युदाहरणं न मनोहरमिति न च वाच्यम् । पुल्लिङ्गनपुंसकलिङ्गपदयोरैकार्थ्यनिर्भर्येणैव तथोक्तेरिति सम्भवत्वात् । रूपशब्दः सुखरूपं यस्येति सुखस्य तदात्मकतामावेदयन्न सहेत टीकोक्तस्य क इत्यस्य । अर्श आद्यजन्तताश्रयणमित्युपर्येव ज्ञायते । न हि बहुव्रीहिस्तत्रेति वक्तुरुत्कण्ठां कुण्ठयति सुखरूप इति स्वयं नपुंसको भवन् रूपशब्दः । किञ्च विशेषशब्दाश्च सामान्यवाचका अपि भविष्यन्तीत्याचार्याः सूचितवन्तः

सूचितचेतसो गीतातात्पर्ये । दुःखं तु मानसं ज्ञेयमायासो बाह्यमुच्यते । विशेषस्य विवक्षायामन्यथा सर्वमेव त्विति । बृहदारण्यकछान्दोग्यभाष्यादिकं मनसि निधाय किञ्चित्पिधाय चेक्षापरीक्षायै सर्वविदष्टीकाकारपादाः सुखंरूप इति क इतीति करणेन कशब्दवाच्यतायां सुखरूपत्वं हेतुत्वेन न्यरूपयन्निति टीकैवाचूप्रत्ययव्याकृतिं बबाध इति श्रुतिरपि केवलं सुखादनन्तादिति गदन्ती सान्दोलयति शिर इति गदनीयमेव जगदुरिति दिक् । महान्गुणतः प्रणतः प्रव्हः कृत-नमनोऽस्तौत्तुष्टाव ।। २१ ।।

छलारी — तत्र हयसमीपे । महान्बुद्धिमान् अंशुमान् ।। २१ ।।

अंशुमानुवाच —

न पश्यति त्वां परमात्मनोऽजनो न बुध्यतेऽद्यापि समाधियुक्तिभिः ।
कुतोऽपरे तस्य मनःशरीरविसर्गसृष्टा वयमप्रकाशाः ।। २२ ।।

सत्यधर्मीया — न जानन्तोऽप्यवजानन्तो वयमनन्त त्वया अव्या इत्याशयेनांशुमानीशांशं कपिलमुपश्लोकयति षड्भिः श्लोकैः । अजनो जनो जननं स आद्विष्णोर्यस्य सोऽजो ब्रह्मा यस्य परमात्मनो हरेरंशमिति शेषः । त्वां तत्त्वेन न पश्यति साकल्येन नापरोक्षीकरोति । परोक्षतस्तर्हि स साकल्येन जानाति किमित्यतो नेत्याह ।। अद्यापीति । समाधियुक्तिभिर्न बुध्यते समाधयः प्राणायामादयस्तैर्युक्तिभिस्तर्कैः समाधीनां युक्तयो योगास्तैरिति वा । करणैर्न बुध्यते परोक्षतः साकल्येन न जानाति । तस्य चतुरास्यस्य मनः शरीरविसर्गसृष्टाः । मनश्च शरीरं च ताभ्यां विविधः सर्गो येषां ते तैर्मरीच्यादिभिः सृष्टा वयं तदपरे अर्वाचीना अधुनातनाः कुतो हेतोः पश्येम । खस्वरूपं निरूपयति ।। अप्रकाशा इति । न विद्यते प्रकाशो मानमुभयविधं तद्वदेषां ते तथा । अवयवप्रकाशा मनःशरीरेभ्यो विसृष्टाः स्वयं च ते सृष्टाः स्रष्ट्रोत्पादिता येऽवयवाः प्रतीकास्तत्र प्रकाशो विषयस्फोरणादिरूपो येषां ते परे इन्द्रादय इति वा । न यस्य तत्त्वं परमात्मनो जन इति पाठे यस्यापरेतस्य मृत्यूपलक्षितदोषरहितस्यात्मनः सर्वस्वामिनस्तव तत्त्वं स्वरूपं न जनोऽपामरः । प्रबुध्यते । ननु रमा चेत्सामस्त्येन जानीयात्त्वमित्यतो न सापि पटुरिति प्राह ।। अदिति । याऽपि समाधियुक्तिभिः करणैर्या रमया परं तत्त्वं नापि न प्राप्तं न ज्ञातमिति यावत् । आत्मनो विषये इदमत् आश्चर्यम् । कुतो न कुतोऽपि । कुतूहलावहमिति वा । अद्भुतपदव्याकृत्यवसरेऽदित्याश्चर्यार्थ-कमव्ययमिति भान्वाद्युक्तेर्नाद्भुतव्याकरणमिति मन्तव्यम् । हे अपरेतस्यापगतरेतोविकार । रेतसि भवो रेतस्यस्तस्मादपगतस्तदविकृतदेह इति यावत् । मनःशरीरविसर्गसृष्टावयवप्रकाशा मनःसृष्टा रुद्रचन्द्राद्याः शरीरसृष्टो विराट् शरीरसृष्टो ब्रह्मा विसर्गः पाय्वादितत्सृष्टा दक्षाद्यास्ते चावयवप्रकाशा

इतरे तत्त्वेशाश्च । अद्यापि समाधियुक्तिभिर्न पश्यन्ति । यश्च भगवान्नपश्यति । पश्यतीति पश्यो जीवस्तद्वदाचरति पश्यति । यदा पश्यः पश्यत इति व्याख्यावसरे पश्यतीति पश्यो जीव इति टीकोक्तेः । जीवविलक्षण इति यावत् । तत्त्वं जनो न बुध्यत इति कुतः कुतोऽवक्तव्यमवचनेऽपि ज्ञायत इति विवृण्वन्ति ॥ २२ ॥

छलारी — अजनोऽजो विरिञ्चः । यस्य परमात्मनः । अंश इति शेषः । त्वां न पश्यति साकल्येनापरोक्षीकर्तुं न शक्नोति । अथवा । परं आत्मन इति पदद्वयम् । आत्मनः स्वात्मनः परमुत्तमम् । त्वामित्यन्वयः । तर्हि परोक्षतो जानाति किं, नेत्याह ॥ नेति । समाधियुक्तिभिर्ध्यानयोगैरद्यापि त्वां न बुद्ध्यते न जानातीत्यन्वयः । ''पश्यन्तोऽपि न पश्यन्ति मेरो रूपं विपश्चित'' इतिवत् । अपरेऽर्वाचीनास्तु कुतस्त्वां पश्येयुः । अर्वाचीनत्वे हेतुः तस्य मनः शरीरविसर्गसृष्टा इति । तस्य विरिञ्चस्य मनसः शरीराच्च विसर्गो विसृष्टा सृष्टिर्येषां मरीच्यादीनां ते तथोक्तास्तैस्तत्रापि वयमप्रकाशा अज्ञाः । कुतस्त्वामपश्याम इत्यर्थः ॥ २२ ॥

ये देहभाजस्त्रिगुणप्रधाना गुणान् विपश्यन्त्युत वा तमश्च ।
यन्मायया मोहितचेतसस्ते विदुः स्वसंस्थं न बहिःप्रकाशाः ॥ २३ ॥

सत्यधर्मीया — गुणानुगुणाचरणानधिकारिण आह ॥ य इति । ये देहभाजः शरीरिणस्ते त्रिगुणप्रधानास्त्रयो गुणाः प्रधानानि कारणीभूतानि येषां ते रजः प्रकृतयो मानुषा आवर्तन्ते । त्रिगुणप्रधाना इति । त्रयो गुणा धर्मार्थकामास्ते एव प्रधानं मुख्यप्रयोजनं येषां त इति तदर्थः । ते च गुणानप्रधानफलस्वर्गादीनेव विपश्यन्ति जानन्ति अनुभवन्ति न मोक्षं ते लभन्त इति यावत् । ये यद्यस्मान्मायया तव बन्धकशक्त्या योग्यतां निमित्तीकृत्य बध्नन्त्यामोहितचेतसो मोहितमतयस्तस्मिंस्तत्त्वं विषयीकुर्वच्चेतो येषां ते तथा स्वसंस्थं त्वां न विदुः । किञ्च बहिःप्रकाशा देहादावेवाहज्ञानिनः । मिथ्याज्ञानिन इति यावत् । उत तस्मात्तमोऽन्धन्तम एव विपश्यन्ति । यन्मायया आमोहितचेतस इति तामसपक्षे आ सम्यगिति, राजसपक्षे आ ईषदिति । उत्तरत्र प्रध्वस्तमायेत्याद्युक्तिस्वारस्याद्विवेको ज्ञेयः ॥ २३ ॥

छलारी — तर्हि केऽपि न पश्यन्ति किमित्यतः केचिदेव पश्यन्तीत्याह ॥ ये देहभाज इति । ये देहभाजः शरीरिणस्ते त्रिगुणप्रधानाः सत्त्वप्रधाना रजःप्रधानास्तमःप्रधाना इति त्रिविधाः । तत्र रजःप्रधाना राजसा मानुषा गुणान्स्वर्गादीनेव विपश्यन्त्यनुभवन्ति । न मोक्षम् । अन्यथाज्ञानपूर्णबुद्धयस्तमःप्रधानास्तामसा असुरा यस्य हरेर्मायया बन्धकशक्त्या मोहितचेतसस्तम एवान्धन्तम

एव विपश्यन्त्यनुभवन्ति । अत्र निमित्तमाह ॥ त इति । ते स्वसंस्थं हृदिस्थं विष्णुं न विदुरिति । यस्मात्तस्मादिति शेषः । तर्ह्यचेतनाः किं ते, नेत्याह ॥ बहिरिति । बहिर्देहादावेव प्रकाशो येषां ते तथा । अनात्मज्ञानिन इत्यर्थः । ज्ञानाश्रयत्वेन चेतनत्वेऽपि न परतत्त्वज्ञानिन इति भावः । ये सत्त्वप्रधाना सात्त्विका देवादयस्ते त्वामेव विपश्यन्तीति योज्यम् ॥ २३ ॥

तं त्वामहं ज्ञानघनस्वभावं प्रध्वस्तमायामयभेदमोहैः ।
सनन्दनाद्यैर्मुनिभिर्विभाव्यं कथं विमूढः परिभावयामि ॥ २४ ॥

सत्यधर्मीया — राजसास्तामसाश्च बहुलास्तरतमयेति तान्निरूप्योत्तमानां रीतिमीरयति ॥ तं त्वामिति । अहं तं त्वां कथं परिभावयामि चिन्तयामि । महमुत्सवरूपं त्वा त्वामिति । किं परिभावितः कीदृशोऽहमित्यतस्तदाह ॥ ज्ञानघनस्वभावमिति । ज्ञानपूर्णतया ज्ञानघनः स्वभावः स्वरूपं यस्य तम् । ज्ञानघनो ज्ञानात्मा चासौ स्वाख्यो भावो नित्यसत्तश्च स वा तम् । मायामयो मायिको मिथ्याभूत इति यावत् । स चासौ भेदश्च अपारमार्थिको भेदो जगतो जगन्नाथस्येति तद्विषयको यो मोहो मिथ्यामत्युपदेशप्राप्तः स प्रध्वस्तो यैस्ते तैः । मायामयो भेदो यस्य प्रपञ्चस्य स इति यो मोहो वैचित्यं स प्रध्वस्तो यैरिति वा । मायात्या प्रकृतिरूपायाऽमयो रोगस्तेन प्रप्तो भेदस्य प्रपञ्चरूपस्य मोहोऽज्ञनं स प्रध्वस्तो यैरिति वा । मोहमिच्छेति मूर्छायामविद्यायां च सूरय इति

विश्वः । सनन्दनाद्यैः सनन्दन एवाद्यो येषां ते मुनयः परमहंसास्तैर्विभाव्यं चिन्त्यम् । ननु सनकादिः स न कस्मात्पूर्वं गृहीतो गृहीतश्च तदनन्तरजः सनन्दन इति चेत् । सत्यम् । अगाधमेधाव्यसि । शङ्का चेयं निरातङ्का । परन्तु गुर्वनुकम्पायाः किमकम्प्यम् । सनकादय इत्युक्तौ केवलं परमहंसा विभावका न संसारे सन्तः सन्त इति भायात्तच्चानिष्टम् । दृष्टेर्वसिष्ठादीनां तन्निविष्टानां विभावकताया अतस्तेऽपि ग्राह्या आदिपदेनेति वचनमेवमिति । न तथोक्तावप्यादिपदेनैते ग्रहीतुं शक्या इति वाच्यम् । सजातीयग्रहस्यैव न्याय्यत्वात् । इत्थं वदंश्च सनन्दनादयः सनकाद्या नन्दनैः सहिताः सनन्दनाः सांसारिका मुनयो वसिष्ठाद्या इत्यप्यर्थान्तरसङ्ग्रहः सुग्रह इति सूचयामासेति ज्ञेयम् । अहं तु न तदन्यतम इति कथं कथय त्वां परिभावयामीत्याह ॥ विमूढ इति । न चात्रातीव कर्तव्यं दोषदृष्टिपरं मनः । दोषो ह्यविद्यमानोऽपि तत्पराणां प्रदृश्यत इति सुधाभिधानात् न शङ्कस्वेति वाच्यम् । क्षणमेकं विलम्बोऽवलम्बनीयो दया विधेया विनेयोपरि । अरे स्वच्छन्दं पृच्छ । ॐ धन्योऽस्मि । अधिकार्यवधिं विधिसर्वं धीकृत्य कुत उक्तिनेति शङ्कितुं शक्यमिति चेत् । सत्यम् । सा च पिशाची क नाम नावतार्या । तथाऽपि मन्त्रयामः । अस्य योगित्वाद्योगिपुरस्कृतिरिति वा नन्दनस्तत्पुत्रो विधाता चासावाद्यश्च तेन सहितैर्नन्दनेष्वाद्यस्तेन सहितैरिति वा मुनिभिरिति भावेनाप्येवमुक्तिरिति जोषमास्व ।

किञ्च विमूढ इति मौढ्यं किंहेतुकमित्यतोऽप्याह ।। सनन्दनाद्यैरिति । नन्दनेन तन्नाम्ना नन्दनवनेन सहितं सौवर्गभाग्यं तदेवाद्यं येषां भोगानां तैर्विमूढस्तत्कामनया मूढतम इति ।। २४ ।।

छलारी — तर्हि तवापि सात्त्विकत्वात् ध्यानेन त्वं मां ज्ञास्यसीति तत्राह ।। तं त्वामिति । सनन्दनाद्यैर्मुनिभिर्विभाव्यमुपास्यं ज्ञानघनस्वभावं ज्ञानादिगुणस्वरूपं तं तत्तद्योग्येभ्यस्तत्तत्फलदातारं त्वामहं कथं परिभावयामि चिन्तयामि । चिन्तने काऽनुपपत्तिरिति तत्राह ।। विमूढ इति । सामान्यतो ज्ञाते वस्तुनि विशेषजिज्ञासा संजाघटीति । मम तु तदेव नास्ति । अतस्तद्विषयज्ञानाभाव एवानुपपत्तिरित्यर्थः । सनन्दनादीनामपि देहभात्काविशेषात्परिभावना कथं स्यादिति तत्राह ।। प्रध्वस्तेति । प्रध्वस्तो मायामयः प्रकृतिहेतुको भेदमोहोऽनात्मन्यात्ममोहो यैस्ते तथा तैर्निरस्त-मिथ्याज्ञानैरित्यर्थः । कार्यते ह्यवशः कर्म सर्वप्रकृतिजैर्गुणैरिति स्मृतिः ।। २४ ।।

प्रशान्तमायागुणकर्मलिङ्गमनामरूपं सदसद्विमुक्तम् ।
ज्ञानोपदेशाय गृहीतलिङ्गं नमामहे त्वां पुरुषं पुराणम् ।। २५ ।।

सत्यधर्मीया — नम इति प्रव्हत्वार्हणं तव मया कार्यमित्याह ।। प्रशान्तेति । वयं त्वां नमामहे नमामः । प्रशान्तमायागुणाः प्रशान्तान्यप्रादुर्भूतानि माया प्रकृतिर्गुणाः सत्त्वाद्याः प्रयोजकाः कर्माणि लिङ्गं शरीरं चेति तत्प्रयोज्यानि यस्मिन्स तम् । सदसद्विमुक्तं मूर्तामूर्तविलक्षणम् । ननु शरीररहितश्चेन्न सृष्ट्यादि सम्भवेदित्यतोऽकर्मनिर्मितमिच्छोपात्तं शरीरमस्ति ततस्तदुपपत्तिरित्याह ।। गृहीतलिङ्गमिति । तद्ग्रहणे हेतुमाह ।। ज्ञानोपदेशायेति । ज्ञानं तज्जनकं साङ्ख्यशास्त्रम् । तस्योपदेशार्थं पुराणं प्रातिस्विकशरीराणकं चिरन्तनमाद्यमिति वा पुरुषं पूर्णषड्गुणमिति ।। २५ ।।

छलारी — मूढत्वान्नमनमात्रं करिष्यामीत्याह ।। प्रशान्तेति । हे स्वामिन् । त्वां केवलं नमामह इत्यन्वयः । सदसद्भ्यां पुण्यपापाभ्यां विमुक्तम् । कर्मबन्धाभावेऽपि शिक्षार्थं तपः कुर्वाणमिति भावः । अनामरूपं प्राकृतनामरूपरहितम् । तत्कुत इति तत्राह ।। प्रशान्तेति । प्रशान्तान्युपरतानि मायागुणाः सत्त्वादयः कर्माणि तन्निमित्तव्यापारा लिङ्गशरीरं यस्य स तथा । शरीरत्वेन नामरूपदर्शनात्तदभावकथनं कथमिति तत्राह ।। ज्ञानेति । लोकानुग्रहार्थं शरीरग्रहणं न तु कर्मनिमित्तम् ।। २५ ।।

यन्मायारचिते लोके वस्तुबुध्या गृहादिषु ।
भ्रमन्ति कामलोभेर्ष्यामोहविभ्रान्तचेतसः ।। २६ ।।

सत्यधर्मीया — त्रिविधानामपि न स्वभावाभिभव इत्याह ।। यदिति । यस्य भगवतो मायेच्छा तया रचिते लोके उत्तमाश्चालोके लोकातीते श्रीपतौ वस्तुबुध्या वस्तुशक्तं ब्रह्मेति बुध्या गृहादिषु गृहीणी गृहमुच्यत इत्यादेः । कामलोभेर्ष्यामोहैर्विभ्रान्तं भ्रान्तविरुद्धमभ्रान्तं चेतो येषां ते तथा सन्तो भ्रमन्त्यटन्ति । मध्यमास्तु यन्माया प्रकृतिस्तया रचिते लोके गृहादिषूक्तरूपेषु वस्तुबुध्याऽनश्वरताधिया कामलोभेर्ष्याभिर्मोहो यस्य तत्किञ्चिद्विभ्रान्तमभ्रमं च चेतो येषां ते । मध्यमा मिश्रमतयो विमिश्रगतयोऽपि चेत्युक्तेः । भ्रमन्ति । इतरेऽपि हरीच्छारचिते तेनैव सत्ये लोके । अवस्तुबुध्येदं सर्वं मिथ्येति मत्या कामलोभेर्ष्यामोहविभ्रान्तचेतसः सन्तो गृहादिषु भ्रमन्ति ।।२६।।

छलारी — त्रिविधानां जीवानां स्वभावाभिभवो नास्तीति दर्शनाय मानुषस्वभावमाह ।। यन्मायायेति । यस्य हरेर्मायया प्रकृत्येच्छया रचिते निर्मिते लोके भूम्यादौ रचितगृहादिषु वस्तुबुद्ध्याऽनश्वराणीति बुद्ध्या भ्रमन्ति परिवर्तन्ते । प्राणिन इति शेषः । अत्र निमित्तमाह ।। कामेति । कामादिभिर्विभ्रान्तं चेतो येषां ते तथा ।। २६ ।।

अद्य नः सर्वभूतात्मन् कामकर्मेन्द्रियाशयः ।
मोहपाशो दृढश्छिन्नो भगवंस्तव दर्शनात् ।। २७ ।।

सत्यधर्मीया — लोकरीतिमीरयित्वेदानीं स्वस्थितिमुक्त्वोपसंहरति । अद्येति । कामकर्मेन्द्रियाशयः कामकर्मेन्द्रियेष्वाशेते । अधिकरणे शेतेरित्यच् । तेष्वेव विद्यमानो यो मोहपाशः पुत्रमित्रकलत्रादिस्नेहपाशो दृढो विना त्वदिच्छामच्छेद्यः । हे भगवन् तव दर्शनाच्छिन्नः । दृढमिति पाठे दृढं छिन्नः । पुनरनुज्जृम्भणं यथा तथा छिन्न इत्यर्थः । सर्वभूतात्मन्सर्वजगद्व्यापिन् । अनेन पुत्रादावपि परमात्मा सन्निहित इत्यनुसन्धानेन ममतामादधानां न दुष्यतीति ध्वन्यते ।। २७ ।।

छलारी — उपसंहरति ।। अद्येति । अद्य नोऽस्माकं पुत्रादिषु दृढो मोहपाशोऽज्ञानहैतुकः स्नेहपाशः छिन्न इत्यर्थः । कामकर्मेन्द्रियाण्येवाशयो यस्य तन्निमित्तक इत्यर्थः । कामादीनामाश्रय इति वा । त्वत्प्रसादेन कृतार्थोऽस्मीत्यर्थः ।। २७ ।।

श्रीशुक उवाच —

इत्थं गीतानुभावस्तं भगवान् कपिलो मुनिः ।
अंशुमन्तमुवाचेदमनुगृह्य धिया नृप ।। २८ ।।

सत्यधर्मीया — धियाऽनुगृह्य मनःपूर्वकमनुग्रहं कृत्वा ।। २८ ।।

छलारी — अनुगृह्यानुग्रहं कृत्वा । धियाऽन्तःकरणपूर्वकमित्यर्थः ॥ २८ ॥

श्रीभगवानुवाच —

अश्वोऽयं नीयतां वत्स पितामहपशुस्तव ।
इमे च पितरा दग्धा गङ्गाम्भोऽर्हन्ति नेतरत् ॥ २९ ॥

सत्यधर्मीया — तव पितामहपशुर्हयो नीयताम् । अर्हन्त्यपेक्षन्ते ॥ २९ ॥

छलारी — कथम्भूतोऽश्वः । पितामहस्य सगरस्य याज्ञीयपशुभूतः । अश्वं लब्ध्वाऽपि पितृविषये साकांक्षं प्रत्याह ॥ इमे चेति । अर्हन्त्यपेक्षन्ते ॥ २९ ॥

तं परिक्रम्य शिरसा प्रसाद्य हयमानयत् ।
सगरस्तेन पशुना क्रतुशेषं समापयत् ॥ ३० ॥

सत्यधर्मीया — तं परिक्रम्य प्रदक्षणीकृत्य शिरसा प्रसाद्य । अंशुमता नीतेन पशुना यज्ञशेषं समापयत्समापितवान् ॥ ३० ॥

छलारी — तं परिक्रम्य तस्य प्रदक्षणीकृत्वेत्यर्थः । शिरसा प्रणम्येति शेषः ॥ ३० ॥

राज्यमंशुमते न्यस्य निःस्पृहो मुक्तबन्धनः ।
और्वोपदिष्टमार्गेण लेभे गतिमनुत्तमाम् ॥ ३१ ॥

सत्यधर्मीया — अंशुमते राज्यं न्यस्य निःस्पृहो विषयस्पृहाहीनो मुक्तबन्धनस्त्यक्तसंसारबन्धनः और्वोपदिष्टमार्गेणानुत्तमां गतिं लेभे ॥ ३१ ॥

छलारी — लेभे । सगर इति शेषः ॥ ३१ ॥

अंशुमांश्च तपस्तेपे गङ्गागमनकाम्यया ।
कालं महान्तं नाशक्नोत् ततः कालेन संस्थितः ॥ ३२ ॥

सत्यधर्मीया — गङ्गागमनकाम्यया गङ्गाया जाह्नव्या आगमनविषयिणी काम्या गतम् । तया महान्तं बहुकालं तपस्तेपे कृतवान् । तथाऽपि नाशक्नोन्न शशाक । कालेन संस्थितो मृतः ॥ ३२ ॥

छलारी — महान्तं कालं तपस्तेप इत्यन्वयः । नाशक्नोत् । गङ्गामानेतुमिति शेषः । ततः कालेन संस्थितः कालमृत्युना संस्थितो ग्रस्तो मृतोऽभूदित्यर्थः ॥ ३२ ॥

दिलीपस्तत्सुतः तद्वदशक्तः कालमेयिवान् ।
भगीरथस्तस्य पुत्रस्तेपे स सुमहत्तपः ॥ ३३ ॥

सत्यधर्मीया — कालं यममेयिवान्प्राप्तवान् । मृत इति यावत् । तस्य दीलीपस्य नृपस्य ॥३३॥

छलारी — तद्वत् तपस्तेप इति शेषः । अशक्तः । गङ्गामानेतुमिति शेषः । कालमेयिवान्मरणं प्राप्तः । तेपे कृतवान् ॥ ३३ ॥

दर्शयामास तं देवी प्रसन्ना वरदाऽस्मि ते ।
इत्युक्तः स्वमभिप्रायं शशंसावनतो भृशम् ॥ ३४ ॥

सत्यधर्मीया — अहं प्रसन्ना वरदा च तेऽस्मीति तं भगीरथं नृपमात्मानं दर्शयामास । यस्मिन्नियत्यपि न देवी दर्शयामासात्मानमित्यस्मिते स्मितरहिते दुःखित इति यावत् । सति यथापूर्वमुर्वरितम् । स्वमभिप्रायं स्वपितृगात्रभस्मपवित्रीकरणरूपं शशंसोचे ॥ ३४ ॥

छलारी — तं प्रत्यात्मानं दर्शयामास । वरदाऽस्मीति गङ्गोक्तः सन् स्वाभिप्रायं पूर्वजोद्धारणे शशंस ॥ ३४ ॥

गङ्गोवाच —

को विधारयिता वेगं पतन्त्या मे महीतले ।
अन्यथा भूतलं भित्वा नृप यास्ये रसातलम् ॥ ३५ ॥

सत्यधर्मीया — महीपते! महीतले पतन्त्या मम वेगं विधारयिता कः । स्वत एव पत तवेयत्कुत इत्यत आह ॥ अन्यथेति । अनागमन एवमागमने च तवोभयथा नाभीष्टसिद्धिरिति भावः ॥ ३५ ॥

छलारी — पतन्त्या । गगनादिति शेषः । मे वेगं विधारयिता धारयिष्यति । अन्यथा धारकाभावे ॥ ३५ ॥

किं चाहं दुर्गतिं यास्ये नरा मय्यामृजन्त्यघम् ।
मृजामि तदघं क्रूरं राजंस्तत्र विविच्यताम् ॥ ३६ ॥

सत्यधर्मीया — न केवलं रसातलं यास्येऽपि तु ममायमेको भावी विभव इत्याह ॥ किञ्चेति । नरा मय्यघं स्वेषां विसृज्य स्नानादिनाऽऽत्मानमामृजन्ति शोधयन्ति तत्क्रूरं तैर्मुक्तमघं मृजामि

मार्जयामि । तत्रोभयविषये विविच्यतां त्वया विवेकः क्रियताम् । पामरनरपापापहन्त्र्या मम दुर्गतिमतिहाय पापपरिहारोपायो धर्ता चायमिति निश्चयश्च क्रियतामिति यावत् । रसातलगमने च तवाभीप्सितमपि न सेत्स्यतीत्याह ॥ नरा इति । नराः पितृव्याः कथमघं मृजन्त्यहं च कथं तदघं मृजामि । विचिन्त्यतामित्युचितोऽपि पाठः ॥ ३६ ॥

छलारी — किञ्च न केवलं रसातलप्रवेशलक्षणानर्थ एवान्योऽप्यस्तीत्याशयेनाह ॥ किञ्चेति । कुतो नरकप्राप्तिरिति तत्राह ॥ नरा इति । पापिनो जनाः स्नानादिना मय्यघमामृजन्ति शोधयन्ति । पापं निक्षिप्य स्वयं शुद्धा भवन्ति । हे राजन् तदघं मृजामि शोधयामि । केति शेषः । क निक्षिप्य शुद्धा भवाम्यत्रास्मिन्नर्थे विविच्यताम् । नराणामघहाऽहं मदघसंहर्ता क इति विवेकः क्रियतामित्यन्वयः । तत्रोपायो विचिन्त्यताम् ॥ ३६ ॥

राजोवाच —

साधवो निराशिषः शान्ता ब्रह्मिष्ठा लोकपावनाः ।
हरन्त्यघ तेऽङ्गसङ्गाद् ये प्राप्ताः स्वहृदा हरिम् ॥ ३७ ॥

सत्यधर्मीया — यद्यपि क्रमप्राप्तं विधारयितेति प्रागुत्तरयितव्यम् । तथाऽपि गङ्गागमन-मनोरोधकतया स्वपित्रनुद्धृत्या स्वव्याकुलताहेतुरुत्तर इति तमेवोत्तरयति ॥ साधव इति । निराशिषो निर्गता आशीर्भ्य ईशेतराशीभ्यस्ते तथा । शान्ता अक्रूरा लोकपावना लोकान्पावयन्तीति ते तथा । अनायासेनेतरपावनकर्तारस्त इत्यप्याह । लोकेन स्वावलोकनेनैव पावयन्तीति ते तथेति । दर्शनादेव साधव इत्यादेः । पृथिव्यां यानि तीर्थानि तानि तीर्थानि सागरे । सागरे सर्वतीर्थानि पदे विप्रस्य दक्षिण इत्यादि स्मरन्ति । तेषामेष महिमा कुत इत्यत आह ॥ ब्रह्मिष्ठा इति । ब्रह्म येषामस्ति ज्ञातृतासम्बन्धेन ते ब्रह्मिणः । व्रीह्यादित्वादिनिः । ब्रह्मोपास्तिसम्पन्ना अतिशयेन तथा ये ते ब्रह्मिष्ठाः । इष्टन् टिलोपः । मन्त्रवच्छ्रेष्ठा वा । तदेव विवृणोति ये हृदा हरिं प्राप्ता इति । तत्रापीष्टमित्यनेन प्रकटित इति ज्ञेयम् । अङ्गसङ्गात्स्नानादेस्तेऽघं हरन्ति । क्रियाप्रबन्धे लट् । हरिष्यन्ति । द्वितीयेऽङ्गसङ्गाद्धरिष्यन्तीति किमुतेति योज्यम् । अहं तु हरिचरणमात्रस्पृक् ते तु हृदा हरिं प्राप्ता महान्त इति न दुर्घटं मदघविघटनं तेषामिति स्वस्तटिनी स्वस्थाऽभूदिति भावः स्वहृदेति पदलब्ध इति ज्ञेयम् ॥ ३७ ॥

छलारी — उत्तरमाह ॥ साधव इति । शमदमादिसंपन्नाः साधवोऽत एव निराशिषः स्वर्गादिसुखलक्षणाशारहिताः । कुत इति तत्राह ॥ ब्रह्मिष्ठा इति । एवंविधा ये स्वहृदा हरिं प्राप्तास्ते

ज्ञानिनोऽङ्गसङ्गात्पादप्रक्षालनादिना जातादङ्गसम्बन्धात्पापिनामघं हरन्ति । तेषां स्वहृदि स्थितहरि-सान्निध्यात्पापं नास्त्येव । तत्र किं वक्तव्यम् । अनवरतम् नलिननाभपादसरोजनिवासाया इत्यर्थः । अथवा । साधवोऽङ्गसङ्गात्स्नानादिना स्वशरीरसम्बन्धात्ते तवाघं पापं हरन्ति हरिष्यन्ति ॥ ३७ ॥

धारयिष्यति ते वेगं रुद्रस्त्वात्मा शरीरिणाम् ।
यस्मिन्नोतमिदं प्रोतं विश्वं शाटीव तन्तुषु ॥ ३८ ॥

सत्यधर्मीया — आदिमोत्तरेण तामनुमोदयति । रुद्रस्ते तव वेगं धारयिष्यतीति धारणेऽसाधारणं कारणमाह । तु यतः शरीरिणां देहवाहानामहङ्काराभिमतिमानिति स्वामी । तदेवात्मानं निदर्शनपूर्वकं दर्शयति । यस्मिन्हराविदं विश्वं स्थावरं सर्वं तन्तुषु शाटीव कन्था यथा तथा ओतं प्रोतं तत्त्वेन वर्तते । तदाधारमिति यावत् । अतो धारयिष्यति । श्रुतसदाशिवक्षिप्रप्रसादत्वक इति झटिति तन्नाम जग्राहेत्यपि मन्तव्यम् । अत्राशु तुष्यतीति बहुस्थल उक्तेरिवान्यत्राप्युक्तेः ॥ ३८ ॥

छलारी — द्वितीयं प्रश्नं परिहृत्य प्रथमं परिहरति ॥ धारयिष्यतीति । आत्मा स्वामी । शाटी कंथापटलस्तन्तुष्विव यथा तथोक्तः प्रोतस्तथेदं विश्वं यस्मिन्नोतं प्रोतमित्यर्थः ॥ ३८ ॥

श्रीशुक उवाच —
इत्युक्त्वा स नृपो देवीं तपसाऽतोषयच्छिवम् ।
कालेनाल्पीयसा चापि तस्येशः समतुष्यत ॥ ३९ ॥

सत्यधर्मीया — शिवं तपसाऽतोषयत्सन्तोषोन्मुखमचीकरत् । शिवमित्यावृत्तम् । शिवं मङ्गलं क्षेमो यथा तथेति स पितृपितामहवदयं नेति बोधयतीति बोध्यम् । अल्पीयसेति कालपद-तपःपदाभ्यामन्वेति । अतुष्यतातुष्यत् । यद्यपि नृपश्चेदपि तपस्येव रतो न रतोऽमित्रत्रासनादाविति नेत्यप्याह ॥ चापीति ॥ धानुष्कोऽपि स चापि शिवोऽप्यतुष्यतेत्यन्वेति च ॥ ३९ ॥

छलारी — अल्पीयसाऽल्पीयेन ॥ ३९ ॥

तथेति राज्ञाऽभिहितः सर्वलोकहितः शिवः ।
दधारावहितो गङ्गां पादपूतजलां हरेः ॥ ४० ॥

सत्यधर्मीया — इति गङ्गागीतप्रकारेण राज्ञाऽभिहितः शिवस्तथेति आ अभिहितं यस्य स सन् सर्वलोकहितः सर्वेभ्यो लोकेभ्यो हितं येन स तथा गङ्गामवहितः सङ्कल्पिताल्पव्यत्यासे प्रत्यवायमिति

सावधानमानसः शिवः शिवोऽभूदित्यादेः । स्वयमपि स्वोद्धारार्थं चादीधरदित्याह ॥ हरेः पादपूतजलामिति ॥ ४० ॥

छलारी — राज्ञा भगीरथेनाभिहितः । तथेत्यङ्गीकृत्येति शेषः ॥ ४० ॥

भगीरथोऽपि राजर्षिर्निन्ये भुवनपावनीम् ।
यत्र स्वपितृणां देहा भस्मीभूताः स्म शेरते ॥ ४१ ॥

सत्यधर्मीया — पितॄणां भस्मीभूता देहाः शेरते तद्वद्वर्तन्ते यत्र तत्र निन्ये । निन्य इत्यनेन कृपापारवश्यमापगाया ध्वन्यते ॥ ४१ ॥

छलारी — शेरते सन्तीत्यर्थः ॥ ४१ ॥

रथेन वायुवेगेन प्रयान्तमनुधावती ।
देशान् पुनन्ती निर्दग्धानसिञ्चत् सगरात्मजान् ॥ ४२ ॥

सत्यधर्मीया — अनुधावती पृष्ठतोऽनुगच्छन्ती मध्येध्वसम्बद्धान्देशान्पुनन्ती सगरात्मजांस्तद्भस्म असिञ्चत् ॥ ४२ ॥

छलारी — प्रयान्तं भगीरथमनुधावती पृष्ठत आयान्ती । आसिञ्चत्प्लावयामास ॥ ४२ ॥

यज्जलस्पर्शमात्रेण ब्रह्मदण्डहता अपि ।
सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः ॥ ४३ ॥

सत्यधर्मीया — यस्या जलं तस्य स्पर्शमात्रेण ब्रह्मणः परब्रह्मणः कपिलस्य दण्डोऽश्वचोरोऽयमित्यादि स्वकृतापचारस्तेन हता अपि सगरात्मजा इति वर्णाधिक्यं वर्णनीयसुरतरङ्गिणीमहामहत्त्वसूचकम् । केवलं देहभस्मभिस्तद्द्वारा दिवं स्वर्गं जग्मुः ॥ ४३ ॥

छलारी — ब्रह्मदण्डेन कपिलरूपभगवदपराधरूपदण्डेन हताऽपि । यस्या जलस्पर्शमात्रेण दिवं जग्मुः । यज्जलस्पर्शनं तच्च केवलं देहभस्मभिरेव न साक्षात् । अतस्तन्माहात्म्यं किं वर्णनीयमित्यध्याहृत्य योजनीयम् । यद्वा । देहभस्मभिरित्यस्य विभक्तिविपरिणामेन भस्मानामित्यर्थः ॥ ४३ ॥

भस्मीभूताङ्गसङ्गेन स्वर्याताः सगरात्मजाः ।
किं पुनः श्रद्धया देवीं ये सेवन्ते धृतव्रताः ॥ ४४ ॥

सत्यधर्मीया — किञ्चिदनूद्य तन्माहात्म्यं हरिमहत्त्वोन्नायकमिति विविच्याह ॥ भस्मीभूतेति । धृतव्रता ये भक्त्या देवीं सेवन्ते ते गच्छेयुरिति पुनः किं किं वक्तव्यमित्यर्थः ॥ ४४ ॥

छलारी — एतत्प्रपञ्चयति ॥ भस्मीभूतेति । भस्मीभूतेनाङ्गेनाङ्गसम्बन्धास्थिजातेन यो गङ्गाजलसङ्गस्तेनेति ॥ ४४ ॥

न ह्येतत् परमाश्चर्यं स्वर्धुन्या यदिहोदितम् ।
अनन्तचरणाम्भोजप्रसूताया भवच्छिदः ॥ ४५ ॥

सत्यधर्मीया — हरिचरणसरोजसङ्गिनीयं हरति महच्च मलं न चित्रमेतदित्याह ॥ न हीति । इहैतत्प्रस्तावे यदुदितं तन्माहात्म्यं न हि चित्रम् । तत्र तन्त्रमाह ॥ अनन्तेति । भवच्छिदः संसार उत्पत्तिर्वा भवस्तच्छिदः छेत्र्या अनन्तचरणाम्भोजाद्दक्षिणाङ्गुष्ठाद्वामाङ्गुष्ठाद्वा प्रसूताया उत्पन्नायाः । भवच्छिद इति गङ्गायामनुपपद्यमानमनन्तेति लुप्तषष्ठीकेनान्वेति । भवच्छिदोऽनन्तस्य चरणाम्भोजप्रसूतायाः । अनन्तेति समस्तेऽपि भवच्छिद इत्यस्य दीप्तानलार्कद्युतिमप्रमेयमित्यत्राप्रमेयत्वस्य द्युतावन्वय इवात्राप्यन्वये भवच्छिद्योऽनन्तस्तस्येति वा ॥ ४५ ॥

छलारी — श्रीनारायणचरणसङ्गलब्धमेवास्या माहात्म्यं नान्यतोऽतो नैतच्चित्रमित्याह ॥ न हीति । इह सगरात्मजकथाप्रसङ्गेन गङ्गामाहात्म्यमुदितम् । अत एव भवच्छिदः संसारच्छेत्र्याः । जन्मच्छेत्र्या वा । अनन्तस्य त्रिविक्रमस्य वामपादेन जाताया इत्यर्थः ॥ ४५ ॥

यस्मिन्मनः सन्निवेश्य श्रद्धया मुनयोऽमलाः ।
त्रैगुण्यं दुस्त्यजं हित्वा सद्यो यातास्तदात्मताम् ॥ ४६ ॥

सत्यधर्मीया — यच्चरणसङ्गाद्गङ्गाया इयती महिमाऽनन्तस्य माहात्म्यं कियदिति वक्तव्यमिति शुकः पारवश्येन वदति ॥ यस्मिन्निति । हरौ मनः श्रद्धया सन्निवेश्य मुनयोऽमलाः सन्तो दुस्त्यजं त्रैगुण्यं गुणत्रयकार्यं संसारं हित्वा तदात्मतां तत्स्वामिकतां सायुज्यं तन्मनस्कतां वा सद्य एतत्कल्पे ब्रह्मणा सह दुर्मनोवृत्तिनिवृत्त्युत्तरमिति वा ॥ ४६ ॥

छलारी — संसारच्छेदनमाहात्म्यं श्रीहरिनिष्ठगङ्गाया उपचार इत्याशयवानाह ॥ सन्निवेश्येति । त्रैगुण्यं त्रिगुणसम्बन्धिसंसारम् । तदात्मतां तत्सायुज्यलक्षणां मुक्तिम् ॥ ४६ ॥

श्रुतो भगीरथाज्जज्ञे तस्य नाभोऽपरोऽभवत् ।
सिन्धुद्वीपस्ततस्तस्मादयुतायुस्ततोऽभवत् ॥ ४७ ॥

सत्यधर्मीया — प्रसङ्गसङ्गत्याऽऽगतां गङ्गागमनकथां निरूप्य भगीरथसन्ततिमाह ॥ श्रुत इति । तस्य श्रुतस्य । नाभ एकदेशविकृतस्यानन्यत्वात् नाभागोऽपरो मनुतनयादितरः । ततो नाभागात् । तस्मात्सिन्धुद्वीपादयुतायुः ॥ ४७ ॥

छलारी — एवं भगीरथस्य गङ्गाऽऽनयनादिमाहात्म्यमुक्त्वा तत्सन्ततिं कथयति ॥ श्रुत इति । नाभो नाभागः । मनुपुत्रनाभागादपरस्तस्मात्सिन्धुद्वीपात्ततोऽयुतायोः सकाशात् ॥ ४७ ॥

ऋतुपर्णो नलसखो योऽश्वविद्यामयान्नलात् ।
दत्वाऽक्षहृदयं तस्मै सर्वकामस्तु तत्सुतः ॥ ४८ ॥

सत्यधर्मीया — ततोऽयुतायुतो ऋतुपर्णो नामतो नलसखो नलस्य सखा नलसखः । नलो बाहुकः सखा यस्येति वा । अत्र टजार्षः । कथं सख्यं तयोरित्यतोऽक्षहृदयमिति । पाशमर्म दत्वोपदिश्याश्वविद्यां तत्परीक्षाशास्त्रं नलादयादगच्छज्ज्ञानदीपं सम्पादितवान् । तत्सुतो ऋतुपर्णसुतः । तथोक्तमरण्यपर्वणि ।

विध्यक्षहृदयज्ञं मां सङ्ख्याने च विशारदम् ।
बाहुकस्तमुवाचाथ देहि विद्यामिमां मम ।
मत्तोऽपि चाश्वहृदयं गृहाण पुरुषर्षभेत्यादि ।

ऋतुपर्णकीर्तनं कलिमलकर्तनमिति माहात्म्यं कर्कोटकस्य नागस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनमिति वचनात् ॥ ४८ ॥

छलारी — नलराजसखो ऋतुपर्णः अभवदित्यनुषङ्गः । यो ऋतुपर्णस्तस्मै नलायाक्षहृदयं द्यूतविद्यां दत्वाऽश्वविद्यामयात् । तत्सुतो ऋतुपर्णसुतः ॥ ४८ ॥

ततः सुदासस्तत्पुत्रो मदयन्तीपतिर्नृपः ।
आहुर्मित्रसहं यं वै कल्माषाङ्घ्रिमुत क्वचित् ॥ ४९ ॥

सत्यधर्मीया — तत्पुत्रः सर्वकामकुमारो मदयन्ती नाम्ना भार्या तस्याः पतिः । उत्तरत्र पतिदुर्मतिच्युतिकर्त्रीति तत्पतिरित्युक्तिः । यं सुदासमेव मित्रसहमाहुः । ततस्तदनन्तरं क्वचित्कल्माषाङ्घ्रिनाम्ना सौदासश्चाभवत् । एवं नामत्रयवानभूत् ॥ ४९ ॥

छलारी — तत्पुत्रः सौदास इति शेषः । यं सुदासपुत्रम् । कल्माषाङ्घ्रिमुत कल्माषपादं चाहुः क्वचित्कदाचित् ॥ ४९ ॥

वसिष्ठशापाद् रक्षोऽभूदनपत्यः स्वकर्मणा ॥ ५० ॥

सत्यधर्मीया — स्वकर्मणा प्राचीनेनानपत्योऽपुत्रः स्वकर्मणेदानीमनुष्ठितेन वसिष्ठशापाद्रक्षो राक्षसोऽभूत् ॥ ५० ॥

राजोवाच —

किन्निमित्तो गुरोः शापः सौदासस्य महात्मनः ।
एतद् वेदितुमिच्छामः कथ्यतां न रहो यदि ॥ ५१ ॥

सत्यधर्मीया — किन्निमित्तः किं निमित्तं यस्य स तथा । महात्मन इति शप्तृशाप्योभयान्वयि । यदि रहो गोप्यं न तर्हि कथ्यताम् ॥ ५१ ॥

छलारी — न रहो न रहस्यम् ॥ ५१ ॥

श्रीशुक उवाच —

सौदासो मृगयां किञ्चिचरन् रक्षो जघान ह ।
मुमोच भ्रातरं सोऽथ गतः प्रतिचिकीर्षया ॥ ५२ ॥

सत्यधर्मीया — मृगयां गतं किञ्चिद्रक्ष इत्यन्वयः । स द्वितीयस्तद्भ्राता । प्रतिचिकीर्षया प्रतिहतीच्छा तया, गतो राजगृहम् ॥ ५२ ॥

छलारी — कञ्चिद्रक्षः कञ्चिद्राक्षसं जघान । तस्य भ्रातरं मुमोच सः । भ्राता पलाय्य गतः । प्रतिचिकीर्षया भ्रातृहननप्रतिकरणेच्छया ॥ ५२ ॥

स चिन्तयन्नघं राज्ञः सूदरूपधरो गृहे ।
गुरवे भोक्तुकामाय पक्त्वा निन्ये नरामिषम् ॥ ५३ ॥

सत्यधर्मीया — अघं स्वभ्रातृघातरूपम् । सूदरूपस्य धरः । सूदस्तु, सूदवत्सूपकारे च व्यजनेऽपि चेति विश्वः । अनेन परिचितचरसूदाकारवानिति सूच्यते । भोक्तुकामाय गुरवे वसिष्ठाय नरामिषं मानुषमांसं पक्त्वा निन्ये ॥ ५३ ॥

छलारी — राज्ञः सौदासस्याघमनिष्टम् । पक्त्वा पाकं कृत्वाऽनिन्ये । परिवेषणार्थमिति शेषः ॥ ५३ ॥

परिवेष्यमाणं भगवान् विलोक्याभक्ष्यमञ्जसा ।
राजानमशपत् क्रुद्धो रक्षो ह्येवं भविष्यसि ॥ ५४ ॥

सत्यधर्मीया — अञ्जसा ज्ञानदृष्ट्येति सम्यक् तदसाम्भावित्यं निराकरोति भगवानिति । अभक्ष्यं भक्षणानर्हम् । एवं परिवेषकसूदवेषकरक्षोवत् ॥ ५४ ॥

छलारी — एवं विधो रक्षो राक्षसः भविष्यसि ॥ ५४ ॥

रक्षःकृतं तद् विदित्वा चक्रे द्वादशवार्षिकम् ।
सोऽप्यपोऽञ्जलिनाऽऽदाय गुरुं शप्तुं समुद्यतः ॥ ५५ ॥

सत्यधर्मीया — न च वचनं ततान नृपो न च मम वचनमन्यथयितुं शक्यं कृतवच्च प्रतिकर्तृरक्षोऽतोऽयं शापः किञ्चित्सङ्कोचनीय इति दयावानेवं कृतवान्गुरुरिति गृणाति ॥ रक्ष इति । अभक्षतालक्षणक्षण एवैवमप्रेक्षा तु शापप्रदानेनोहिता कोपपारवश्येनेति ज्ञेयम् । अन्यथा शापं न दद्याद्भूपाय तापस इति भावः । ननु भारते आदिपर्वणि राज्ञा प्रेरित एव नरमांसं पक्त्वा स्थापयामासेति वचनमत्र तु रक्षःकृतं तद्विदित्वेति वचनमिति विसंवाद इति चेन्न । ''विश्वामित्रस्ततो रक्ष आदिदेश नृपं प्रति । राक्षसः किङ्करो नाम विवेश नृपतिं तदा । रक्षसा तं गृहीतं त्वितु'' इति तत्रैवोक्तेराविष्टं रक्षो, रक्षः सूदवेषं चेति द्वे रक्षसी तत्कृतं ज्ञात्वेत्यर्थापनेन तस्यैककण्ठ्यसम्भवात् । राजा तु रक्षसाऽऽविष्टः सूदमाह गतव्यथः । अप्येनं नरमांसेन भोजयेति पुनः पुनः । तथेत्युक्त्वा ततः सूदः संस्थानं वध्यघातिनाम् । द्वादशवार्षिकं रक्षस्त्वं सोऽपि सौदासोऽप्यञ्जलिना । अप उदकमादाय गुरुं निरपराधिनम् । एवमुपरोधं कृतवानिति रुषा । शप्तुं शापं वितरितुं समुद्यतः ॥५५॥

छलारी — वसिष्ठो रक्षःकृतं राक्षसकृतम् । स्वशापमिति शेषः । द्वादशवार्षिकं चक्रे ॥ ५५ ॥

वारितो मदयन्त्याऽऽपो रुशतीः पादयोर्जहौ ।
दिशः खमवनीं सर्वां पश्यन् जीवमयीं नृपः ॥ ५६ ॥

सत्यधर्मीया — मदयन्त्या भार्यया वारितो वारा इतः स सन्नपि वारितो निवारितः । रुशतीर्मन्त्रितत्त्वाद्धिंसयतीः पादयोर्जहौ तत्याज । तत्र हेतुमाह ॥ दिश इति । जीवमयीमिति यथायथं विपरिणतमन्वेति । रक्षः क्षपणेनेदृशी दशा सादिता सूदिताश्चेदुदकैर्जीवाः का वाऽवस्था भवेदिति स्वपादयोरेवासृजद्वारीति भावः ॥ ५६ ॥

छलारी — रुशतीः क्रूरा आपो मन्त्रितत्वात्स्वपादयोरेव जहौ नान्यत्र । तत्र हेतुः ॥ दिश इति । दिशो जीवमयाः खं जीवमयं सर्वामवनिं जीवमयीमिति योज्यम् ॥ ५६ ॥

राक्षसं भावमापन्नः पादे कल्माषतां गतः ।
व्यवायकाले ददृशे वनौकोदम्पती द्विजौ ॥ ५७ ॥

सत्यधर्मीया — कल्माषतां कालिमानम् । कल्माषो राक्षसे कृष्ण इति विश्वः । व्यवायकाले सुरतसमये । व्यवायः सुरते मृध्रीति विश्वः । वनौकोदम्पतीति सरलः पाठः । वनमोको भवनं ययोस्तौ च तौ दम्पती चेति तत्र पदमेकम् । वनौकाविति पाठे सकारान्तस्याकारान्तताऽप्यस्तीति ज्ञेयम् । द्विरूपकोशादावेतत्सजातीयानां तमोरजःशिरआदीनां शब्दानामकारान्ततोक्तेः । एधोदकमिति विवृत्यवसरे तत्त्वसुबोधिन्यामेधशब्दपर्यायोऽयमेधशब्द इतीत्येवंजातीयकेषु धनुरादि शब्देषु गतेरुक्तेः । द्विजा च द्विजश्च द्विजौ पुमेकशेषः । एवं निर्दिशंश्छब्द एव पुंशेषः । अर्थतस्तु प्रस्तुतस्त्रीशेष इति ध्वनयामास ॥ ५७ ॥

छलारी — कल्माषतां कल्माषसमानवर्णताम् । तदेवं राक्षसत्वे कल्माषाङ्घ्रित्वे च कारणमुक्त्वा स्वकर्मणाऽनपत्य इति यदुक्तं तत्प्रपञ्चयति ॥ व्यवायकाल इति । व्यवायकाले सुरतसमये वनमोको निवासो ययोस्तौ वनोकौ ॥ ५७ ॥

क्षुधार्तो जगृहे विप्रं तत्पत्न्याहाकृतार्थवत् ।
न भवान् राक्षसः साक्षादिक्ष्वाकूणां महारथः ॥ ५८ ॥

सत्यधर्मीया — तत्पत्नी द्विजपत्नी अकृतार्थवदकृतार्था । स्वार्थे गतेरर्थवत्त्वमिति मतुब्वद्वतिः । अरतिविरतिराह । साक्षाद्राक्षस आजनी न तज्जातिः ॥ ५८ ॥

छलारी — अकृतार्थवत् । यद्यपि लज्जा स्त्रीणां स्वभावतस्तथाऽपि तत्पत्नी लज्जां त्यक्त्वा लज्जारहिताऽकृतार्थपुरुषवद्राजानं प्रत्याहेत्यर्थः । यद्वा । अकृतार्थवदकृतार्थवती पत्या सुरतस्यासमाप्त-त्वादकृतार्थेत्यर्थः । अकृतार्थशब्दान्मन् प्रत्यये ङीप् प्रत्ययस्य छान्दसे लोपेऽकृतार्थवदिति

रूपनिष्पत्तिः । राक्षसस्य कृपाजननायावध्यत्वे कारणान्याह ।। न भवानित्यादिना । इक्ष्वाकूणामिक्ष्वाकुवंशोत्पन्नानां मध्ये ।। ५८ ।।

मदयन्त्याः पतिर्वीर नाधर्मं कर्तुमर्हसि ।
देहि मेऽपत्यकामायास्त्वकृतार्थं पतिं द्विजम् ।। ५९ ।।

सत्यधर्मीया — मदयन्त्याः पतिः । अनेन स्त्रीसुखं जानासीति मत्पतिं त्यजेति त्याजन एतत्सुखस्य मम तव पत्न्या अपि सति त्वय्येतत्सुरतसुखविखण्डनं स्यादिति वा कटाक्षयतीति ज्ञेयम् । अपत्यकामायाः पुत्रापेक्षावत्या अकृतार्थमसुरतसमाप्तिं द्विजं पतिं देहि मा हिंसीतीति भावः ।। ५९, ६० ।।

छलारी — अकृतार्थमसमाप्तरतिम् ।। ५९ ।।

देहोऽयं मानुषो राजन् पुरुषस्याखिलार्थदः ।
तस्मादस्य वधो वीर सर्वार्थवध उच्यते ।। ६० ।।

छलारी — अस्य मानुषदेहस्य ।। ६० ।।

एष हि ब्राह्मणो विद्वान् तपःशीलगुणान्वितः ।
आरिराधयिषुर्ब्रह्म महापुरुषसंज्ञितम् ।। ६१ ।।

सर्वभूतात्मभावेन भूतेष्वन्तर्हितं गुणैः ।
सोऽयं ब्रह्मर्षिवर्यस्ते राजर्षिप्रवराद् विभोः ।। ६२ ।।

सत्यधर्मीया — भजने यानि निमित्तानि भीतिजनने भवन्ति त्यजनेन वा भवन्त्विति द्विजजाया राजानं प्रति प्राह ।। एष इति । महापुरुषसंज्ञितं ब्रह्म नारायणाख्यं सर्वभूतानात्मभावेन स्वामित्वेन भूतेष्वन्तर्हितं गुणैरारिराधयिषुस्तत्तद्गुणकत्वेनाराधनं कर्तुमिच्छुर्विभो राजर्षिप्रवरत्वात् ।। ६१,६२ ।।

छलारी — सर्वभूतानामात्मा स्वामीति भावेन भावनया आरिराधयिषुः ।। यद्वा । कथंभूतं ब्रह्म । सर्वभूतानात्मभावेनात्मत्वेनान्तर्नियामकत्वेन । भूतेष्वन्तर्हितमदृश्यत्वेन स्थितं गुणैः पूर्णमिति शेषः ।। ६१,६२ ।।

कथमर्हति धर्मज्ञ वधं पितुरिवात्मजः ।
तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः ॥ ६३ ॥

सत्यधर्मीया — आत्मजः सुतो भ्रूणस्य । भ्रूणोऽर्भके स्त्रैणगर्भ इत्यमरः । भ्रूणः स्त्रीगर्भयोरिति भानुः । स्त्रैणगर्भो नाम स्वयमपत्यतयाऽधुना न जात इति स्वयमेव वर्तत इत्यर्थः । भ्रूणहत्यां वैते घ्नन्तीत्येतद्विवृतौ वेदवेदाङ्गविदो ब्राह्मणस्येत्युक्तेर्वेदवेदाङ्गज्ञानिन इति वा । ब्रह्मवादिनो वेदवादिनो ब्रह्मविषयको वादोऽस्यास्तीति ब्रह्म वदितुं शीलमस्यास्तीति वा द्वितीयव्याख्यानुसारेणार्थो ज्ञेयः ॥ ६३ ॥

छलारी — सवितुः सकाशादात्मज इव भ्रूणस्य स्वयमेव पुत्रस्य बभ्रोर्वधम् । यथाऽयोग्यवधमिवेत्यर्थः । सतां संमतो भवान्वधं ब्रह्मवधं कथं साधु मन्यत इत्यर्थः । क्षणमपि येन विना न जीविष्ये । सोऽयं यदि भक्ष्यः क्रियते तर्हि मृतकं यथा मृतप्रायं मां पूर्वं भक्षय । यद्वा मृतकं प्राणरहितं शरीरम् । प्राणमन्तरेण यथा न जीवति तथा पत्या विना न जीविष्य इत्यन्वयः । विलपन्त्या ब्राह्मण्या । एवं प्रार्थितेऽपीति शेषः ॥ ६३,६४,६५ ॥

कथं वधं यथा बभ्र्वा मन्यते सम्मतो भवान् ।
यद्ययं क्रियते भक्ष्यस्तर्हि मां खाद पूर्वतः ॥ ६४ ॥

सत्यधर्मीया — बभ्र्वाः सौरभेय्याः । माहेयी सौरभेयी च बभ्रूः स्याद्वृषकाङ्क्षिणीति चाभिधानम् । सम्मतः सत्त्वेन भवान् । बभ्र्वा वधो यथा न विधातव्यस्तथा ब्राह्मणवधोऽपि स एवं कथं मन्यते । साध्विति जानीषे यदि । अयं सप्ततिर्भक्ष्यः क्रियते । तर्ह्ययमुपायं वा कुर्वादाविति वदति ॥ तर्हीति । पूर्वतः पूर्वं मां खाद भक्षय ॥ ६४ ॥

न जीविष्ये विना येन क्षणं च मृतकं यथा ।
एवं करुणभाषिण्या विलपन्त्या अनाथवत् ॥ ६५ ॥

सत्यधर्मीया — राजावा त्वज्जीवनापेक्षयाऽयमधिकः किमित्यत आह ॥ नेति ॥ येन पत्या विना न जीविष्ये । मृतकं गतजीवं कलेवरं यथा हेयं तथा मज्जीवनमनेन विनेति भावः ॥ ६५ ॥

व्याघ्रः पशुमिवाखादत् सौदासः शापमोहितः ।
ब्राह्मणी वीक्ष्य भर्तारं पुरुषादेन भक्षितम् ॥ ६६ ॥

सत्यधर्मीया — पुरुषादेन प्रस्तुतमनुसृत्येवमुक्तिः ॥ ६६ ॥

शोचन्त्यात्मानमुर्वीशमशपत् कुपिता सती ।
यस्मान्मे भक्षितः पाप कामार्तायाः पतिस्त्वया ॥ ६७ ॥

सत्यधर्मीया — आत्मानं हा विधेहि विधेहि मामपि मृतामिति स्वमुद्दिश्य शोचन्ती । तस्याः शापेन भूपस्य किं स्यादित्यतोऽभिधास्यति ॥ सतीति । पतिव्रतेति न तथोक्तं च्यावयितुं शक्यमिति द्योतयति । पाप तद्वान् ॥ ६७ ॥

छलारी — आत्मानं देहम् । ताडयन्ती सतीति शेषः ॥ ६७ ॥

तवापि मृत्युराधानादकृतप्रज्ञ दर्शितः ।
एवं मित्रसहं शस्वा पतिलोकपरायणा ॥ ६८ ॥

सत्यधर्मीया — शापप्रकारमुपदर्शयति ॥ तवेति । आधानाद्गर्भाधानमप्राप्य स्थितस्य मृत्युः प्रदर्शितः । एतत्कार्यानुगुण्येन भवेदिति भावः । आपातादिति पाठे गर्भसन्दर्भकरात् ईषत्पातात्सम्यगपत्योत्पत्तिहेतुभूतात्प्रागेवेत्यर्थः । मित्रसहं सौदासम् ॥ ६८ ॥

छलारी — हे अकृतप्रज्ञ अशिक्षितबुद्धे । तवाधानाद्गर्भाधानात् । मृत्युः । दर्शितो भवेत् । मैथुनसमये तवाऽपि मृत्युर्भूयादिति यावत् । मित्रसहं कल्माषपादम् ॥ ६८ ॥

तदस्थीनि समिद्धेऽग्नौ प्रास्य भर्तुर्गतिं गता ।
विशापो द्वादशाब्दान्ते मैथुनाय समुद्यतः ॥ ६९ ॥

सत्यधर्मीया — तस्य पत्युः । प्रास्यादौ क्षिप्त्वा । द्वादशाब्दान्ते विशापः शापहेतुकरक्षोभावविकलः ॥ ६९ ॥

छलारी — प्रास्य निक्षिप्य । सहगमनं कृत्वा भर्तुर्गतिं गतेत्यर्थः । द्वादशाब्दान्ते विशापः सन् । तेनैव शरीरेण स्वगृहं गतः ॥ ६९ ॥

विज्ञाय ब्राह्मणीशापं महिष्या स निवारितः ।
तत ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणाऽप्रजाः ॥ ७० ॥

सत्यधर्मीया — कर्मणा तच्छापस्मरणरूपेण । स्त्रीसुखम् । अप्रजाः प्रजारहितोऽपि तत्याज । अप्रज इति पाठे प्रजायते पुत्रात्मना स्वयमिति प्रजः स नेत्यप्रज इत्यर्थः । प्रजामिति द्वितीयान्तपाठे प्रजां सन्ततिमुद्दिश्य स्त्रीसुखं तत्याजेत्यर्थः ॥ ७० ॥

वसिष्ठस्तदनुज्ञातो मदयन्त्यां प्रजामधात् ।
सा वै सप्त समा गर्भमबिभ्रन्न व्यजायत ॥ ७१ ॥

सत्यधर्मीया — तदनुज्ञातस्तेन तद्भर्त्रा । सा मदयन्ती समाः सप्त संवत्सरान् गर्भमबिभ्रत् बभार । न व्यजायत न बहिः प्रादुर्भूतोऽभूत् ॥ ७१ ॥

छलारी — तेन सौदासेनानुज्ञातो मद्भार्यायां पुत्रमुत्पादयेति । सप्तसमाः सप्तसंवत्सरान् गर्भमबिभ्रद्दधाना न व्यजायत नाप्रासूत ॥ ७१ ॥

जघ्नेऽश्मनोदरं तस्मात् सोऽश्मकस्तेन कथ्यते ।
अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः ॥ ७२ ॥

सत्यधर्मीया — ततः किं कृतवती सेत्यतो वक्ति ॥ जघ्न इति । अश्मना पाषाणेनोदरं जघ्ने जघान । अनेन सा द्विजसती स्वकलेवरं शिलया ताडयन्ती न भवतु भवतः साक्षात्सन्ततिः प्रकारान्तरेणान्तर्वत्नी पत्नी जाता चेदप्यनया धात्र्यै भवतु तवापत्यमिति मनसि कृतवती तथैवेश्वर एतद्गृहेश्वरीमप्रेरयदिति ध्वन्यते । आत्मानं शोचन्तीत्यस्य स्वोदरं दृषत्ताडनादिना देहमुद्दिश्य शोचन्तीति चार्थो ज्ञेयः । तेन हेतुनाऽयं जातः सुतोऽश्मकः कथ्यते । यो मूलकः स्त्रीभिः परिरक्षितः परशुरामतः स्वयं परित उपवेशनेन न कोऽप्यत्र पुरुष इति सम्भाषणादिना संरक्षितः ॥ ७२ ॥

छलारी — अतो वसिष्ठ एव तस्या उदरमश्मना पाषाणेन जघान । स उत्पन्नः सुतोऽश्मकः । स्त्रीभिः संवेष्ट्य परशुरामात्परिरक्षितोऽतो नारीकवच इत्युक्तः । परशुरामेण निःक्षत्रिये सति क्षत्रियवंशस्य मूलमभवदतो मूलक इति चाप्युक्तः ॥ ७२,७३ ॥

नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् ।
ततो दशरथस्तस्मात् पुत्र ऐलबिलिः स्मृतः ॥ ७३ ॥

सत्यधर्मीया — अतो नारीकवच इति नामाऽयम् । नार्य एव कवचं यस्य सः निःक्षत्रे परशुरामे क्षत्रमात्राभावे सति कृते मूलं करोतीति करोतेर्डः । क्षत्रियकुलमूलं मूलकनाममूलमित्थमिति भावः । ततो मूलकाद्दशरथोऽयमितरो रामतातात् ॥ ७३ ॥

राजा विश्वसहो यस्य खट्वाङ्गश्चक्रवर्त्यभूत् ।
यो देवैरर्थितो दैत्यानवधीद् युधि दुर्जयान् ।। ७४ ।।

सत्यधर्मीया — यस्यैलबिलेर्विश्वसहः विश्वं सहत इति क्षमावानिति गुणनाम । खट्वाङ्ग इति तातस्थापितं नामेति विवेकः चक्रवर्तीति गतम् । अर्थितः सहायार्थं याचितः ।। ७४ ।।

छलारी — यस्यैलिबिलिनामकस्य । खट्वांगो राजाऽभूत् । तं विशिनष्टि ।। विश्वसह इति । अत्यन्तक्षमावानित्यर्थः । प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्ते खट्वाङ्गेनोक्तं तावन्ममायुः कथ्यतामिति । देवैश्चोक्तं मुहूर्तमात्रमिति । तज्ज्ञात्वा देवैर्दत्तविमानेन पुरमेत्य मनः सन्दधे । इदानीं खट्वाङ्गस्य स्वसाधुवृत्तानुस्मरणपूर्वकं भगवच्छरणागतिप्रकारं दर्शयति ।। नम इत्यादिना तमहं प्रपद्य इत्यन्तेन । कुलदैवतात् । ब्रह्मकुलाद्ब्राह्मणकुलात् । ते प्राणा नातिवल्लभा नातिप्रिया इति प्रत्येकं सम्बन्धः । मह्यं मम ।। ७४,७५,७६ ।।

राजा उवाच —

मुहूर्तमायुर्ज्ञात्वैत्य स्वपुरं सन्दधे मनः ।
न मे ब्रह्मकुलात् प्राणाः कुलदैवान्न चात्मजाः ।। ७५ ।।

सत्यधर्मीया — आयुः स्वजीवितकालं मुहूर्तं तदवशिष्टं ज्ञात्वा स्वपुरमेत्य मनो दधे दधार । तत्प्रकारश्च 'खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तां तथाऽऽयुषः' इति व्याकृत्यवसरे । अत्रेयमाख्यायिका देवैः सहायार्थं याचितः खट्वाङ्गो दितिजानजावजीघनत् । तदा ते दिविषदस्तुष्टा वरं वरयेत्यवोचन् । तदा मेदिनीशो ममायुः कियद्वदेत्याह । ते चाहुर्मुहूर्तात्मकमिति । तदा तदवेत्य देवयानेन त्वरया पुरमागत्य भगवति मनः समाधाय परं पदं जगामेति द्वितीयप्रथमेऽनुसन्धेयः । चिन्तनप्रकारमाह ।। नम इति । ब्रह्मकुलाद्ब्रह्मणकुलात्प्राणा नातिवल्लभा इत्युत्तरेणान्वयः । कुलदैवाच्छ्रीवासुदेवात् । आत्मजाः सुताः ।। ७५ ।।

न श्रियो न मही राज्यं न दाराश्चातिवल्लभाः ।
न बाल्येऽपि मतिर्मह्यमधर्मे रमते क्वचित् ।। ७६ ।।

सत्यधर्मीया — श्रियः सम्पदो दारा भार्या लसत्सु सत्सु दन्तेषु नोदन्तश्चणकानां तेषु च सत्सु न रदा इति चणकाभाणकवन्नायुषि सति सति साधने मन इदानीं सति चेतसि न नायुरिति न किन्त्वहमाजनीनैतत्स्वभाव इति स्वस्वरूपं निरूपयति ।। नेति । अनेन विशेषसाधनचिकीर्षयेयमुक्तिरिति सूच्यते । बाल्येऽपि मह्यं मम रमतेऽरमत ।। ७६ ।।

नापश्यमुत्तमश्लोकादन्यत् किञ्चन वस्त्वहम् ।
देवैः कामवरो दत्तो मह्यं त्रिभुवनेश्वरैः ॥ ७७ ॥

सत्यधर्मीया — वस्तु शक्तम् । अवस्त्वशक्तमुद्दिष्टं वस्तु शक्तमिति तात्पर्यान्तरात् । उद्गतं तमो यस्मात्स श्लोकः कीर्तिर्यस्य । उत्तमैर्ब्रह्मादिभिः श्लोक्यत इति स तथा तस्मात् । किञ्चनान्यन्नापश्यम् । देवैः कामवरो मह्यं दत्तः ॥ ७७ ॥

छलारी — किञ्चन वस्तूत्तमश्लोकादन्यद्भगवदनधीनं नापश्यम् । किन्तु भगवदधीनमेवापश्यमित्यर्थः ॥ ७७ ॥

न वृणे ह्यवरं कर्म भूतभावनभावनाद् ।
येऽविक्षिप्तेन्द्रियधियो देवास्ते स्वहृदि स्थितम् ।
न विदन्ति प्रियं शश्वदात्मानं किमुतापरे ॥ ७८ ॥

सत्यधर्मीया — हि यतः कर्मावरं नश्वरफलकमिति नीचम् । भूतभावनो भगवान् । भूतभावनस्य जगदुत्पादकस्य भावनादुपासनया न वृणे नेच्छामि । दुर्गमं भगवदवगमनमित्याह ॥ य इति । अविक्षिप्तेन्द्रियधियः शश्वत्प्रियमात्मानं स्वामिनं हृदि संस्थितमपि न विदन्ति । अपरे मदादयो न विदाम इति किमुतेति योजना । इन्द्रियसहिता च सा धीश्चाविक्षिप्ताऽविषयविषयिणी सा येषां तथेति ॥ ७८ ॥

छलारी — अहं भूतभावनभावनाद्भूतोत्पादकभगवद्ध्यानादिकामादवममन्यकामं न वृणे न स्वीकरोमीति । विषयेष्वविक्षिप्तानीन्द्रियाणि धियश्च येषां ते देवा अप्यात्मानं श्रीहरिं न जानन्ति किमुतापरे मादृशाः ॥ ७८ ॥

अथेशमायारचितेषु सङ्गं गुणेषु गन्धर्वपुरोपमेषु ।
रूढं प्रकृत्याऽऽत्मनि विश्वभर्तुर्भावेन हित्वा तमहं प्रपद्ये ॥ ७९ ॥

सत्यधर्मीया — मदनुष्ठेयकाष्ठेयमिति स्पष्टयति । अहमीशमायारचितेष्वीशेन मुख्यकर्त्रा मायया प्रकृत्या रचितेषु निर्मितेषु गुणेषु देहादिषु । स्थैर्यं न तेषामित्यनुरूपं निदर्शनं निरूपयति । गन्धर्वपुरोपमेषु, गन्धर्वपुरेणोपमा येषां ते तथा तेषु । प्रकृत्या स्वत आत्मन्यचिन्मनसि रूढं सङ्गं स्नेहं हित्वा तद्धानिदानमाह । विश्वभर्तुर्जगद्धारकस्य भावो भक्तिस्तेनेति, तं प्रपद्ये ॥ ७९ ॥

छलारी — किमनेन बहूक्तेनाथैवं मम सिद्धान्त इति भगवति मनः सन्दधाति ॥ अथेति । अथ तस्मात्तं श्रीहरिं शरणं प्रपद्य इत्यन्वयः । किं कृत्वा । ईशस्य हरेर्माययेच्छया विकृतैः पृथिव्यादिपञ्चमहाभूतैः रचितेषु गन्धर्वपुरोपमेषु नश्वरेषु गुणेषु देहेन्द्रियादिषु । आत्मनि मनसि प्रकृत्या स्वत एव रूढं सङ्गं स्नेहपाशलक्षणं हित्वा । त्यागे साधनमाह ॥ विश्वभर्तुरिति । भावेन भक्त्या ॥ ७९ ॥

इति व्यवसितो बुध्द्या नारायणगृहीतया ।
हित्वाऽन्यभावमज्ञानं ततः स्वं भावमाश्रितः ॥ ८० ॥

सत्यधर्मीया — नारायणगृहीतया नारायणो गृहीतो विषयीकृतो यया सा तया बुद्ध्या अन्तर्णीतण्यर्थतया नारायणगृहीतया प्रापितयेति वा व्यवसितो विशेषेणावसितं निश्चयो यस्य सः । अज्ञानं तत्स्वरूपमाह ॥ अन्यभावमिति । अन्यान्भावयति भगवत्त्वं नेति तत्तथा । अन्येनापि स्वतन्त्रेतरेण भावः सत्तेति येन तत्तथेति वा । अनिनां प्राणिनामभावः पृथगीश्वरेण येन तत्तथा तद्वा हित्वा ततस्त्यक्त्वा गामनन्तरं स्वं स्वतन्त्रं स्वशब्दवाच्यं भावं नित्यस्वतन्त्रसत्तमाश्रितः ॥ ८० ॥

छलारी — खट्वाङ्गो नारायणदत्तया बुद्ध्या । इति पूर्वोक्तप्रकारेण व्यवसितो व्यवसायं प्राप्तः सन् । अज्ञानमज्ञानादिनिमित्तकमन्यस्मिन् शरीरादौ भावं विद्यमानं ममतादिरूपं सङ्गं हित्वा तं स्वं स्वतन्त्रं भावं नारायणाख्यं पदार्थमाश्रितः ॥ ८० ॥

यत् तद् ब्रह्म परं सूक्ष्ममशून्यं शून्यकल्पितम् ।
भगवान् वासुदेवेति यं गृणन्ति हि सात्वताः ॥ ८१ ॥

सत्यधर्मीया — प्रस्तुतं प्राक् स्तुतं च वस्तु वस्तुतः किमिति मन्दसन्देहं तुदति ॥ यत्तदिति । परमक्षरात्परतः परमिति परं, सूक्ष्ममिन्द्रियागोचरमणोरणीयो वा नेन्द्रियाणि । अणोरणीयानिति श्रुतेः अन्योन्यं सकलगुणाविकलं शून्यकल्पितमिति इतरसुखोनन्यंत्वाच्छून्यमिति कल्पितं पृथग्गुणराहित्याच्छून्यमिव कल्पितमिव । शमूनं कुरुते यस्माच्छून्यं तस्माज्जनार्दनः । शून्यतया कल्पितं पामरैरिति वा । शून्यं तत्त्वमविज्ञेयं मनोवाचामगोचरमिति । यत्तद्ब्रह्मेति ब्रह्मपदप्रतीक्षया नपुंसकनिर्देशः । सात्वताः पञ्चरात्रिकाः । भगवानिति वासुदेवेति यं गृणन्ति यच्च परमित्यादि-प्रकारेण गृणन्ति च तं भावं श्रित इत इत्यन्वयः । तर्हि पूर्वं भाव इत्यभिहितं वस्त्वन्यदिदं चान्यदिति स्यादित्यतः पुनः भावपदं लक्षयित्वा पुल्लिङ्गयच्छब्देन स परामृश्यस्ततश्चैकमेव पुंनपुंसकलिङ्गपदाभ्यां मयोक्तमिति सङ्कलय्याहेति तात्पर्यमवधेयम् । ब्रह्मविदाप्नोति परम् । तस्यान्ते सुषिरं सूक्ष्मं, ब्रह्मेति

परमात्मेति भगवानिति वासुदेवो वा इदमग्र आसीदित्यादिश्रुतिप्रसिद्धतामेतदर्थस्य हिराह । हरिं जगाम कायं त्यक्त्वेति यावत् ॥ ८१ ॥

छलारी — स्वं भावमेवाह ॥ यत्तदिति । उत्तरलिङ्गविवक्षया यत्तदिति यद्वस्तु तत्सर्वं प्रमाणप्रसिद्धं परं सर्वोत्तमं सूक्ष्ममतीन्द्रियमशून्यं गुणैः शून्यं न भवति । पूर्णमिति यावत् । शून्यकल्पितं शून्यनामकमूलरूपादभिव्यक्तम् । वासुदेवेति शब्दवाच्यमिति । सात्वताः पञ्चरात्रिकाः । गृणन्ति यं च ब्रह्मेति भगवानिति च गृणन्ति । हिशब्देनोक्तार्थस्य 'शमूनं कुरुते यस्माच्छून्यस्तस्माज्जनार्दनः' इत्यादिप्रमाणप्रसिद्धिं दर्शयतीति द्वयोरेकान्वयः ॥ ८१ ॥

शुक उवाच—

खट्वाङ्गाद् दीर्घबाहुश्च रघुस्तस्मात् पृथुश्रवाः।
अजस्तस्मान्महाराजस्तस्माद् दशरथोऽभवत् ॥ ८२ ॥

सत्यधर्मीया — स्वात्मानं प्रत्येवैवमालोचनेनोवाचेति सूचयितुं पुनः शुक उवाचेति कविर्वदति ॥ शुक इति । तस्माद्दीर्घबाहोः । पृथुश्रवा इति रथध्वजान्वयि । दशरथो महाराजस्तस्मादजात् । प्राक् दशरथस्तु स्वायम्भुवः । यथोक्तं पद्मपुराणे ।

तस्याभूत्प्रथमं जन्म मनोः स्वायम्भुवस्य तु ।
रघूणामन्वये पूर्वं राजा दशरथोऽभवत् ।
द्वितीयं वसुदेवोऽभूद्वृष्णीनामन्वये मनुः ।
काले दशसहस्राब्दे ग्रामे शम्बलसंज्ञिते ।

विष्णुव्रतोऽभवदित्याद्युक्तेः । नन्वाचार्यैर्महाभारततात्पर्यनिर्णये स कश्यपो द्रागिति शूरात्स जातो बहुगोधनाढ्यो भूमौ यमाहुर्वसुदेव इत्यपीत्येकादशाध्याये वसुदेवस्य कश्यपत्वोक्तेर्विरोध इति चेन्न । वसुदेवो भवतु कश्यपः । स्वायम्भुवस्यावेशयुत इति समाध्युपपत्तेः । न च दशरथ प्राग्रूपानुक्तिरिह कथमिति शङ्क्यम् । स कश्यपस्यादितिगर्भजन्मनो विवस्वतस्तन्तुभवस्य भूभृतः । गृहे दशस्यन्दननामिनोऽभूदिति तृतीयाध्याये । अदित्यां गर्भस्य जन्माङ्कुरणं यस्मात्तस्य कश्यपस्य दशस्यन्दननामिनो गृह इत्यप्यन्वयने पद्मपुराणैककण्ठ्यस्याकुण्ठनात् । एतच्छ्लोकव्याकृतौ केचिद्दशरथं वैवस्वतमाहुः । तदुक्तं वामनपुराणे । भविष्यदन्तरे भूत्वा मनुववस्वतो भवात् ।

तव वंशे भवाम्यङ्ग रामो दाशरथिः स्वयम् ।
पुनर्दशरथो भूत्वा त्वमेवासि पिता मम ।

तद्दत्तपिण्डदानेन मुक्तिस्ते भविता ध्रुवमिति । यत्तूत्तरखण्डपद्मपुराणवचनं तद्वसुदेवसाहचर्यादावेशपरमित्यप्याहुः । पद्मपुराणवचनं च यस्याभूत्प्रथमं जन्म मनोः स्वायम्भुवस्य च । रघूणामन्वये पूर्वं राजा दशरथो ह्यभूत् । द्वितीये वसुदेवोऽभूद्वृष्णीनामन्वये पुनरितीत्यवदन् । वामनवचनमेव मानसे निधाय विवस्वतस्तन्तुभवस्येति गोत्रापत्यतयाऽऽचार्या विवृतवन्त इति सावकाशमिति न वैवस्वतपक्षः सम्मत आचार्याणाम् । किञ्चांशावतारे नारायणपण्डिताचार्यविरचिते 'राजा दशरथः पूर्वं मनुः स्वायम्भुवः स्मृतः' । उक्तं पद्मपुराणे च 'ह्यवतारप्रसङ्गत' इत्युक्तेश्च कश्यपोऽयमस्मिन्स्वायम्भुवस्यांशस्तथा विवस्वतश्चांश इति निर्गलो मार्ग इत्यलम् ॥ ८२ ॥

छलारी — पृथुश्रवा इति रघोर्विशेषणम् ॥ ८२ ॥

तस्यापि भगवानेष साक्षाद् ब्रह्ममयो हरिः ।
अंशांशेन चतुर्धाऽगात् पुत्रत्वं प्रार्थितः सुरैः ।
रामलक्ष्मणभरतशत्रुघ्नाश्चेति संज्ञया ॥ ८३ ॥

सत्यधर्मीया — तस्य दशरथस्य । साक्षादित्युत्तरत्रत्यत्रिकव्यावर्तये । ब्रह्ममयस्तदभिन्नोंऽशेन त्रिधा चेति चतुर्धा सुरैः प्रार्थितः पुत्रत्वमगात् । स्वच्छन्दप्रवृत्तेर्न छन्दप्रवृत्तिरिति रामलक्ष्मणभरतेत्युक्तिः सम्भवति ॥ ८३ ॥

छलारी — ब्रह्ममयो वेदमुख्यार्थभूतः पुरुषापरनामा पद्मनाभः स्वस्यांशेन वासुदेवादिरूपांशेन तस्य दशरथस्य रामादिसंज्ञया चतुर्धा पुत्रत्वमगादित्यन्वयः । इत्थं विचिन्त्य स तु वासुदेवनामा बभूवेत्युक्तेः । अण्डाद्बहिर्वासुदेवादिसर्वावताराणां मूलरूपाद्विश्लेष एतन्नानावताराणां निधानं बीजमव्ययमित्युक्तेः । अण्डान्तर्वासुदेवादिरूपाणां पद्मनाभाद्विश्लेषस्तस्मिन्नेव संश्लेष इत्यवधेयम् । यथाऽण्डद्बहिर्नारायण आदौ वासुदेवादिरूपो वभूव । एवमण्डान्तः पद्मनाभोऽपि वासुदेवादिरूपेण चतुर्धा बभूव । स वासुदेवः प्रथमं रामे बभूव । सः संकर्षणः शेषावतारे लक्ष्मणे प्राविशत् । स प्रद्युम्नश्चक्राभिमानिनि कामावतारे भरते प्राविशत् । सोऽनिरुद्धः शङ्खाभिमानिनि कामपुत्रेऽनिरुद्धावतारे शत्रुघ्ने प्राविशत् । चतुर्मूर्तेर्मुकुन्दस्य मूर्तिरेवाग्रतोऽभवत् । अन्येषु त्रिषु तिस्रोऽन्याः प्राविशन्निति सन्मतमिति । ननु पद्मनाभो वासुदेवादिरूपेण वभूवेत्यत्र किं प्रमाणमिति चेन्न । चतुर्मूर्तेर्मुकुन्दस्येति च नान्यथाऽनुपपत्तेरेव प्रमाणत्वादिति ॥ ८३ ॥

तस्यानुचरितं राजन् ऋषिभिस्तत्त्वदर्शिभिः ।
श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहुः ॥ ८४ ॥

सत्यधर्मीया — तत्त्वदर्शिभिरप्रमोषप्रमैर्ऋषिभिः प्रागगितैः । तस्य सीतापते रामस्यानुचरितं भूरि बहुवारवर्णितं त्वया श्रुतं चेदपि मुहुः श्रुतं भूरिफलतो महदिति । अनु त्वच्छ्रुतमनुसृत्याहमपि वर्णयामीति शेषः । अन्यथा गुर्वर्थ इत्युत्तरश्लोकानुत्थितिः स्यादिति ज्ञेयम् । चरितमिति पूर्तावपि यदन्वित्याह तेनामुमर्थं ध्वनयामासेति ज्ञेयम् ॥ ८४ ॥

छलारी — ऋषिभिर्वाल्मीकमुख्यैर्भूरि वर्णनं त्वया मुहुः श्रुतम् । तथाऽपि संक्षेपेण कथ्यमानं शृणु ॥ ८४ ॥

गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः
पाणिस्पर्शाक्षमाभ्यां मृजितपथिरुजो यो हरीन्द्रानुजाभ्याम् ।
वैरूप्याच्छूर्पणख्याः प्रियविरहरुषाऽऽरोपितभ्रूविजृम्भः
श्रुत्वाऽऽविर्बद्धसेतुः खलदवदहनः कोसलेन्द्रोऽवतीर्णः ॥ ८५ ॥

सत्यधर्मीया — विदितसङ्क्षेपा हि प्रपञ्चं जिज्ञासवो भवन्तीत्येतत्स्मरणोद्धारणाय समग्रं रामचरितं सङ्कृह्लानः सूत्रप्रायश्लोकेन शुक आह ॥ गुर्वर्थ इति । गुरुर्निषेकादिपरे पित्रादावित्यमरात्पितुर्दशरथार्थे तन्निमित्तं त्यक्तराज्य आचतुर्दशसमासमाप्ति पद्मपद्भ्यां पद्मवद्विद्यमानौ पादौ ताभ्यां कमलकोमलाभ्याम् । आदेशरूपो वा पदङ्घ्रिश्चरणोऽस्त्रियामित्युक्तः स्वतन्त्रशब्दो वेति ज्ञेयम् । अनुवनं व्यचरत् । अनुना नैकत्रावस्थितिरिति स्थितिं ध्वनयति । पदसौकुमार्यसम्पदं दर्शयति । प्रियायाः सीतायाः पाणी हस्तौ तयोर्यः स्पर्शस्तस्मिन्नप्यक्षमौ असमर्थौ ताभ्यां क्षमम् । वाच्यवच्छक्तहितयोरिति विश्वः । तादृशाभ्यामपि मृजितपथरुजो यो वाटः पथश्चेति त्रिकाण्डशेषात्स्वतन्त्रोऽदन्तः पथशब्दः । पथान्मार्गाज्जाता या रुजा । टापं चैवेति टाबन्तः शब्दः । सा मृजिता मार्जिता येन सः । मृजितपथिरुज इति पाठः सरसः । यद्वा पथोऽस्या अस्तीति पथिनी सा च रुजा च सा मृजिता येन सः । सम्बन्धश्च जन्यतारूपः । हरीन्द्रो हनुमान्सुग्रीवो वा ताभ्यां सहितो व्यचरच्चचार । प्रियः स्वपतिरकम्पनस्तस्य विरहो रावणमारणकृतो वियोगस्तज्जनिता या रुट् लङ्कात्यागे निमित्तभूता तया । तथा वैरूप्याद्गलमङ्गलसूत्रादिविकलतायातं वैरूप्यं प्राप्यागतायाः शूर्पणख्याः । नखमुखात्संज्ञायामिति स्मरणात् । शूर्पणखाया इति यद्यपि वक्तव्यं तथाऽपि शूर्पनख्या इति वदन्कुम्भवदेव कर्णावस्येत्यतो नाम च कुम्भकर्ण इतिवच्छूर्पाकारनखवत्तानिमित्तकोऽयं शब्द इति ध्वनयामासेत्यवसेयम् । यथोक्तं तत्त्वसुबोधिन्याम् । यदा तु शूर्पवन्नखानि यस्या इति योगमात्रं विवक्ष्यते न तु संज्ञातो संज्ञात्वान्न ङीषुनिषेधो न वा णत्वं तेन राक्षस्यामपि शूर्पनखीति योगवृत्त्या भवतीत्याहुरिति । स्वाङ्गादिति । ईषू इति । यथोक्तमाचार्यैः ।

व्यापादिते निजपतौ हि दशाननेन प्रामादिकेन विधिनाऽभिससार राममिति । वैरूप्यादित्यावृत्तं प्रथमान्तं सदन्वेति । वैरूप्यं घोणाकर्णच्छेदनेनातयतीति स तथा । यद्वा वैरूप्यात्तद्विरचय्य यो व्यचरदित्यन्वयः । आरोपितभ्रूविजृम्भ आरोपिते उत्तानीकृते भ्रुवौ तयोर्विजृम्भो विकासो यस्य सः । जृम्भो हर्षे विकासे चेति विश्वः । अत्र निमित्तमाविः श्रुत्वेति । हनुमतो मुखेनाविर्भावं स्थितिमिति यावत् । त्रस्ताब्धिरिति स्फुटार्थः पाठः । समुद्र इति शेषः । बद्धः सेतुर्येन सः । पूर्वः खलः स्वरस्तदुपलक्षितादूषणेन स हि चतुर्दशसाहस्री चास्रपानाम् । सैव दवो वनम् । खला रावणाद्युच्छृङ्खलवृत्तयो राक्षसास्त एव दवो वनं वा तस्य दहनोऽग्निः । दवदावौ वनारण्यवन्ह्योरिति यादवः । दवदावौ वनारण्यवह्नीत्यमरः । कोसलेन्द्रः कोसलदेशेशः सन्नवतीर्णः । भूमाविति शेषः । अवतान्न इति पाठोऽवतान्नः । योऽनुवनं जलमनु व्यचरत्स एवावतीर्ण इत्यन्वयेनापि नारायण एवायमिति भावो ध्वन्यते । दशाप्यवतारा एतेन सङ्गृहीता इति भाति । तथा हि । अनुवनं गुर्वर्थे सत्यव्रतोपरि निहितभाररूपप्रयोजनार्थं जलमनुसृत्यावतीर्णो यो व्यवहरदिति वा योऽनुवनं व्यचरत्स मत्स्योऽवतादिति वाऽन्वयः ॥ १ ॥

यो गुर्वर्थे मन्दरभारमुद्दिश्यानुवनं व्यचरत्कूर्मः । यथापूर्वमुर्वरितम् ॥ २ ॥

अनुवनं काननमनुसृत्य पाणिस्पर्शाक्षमाभ्यां पाणिस्पर्शे अक्षमा धरा ययोस्ताभ्यां पद्मपद्भ्यां व्यचरत्स वराहः । पादसंवाहिका मही यस्येति भावः ॥ ३ ॥

गुरोः प्रल्हादपितुरर्थे निवृत्तौ तामुद्दिश्य योऽवतीर्णः स नृसिंहः ॥ ४ ॥

गुर्वर्थे गुरुर्बृहस्पतिस्तस्यार्थे । अवमानेनादृश्यतारूपनिवृत्तौ यस्त्यक्तराज्यस्तस्य । गुरोर्ज्येष्ठत्वात्पितृसमस्येन्द्रस्यार्थे । तस्मा इति यावत् । त्यक्तं बलितोऽपहृत्य दत्तं राज्यं येनेति वामनः ॥ ५ ॥

गुर्वर्थे पूज्यकश्यपार्थे त्यक्तराज्य इति जामदग्न्योऽत एव धरायाः काश्यपीत्यभिधा ॥ ६ ॥

प्रस्तुतस्तुतश्चैकः ॥ ७ ॥

गुर्वर्थे उग्रसेनार्थे त्यक्तराज्यो याः प्रिया अत्यक्तराज्योऽत्यक्तपङ्क्यस्तासां पाणिस्पर्शाक्षमाभ्यां पद्मपद्भ्यामनुवनं मृजितपथिरुजो व्यचरद्यः स कृष्णः ॥ ८ ॥

यो वैरूप्याद्वैरूप्येण दिगम्बरतयाऽततीति स तथा बुद्धः ॥ ९ ॥

यश्च हरीन्द्रो वाजिराजस्तस्यानु पश्चाद्भागे जायेते इति तौ ताभ्यां पद्मपद्भ्यां मृजितपथिरुजः । हरिर्भेकाश्वसिंहेत्यादिर्विश्वः । चतुष्ट्वात्पादानां कथं द्वयोरेव ग्रहणमित्यतोऽप्याह । पद्मपद्भ्यां

पाणिस्पर्शाक्षमाभ्यां योग्यतया हरीन्द्रपदार्थान्वयः । पाणिस्पर्शमात्रेण न विद्यते क्ष्मा भूः स्पृश्यत्वेन ययोस्ताभ्यामुत्तानीकृताभ्यामिति यावत् । इति चतुर्भिः पादैः । यदाऽश्वस्य पाणि स्पर्शोऽसम्भावितस्तदा कशा दुर्दशा किं शंसनीयेति द्योत्यतेऽनेन कल्की ॥ १० ॥

सर्वमपि सर्वत्राभेदादन्वेत्युर्वरितमिति मन्तव्यम् । प्रियं कलत्रं तद्विरहरुषेत्यपि योजयन्ति ॥ ८५ ॥

छलारी — इदानीं संक्षेपविस्तराभ्यां च कथयन्ति मनीषिणः । बहुवारस्मृतेस्तस्य फलबाहुल्यकारणादित्युक्तेर्विस्तरतो रामकथां विवक्षुः प्रथमं तावत्संक्षेपतस्तां वर्णयन् स्वसंरक्षणं प्रार्थयते ॥ गुर्वर्थ इति । सः कोसलेन्द्रो रामो नोऽस्मान् अवतात् । सः कः । यो गुर्वर्थे पितुः सत्यपालनार्थं त्यक्तराज्यः सन् पद्मवत्सुकुमाराभ्यां पद्भ्याम् । तदेवाह । प्रियायाः पाणिस्पर्शेऽक्षमाभ्यामसमर्थाभ्याम् । अतिकोमलाभ्यामिति यावत् । प्रतिवनं व्यचरन् । हरिरिन्द्रो हनुमान्सुग्रीवो वा । अनुजो लक्ष्मणस्ताभ्यां युक्तः । मृजितपथिरुजो मार्जितमार्गक्लेशः शूर्पनख्या वैरूप्याद्धेतोस्तया प्रलोभितेन रावणेन । भार्याया अपहारात्प्रियाया जातो यो विरहस्तेन जातया रुषाऽऽरोपितभ्रूविजृंभणैव त्रस्तोऽब्धिर्यस्मात्सः । ततस्तद्विज्ञापनेन बद्धसेतुर्येन सः । खल एव दवो वनं तस्य दहनोऽग्निस्थानीयः । दवादावौ वनारण्यवन्ह्योरिति यादवः ॥ ८५ ॥

विश्वामित्राध्वरे येन मारीचाद्या निशाचराः ।
पश्यतो लक्ष्मणस्यैव हता नैर्ऋतपुङ्गवाः ॥ ८६ ॥

सत्यधर्मीया — तच्चरितं प्रपञ्चयति ॥ विश्वामित्रेति । मारीचाद्या इति चातद्गुणसंविज्ञानो बहुव्रीहिः । लक्ष्मणस्य पश्यतः सतस्तमनादृत्य । नैऋतपुङ्गवा नैऋतः खरः श्रेष्ठो येषां ते तथा । निशाचरा येनैव हताः । अथवा कथाया ऐदंप्राथम्येणावचनान्मरीचाद्या इति तद्गुणसंविज्ञान इति ज्ञेयम् । अत एव यो लोकवीरसमितावित्याद्युक्तिर्युक्ता ॥ ८६ ॥

छलारी — एकपद्येनानेन सूत्रवत्संक्षिप्य कथितं रामचरितमादित एव किञ्चित्प्रपञ्चयति ॥ विश्वामित्रेति । पश्यत एव लक्ष्मणस्य पश्यतोऽस्यानपेक्षयैव हता इत्यर्थः । नैर्ऋतपुंगवा राक्षसश्रेष्ठाः ॥ ८६ ॥

यो लोकवीरसमितौ धनुरैशमुग्रं
सीतास्वयंवरमुखे त्रिशतोपनेयम् ।
आदाय बालगजलील इवेक्षुयष्टिं
सज्जीकृतं नृप विकृष्य बभञ्ज मध्ये ॥ ८७ ॥

सत्यधर्मीया — लोके ये वीरास्तेषां समितौ सभायाम् । समितिः सङ्गरे साम्ये सभायां सङ्गमेऽपि चेति विश्वः । सीतास्वयंवरमुखे तत्प्रारम्भसमये । ईशस्येदमैशं शिवसम्बन्धि । उग्रं क्रूरं धनुः कार्मुकं त्रिशतोपनेयं बालगजलीलो लीला हि शृङ्गारक्रिया बालगजस्येव सा यस्य सः । लीलां विदुः । शृङ्गारभावप्रभवक्रियास्विति विश्वः । आदाय सज्जीकृतं ज्यासहितं कृत्वा विकृष्य मध्ये । लीलाऽस्तीति लीलः । बालगजश्चासौ लीलश्च लीलावद्बालगजः । इक्षुयष्टिमिव । यथेक्षुदण्डं शतमन्युकुञ्जर इत्याचार्योक्तेः । बभञ्ज । अत्र त्रिशतोपनेयमिति । रामायणे च नृणां शतानि पञ्चाशध्यायतानां महात्मनाम् । सङ्ग्रहे च वीरोत्तमैः पञ्चसहस्रसङ्घचैरिति । पाद्मे च । सैन्येनानीय भण्डिनेत्युक्तेर्विरोध इति चेन्न । मुख्यामुख्यकिङ्करधुरन्धरविवक्षया प्रवृत्तमिदम् । तत्र मुख्यामुख्यकिङ्करविवक्षया रामायणम् । सेनायां समवेतायां सैन्यास्त इत्युक्तेः सैनिकलोकमात्रपरं पाद्मवचनमिति समाध्युपपत्तेः । अनुक्तेरयुक्ततानावहकत्वात् । मञ्जूषामष्टचक्रान्तां समूहस्ते कथञ्चन । अष्टचक्रमञ्जूषया तयाऽभिगुप्तमिति चानधुनातनरामायणद्वन्द्वे सहा न सैवात्राचार्योक्तौ तथा भण्डिनेति पद्मपुराणे च सत्त्वान्मञ्जूषादिना सह त्रिशतोपनेयमिति योज्यम् । इक्षुयष्टिमिव बालगजलीलो रामो बभञ्जेति वा ॥ ८७ ॥

छलारी — लोके ये वीरास्तेषां समितौ सभायाम् । ऐशं रुद्रसम्बन्धित्रिशतैः पुरुषैरुपनीतं बालगजस्य लीलैव लीला यस्य स तथा । हे नृप ॥ ८७ ॥

जित्वात्मरूपगुणशीलवयोऽनुरूपां
सीताभिधां श्रियमुरस्यभिलब्धमानाम् ।
मार्गे व्रजन् भृगुपतेर्व्यनयत् प्ररूढं
दर्पं महीं कृतवतो हतराजबीजाम् ॥ ८८ ॥

सत्यधर्मीया — उरसि वक्षसि प्रतिलब्धमानां प्रतिलब्धो मानश्चित्तसमुन्नतिः सत्कार इति यावत् । यया तामात्मरूपगुणशीलवयोनुरूपामात्मनः स्वस्य रूपगुणशीलवयोभिरनुरूपां योग्यां सीताभिधां श्रियं जित्वा प्राप्य धनजिते स्वर्जित इत्यादिवत् । त्वं उः असीति रुद्रं धनुर्विधूनने जित्वा च मार्गे व्रजन् प्ररूढं दर्पं निमित्तीकृत्य हतराजबीजा हतानि राज्ञां बीजानि यस्यां सा तां महीं कृतवतो भृगुपतेः स्वेन चाभेदं प्रदर्श्य पुनः पृथक् स्वं व्यनयन्नीतवान्सोऽवतात् । समेत्य चैक्यं जगतोऽभिपश्यतः । द्विधेव भूत्वा भृगुवर्य आत्मना रघूत्तमेनैक्यमगात्समक्षम् । प्रदाय रामाय धनुर्वरं तदेत्याद्याचार्योक्तेः । भृगुपतेः प्ररूढं दर्पं व्यनयदित्यन्वये तु शुद्धलौकिकं धाटीनटन-मितरमोहनायेति ज्ञेयम् ॥ ८८ ॥

छलारी — उरसि वक्षस्यभिलब्धमानां प्राप्तमानाम् । तत्र स्थितामित्यर्थः । आत्मनः स्वस्य रूपादिभिरनुरूपां सीताऽभिधां लक्ष्मीं जित्वा प्राप्य श्रीरामकृतधनुर्भङ्गमहानादश्रवणक्षुभितस्य भृगुपतेः प्ररूढदर्पमपनीतवान् । कथं भूतस्य । हृतराजबीजां निर्मूलितक्षत्रसन्ततिं महीं कृतवतः ॥ ८८ ॥

यः सत्यपाशपरिवीतपितुर्निदेशं
स्त्रैणस्य चापि शिरसा जगृहे सभार्यः ।
राज्यश्रियं प्रणयिनः सुहृदोऽधिवासं
त्यक्त्वा ययौ वनमसूनिव मुक्तसङ्गः ॥ ८९ ॥

सत्यधर्मीया — यो मुक्तसङ्गो योगी । असून्प्राणानिव यथा सोऽसूंस्त्यजति तथा । सत्यपाशपरिवीतपितुः सत्यलक्षणो यः पाशस्तेन परिवीतश्चासौ पिता च तस्य । यद्वा पाशभिन्नः पाशसदृशो ह्यपाशः सतीरूपो यः पाशस्तेन बन्धकतया च सादृश्यम् । परिवीतश्चासौ पिता च तस्य । तत्स्वभावमावदेयति ॥ स्त्रैणस्येति । स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादिति स्त्रीजितः स्त्रैणस्तस्य । एतादृशस्याप्यपिनोत्पथवर्तिनं पितरम् । घटात्कृत्य राज्यं कर्तुं शक्यमन्येनेति ध्वनयति । तथाऽपि सभार्यः शिरसा निदेशमाज्ञां जगृहे । तद्योग्यो नेत्येवं नेत्यप्याह । सभार्यः सभायामार्य इति । राज्यश्रियं प्रणयिनः स्नेहपात्राणि । अगोत्रजान्सुहृदो बन्धूनधिवासमयोध्यायां गृहं वा त्यक्त्वा वनं ययौ यः सोऽवतादित्यन्वयः । सदा मुक्तसङ्ग इति रामपक्षेऽप्यन्वयो ज्ञेयः ॥ ८९ ॥

छलारी — इदानीं गुर्वर्थ इति श्लोकं विवृण्वन्नाह ॥ य इति । कदाचित्कैकेय्या रक्षितेन राज्ञा त्वदपेक्षितं दास्यामीति प्रतिश्रुतम् । ततः श्रीरामस्य यौवराज्याभिषेकसमये भरतस्य राज्यं रामस्य वने वासः प्रार्थितस्तदा सत्यपाशेन परिवीतस्य परिवेष्टितस्य पितुर्निर्देशमाज्ञां शिरसा जगृहे । ततो राज्यश्रियं प्रणयिनः प्रीतिविषयान्सुहृदश्च त्यक्त्वा अधिवासमयोध्यां च त्यक्त्वा सभार्यो वनं ययौ । दुस्त्यजस्यापि हर्षेण त्यागे दृष्टान्तः । मुक्तसंगो योग्यसून्प्राणानिवेति ॥ ८९ ॥

रक्षःस्वसुर्व्यकृत रूपमशुद्धबुद्धे-
स्तस्याः खरत्रिशिरदूषणमुख्यबन्धून् ।
जघ्ने चतुर्दशसहस्रमवारणीय-
कोदण्डपाणिरटमान उवास कृच्छ्रम् ॥ ९० ॥

सत्यधर्मीया — यो रक्षस्स्वसुः शूर्पणखायाः । अशुद्धबुद्धेरिति रक्षःपदेनाप्यन्वेति । अशुद्धबद्धे रक्षस इति । तृतीयादिभाषितपुंस्कं पुंवदित्युक्तेः सम्भवति । स्वसृविशेषणं वा त्वमट नः समीपे मेति। गच्छानुजं म इह नेत्याचार्योक्तेः । तस्या रूपं व्यकृत विकृतमुक्तरीत्याऽकरोत् । खरश्चत्रिशिरश्च। अदन्तःशब्दः शिरोवाची । शिरोऽदन्त इत्यादेः । दूषणश्चैते मुख्यबन्धवश्च तान् जघ्ने आजघ्ने । तथा च चतुर्दशसहस्रमाजघ्ने । अवारणीयो यो कोदण्डः । कोदण्डो भ्रूलतायां स्यादेशभेदे च कार्मुक इति विश्वः । स पाणौ यस्य सः । अवारणीयमिति पाठे च चतुर्दशसहस्रपदेनान्वयः । कृच्छ्रं लोकरीत्या यथा तथा वा सोऽटमानोऽटन्वा ।। ९० ।।

छलारी — रक्षस्वसुः शूर्पनख्या रूपं व्यकृत कर्णनासिकाच्छेदनलक्षणविकारं कारितवान् । अन्यैरवारणीयं कोदण्डः पाणौ यस्येति हेतुगर्भम् । अटमानो वने संचरन्सन् । आतपादिना क्षुधादिना च पीडितः सन् । कृच्छ्रमुवास । असुरजनमोहार्थं तथा दर्शयामासेति भावः ।। ९० ।।

सीताकथाश्रवणदीपितहृच्छयेन
सृष्टं विलोक्य नृपते दशकन्धरेण ।
जघ्ने कृतैणवपुषाऽऽश्रमतोऽपकृष्टो
मारीचमाशु विशिखेन यथाऽरिमुग्रः ।। ९१ ।।

सत्यधर्मीया — सीतायाः कथासौन्दर्यातिशयादिविषयिणी तस्याः श्रवणेन शूर्पणखामुखतो दीपित उज्वलितो हृच्छयो मन्मथो यस्य तेन दशकन्धरेण दश कन्धरा यस्य तेन रावणेन सृष्टं प्रेषितं विलोक्यकृतं च तदैणमेणस्य कृष्णस्य सारस्य सम्बन्धि । ऐणं तच्च तद्वपुर्यस्य तेनाश्रमतः स्वोटजादपकृष्टो दूरं नीत आशु विशिखेन बाणेन यथोग्रः कपर्द्यरिमन्धकं त्रिपुरं वा । उग्रो नरहरिररिं हिरण्यकशिपुं वा । उग्रो जज्ञे वीर्याय स्वधानाविति । उग्रं वीरमिति च श्रुतेः । उग्रः कपर्दीत्यमरः । अद्भतैणवपुषोपलक्षितमिति वा ।। ९१ ।।

छलारी — शूर्पनखीमुखात्सीतायाः सौन्दर्यादिविषयकथाश्रवणेन दीपितः प्रज्वालितो हृच्छयः कामो यस्य स तथा । तेन दशकन्धरेण रावणेन सृष्टम् । प्रेषितमिति यावत् । अद्भुतैणवपुषा । स्वर्णरत्नविरचितत्वेनाद्भुतहरिणदेहेन । उपलक्षितमिति शेषः । एतादृशं मारीचं विलोक्य सीतया प्रेरितः सन् । आश्रमतोऽपकृष्टो दूरं नीतो रामो विशिखेन बाणेन मारीचमाशु जघ्न इत्यन्वयः । उग्रो नृसिंहो हिरण्यकशिपुनामानमरिं यथा । यद्वा । उग्रो रुद्रोऽन्धकाख्यं रिपुं यथा ।। ९१ ।।

रक्षोधमेन वृकवद् विपिनेऽसमक्षं
वैदेहराजदुहितुर्यपयापितायाम् ।
भ्रात्रा वने कृपणवत् प्रियया वियुक्तः
स्त्रीसङ्गिनामिति रतिं प्रथयंश्चचार ॥ ९२ ॥

सत्यधर्मीया — रक्षोऽधमेन राक्षसापसदेन वृकवद्वृकेण तुल्यं वर्तत इति स तथा तेन । वृको यथाऽऽत्मानं भुवि लीनं कृत्वाऽवीन् हरति तद्वद्वेषान्तराच्छादितेनेत्यर्थः । विपिनेऽरण्येऽसमक्षम् । प्रतिपरसमनुभ्योक्ष्ण इत्यच् । स्वस्मिन्नसति वैदेहराजदुहितरि विदेह एव वैदेहः स चासौ राजा च तस्य दुहितरि पुत्र्यां सीतायाम् । अवने रक्षणविषये वियुक्तो विशेषेण योजितो यस्तेन भ्रात्रा लक्ष्मणेन च । वियुक्त इत्यावर्तते वियुज्यत इति वियुक् । सयुजा सखायावितिवत् । भावप्रधानश्च वियुक्ततो वियुक्तत्वात् । अपयापितायामपनीतायां प्रियया तया वियुक्तः कृपणवद्दीनमानव इव स्त्रीसङ्गिनां स्त्रैणानां । इति रतिं सत्यासक्तिं प्रथयन् प्रथ प्रख्यापने ख्यापयन् । भ्रात्रा सह वन इत्यपि सदावर्तते । वने चचार । मूलकृत्प्रथयन्निति कथयंस्तत्तात्पर्यं सूचितवानिति न तात्पर्यमत्र पर्यनुयुक्तिपूर्वकं योजितं स्वावसरे योजयिष्यामः ॥ ९२ ॥

छलारी — रक्षोऽधमेन रावणेन रामस्यासमक्षमप्रत्यक्षमपि यापितायामपनीतायाम् । अवने पालने नियुक्तेन भ्रात्रा लक्ष्मणेन । रहितायामिति शेषः । प्रियया वियुक्तः । लोकदृष्टचेति शेषः । भ्रात्रा लक्ष्मणेन सह । कृपणवद्वने चचार । किमभिप्रायः सन् इत्यनेन प्रकारेण स्त्रीसङ्गिनां विटानां गतिं प्रख्यापयन् । कथं भूतेन रक्षोधमेन । वृकवत्स्थितेन ॥ ९२ ॥

दग्ध्वाऽऽत्मकृत्यहतकृत्यमहन् कबन्धं
सख्यं विधाय कपिभिर्दयितागतिं तैः ।
बुद्ध्वाऽथ वालिनि हते प्लवगेन्द्रसैन्यै-
र्वेलामगात् स मनुजोऽजभवार्चिताङ्घ्रिः ॥ ९३ ॥

सत्यधर्मीया — दग्ध्वेति श्लोकः प्रक्षिप्त इति कैश्चिन्न व्याख्यातः कथासङ्ग्राहक इति गङ्गाजलमिलितेतरजलवन्निर्णयाभावेन व्याख्यास्यामः । आत्मकृत्यं आत्मनः स्वस्य कृत्येन युद्धाख्यव्यापारेण हतेति सदावृत्तमन्वेति । हतं हतकृत्यं हतश्चासौ हतं गतम् । कृत्यं प्रेतकार्यं यस्य स तम् । मन्दचेष्टितमित्याचार्योक्तेर्गतव्यापारं गतासुमनन्तरं दग्ध्वा । आत्मकृत्ये सीतावनरूपस्वकार्ये हतकृत्यमिति वा । अथ कबन्धमहन् हतवान् । कपिभिः सुग्रीवादिभिः सख्यं विधाय वालिनि स्वेन

हते सति तैर्दयितागतिं हनुमदादिभिर्भार्यास्थितिं बुद्ध्वा ज्ञात्वा सैन्यैः सह वेलां नीरनिधितीरमगात् । अजभवार्चिताङ्घ्रिर्ब्रह्मरुद्रपूजितपादः स मनुजस्तत्त्वेनाविर्भूतोऽवतात् । स मनुजः काकुः । न मनुज इत्यर्थ इति वा । यो मनुजः स त्वमज हरे अर्चिताङ्घ्रिर्भवेति शुकः प्रार्थयतीत्यर्थ इति वर्णयन्ति ॥ ९३ ॥

छलारी — ततः किं चकारेत्यत आह ॥ दग्ध्वेति । आत्मकृत्यं हतकृत्यं सीतालक्ष्मणरूपं यदात्मकृत्यं तदर्थं हतकृत्यं रावणेन नष्टांशो यस्य व्यापारं मृतं जटायुषमित्यर्थः । दग्ध्वा दहनादिसंस्कारं कृत्वेत्यर्थः । कबन्धं तन्नामकं स्वग्रहणाय विस्तृतबाहुं राक्षसमहन् जघान । अथ सुग्रीवेण सख्यं विधाय । अथ वालिनि हते सति कपिभिर्हनुमदादिभिर्दयितागतिं बुद्ध्वेत्यन्वयः । मनुजो मनुजाकारः स रामः प्लवगेन्द्रसैन्यैः सह । वेलां समुद्रतीरमगादिति । अजभवाभ्यामर्चितावङ्घ्री यस्य स तथा ॥ ९३ ॥

यद्रोषतीव्रपरिवृत्तकटाक्षपात-
संभ्रान्तनक्रमकरो भयगीर्णघोषः ।
सिन्धुः शिरस्यर्हणं परिगृह्य रूपी
पादारविन्दमुपगम्य बभाष एतत् ॥ ९४ ॥

सत्यधर्मीया — मनुज इति स्वजल्पनस्य कल्पनयाऽपार्थार्थस्याल्पमतयो दुर्गतयो भवेयुरिति दययाऽनेकैः श्लोकैस्तदभिप्रायं दर्शयितुमनितरसुरसाधारणगुणवर्णकैरुपश्लोकयति ॥ यद्रोषेति । यस्य रामस्य रोषेण दर्शितकोपेन तीव्रं यथा तथा परिवृत्तो भ्रामितो यः कटाक्षो नेत्रप्रान्तभागस्तस्य यः पातः । लक्ष्यतयेक्षणमिति यावत् । तेन सम्भ्रान्ता इतस्ततो भ्रमन्तो नक्रा अवहारा मकरास्तद्विशेषा यस्मिन्स तथा भयेन गीर्णः स्वस्मिन् गिलितो घोषो यस्य स सन् सिन्धुः रूपी साकारःशिरस्यर्हणं पूजाद्रव्यं परिगृह्य पादारविन्दं स्वाभिमन्यमानं जलजपुत्रीधात्रिजनकतानुबन्धेन । अद्भ्यः पृथिवी पद्भ्यां भूमिरिति श्रुतेः । तथा स्वाभिमन्यमानजलजत्वानुबन्धेन स्वकलत्रगङ्गाजनकतानुबन्धेन च पादारविन्दोपगमनं दययेद्देव इति ज्ञेयम् । पादावेवारविन्दं तत् । एकवचनं लिङ्गसङ्ख्याविभेदेऽपि ह्युपमानोपमेययोर्विभक्तिः पुनरेकैवेत्यालङ्कारिकोक्तेर्युक्तम् । उपगम्य प्राप्यैतद्वक्ष्यमाणं बभाषे । अत्र रात्रित्रयेऽप्यनुपगामिनमित्याचार्योक्तत्त्वादिना पूर्वत्रोत्तरत्र च कथाविशेषोऽनुसन्धेयः ॥ ९४ ॥

छलारी — तत्र त्रिरात्रिवासेन प्रतीक्षितः सिन्धुर्यदा नोपस्थितः । तदा यस्य रोषतीव्रेण तीक्ष्णकोपेन परिवृतस्तिर्यग्भावं प्राप्तो यः कटाक्षस्तस्य पातेन संभ्रान्ता नक्रा मकराश्च यस्मिन्सः भयेन गीर्णो ग्रस्तः स्तम्भितो घोषो यस्मिन्सः । अर्हणं पूजासाधनम् । रूपी मूर्तिमान् ॥ ९४ ॥

तं त्वा वयं जडधियो न विदाम भूमन्
कूटस्थमादिपुरुषं जगतामधीशम् ।
त्वं सत्त्वतः सुरगणान् रजसः प्रजेशान्
मन्योश्च भूतपतयः स भवान् गुणेशः ॥ ९५ ॥

सत्यधर्मीया — इयत्कालमालयाज्जल्पते कुतो नायात इत्यस्यावसरमनासादयानोऽब्धिरब्धिशयनं स्वयमेव स्वाज्ञानं विज्ञापयति ॥ तं त्वेति । हे भूमन् । भावभवित्रोरभेदात्पूर्ण । कूटस्थं निर्विकारं कूटवत्तिष्ठतीति कूटस्थः कूटं खं विदलं व्योमेति गीताभाष्योक्तेः । आदिपुरुषं पुरातनपुरुषं जगतः जगतां प्राणानां वा । जगत्प्राणसमीरणा इत्यमरः । अधीशमधीश्वरं यस्त्वं सत्त्वतः सुरगणानस्राक्षीः । रजसः प्रजेशान् मानवान् मन्योः । व्याकृतं च पदजातमाचार्यैः । रजसो मनुष्यांस्तार्तीयतोऽसुरगणानभितस्तथास्रा इति तमसो भूतपतीन् राक्षसादीन् । स भवानेवं गुणेश इति तं त्वां वयं न विदाम न विद्मः । जडधियो जडा मन्दा धीर्येषां ते तथा । जल एव धीर्येषामिति तस्यान्तरङ्गिको भावः ॥ ९५ ॥

छलारी — एतावत्पर्यन्तं त्वां न विदामो जडधियो मूर्खबुद्धयो न जानीम इत्यर्थः । इदानीं जानामीत्याह ॥ त्वमिति । यस्त्वं सुरगणान्सात्विकान् । असृज इति शेषः । प्रजेशान् राजसान् रजसाऽस्राक्षीः । मन्योः क्रोधकारणात्तमोगुणाद्भूतपतयः । विभक्तिविपरिणामः । तामसानुत्पादयसि । गुणैः प्रवर्तमानस्य गुणनिर्मिता भावो नाशङ्कनीयः । गुणानां तदधीनत्वादित्याशयेनाह ॥ स भवान् गुणेश इति ॥ ९५ ॥

कामं प्रयाहि जहि विश्रवसोऽवमेहं
त्रैलोक्यरावणमवाप्नुहि वीर पत्नीम् ।
बध्नीहि सेतुमिह ते यशसो वितत्यै
गायन्ति दिग्विजयिनो यमुपेत्य भूपाः ॥ ९६ ॥

सत्यधर्मीया — काममिच्छानुसारं प्रयाहि । विश्रवसो मुनेरवमेहं विष्टासमम् । तस्य सकाशादवमा नीचा ईहा चेष्टा यस्य स तम् । अतत्कुमारीभवनयोग्यं त्रैलोक्यरावणं त्रैलोक्यं रावयतीति स तं जहि । हे वीर पत्नीमाप्नुहि । इह मयि वितत्यै विस्ताराय । तत्कथं तद्विस्तर इत्यतः कथयति । यं सेतुमुपेत्य भूपा गायन्ति गास्यन्ति दिग्विजयिन इति प्रथमान्तं सद्भूपविशेषणम् । रामबिशेषणं च षष्ठ्यन्तं सद्भवति । तेन दिग्विजयिनोऽप्येतं सेतुं दुःसाधयतं गायन्तीति

महामाहात्म्यलाभो ज्ञेयः । यद्यपि जलतरणं तव त्वदनुकम्पया च कपीनां च नासुसाधं तथाऽपि यशोर्थमेव कपीनां यातुं पुण्यहेतुं सेतुं कुर्विति प्रार्थना ममेति विज्ञापयामास पयोधिरिति भावः ॥९६॥

छलारी — विश्रवसोऽवमेहं पुरीषतुल्यम् । त्रैलोक्यं रावयत्याक्रन्दयतीति तथा तं जहि । यद्यपि जलं तव न प्रतिबन्धकम् । तथाऽपीह जले सेतुं बध्नीहि । किमर्थम् । ते यशसो वितत्यै । तदेवाह ॥ यमिति । यं सेतुमुपेत्य दुष्करं कर्मावेक्ष्य त्वद्यशो गायन्ति भूपास्तं सेतुमिति सम्बन्धः ॥ ९६ ॥

बध्वोदधौ रघुपतिर्विविधाद्रिकूटैः
सेतुं कपीन्द्रकरकम्पितभूरुहाङ्गैः ।
सुग्रीवनीलहनुमत्प्रमुखैरनेकै-
र्लङ्कां विभीषणदृशाऽऽविशदाशु दग्धाम् ॥ ९७ ॥

सत्यधर्मीया — जलधिजल्पनं सम्मान्यविविधाद्रिकूटैर्नानाप्रकारपर्वतशृङ्गैः कपीन्द्रकरकम्पितानि कपीन्द्राश्च मध्येऽध्वन्यानीय दातारस्तेषां करैः कम्पितानि भूरुहाणां तरूणामङ्गानि शाखा येषां तानि तैः करणैरुदधौ समुद्रे सेतुं बद्ध्वा । सुग्रीवनीलहनुमत्प्रमुखैरनेकैः कपिभिः कर्तृभिर्बद्ध्वा बन्धयित्वा तत्रापि सामर्थ्यमेतस्यैव न तेषामिति ध्वनयितुं बद्ध्वेत्यणिजन्तप्रयोगः । बिभीषणदृशा तद्बुध्या दग्धां हनुमता तां लङ्कामाशु शीघ्रमाविशत् । तत्समीपमापेति भावः । सुग्रीवनीलहनुमत्प्रमुखैरनेकैः सहाविशदित्यप्यन्वयो ज्ञेयः ॥ ९७ ॥

छलारी — तद्वाक्यमभिनन्द्य यत्कृतं तदाह ॥ बद्ध्वेति । विविधैरद्रीणां कूटैः शृङ्गैः सेतुं बद्ध्वा सीताऽन्वेषणे हनुमतैव दग्धां लङ्कां विभीषणदृशा बुद्ध्याऽऽविशत् । कथं भूतैः शृङ्गैः । कपीन्द्राणां करैः कंपितानि भूरुहाणां अङ्गानि शाखादीनि येषां तैः । सुग्रीवादयः प्रमुखा येषां तैरनीकैः ॥९७॥

स वानरेन्द्रबलरुद्धविहारकोष्ठ-
सद्द्वारगोपुरसदोवलभीविटङ्का ।
निर्भज्यमानधिषणध्वजहेमकुम्भ-
शृङ्गाटका गजकुलैर्ह्रदिनीव घूर्णा ॥ ९८ ॥

सत्यधर्मीया — यदा राम आविशत्तदा लङ्का कां कामवस्थामगादित्यतः कथयति ॥ सा इति । गजकुलैः करिनिकरैर्ह्रदिनीव घूर्णा कम्पिताऽभूत् । वानरेन्द्राणां बलं सेना तेन रुद्धा निरुद्धा । सा वा

साऽपि । नरेन्द्रो रामस्तस्य बलं सेना तेन रुद्धा इति वा । विहारा बुद्धसद्मानि विहारभ्रमणे स्कन्दे लीलायां सुगतालय इति विश्वः । काष्टा अन्तःसदनानि धान्यगृहादिर्वा । कोष्टोऽन्तर्गृहे कुसूल इति विश्वः । सद्वारं सदोद्वारं गोपुरं पुरद्वारं सदः सभास्थानं वलभी गोपानसी । मुन्दरीत्यपभ्रष्टभाषा । विटङ्का उल्लोचा यस्याः सा । आच्छादने स्याद्वलभी गृहाणां गोपानसी दारुषु वक्रसंस्था । नीप्रं वलीकम्पठलान्तमाहुः कपोतपाली च विटङ्कसंज्ञामिति हलायुधः । गोपानसी तु वलभी छादने वक्रदारुणि । कपोतपालिकायां तु विटङ्कं पुन्नपुंसकमित्यमरः । धिषणानां गृहाणां ध्वजा केतवो हेममयाः कुम्भास्तेऽपि गृहोपरि स्थापिताः । शृङ्गाटकानि चतुष्पथाः । शृङ्गाटकं भवेद्वारि चतुष्पथ इति विश्वः । निर्भज्यमानानि धिषणध्वजहेमकुम्भशृङ्गाटकानि यस्याः सा ।। ९८ ।।

छलारी — यदा सा लङ्का रामेणाविष्टा । तदा गजकुलैर्हृदिनीव घूर्णा प्रचलिता बभूव । कथं भूता । गृहाच्छदनान्तर्नालीदारुभिः परितो निर्मिता वानरेन्द्राणां बलैः सैन्यै रुद्धा आवरिता विहारादयो यस्याः सा तथा । निर्भज्यमानधिषणादयो यस्याः सा तथा विहारा नानाविधक्रीडास्थानानि । कोष्ठं धान्यागारादि सद्वारं गृहादीनां प्रशस्तद्वारं गोपुरं पुरद्वारं सदः सभा वलीभिः प्रासादादिपुरोभागाच्छदनादीनि विटङ्का कपोतपेटिका । धिषणं धिष्ण्यं गृहवेदिकादि ध्वजस्तंभो हैमकुम्भा गृहालङ्कारहेमकलशाः शृङ्गाटकं चतुष्पथं गोपानसी तु वलभीछादने वक्रदारुणि कपोतपालिकायां च विटङ्कं पुंनपुंसकमित्यमरः ।। ९८ ।।

रक्षःपतिस्तदवलोक्य निकुम्भकुम्भ-
धूम्राक्षदुर्मुखसुरान्तनरान्तकादीन् ।
पुत्रान् प्रहस्तमतिकायविकम्पनादीन्
सर्वानुगान् समहिनोदथ कुम्भकर्णम् ।। ९९ ।।

सत्यधर्मीया — तद्वानरेन्द्रबलरोधनं नरेन्द्रबलरोधनं वा रक्षःपती रावणो विलोक्योच्चावचाः सर्वेऽपि रणे मरणमेष्यन्त्यविशेषादिति सूचयितुं कोऽपि क्रमोऽत्र न विवक्षित इति ज्ञेयम् । कुम्भकर्णसुतकुम्भनिकुम्भयोः स्वपुत्रत्वमपि सम्भावितमिति पुत्रानित्यक्तिः । प्रहस्तं सेनान्यमति-कायविकम्पनादीन्पुत्रानित्यत्राप्यन्वेति । सर्वानुगान्समहिनोत्प्राहिणोत् । अथैतन्मरणानन्तरं कुम्भकर्णं च प्राहिणोत् । अरे किञ्चिच्छङ्कितुं कुतुक्यसीति भाति तव वदनोपरि । तर्ह्युक्तं स्मरेत्येकयोः श्रवसोर्वा पेषणमुत्तरमेव हि ।। ९९ ।।

छलारी — रक्षःपतिः रावणः कुम्भनिकुम्भौ कुम्भकर्णसुतौ । धूम्राक्षादयो रावणसुताः । सुरान्तो देवान्तकः । आदिपदेन मेघनादः । अत्र क्रमो न विवक्षितः । समहिनोत्प्रेषयामास ॥९९॥

तां यातुधानपृतनामसिशूलचाप-
प्रासर्ष्टिशक्तिशरतोमरखड्गजुष्टाम् ।
सुग्रीवलक्ष्मणमरुत्सुतगन्धमाद-
नीलाङ्गदर्क्षपनसादिभिरन्वितोऽयात् ॥ १०० ॥

सत्यधर्मीया — असिशूलचापप्रासर्ष्टिशक्तिशरतोमरखड्गजुष्टामसिऋष्टिखड्गा इति चन्द्रहासविशेषा वा धर्तृभेदादुक्तिर्वेति ज्ञेयम् । व्याकृतचरमिदम् । गन्धमादो गन्धमादनो ऋक्षो हि जाम्बवान् । पृतनां सेनां प्रत्यगात् ॥ १०० ॥

छलारी — असिशूलादिभिर्दुर्गमां तां यातुधानपृतनां राक्षससेनां सुग्रीवादिभिरन्वितो श्रीरामोऽभ्यगात् । मरुत्सुतो हनुमान् ऋक्षो जाम्बवान् ॥ १०० ॥

तेऽनीकपा रघुपतेरभिपत्य सर्वे
द्वन्द्वं वरूथमिभपत्तिरथाश्वयोधम् ।
जघ्नुर्द्रुमैर्गिरिगदेषुभिरङ्गदाद्याः
सीताभिमर्शहतमङ्गलरावणेशम् ॥ १०१ ॥

सत्यधर्मीया — रघुपते रामस्य तेऽनीकपाः सेनान्यः सर्वे द्वन्द्वं द्वन्द्वश इभपत्तिरथाश्वयोधं वरूथं मण्डलाकारवेश्मरूपसैन्यमागत्य तत्प्रति निपत्य । वरूथो रथगुप्तिः स्याद्वरूथं चर्मवेश्मनोरिति विश्वः । द्रुमैर्गिरिभिः स्वजात्युचितैः । गदेषुभिरिति तदाकृष्टैरिति ज्ञेयम् । अत एव तेन तद्धतप्रायनाथमित्याह ॥ सीतेति । सीताया अभि अवज्ञया मर्शो ह्यभिमर्शस्तेन हतं नष्टं मङ्गलं जीवनहेतुः शुभं यस्य तत् । अङ्गदाद्या जघ्नुः ॥ १०१ ॥

छलारी — ते रघुपतेरनीकपाः सेनानायका अङ्गदाद्याः सर्वे द्वन्द्वं यथा भवति तथाऽभिपत्य शत्रुभिः सङ्गत्य । द्वन्द्वयुद्धं कृत्वेति यावत् । वरूथं सैन्यं गिरिभिः शत्रुभ्यो बलादाकृष्टैर्गदाद्यायुधैश्च जघ्नुः । यद्यपि वरूथिनीशब्दः सैन्यवाचकस्तथाऽपि वरूथशब्दो लक्षणया सैन्यवाचक इति ज्ञातव्यम् । कीदृशम् । इभाश्च पत्तयश्च रथाश्चाश्वाश्च तैः सहिताः । योद्धा सहायो । योद्धारो यस्मिंस्तत्तथोक्तम् । पुनः कीदृशम् । सीताया अभिमर्शेन हतं मङ्गलं यस्य सः रावणः स एव ईशो यस्य तत्तथोक्तम् ॥ १०१ ॥

रक्षःपतिः स्वबलनष्टिमवेक्ष्य रुष्ट
आरुह्य यानकमथाभिससार रामम् ।
स्वः स्यन्दने द्युमति मातलिनोपनीते
विभ्राजमानमहनन्निशितैः क्षुरप्रैः ॥ १०२ ॥

सत्यधर्मीया — स्वबलस्य स्वसेनाया नष्टिं नाशम् । रुष्टः कुपितः । यानकं पुष्पकम् । केन निर्याने रामे निर्याणं यानेनानुचितमिति कुत्सयामास । स्वः स्वर्गान्मातलिनेन्द्रसुतेन द्युमति तेजस्विन्युपनीते स्यन्दने बिभ्राजमानं रामं स रावणो निशितैर्निशातैः क्षुरप्रैरर्धचन्द्रैः । गतम् । अहनदहन् ॥ १०२ ॥

छलारी — रक्षःपती रावणः स्वबलनष्टं स्वबलनाशनमवेक्ष्य यानकं पुष्पकविमानमारुह्य श्रीराममभिससार । स रामो द्युमति तेजोमति । स्वः स्वर्गादवतीर्णे स्यन्दने रथे मातलिनेन्द्र-सारथिनाऽऽनीते । विभ्राजमानं रामं क्षुरप्रैरर्धचन्द्रैः । अर्धचन्द्रः क्षुरप्रः स्यादित्यभिधानम् । अहनत् ॥ १०२ ॥

रामस्तमाह पुरुषादपुरीष यन्नः
कान्ताऽसमक्षमसताऽपहृता स्वयं ते ।
त्यक्तत्रपस्य फलमद्य जुगुप्सितस्य
इच्छामि काल इव कर्तुमलङ्घ्यवीर्यः ॥ १०३ ॥

सत्यधर्मीया — हे पुरुषादपुरीष राक्षसापसद । अपकृष्टं पुरीषं स्यद्विष्ठा निष्ठ्यूतमप्युते-त्यभिधानम् । नोऽसमक्षं परोक्षतो नः कान्ता स्वयं साक्षात्तेऽसताऽसाधुनाऽपहृता । जुगुप्सित-स्याकार्यकरणान्निन्दितस्य त्यक्तत्रपस्य गतलज्जस्य तस्य तेऽलङ्घ्यवीर्योऽहम् । काल इवेत्यलङ्घ्य-वीर्यताहेतुः । मृत्युदेवतेव फलं कर्तुमिच्छामि । इतःपरं प्रणतः प्रशयिनीं प्रतिदातुमिच्छसि चेदपि सन्धिसमयोऽतीत इत्यभिसन्धिमसन्धिनिर्देशेन ध्वनयामासेति ज्ञेयम् । अद्येत्यनालस्यं सूचयति ॥
॥ १०३ ॥

छलारी — हे पुरुषादपुरीष राक्षसाधम । अपकृष्टं पुरीषं स्यादित्यभिधानम् । यद्यस्मादसता दुष्टेन त्वया कान्ता सीताऽस्माकमसमक्षमप्रत्यक्षं यथा तथाऽपहृता । तत्तस्माज्जुगुप्सितस्य कर्मणः कर्तुस्तेऽद्य काल इवान्तक इव फलं यच्छामि प्रयच्छामि ॥ १०३ ॥

एवं क्षिपन् धनुषि सन्धितमुत्ससर्ज
बाणं स वज्रमिव तद्धृदयं बिभेद ।
सोऽसृग् वमन् दशमुखैर्न्यपतद् विमानाद् ।
हा हेति जल्पति जने सुकृतीव रक्षः ॥ १०४ ॥

सत्यधर्मीया — एवं क्षिपंस्तिरस्कुर्वन्धनुषि सन्धितं बाणमुत्ससर्जामुचत । स बाणो वज्रमिव तद्धृदयं रावणहृदयं बिभेद । स रक्षो रावणो दशमुखैरसृग्वमन् । उद्गिरन् जने स्वजने हाहेति जल्पति सति विमानात्सुकृती क्षीणे पुण्ये स्वर्गाद्यथा पतति तथा न्यपतत् । सुकृत्यल्पतया निन्दनीयसुकुतवान् ॥ १०४ ॥

छलारी — एवं क्षिपन्निन्दन्सबाणम् । सुकृती जनो रिक्तः क्षीणपुण्यःसन् स्वर्गादिव विमानात्पुष्पकान्न्यपतदिति ॥ १०४ ॥

ततो निष्क्रम्य लङ्काया यातुधान्यः सहस्रशः ।
मण्डोदर्या समं तस्मिन् प्ररुदन्त्य उपाद्रवान् ॥ १०५ ॥

सत्यधर्मीया — ततः पतिपातानन्तरं । मण्डमन्दपाठावानन्ददौ । मन्दमल्पमुदरम् । मण्डं पिपीलिकामध्यमित्यभिधानात् । तद्वदुदरं यस्याः सा तया समं मिलित्वा तस्मिन् रणधरणीमण्डले ॥ ॥ १०५ ॥

छलारी — तस्मिन् रणाङ्गणे मण्डवत्पिपीलिकामध्यवदुदरं यस्याः सा तया रावणभार्यया सह ॥ मण्डं पिपीलिकामध्यमित्यभिधानम् ॥ १०५ ॥

स्वान् स्वान् बन्धून् परित्यज्य लक्ष्मणेषुभिरर्दितान् ।
रुरुदुः सुस्वरं दीना घ्नन्त्य आत्मानमात्मना ॥ १०६ ॥

सत्यधर्मीया — शतं दुर्योधनादींस्ते धनञ्जयशरैर्हतानित्यादौ क्वचित्पुंव्यत्यासेनोक्तिरिति लक्ष्मणेत्युक्तिरुपलक्षणीयो राम इति केचित् । लक्ष्मणं रामनाम येष्विषुषु ते लक्ष्मणेषवस्तैरिति वा । रामनामाङ्कितैः शरैरिति रामायणोक्तेः । लक्ष्मणं नाम्नि चिन्हे च रामभ्रातरि लक्ष्मण इति विश्वः । तद्रूपं चिन्हं येष्विति वा । स्वान्स्वान्बन्धून्पतीन् । आत्मानमुरोरूपं देहमात्मना हस्तरूपशरीरैकदेशेन घ्नन्त्यस्ताडयन्त्यो रुरुदुः सुस्वरं श्रोतृकरुणाकरं दीनास्तप्ताः ॥ १०६ ॥

छलारी — लक्ष्मणेषुभिः । उपलक्षणमेतत् । रामेषुभिश्च । अर्दितान्हिंसितान् । अर्द हिंसायामिति धातोः । आत्मानं देहमात्मना देहेन । हस्तेनेति यावत् ॥ १०६ ॥

हा हताः स्म वयं नाथ लोकरावणरावण ।
कं यायाच्छरणं लङ्का त्वद्विहीना परार्दिता ॥ १०७ ॥

सत्यधर्मीया — लोकरावक तावकानामपि कामिन्यदीनां दशाननदशासादितेति लोकरावणेति पदेन सूचयति । लङ्का तदन्तस्थप्रजाः ॥ १०७ ॥

छलारी — लङ्का लङ्कास्थो जनाः परैः शत्रुभिरर्दिताः ॥ १०७ ॥

न वै वेद महाभाग भवान् कामवशं गतः ।
तेजोऽनुभावं सीताया येन नीतो दशमिमाम् ॥ १०८ ॥

सत्यधर्मीया — सीतायास्तेजसोऽनुभावं सामर्थ्यं येनानुभावेनेमां दशां नीतो गतो भवान्कामवशं गतो न वेद ॥ १०८ ॥

छलारी — तेजोनुभावं तेजः सामर्थ्यं येन सीतासामर्थ्याज्ञानेन ॥ १०८ ॥

कृतैषा विधवा लङ्का वयं च कुलनन्दन ।
देहः कृतोऽयं गृध्राणामात्मा नरकहेतवे ॥ १०९ ॥

सत्यधर्मीया — विधवा पतितपतिका वयं च विधवाः कृताः । अयं देहो गृध्राणां भक्ष्यः कृतः । आत्मान्तर्गतो जीवश्च नरकदुःखानुभवार्थं कृत इत्यर्थः ॥ १०९ ॥

छलारी — लङ्का विधवा पतिरहिता वयं च विधवा भर्तृरहिताः । कृता इत्यनुषङ्गः । अयं देहो गृध्राणां प्राणरक्षाय कृतः । आत्मा जीवो नरकहेतवे नरकभोगाय ॥ १०९ ॥

श्रीशुक उवाच —

स्वानां विभीषणश्चक्रे कोसलेन्द्रानुमोदितः ।
पितृमेधविधानेन यदुक्तं साम्परायिकम् ॥ ११० ॥

सत्यधर्मीया — स्वानां ज्ञातीनाम् । स्वमज्ञातिधनाख्यायामिति स्मरणात् । सर्वनामसंज्ञाभावात्स्वानामित्युपपद्यते । न च विभीषणः परमभागवतोऽवगतभ्रातृदौरात्म्यः कथं तदुत्तरक्रियामकरोदित्यत आह ॥ कोसलेन्द्रानुमोदित इति । पितृमेधविधानेन मन्त्राग्न्यादिविधिना साम्परायिकं परत्र सुखघटकम् ॥ ११० ॥

छलारी — पितृमेधविधानेन शवदाहादिविधिना सांपरायिकं परलोकसुखसाधनमौर्ध्वदेहिकम् । आत्मा जीवे तथा देहे स्वभावे परमात्मनीति यादवः ॥ ११० ॥

ततो ददर्श भगवानशोकवनिकाश्रमे ।
क्षामां स्वविरहव्याधेः शिंशुपामूलमाश्रिताम् ॥ १११ ॥

सत्यधर्मीया — अशोकवनिकारूपाश्रमे क्षामां कृशां विरहव्याधेरिति रीतिर्लौकिकी । शिंशुपा कृष्णागरुतरुस्तन्मूलं चाश्रितां ददर्श । ततो हनुमदादिभिरानयनानन्तरम् । विस्तरस्तु हरिवंशाद्युक्तोऽनुसन्धेयः ॥ १११ ॥

छलारी — अशोकवनिकामशोकवनं तत्र गतश्चासावाश्रमश्चेति मध्यमपदलोपी समासः । तत्र स्थितम् । स्वविरहलक्षणव्याधिः क्षामां कृशाम् ॥ १११ ॥

रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकम्पत ।
आत्मसन्दर्शनाह्लादविकसन्मुखपङ्कजाम् ॥ ११२ ॥

सत्यधर्मीया — अन्वकम्पत दयामतनोत् ॥ ११२ ॥

छलारी — अन्वकंपतानुकंपामकरोत् ॥ ११२ ॥

आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः ।
विभीषणाय भगवान् दत्वा रक्षोगणेशताम् ॥ ११३ ॥

सत्यधर्मीया — तां यानमारोप्य भ्रातृभ्याम् । ल्यब्लोपे पञ्चमी । तौ भरतशत्रुघ्नावनुसृत्य सुग्रीवलक्ष्मणाभ्यां स्वभ्राता वालिभ्राता चेति साम्मुग्ध्येन तथा स्वभ्राता रावणभ्राता चेति द्वयोर्ग्रहणाद्भ्रातृभ्यामित्युपपद्यते । छत्रिनीत्या वा । निमित्ते तृतीयैव वा । भ्रातृनिमित्तकं यानारोहणमित्यर्थः । क्रियार्थोपपदस्य च कर्मणि स्थानिन इति भ्रातरौ द्रष्टुमारुरुह इति चतुर्थी वा युद्धाय सन्नह्यतीतिवत् । पूर्वपक्षद्वन्द्वे हनुमद्युत इत्यस्माद्युत इत्युत्कृष्य भ्रातृभ्यां युत

इत्यन्वेतव्यम् । वृद्धो येनेति निर्देशात्सहेत्यप्रयोगेऽपि लब्धसहेत्यन्वेतव्यं वेति मन्तव्यम् । हनुमद्युतः स्वयमारुरुहे ॥ ११३ ॥

छलारी — यानं पुष्पकमारोप्य । सीतामिति शेषः । भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्याम् । लक्ष्मणविभीषणाभ्यां वा । छत्रिणो गच्छन्तीतिवत् । सहित इति शेषः ॥ ११३ ॥

लङ्कामायुश्च कल्पान्तं ययौ तीर्णव्रतः पुरीम् ।
अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि ॥ ११४ ॥

सत्यधर्मीया — सत्यसन्धो राम इति सङ्कल्पितेन सहासं कल्पितमपि व्यतारीद्राम इत्याह । कल्पान्तमायुश्च दत्वा तीर्णव्रतः । चतुर्दशसंवत्सरात्मकं व्रतं तीर्णं येन स तथा । पुरीमयोध्याम् । अवकीर्यमायाकुसुमैरिति पाठे वकारेणाधिकेनावति (?) कीर्यमाण इत्यर्थविशेषं ध्वनयामास । लोकपालाः पौलोमीनाथादयः ॥ ११४ ॥

छलारी — तीर्णवनवासव्रतः । दिनकल्पान्तमायुश्च दत्वा । तेनापि सहैव ययौ ॥ ११४ ॥

उपगीयमानचरितः शतधृत्यादिभिर्मुदा ।
गोमूत्रयावकं श्रुत्वा भ्रातरं वल्कलाम्बरम् ॥ ११५ ॥

सत्यधर्मीया — शतधृतिर्ब्रह्मा । अनेन ब्रह्माद्यागमनकथा ग्रन्थान्तरस्था सङ्गृहीतेति ज्ञेयम् । गोमूत्रयावकं गोमूत्रपाचितयावान्नभोजिनं वल्कलाम्बरं तरुत्वाग्वस्त्रं । गतम् ॥ ११५ ॥

छलारी — कथं भूतः । शतधृत्यादिभिर्ब्रह्मादिभिरुपगीयमानचरितः । गोमूत्रयावकं गोमूत्रेण सह पक्तव्यान्नभोजनम् । भ्रातरं वल्कलाम्बरं चीरवस्त्रम् ॥ ११५ ॥

महाकारुणिकोऽतप्यज्जटिलं स्थण्डिलेशयम् ।
भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः ॥ ११६ ॥

सत्यधर्मीया — जटिलं स्थण्डिलेशयम् । सम्मज्र्य मण्डलीकृतायामवनौ शेत इति स्थण्डिलेशयः । अधिकरणे शेतेरित्यच् । शयवासेति सप्तम्या अलुक् ॥ ११६ ॥

छलारी — अतप्यदन्तःकरणद्रवीभावं प्राप्तः । पौरामात्यपुरोहितैः सह ॥ ११६ ॥

पादुके शिरसि न्यस्य रामं प्रत्युद्यतोऽग्रजम् ।
नन्दिग्रामात् स्वशिबिरात् गीतवादित्रनिःस्वनैः ॥ ११७ ॥

सत्यधर्मीया — नन्दिग्रामात्तत्रापि न गृहवास इत्याह ॥ स्वशिबिरात्पटकुटिकाया । निवेशः शिबिर इत्यमरः ॥ ११७ ॥

छलारी — स्वशिबिरात्स्वावासभूतान्नन्दिग्रामाद्रामं प्रति गन्तुमुद्यतः सन् । अभिययाविति शेषः । कथं भूतो । गीतादिभिर्घोषेणोच्चध्वनिना ॥ ११७ ॥

ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः ।
स्वर्णकक्ष्यैर्गजैश्चापि हैमैश्चित्रध्वजै रथैः ॥ ११८ ॥

सत्यधर्मीया — स्वर्णकक्ष्यैः सुवर्णात्मिका कक्ष्या बन्धिका रज्जुः । कक्ष्या स्याद्गजबन्धिकेत्य-मरः । अत्र कक्ष्येति रज्जुमात्रग्रहो गजेति पृथगुक्तेः । तद्वद्भिर्गजैर्हैमैर्हेमविकृतैः ॥ ११८ ॥

छलारी — ब्रह्म वेदपठद्भिर्वेदपारायणं कुर्वद्भिर्ब्राह्मणैश्च । युक्त इति शेषः । ब्रह्म वेद तपस्तत्त्वमित्यभिधानम् । पुनः कथं भूतः । स्वर्णकक्ष्यैः सुवर्णमयीकक्ष्या उदरबन्धं येषां ते तथा । तैर्गजैः । हैमैरित्यादीनि चत्वारिरथविशेषणानि । हैमैर्हेमालङ्कृतैश्चित्रा नानावर्णा ध्वजा येषां तैः ॥ ११८ ॥

सदश्वै रुक्मसन्नाहैर्भटैः पुरटवर्मभिः ।
श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चागात् सदोद्यतैः ॥ ११९ ॥

सत्यधर्मीया — सन्तो साधवोऽश्वा येषां ते तै रथैः । पुरटवर्मभिः सुवर्णकवचैः श्रेणीभिरङ्गरक्षकैर्वारमुख्याभिर्वेश्याभिः ॥ ११९ ॥

छलारी — सदश्वैरुत्तमाश्वै रुक्मसन्नाहैः स्वर्णनिर्मिताः सन्नाहाः कवचादीनि येषां तैः पुरटवर्मभिः सुवर्णकवचैर्भटैः श्रेणीभिरंगरक्षकैरुपायनोद्वहैर्भृत्यैश्च युक्त इति पूर्वेणान्वयः ॥ ११९ ॥

पारमेष्ठ्यान्युपादाय भाण्डान्युच्चावचानि च ।
पादयोर्न्यपतत् प्रेम्णा प्रक्लिन्नहृदयेक्षणः ॥ १२० ॥

सत्यधर्मीया — पारमेष्ठ्यान्यागतेऽतिथौ ब्रह्मत्वाद्यनुसन्धानेन क्रियमाणपाद्यार्घ्याद्युपयुक्ता-भ्युक्तानि भाण्डानि पात्राणि । भाण्डं पात्रामत्रेऽश्वभूषण इति विश्वः । तानि चोच्चावचान्य-नेकप्रकाराणि क्लिन्नान्यार्द्राणि हृदयं चेक्षणे च यस्य सः ॥ १२० ॥

छलारी — पारमेष्ठ्यानि राजार्हाणि छत्रचामरादीनि । उच्चावचान्यनेकविधानि पण्यानि नारिकेलादीनि फलानीत्यर्थः । पुरतो न्यस्येति शेषः । प्रेम्णा प्रक्लिन्नं हृदयम् । प्रक्लिन्ने ईक्षणे नेत्रे यस्य स तथा न्यपतदित्यन्वयः । रिक्तहस्तेन नोपेयाद्राजानं दैवतां गुरुमित्युक्तेः ॥ १२० ॥

पादुके न्यस्य पुरतः प्राञ्जलिर्बाष्पलोचनः ।
तमाश्लिष्य दृढं दोर्भ्यां स्नापयन् नेत्रजैर्जलैः ॥ १२१ ॥

सत्यधर्मीया — पादुके रामस्य पुरतः पुरोभागे न्यस्य प्राञ्जलिर्बाष्पलोचनः पादयोर्न्यप-तदित्यतीतेनान्वयः । स्नापयन् । गतम् । नेत्रजलैरानन्दबाष्पैः ॥ १२१ ॥

छलारी — ततः पादुके पुरतो न्यस्य । तस्थाविति शेषः । रामो नेत्रजैर्जलैः स्नापयन् आश्लिष्य । शुशुभ इति शेषः ॥ १२१ ॥

रामो लक्ष्मणसीताभ्यां विप्रेभ्यो योऽभवंस्ततः ।
तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः ॥ १२२ ॥

सत्यधर्मीया — लक्ष्मणसीताभ्यां सह तत्र येऽभवंस्तेभ्यो विप्रेभ्यो रामो नमश्चक्रे । प्रजाभिः स्वयं नमस्कृतः । अत्र सीतालक्ष्मणाभ्यामिति कथनीयम् । तथा गमनसमयसमयबन्धस्त्वेकमात्र-विषयकस्तदुपरि निष्क्रमणनिष्कर्षः प्राग्लक्ष्मणस्य तदुपरि सीताया इति ग्रन्थान्तरवचनसङ्ग्रहाय वा लक्ष्मणस्य सीतापेक्षया चिरसमयसमीपवर्तिताद्योतनाय वैवमुक्तिरिति ज्ञेयम् । शय्यारूपो लक्ष्मण इति तत्सिध्युत्तरं सापेक्ष्येत्यपेक्ष्य वा । यथोक्तं रामायणे । तस्मादपरितापः सन् त्वमप्यनुविधाय माम् । प्रति संहार यक्षिप्रमाभिषेचनिकीं क्रियाम् । अनुज्ञातस्तु भवता पूर्वमेवेत्यादि । अलक्ष्मण-सीताभ्यामिति छेदो वा । अलक्ष्मणं कटकमुकुटादिचिन्हधारणाभावश्च सीता च ताभ्यां सहेति वा । अनेन रामस्य विप्रभक्त्यातिशय इव निःस्पृहता च द्योत्यत इति ज्ञेयम् ॥ १२२ ॥

छलारी — ततो रामः सीतालक्ष्मणाभ्यां सह । विप्रेभ्यो वसिष्ठादिभ्यो नमश्चक्रे । तत्र ये कुलवृद्धा अभवन् तेभ्योऽपि नमश्चक्रे ॥ १२२ ॥

धुन्वन्त उत्तरासङ्गं पतिं वीक्ष्य चिरागतम् ।
उत्तराः कोसलाः माल्यैः किरन्तो ननृतुर्मुदा ॥ १२३ ॥

सत्यधर्मीया — उत्तरासङ्गमुत्तरीयं वसनं धुन्वन्त उत्क्षिपन्त उत्तराः कोसला दक्षिणोत्तरेति कोसलदेशभागविशेषौ । तत्रोत्तरकोसलदेशस्था एत इति वोत्तरा उत्तमा इति वाऽर्थः ॥ १२३ ॥

छलारी — उत्तरासंगमुत्तरीयवस्त्रं धुन्वन्तश्चालयन्त उत्तरा उत्तमाः कोसला अयोध्यापुरवासिनो माल्यैः पुष्पैः । माल्यं पुष्पे पुष्पदाम्नीत्यभिधानम् ॥ १२३ ॥

पादुके भरतोऽगृह्णाच्चामरव्यजनोत्तमे ।
विभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुतः ॥ १२४ ॥

सत्यधर्मीया — ससुग्रीवो विभीषणश्चामरव्यजनोत्तमे जगृहतुरित्यन्वयः । मरुत्सुतो हनुमान् श्वेतछत्रमगृह्णादित्यन्वेति ॥ १२४ ॥

छलारी — अयोध्याप्रवेशप्रकारमाह ॥ पादुकेति सार्धत्रिभिः ॥ १२४ ॥

धनुर्निषङ्गाञ्छत्रुघ्नः सीता तीर्थकमण्डलुम् ।
अबिभ्रदङ्गदः खड्गं हैमं चर्मर्क्षराण्नृप ॥ १२५ ॥

सत्यधर्मीया — धनुश्च निषङ्गौ च तूणीरौ तान् । हैमं हेमत्सरुं चर्म ऋक्षराट् जाम्बवान् ॥१२५॥

छलारी — धनुर्निषङ्गान् धनुश्च निषङ्गौ च तान् । ऋक्षराट् जाम्बवान् । हैमं सुवर्णालङ्कृतं चर्म ॥ १२५ ॥

पुष्पकस्थैर्वृतस्त्वेभिः स्तूयमानश्च बन्दिभिः ।
विरेजे भगवान् राजन् गृहैरिन्दुरिवोदितः ॥ १२६ ॥

सत्यधर्मीया — बन्दिभिः स्तुतिपाठकैः ॥ १२६ ॥

छलारी — पुष्पकविमानस्थैरेभिर्वृतः सेवितः ॥ १२६ ॥

भ्रातृभिर्नन्दितः सोऽपि सोत्सवां प्राविशत् पुरीम् ।
प्रविश्य राजभवनं गुरुपत्नीश्च मातरम् ॥ १२७ ॥

सत्यधर्मीया — सोत्सवामुत्सवसहितां मातरं कौसल्यां तदनन्तरं गुरुपत्नीः पितृभार्याः सुमित्राकैकेय्याद्याः प्रत्यपूजयत् ॥ १२७ ॥

छलारी — भ्रात्रा भरतेन । मातरं मातृसमूहम् ॥ १२७ ॥

गुरून् वयस्यावरजान् पूजितः प्रत्यपूजयन् ।
वैदेही लक्ष्मणश्चैव यथायोग्यं प्रणेमतुः ॥ १२८ ॥

सत्यधर्मीया — गुरून्वसिष्ठाद्यवशिष्टान् । आशुशुक्षणिरक्षणार्थमग्र्यागारनिविष्टात् । पौरामात्यपुरोहितैरिति प्रागभिहितत्वात् । तद्दर्शनोत्तरमेव तन्नमनस्य न्याय्यत्वात्प्रत्यपूजयत् । वयस्याश्चावरजाः कनिष्ठाश्च तांस्तैः स्वयं पूजितः प्रत्यपूजयत् । कटाक्षविक्षेपादिना ॥ १२८ ॥

छलारी — गुरुन्वसिष्टादीन्ववन्दे । वयस्यावरजान्स्वावरजांश्च तैः पूजितः प्रत्यपूजयत् ॥१२८॥

पुत्रांस्तन्मातरस्तावत् प्राणांस्तन्व इवोत्थिताः ।
आरोप्याङ्केऽभिषिश्चन्त्यो बाष्पौघैर्विजहुः शुचः ॥ १२९ ॥

सत्यधर्मीया — प्राणान्प्राप्य तन्वः । स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः । शरीराणि यथोत्थिता भवन्ति स्वान्पुत्रान् । रामं कौसल्या सुमित्रा लक्ष्मणं शत्रुघ्नं च कैकेयी च भरतमिति मातरः पुत्रानुत्थिता अङ्के आरोप्य बाष्पौघैरभिषिश्चन्त्यः शुचो विरहशोकाञ्जहुस्तत्यजुः । अनेन नन्दिग्रामे सतोरपि भरतशत्रुघ्नयो रामेण सहैव मातृदर्शनग्रहणसङ्कल्प इति ध्वनितम् ॥ १२९ ॥

छलारी — गतान्प्राणान्प्राप्य । तन्वस्तनवो यथोत्थिता भवन्ति तथा । शुचो विरहशोकान् ॥ १२९ ॥

जटा निर्मुच्य विधिवत् कुलवृद्धैः समं गुरुः ।
अभ्यषिश्चद् यथैवेन्द्रं चतुःसिन्धुजलादिभिः ॥ १३० ॥

सत्यधर्मीया — गुरुर्वसिष्ठो विधिवद्यथाविधानं विधिवत्पुत्रत्वात्तद्वदेव स गुरुः । अनेन न कर्मछिद्रता चूतपल्लवकुशादिग्रहः ॥ १३० ॥

छलारी — गुरुर्बृहस्पतिरिन्द्रं यथेन्द्रमिव । गुरुर्वसिष्टो राममभ्यषिश्चत् । आदिपदेन गङ्गादि-तीर्थजलं ग्राह्यम् ॥ १३० ॥

एवं कृतशिरस्नानः सुवासाः सदलंकृतः ।
स्वलंकृतैः सुवासोभिर्भ्रातृभिर्भार्यया बभौ ॥ १३१ ॥

सत्यधर्मीया — भार्यया च स्वलङ्कृतया ॥ १३१ ॥

छलारी — कृतशिरःस्नानः कृताभ्यङ्गस्नानः ॥ १३१ ॥

अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः ।
प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विताः ॥ १३२ ॥

सत्यधर्मीया — आसनं सिंहासनं प्रणिपत्य भ्रात्रा प्रसादित इति तद्ग्रहणे हेतुः ॥ १३२ ॥

छलारी — भ्रात्रा भरतेन प्रणिपत्य नमस्कृत्वा प्रसादितः प्रार्थितः आसनं सिंहासनमग्रहीत् ॥ १३२ ॥

जुगोप पितृवद् रामो मेनिरे पितरं च तम् ।
त्रेतायां वर्तमानायां कालः कृतसमोऽभवत् ॥ १३३ ॥

सत्यधर्मीया — तं रामं च पितरं तत्समं प्रजा अप्यनुमेनिरे । त्रेतायां वर्तमानायामपि कृतसमः कृतयुगसमः ॥ १३३ ॥

छलारी — गुणो धर्मः वर्तमानायाम् ॥ १३३ ॥

रामे राजनि धर्मज्ञे सर्वभूतसुखावहे ।
वनानि नद्यो गिरयो वर्षाणि द्विपसिन्धवः ॥ १३४ ॥

सत्यधर्मीया — वर्षाणि खण्डाः ॥ १३४ ॥

छलारी — रामे राजनि भूपतौ च सति । वर्षाणि नवखण्डाः ॥ १३४ ॥

सर्वे कामदुघा आसन् प्रजानां भरतर्षभ ।
नाधिव्याधिजराक्षुत्तृड्दुःखशोकभयक्लमाः ॥ १३५ ॥

सत्यधर्मीया — कामं दुहन्तीति कामन्दुघाः । दुहः कपुघश्चेति स्मरणात् । क्लमस्तन्द्री ॥१३५॥

छलारी — शोकः प्रळापः ॥ १३५ ॥

मृत्युश्चानिच्छतां नासीद् रामे राजन्यधोक्षजे ।
एकपत्निव्रतधरो राजर्षिचरितः शुचिः ॥ १३६ ॥

सत्यधर्मीया — अनिच्छतां मृत्युर्नासीत् ॥ १३६ ॥

छलारी — एकपत्नीव्रतधरः परनारीसहोदर इति यावत् । राजर्षिचरितमिव चरितं यस्य स तथा ॥ १३६ ॥

स्वधर्मं गृहमेधीयं शिक्षयन् स्वयमाचरन् ।
प्रेम्णाऽनुवृत्त्या शीलेन प्रश्रयावनता सती ।
भिया ह्रिया च भावज्ञा भर्तुः सीताऽहरन्मनः ॥ १३७ ॥

इति श्रीमद्भागवते नवमस्कन्धे अष्टमोऽध्यायः ।

सत्यधर्मीया — स्वयं नारायणोऽपि सन् । भर्तुर्भावं मनो जानातीति स तथा । अभिप्रायं वा । मनोऽहरत्स्वानुकूलं कलयामासेति यावत् ॥ १३७ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे अष्टमोऽध्यायः ।

छलारी — अनुवृत्त्या शुश्रूषया शीलेनानुकूलस्वभावेन प्रश्रयेण विनयेनावनता ॥ १३७ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे अष्टमोऽध्यायः ॥ ९-८ ॥

॥ अथ नवमोऽध्यायः ॥

श्रीशुक उवाच —

भगवानात्मनाऽऽत्मानं राम उत्तमकल्पकैः ।
सर्वदेवमयं देवमीज आचार्यवान् मखैः ॥ १ ॥

सत्यधर्मीया — आचार्यवान्वसिष्ठविशिष्ट उत्तमकल्पकैर्मुख्यकल्पजल्पितदक्षिणादियुक्तैः । देवो न वासुदेवात्स्वामिनोऽन्य इत्याह ॥ आत्मानमिति ॥ १ ॥

छलारी — आत्मना मनसाऽऽत्मानं स्वस्वरूपं परमात्मानम् । ध्यायन्निति शेषः । उत्तमकल्पकैर्बहुदक्षिणोपेतैः सर्वदेवप्रधानम् । आचार्यवानित्यनेन शिक्षितत्वं गुरुकुलवासित्वं च सूचयति । आचार्यवान्पुरुषो वेदेति श्रुतेः ॥ १ ॥

होत्रेऽददाद् दिशं प्राचीं ब्रह्मणो दक्षिणां विभुः ।
अध्वर्यवे प्रतीचीं च उदीचीं सामगाय सः ॥ २ ॥

सत्यधर्मीया — कल्पकानल्पतां जल्पति ॥ होत्र इत्यादिना । दद दाने । अददाद्दत्तवान् ॥ २ ॥

छलारी — प्राचीं दिशं तत्र विद्यमानां भूमिम् ॥ २ ॥

आचार्याय ददौ शेषा यावती भूस्तदन्तरा ।
मन्यमान इदं कृत्स्नं ब्राह्मणोऽर्हति निःस्पृहः ॥ ३ ॥

सत्यधर्मीया — तदन्तरा तासां दिशां मध्ये यावती भूः, शेषा चतुर्भ्यो दत्तावशिष्टा तामाचार्याय ददौ । निःस्पृहो ब्राह्मणः स्वयमनाकाङ्क्षन् इदं कृत्स्नं दिगादिकमर्हति ॥ ३ ॥

छलारी — तदन्तरा तासां दिशां मध्ये । कोणेष्विति यावत् । इदं कृत्स्नम् । प्रतिगृहीतुमिति शेषः । निस्पृहो यदृच्छालाभसन्तुष्ट इत्यर्थः ॥ ३ ॥

इत्यदात् स्वमलङ्कारं वासोभ्यामवशेषितः ।
तथा राज्ञ्यपि वैदेही सौमङ्गल्यावशेषिता ॥ ४ ॥

सत्यधर्मीया — इति मन्यमानः स्वमलङ्कारमदात् । वासोभ्यां परिधानोत्तरीयाभ्यामवशेषितः शिष्टः । राज्ञी राजमहिषी वैदेही सीता च सौमङ्गल्यं गलमङ्गलसूत्रमवशेषितं यस्याः सा ॥ ४ ॥

छलारी — सीताऽपि स्वमलङ्कारं स्त्रीभ्यः । अददादित्यनुषङ्गः । कथम्भूता । सौमाङ्गल्यं मङ्गलसूत्रमेवावशेषितं यस्याः सा तथा ॥ ४ ॥

ते तु ब्राह्मणदेवस्य वात्सल्यं वीक्ष्य सज्जनाः ।
प्रीताः क्लिन्नधियस्तस्मै प्रत्यर्प्येदं बभाषिरे ॥ ५ ॥

सत्यधर्मीया — ब्राह्मणा देवाः पूज्या यस्य स तस्य वात्सल्यं वीक्ष्य सज्जना होत्राद्याः प्रीताः क्लिन्नधियस्तस्मै रामाय प्रत्यर्प्य समर्प्येदं बभाषिरे ॥ ५ ॥

छलारी — ब्राह्मणा देवाः पूज्या यस्य भक्त्या क्लिन्नधियो द्रवचित्ताः ॥ ५ ॥

ब्राह्मणाः ऊचुः —

अप्रत्तं नस्त्वया किन्नु भगवन् भुवनेश्वर ।
यतोऽन्तर्हृदि संविश्य तमो हंसि स्वरोचिषा ॥ ६ ॥

सत्यधर्मीया — नोऽस्मभ्यं त्वयाऽप्रत्तमदत्तं किन्नु सर्वमपि दत्तमेव । एतदपेक्षया दुर्लभं भगवंस्त्वयाऽदायि कियदिदमिति विज्ञापयन्ति ॥ यत इति । हृदि संविश्यान्तस्तमोऽज्ञानं स्वरोचिषा त्वद्दत्तज्ञानेन हंसि । अत्र नश्वरताधियं रासीति यावत् । त्वं तु भूपालो वयं तु त्वत्पाल्या नानयाऽवन्या कृत्यमस्माकमिति तस्मै प्रत्यार्पयन्निति भावः ॥ ६ ॥

छलारी — स्वरोचिषा स्वविषयकज्ञानं दत्वेत्यर्थः । तमो हंस्यज्ञाननिवृत्तिद्वारा मोक्षं प्रदासीत्यर्थः । तव सर्वपुरुषार्थोत्तममोक्षप्रदातृत्त्वात्त्वया सर्वाभीष्टमपि दत्तमेवेति भावः ॥ ६ ॥

नमो ब्रह्मण्यदेवाय रामायाकुण्ठमेधसे ।
उत्तमश्लोकधुर्याय न्यस्ततन्वेऽर्पिताङ्घ्रये ॥ ७ ॥

सत्यधर्मीया — प्रत्युपकारस्त्वयमोङ्कार्य इति वदन्ति ॥ नम इति । उत्तमश्लोकधुर्याय महायशस्विश्रेष्ठाय न्यस्ततन्वे न्यस्ता अस्मिन्नर्पिता तनूर्येन । तदुपलक्षितदारागारादयस्तस्मै । अर्पितौ समर्पितौ दत्ताविति यावत् । अङ्घ्री ज्ञानानन्दौ पादौ येन तस्मै ॥ ७ ॥

छलारी — ब्रह्मण्यश्चासौ देवश्चाकुण्ठमेधसेऽप्रतिहतज्ञानाय । उत्तमश्लोकानां ब्रह्मादीनां धुरं भारं वहतीति तथा न्यस्तदण्डैर्मुनिभिरर्पितचित्ते(?) न्यस्तावङ्घ्री यस्य तेष्वर्पितावङ्घ्री येनेति वा ॥ ७ ॥

श्रीशुक उवाच —

कदाचिल्लोकजिज्ञासुर्गूढा रात्र्यामलक्षितः ।
चरन् वचोऽशृणोद् रामो भार्यामुद्दिश्य कस्यचित् ॥ ८ ॥

सत्यधर्मीया — लोकजिज्ञासुर्लोकं जिज्ञासुः । न लोकेति न षष्ठी । रात्र्यां गूढोऽलक्षितः कैरपि, कस्यचित्पुंसो, भार्यां स्वजायामुद्दिश्योक्तं वचश्चरन्रामोऽशृणोत् ॥ ८ ॥

छलारी — लोकवृत्तान्तं जिज्ञासुः कस्यचित्पुंसो वचः ॥ ८ ॥

नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगाम् ।
स्त्रैणो हि बिभृयात् सीतां रामो नाहं भजे पुनः ॥ ९ ॥

सत्यधर्मीया — तं प्रकारमाकारयन्नाह ॥ नेति । अहं त्वां दुष्टां न बिभर्मि न पोषयामि । किं दौष्ट्यं दृष्टं त्वया मयीत्यत आह ॥ परवेश्मगामसतीमिति । रामः परवेश्मगां सीतां हि यतः स्त्रैणोऽतो बिभृयात् अहं न तथा स्त्रैण इति पुनस्त्वां न भजे । त्याग एव नैर्भर्यं न भोग इति पुनः पुनरित्यन्तोक्तिः ॥ ९ ॥

छलारी — परवेश्मगां स्वैरिणीम् ॥ ९ ॥

इति लोकाद् बहुमुखाद् दुराराध्यादसंविदः ।
श्रुत्वा भीतेन सा त्यक्ता प्राप्ता प्राचेतसाश्रमम् ॥ १० ॥

सत्यधर्मीया — लोकाद्बहुमुखाद्बहूनि मुखानि प्रधानानि यस्य स तस्मात् । संविद्रहितादित्य-संविदः सीतामातृवद्रक्षोरक्षितेति प्रेक्षाशून्यात् । दुराराध्यात् सबहुवासानर्हात् । यथोक्तं रामायणे ।

जयोऽथ मधुमत्तश्च काश्यपो मङ्गलः कुलः ।
सुराजः कालियो भद्रो दन्तवक्रः सुमागध इत्यादि ।

श्रुत्वा तदपवादतो भीतेन त्यक्ता सा सीता प्रचेतसो वरुणस्य पुत्रो वाल्मीकिस्तस्य आश्रमं प्राप्ता । उखादागतात्सिद्धार्थादेर्बहु अपवादं श्रुत्वेति वा । उखउखीत्यादिस्मरणात् ॥ १० ॥

छलारी — मुखशब्देन तत्कार्यं भाषणं ग्राह्यम् । तथा च बहुमुखादित्यस्य बहुभाषणादित्यर्थः । दुराराध्याद्दुष्टानां श्लाघ्यान्न विद्यते संविद्यस्य स तथा । अज्ञाल्लोकाल्लोकापवादभीतेन रामेण त्यक्ता सीता । प्रचेतसो वरुणस्यापत्यं वाल्मीकिस्तस्याश्रमं प्राप्ता ॥ १० ॥

अन्तर्वत्न्यागते काले यमौ सा सुषुवे सुतौ ।
कुशो लव इति ख्यातौ तयोश्चक्रे क्रिया मुनिः ॥ ११ ॥

सत्यधर्मीया — काले आगते दशमे मासीत्युक्तकालेऽन्तर्वत्नी । अन्तर्वत्पतिवतोर्नुगिति नुक् । यमौ यमलौ, कुशो लव इति, कुश इति लव इति ख्यातौ तयोर्मुनिः क्रिया नामकरणादीनि चक्रे ॥११॥

छलारी — अन्तर्वत्नी गर्भिणी । यमौ यमलौ । क्रियाः क्षत्रयोग्या जातकर्मादिक्रियाः । मुनिर्वाल्मीकिः ॥ ११ ॥

अङ्गदश्चक्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ ।
तक्षः पुष्कल इत्यास्तां भरतस्य महीपते ॥ १२ ॥

सत्यधर्मीया — अङ्गदश्चक्रकेतुश्चेति लक्ष्मणस्यात्मजौ तक्षः पुष्कल इति भरतस्य सुतावास्तामित्यन्वयः ॥ १२ ॥

छलारी — भरतस्यात्मजावास्ताम् ॥ १२ ॥

सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः ।
गन्धर्वान् कोटिशो जघ्ने भरतो विजये दिशाम् ।
तदीयं धनमानीय सर्वं राज्ञे न्यवेदयत् ॥ १३ ॥

सत्यधर्मीया — शत्रुघ्नस्य सकाशाद्बभूवतुरुत्पन्नौ । कोटिशस्त्रिकोटिसङ्ख्याकान् कोटित्रयं स निजघान तथाऽसुराणां गन्धर्वजन्मेत्याचार्योक्तेस्ते चासुरा इति ज्ञेयम् । तदीयं गन्धर्वसम्बन्धि राज्ञे रामाय ॥ १३ ॥

छलारी — शत्रुघ्नस्यात्मजौ । राज्ञे रामभूपाय । कोटिशः कोटिसङ्ख्याकान् गन्धर्वान् गन्धर्वजन्मनोऽसुरान् ॥ तदुक्तम् ॥ कोटित्रयं स निजघान तथाऽसुराणां गन्धर्वजन्म भरतेन सतां च धर्ममिति ॥ १३ ॥

शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् ।
हत्वा मधुवनं चक्रे मधुरां नाम वै पुरीम् ॥ १४ ॥

सत्यधर्मीया —— मधुवनं मधुरां पुरीं चक्रे ॥ १४ ॥

छलारी —— मधुरां तन्नामपुरीं च ॥ १४ ॥

मुनौ निक्षिप्य तनयौ सीता भर्त्रा विवासिता ।
ध्यायन्ती रामचरणौ विवरं प्रविवेश ह ॥ १५ ॥

सत्यधर्मीया —— विवरं भूविवरं लोकदृष्ट्या ॥ १५ ॥

छलारी —— मुनौ वाल्मीकिमुनौ । भर्त्रा रामेण विवसिता प्रवासिता । त्यक्तेति यावत् । विवरं भूबिलम् ॥ १५ ॥

तच्छ्रुत्वा भगवान् रामो रुन्धन्नपि धिया शुचः ।
स्मरंस्तस्या गुणांस्तांस्तान् नाशक्नोद् रोद्धुमीश्वरः ॥ १६ ॥

तात्पर्यम् – **'नित्यपूर्णसुखज्ञप्तिस्वरूपोऽसौ यतो विभुः ।**
अतोऽस्य राम इत्याख्या तस्य दुःखं कुतोऽण्वपि ।
तथाऽपि लोकशिक्षार्थमदुःखो दुःखवर्तिवत् ।
अन्तर्हितां लोकदृष्ट्या सीतामासीत्स्मरन्निव ।
ज्ञापनार्थं पुनर्नित्यसम्बन्धं स्वात्मनः श्रिया ।
अयोध्याया विनिर्गच्छन्सर्वलोकस्य चेश्वरः ।
प्रत्यक्षं तु श्रिया सार्धं जगामानादिरव्ययः' ॥ १६ ॥

सत्यधर्मीया —— ननु न रामो नरः किन्तु नारायणस्तस्य शोकः कथं कथं च तन्निरोधोपरोधश्च रुन्धन्नपि धिया शुचो, नाशक्नोदित्युच्यत इत्यतः प्रमाणेन तदभिप्रायं प्राहुः ॥ नित्येति । रमेर्डः अन्तरावर्तिन आङो योग्यतया रे आनन्दे माङ्माने मे ज्ञाने चान्वय इति दर्शयितुं पूर्णेति । सुखज्ञाप्तिविशेषणमिति मन्तव्यम् । यतोऽसौ विभुरत एतस्माद्राम इत्याख्या नाम तस्य तत्प्रवृत्तिनिमित्तकरामनामकस्याण्वपि दुःखं कुतो न कुतोऽपि कारणाद्भवेत् । ननु पूर्णसुखज्ञप्त्योर्निमित्ततयोक्तेस्तदनुरोधेन तस्य दुःखं कुतोऽमतिरितीरयितव्यमिति चेत् । सत्यम् । मूले दुःखस्यैवात्युत्कटमुट्टङ्कना तन्मात्रोक्तौ प्रकृतनिर्वाह इत्यवचनौचित्यात् । किन्न हर्षोत्कर्षो लपने किञ्चालपने वोद्यमस्तव दृश्यते । दृश्यते च न समाधिरनेन तव जात इति । अद्धेति चेत् । तर्हि क्षमणीयं त्वया दुःखपदावर्तनमात्रम् । ॐ, दुःखं तु प्रसिद्धमेकम् । पुनर्दुरशोभनं

दुरशोभनदुष्टयोरित्यभिधानादशोभनं खं संवेदनमज्ञानमिति यावत् । तदपि केति । इतो विकासय मुखम् । खं पुरे संवेदन इति विश्वः । तर्ह्येवं नटनं कुत आटीकत ईश्वर इति तत्राह ॥ तथाऽपीति । अदुःखोऽपदुःखवर्ती दुःखवर्तिवल्लोकदृष्टयाऽन्तर्हितां न तु स्वदृष्टया सीतां स्मरन्निवासीत् । स्वात्मनः स्वस्य स्वदेहस्य वा श्रिया नित्यसम्बन्ध इति ज्ञापनार्थम् । अयोध्याया नगर्या विनिर्गच्छन्नीश्वरः सर्वलोकस्य पामरजनस्य प्रत्यक्षम् । तुनाऽमरादयो व्यावर्तिताः । ते जानन्तीति तात्पर्यम् । अनादिर्न विद्यत आदिरुत्पत्तिर्यस्य सः । अव्ययो न विद्यते व्ययो नाशो यस्य स तथा ॥ अथ मूलार्थप्रथनम् ॥ तत्तद्विवरप्रवेशनम् । शुचः शोकान् रुन्धन्नपि तन्निरोधं कुर्वन्नपि । तांस्तानिति पदमेकम् । तस्याः सीतायास्तांस्तान् गुणान्स्मरन् रोद्धुं नाशक्नोदिति धिया मन्दमत्या निमित्तेन न तु वास्तविकं तत्र हेतुरीश्वर इति धिया रुन्धन्नपि ईश्वर इति नाशक्नोत्तदिवेति वा ॥ १६ ॥

छलारी — ततो रामः किं कृतवानित्यत आह ॥ तच्छ्रुत्वेति । सर्वेश्वरो भगवान् रामः । तत्सीताभूविवरं प्रविवेशेत्येतच्छ्रुत्वाऽदुःखोऽपि भार्यायामत्यन्तासक्तिर्न कार्येति लोकशिक्षार्थमसुरजनमोहनार्थं च धिया मनसा शुचः शोकान् रुन्धन्निरोधं कुर्वन्नपि सीतायास्तांस्तान्पातिव्रत्यादिसीतागुणान्स्मरन्निव दृश्यमानः शुचः शोकान्निरोद्धुं नाशक्नोदिति दर्शयामास । यदि रामस्याल्पदुःखमपि स्यात्तर्हि तस्य भगवत्त्वं न स्यात् । रामत्वं न स्यात् । सर्वेश्वरत्वं न स्यादिति बाधकतर्कत्रयप्रदर्शनार्थं भगवतानित्यादिविशेषणत्रयं प्रायुयोजि । नित्यसुखपूर्णज्ञप्तिस्वरूपोऽसौ यतो विभुरतोऽस्य राम इत्याख्या तस्य दुःखं कुतोऽण्वपीत्यादाविति ॥ १६ ॥

स्त्रीपुम्प्रसङ्ग एतादृक् सर्वत्र त्रासमावहः ।
अपीश्वराणां किमुत ग्राम्यस्य गृहमेधिनः ॥ १७ ॥

सत्यधर्मीया — स्त्रीपुंप्रसङ्ग पुंसां प्रसङ्गः प्रकृष्टः सम्बन्धः । स्त्रीभिः पुंसां प्रसङ्गः स्त्रीपुंप्रसङ्गः । अतो नाचतुरनिपाताभावाचतुरतेति ज्ञेयम् । सर्वत्रात्रोत्तरत्र च । त्रासं भयमावहः प्रापयिता । ईश्वराणां समर्थानां रुद्रादीनामपि ग्राम्यस्य सुरतस्याश्लीलस्य वा । ग्राम्यो जनेऽन्यवद्ग्राम्यमश्लीले रतबन्धयोरिति विश्वः । गृहमेधिनो गृहस्थस्य किमुत किमु वाच्यो भयावह इत्यर्थः । त्रासमावह इत्यलुगार्ष इति केचित् । सर्वत्रापि भयावाह इत्यभयावहः पाठः । त्रासस्य मा ज्ञानं तदावह इति वा ॥ १७ ॥

छलारी — स्त्रीपुरुषयोरत्यन्तासक्तिर्महतामप्युक्तरीत्या क्लेशकरा किमन्येषामतस्तत्रात्यन्तासक्तिर्न कार्येत्याशयेनाह ॥ स्त्रीपुंप्रसङ्ग इति । स्त्रीपुंसोः प्रसङ्गः अत्यन्तासक्तिः सर्वत्रैव । इह लोके

यक्ष्मादिभयावहः परलोके नरकादिभयावहः । किमुत ग्राम्यस्य कर्मरतस्य गृहमेधिनो गृहस्थस्येत्यर्थः ॥ १७ ॥

तत ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत् प्रभुः ।
त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितम् ॥ १८ ॥

तात्पर्यम् – नक्षत्रमासगणितं त्रयोदशसहस्रकम् ।
ब्रह्मलोकसमं चक्रे समस्तं क्षितिमण्डलम् ॥
रामो रामो राम इति सर्वेषामभवत्तदा ।
सर्वो राममयो लोको यदा रामस्त्वपालयत् ॥ इति स्कान्दे ।

सत्यधर्मीया — तत ऊर्ध्वमिति पद्ये त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितमिति, द्वादशाब्दसहस्रं तु रामो राज्यं चकार हेति विष्णुपुराणे । तथा पाद्मे च । दशवर्षसहस्राणि दशवर्षशतानि चेत्येकत्रापरत्र च । एवं प्रशासतस्तस्य राघवस्य महेश्वरि । अत्ययाद्दशसाहस्रं रममाणस्य सीतयेत्युक्तेः । परस्परं च रामायणे च बहुवर्षसहस्राणीत्युक्तेश्च विरोध इत्यतः प्रमाणेन तत्प्रमाणं वदन्परिहरति ॥ नक्षत्रेति । त्रयोदशाब्दसाहस्रसङ्ख्या तु नक्षत्रमासगणनेन मासस्य सप्तविंशतिदिनानि वा षड्विंशतिदिनानि वेति तैः । तथा पौर्णमीगणनेन मासानां तदात्मसंवत्सरैरेकादशसहस्राणीति, सङ्क्रमगणितसौरमानेन दशसाहस्रीति विवेकः । अथवा पद्मपुराणे दशसहस्रमिति पदस्य दश च संवत्सराश्च साहस्रं स्वार्थेऽण् । जात्येकवचनं च । भो पार्श्ववर्तिन् किमिति जघन्यं पक्षमाश्रितवन्तः प्रेक्षावन्तः कुतोऽणं समूहार्थे नाभ्युपगतवन्तः । समूहश्च यथा मानमानन्देनोररीकर्तुमुचितमिति चेत् । अरे कर्णाभ्यर्णमागच्छ जपामि । चित्तं स्थापय तदपवादके चित्तीत्यत्र समाधिस्तव भवतीति शतमानं भवतु भवतः शतमानेत्यनेन वाऽण् भवत्विति चेत् । क्रीतार्थे स विहितस्तेनेति साधुभिः साधूक्तमिति मतिमन् जोषमास्व । यद्वा सहस्रं परिमाणमस्येति साहस्रः सङ्घः । तदस्य परिमाणमित्यर्थे शतमानविंशतिकसहस्रवसनादणित्यणो विधानादिति सुधावाक्यार्थचन्द्रिकायाम् ।

ननु सहस्रशब्दात्तदस्य परिमाणमित्यर्थे प्राग्वतेष्ठञिति ठञि साहस्रिकमिति भाव्यम् । सङ्ख्याया अतिशदन्तायाः कन्निति तस्मिन्नेवार्थे कनष्ठञ्बाधकत्वात्तत्प्रसङ्गेन वर्षसहस्रकमिति भवितव्यं वर्षसाहस्रमिति तु कथमित्यतः शतमानेति तदस्य परिमाणमित्यर्थे प्राप्तठञ्कनोरपवादेनाणाविधानात्तस्मिन्सति वर्षसाहस्रमित्यस्योपपत्तेरित्याशयेनाह ॥ तदस्येति ॥ परिमाणमित्यर्थ इति ।

उपावित्यर्थः ॥ अणित्यणिति । अणित्यतोऽनुवर्तमानस्याण इत्यर्थः ॥ विधानादिति । सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेष्विति सूत्रेण सङ्घेऽर्थे विधानादित्यर्थः । तथा च सहस्ररूपपरिमाणोपाधिके सङ्घरूपेऽर्थे सङ्ख्यावाचिनः सहस्रशब्दादुक्तसूत्रादणप्रत्यये णित्वादादिवृद्धौ यस्येति चेत्यकारलोपे साहस्रमिति भवतीत्युक्तेस्तथाऽत्र ज्ञेयम् । सहस्रमपि साहस्रमिति द्विरूपकोशात्साहस्रमिति सहस्रपर्यायमिति वा ज्ञेयम् । मानान्तरोक्तत्रीणि सहस्राणि चेत्यर्थकतयैककण्ठ्यसम्भवात् । समस्तं क्षितिमण्डलं ब्रह्मलोकसमं चक्रे । सर्वेषां मुखे राम राम इति शब्दोऽभवदिति शेषः । यदा रामो राज्यमपालयत्तदा सर्वो लोको राममयो रामप्रधानकोऽभवदित्यप्यन्वयः ॥ ततश्चायं श्लोकार्थः ॥ ततो वैदेहीमहीविवरप्रवेशादूर्ध्वमनन्तरम् । लोकदृष्टयोर्ध्वरेतस्त्वं धारयंस्तस्मादपत्नीकोऽप्यग्निहोत्रमाहरेदिति ब्राह्मणोक्तेः । काञ्चनीं सीतामित्यादिना रामायणाद्युक्तेश्चानध्वविधुरताविधुराणामिति मधुसूदनोऽन्व-शिक्षयदिति ज्ञेयम् । सहस्रमेव साहस्रं त्रयोदशानामब्दानां साहस्रमखण्डितमग्निहोत्रमजुहोत् । मैथिलीप्रवेशानन्तरमनन्तः कियन्तं कालमवात्सीदयोध्यायां तया सहेति, 'भूमिप्रवेशादूर्ध्वं सा रेमे सप्तशतं समा रामस्य दृश्या त्वन्येषामदृश्या जनकात्मजेत्यादिवचसा ज्ञेयम् । यदि ब्रह्मचर्यमदी-धरदिदानीमेवेति प्रागपि स तादृश इत्यखण्डितता तस्याश्रयणीया हन्त तर्हि ब्रह्मचर्यमेव तद्यद्रात्रौ रत्या संयुज्यन्त इति षट्प्रश्नोपनिषदुक्तेरेवमोङ्कारेऽपि तदखण्डितता ज्ञेया । किञ्च सर्वे सुपर्वाणोऽपि चातुर्वर्ण्यभाजः का कथा काकुत्स्थस्य ब्रह्मचारित्वे ॥ १८ ॥

छलारी — रामः सीतया सह कियन्तं कालमखण्डितमग्निहोत्रं चकारेत्यत आह ॥ तत ऊर्ध्वमिति ॥ प्रभू रामः । देव्या सहेति शेषः । नक्षत्रमानेन त्रयोदशाब्दसहस्रं राज्यम् । कुर्वन्निति शेषः । अखण्डितमग्निहोत्रमजुहोत् ॥ तदुक्तमेतत्तात्पर्ये ॥ ''नक्षत्रमासगणितं त्रयोदशसहस्रकम् । ब्रह्मलोकसमं चक्रे समस्तं क्षितिमण्डलमि''ति । अतो द्वादशसाहस्रं रामो राज्यं चकारेति विष्णुपुराणविरोधो नास्ति । तस्य सौरमासाभिप्रायेण प्रवृत्तत्वादिति द्रष्टव्यम् । कथम्भूतः । तत ऊर्ध्वं सीताया भूमिप्रवेशानन्तरम् । सप्तशतवर्षाण्यज्ञानिनां ब्रह्मचर्यमूर्ध्वरेतस्त्वरूपं व्रतं धारयन्निव दृश्यमानः । तदुक्तम् ॥ ''भूमिप्रदेशादूर्ध्वं सा रेमे सप्तशतं समा'' इति । रामेण दृश्या त्वन्येषामदृश्या जनकात्मजेति च ॥ १८ ॥

स्मरतां हृदि विन्यस्य बुद्धं पद्ममिवांशुकैः ।
स्वपादपल्लवं राम आत्मज्योतिरगात् ततः ॥ १९ ॥

सत्यधर्मीया — अंशुकैरेकदेवोदिततत्किरणैर्दिवाकरैश्चोद्बुद्धं प्रफुल्लं पद्ममिवेत्यभूतोपमा, माहात्म्यातिमहत्त्वलाभात् । को ब्रह्मात्माऽनिलार्केषु । अंशुर्लेशे रवौ रश्माविति विश्वौ । तथा स्मरतां

भक्तानां स्वपादपल्लवं हृदि विन्यस्यात्मज्योतिः स्वप्रकाशः । ततो विधातृप्रार्थनानन्तरं ततोऽयोध्याया अगात् । आत्मज्योतिः स्वस्वरूपमगात् प्रविष्टोऽभूदिति यावत् । यद्वा स्मरणमपि न यादृक् तादृक् च स्याच्चरणपल्लवस्थापने किन्तु तदेवरूपमिति निरूपयति ॥ स्मरतामिति । हृदि मनसि स्मरतां रुद्रतां विन्यस्य तदभिमानमिदमिति स्वयमनुसन्धाय स्मरतां स्थिरस्मृत्यभिमतिमदिति च चिन्तने चञ्चलं स्मरणं भवति तादृशस्मृतिमता । यथोक्तं छान्दोग्योपनिषत्तद्भाष्ययोः । स्मरो वाव आकाशाद्भूयान् । तस्याश्च वै सदाशिवः स्थिरस्मृत्यभिमानी स सममेव रतेः स्मर इति चिन्तयतामित्यर्थः । स्मरतां विधिविधित आगत आकारयितुं स्मरतां सदाशिवतां हृदि विन्यस्य निक्षिप्य तदालापलालनायात्मज्योतिरगादित्यावृत्त्याऽन्वये कथाविशेषो ज्ञापितो भवतीति वा । एकान्ते तु यदा रामश्चक्रे रुद्रेण संविदमित्यादेः । चिन्तयतामित्यादिकमनिबन्धानो निबन्धानः स्मरतामिति मतिमद्भिरेवमपि योजना कार्येति व्यासोऽनुजज्ञ इति ज्ञेयम् । आत्मज्योतिरात्मनो ज्योतिर्ज्ञानं येन तदिति । पल्लवोऽस्त्रीत्यमरः ॥ १९ ॥

छलारी — रामः स्मरतां भक्तिपूर्वकं स्मरणं कुर्वतां सतां हृदि स्वपादपल्लवं विन्यस्य तेषां सर्वदा स्वपादपल्लवध्यानं दत्वेत्यर्थः । आत्मा ज्योतिः प्रकाशं निजं धाम वैकुण्ठाख्यमगात् । रामस्य परंधामगमनानन्तरं सर्वे ध्यानासक्ता बभुवुरिति भावः । कथम्भूतं स्वपादपल्लवम् । अंशुकैः किरणैः । सूर्यस्येति शेषः । बुद्धिविकसितं पद्ममिव शोभमानम् ॥ १९ ॥

नेदं यशो रघुपतेरिह विश्वमूर्ते-
र्लीलातनोरधिकशान्तविमुक्तधाम्नः ।
रक्षोवधो जलधिबन्धनमस्त्रपाणेः
किं तस्य शत्रुहनने कपयः सहायाः ॥ २० ॥

सत्यधर्मीया — स्वोपरि करुणां कुर्वन् रघुपतिर्लालयित्वालापमाप स्वसद्मेति सर्वदा रामनामस्मरणरतस्मरहरहरवपुरिति च शुकः । परवशाः काकुत्स्थकुलाद्वन्द्वं श्लोकद्वन्द्वेन शरणप्रार्थनपूर्वकमुपश्लोकयति ॥ नेदमिति । इह जगति रघुपते रामस्यारघवोऽलघवो महान्तश्चतुर्मुखमुखास्तेषां पतिस्तस्येति वा । इदं वक्ष्यमाणं यश इदमित्यावर्तते । इ विस्मये निपातः । इ ददातीति तत् । आश्चर्यावहं न भवति । कुत इत्यत आह ॥ विश्वमूर्तेरिति । व्याप्ततनोस्तर्हि देहमिमं कुतो दध्र इत्यत आह ॥ लीलातनोरिति । किञ्चिद्वर्तेत प्रयोजनं देहेहायामित्यत आह ॥ अधिकशान्तविमुक्तधाम्न इति । अधिकं शान्तं सुखपूर्णं विमुक्तं विनाऽन्याधीननित्यमुक्तां वारयति रमामिति ज्ञेयम् । स्वातन्त्र्येण नित्यमुक्तं धाम स्वरूपं यस्य स तस्य । न कोपोऽपि तस्येत्याह ॥ अधिकेति । अधिकं शान्तः

समाधानी स इति विमुक्तं त्यक्तं धाम गृहमयोध्यादिकं येन तस्येति वा । अनेन समुद्रोपरि प्रदर्शिता कोपमुद्रा नटनमात्रमिति सूचयति । किं तद्यश इत्यतः शंसति ॥ रक्षोवध इति । जलधिबन्धनमस्त्रपाणेः । 'अस्त्रे प्रहरणे चाप इति विश्वः । धनुष्पाणेस्तस्य रामस्य शत्रुहनने रावणादिमारणे च कपयः सहायाः पक्षभूताः किं नेत्यर्थः ॥ २० ॥

छलारी — सदा रामनामामृतपानतृप्तः शुकाचार्यो रामकथाकथनेन संजातभक्त्युद्रेकः पुनरिदानीं संक्षेपेण तत्कथाप्रशंसां कुर्वन् शरणं प्रार्थयते ॥ नेदं यश इति द्वाभ्याम् । अस्त्रपाणेर्धनुष्पाणेः । अस्त्रं प्रहरणं चापमित्यभिधानम् । रघुपतेर्जलधिबन्धनं रक्षसां वध इतीदृशं यशः कविभिर्बहुधा वर्णितमप्यद्भुतं न भवति । तत्रहेतुः । विश्वस्मिन्प्रपंचे मूर्तिर्यस्येति । तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः । सृष्ट्यादिकर्तुरित्यर्थः । विश्वं मूर्तौ यस्येति वा । स्वोदरस्थाशेषप्रपञ्च इत्यर्थः । तस्य लीलार्था तनुर्यस्य तस्य । सर्वस्मादधिकं शान्तमानन्दपूर्णं नित्यमुक्तं धाम स्वरूपं यस्य तस्य रघुपतेः कपयः शत्रुहनने सहाया बलभूताः किं नेत्यर्थः ॥ २० ॥

यस्यामलं नृपसदस्सु यशोऽधुनाऽपि
गायन्त्यघघ्नमृषयो दिगिभेन्द्रपाते ।
तन्नाकपालवसुपालकिरीटजुष्टं
पादाम्बुजं रघुपतेः शरणं प्रपद्ये ॥ २१ ॥

सत्यधर्मीया — यस्यामलं निर्दुष्टं मुमुक्षुयोग्यं न केवलं स्वयममलं किन्तु कीर्तयदघघ्नं यशो दिग्व्याप्तां कीर्तिं, दिक्षु यानाद्यशः प्रोक्तमिति छान्दोग्यभाष्योक्तेः । नृपसदस्सु इनसभासु गायन्ति । ऋषयो ज्ञानिनः । दिगिभेन्द्रपाते दिगिभा ऐरावतादि सुप्रतीकान्तास्तेषां पातो यत्रेतरकार्यकारित्वेन धराधारणकारणमवस्थानं तन्त्रम् । सर्वत्रेति यावत् । यशःपदार्थलभ्यार्थविवरणमिदमिति ज्ञेयम् । नाकपाल इन्द्रो वसुपालः कुबेर एतत्किरीटजुष्टपादे आ स्वसीम्नि । आङ्सीमायामिति विश्वः । सा सीमा सामीप्यम् । अम्बुजा च कमला च अम्बुजश्च ब्रह्मा चाम्बुजौ । अब्‍भ्यः सम्भूतो हिरण्यगर्भ इत्यष्टाविति श्रुतेः । अनेन न रमातामरससम्भवाग्रहन्यौन्यमिति ज्ञेयम् । न च त्रिलोचनमोचनं कुत इति वाच्यम् । साक्षात्स्वस्यैव त्र्यक्षत्वात्तत्त्यागसम्भवात् । द्वयोरेतयोः पुरस्कृतिस्त्विन्द्रजिद्वधेन महानुपकारो रामेण कारित इति स्वस्य मुक्तावुपागच्छच्छरीरशेषात्मकलक्ष्मणेन कृत इति लङ्कापहारे खिद्यत्कुबेरमनस्समाधिर्जातस्तथा पुष्पकवांश्च जातश्चेति मित्रममित्रमिति नीत्येति ज्ञेया । अकपालो नेति नाकपालः कपाली फाललोचनश्च वसुपालस्तत्सख इति च कुबेरग्रह इति वेन्द्र इत्यनुदाहरन्नुदाहरंश्च नाकपालेति योजनामेतामनुमेने ग्रन्थकृदिति ज्ञेयम् । दिगिभेन्द्रपाते

आकस्मिकमेतदाद्यापदि प्राप्तायामप्यधुना गायतीति वा । एतदादिकिरीटजुष्टं च तत्पादाम्बुजं शरणं प्रपद्य इति तु सर्वजनीनाऽपि योजना ज्ञेया । जुष्टमिति पृथक् पदपाठेऽपि नास्मत्कृतार्थतासाम्भावित्यमिति कृतार्था वयम् । आ अम्बुजौ यत्र स आम्बुजः पादश्चासावम्बुजश्च तं शरणं प्रपद्य इति । तज्जुष्टश्चासौ पादश्चासावम्बुजश्च तम् । विशेषणपरनिपातः कामचारित्वात्तद्भावस्याभ्यर्हितेति । आ अम्बुजा चाम्बुजश्चेति विग्रहं कुर्वतां नः पुमांस्त्रियेत्येकशेषं भणन्पाणिनिः पाणिं जग्राहेति ज्ञेयम् ।। २१ ।।

छलारी — दिगिभेन्द्राणां दिग्गजेन्द्राणां दिग्गजेन्द्रसदृशरावणकुम्भकर्णादीनां पाते सति । श्रीरामेण रावणादिराक्षससंहारानन्तरमिति यावत् । नृपाणां युधिष्ठिरादीनां सदःसु ऋषयो मार्कण्डेयादयो यस्य गायन्ति । तदित्यव्ययम् । तस्य रघुपतेः पादाम्बुजं शरणं प्रपद्य इत्यन्वयः । यद्वा । न केवलं नृपसभासु गायन्त्यपि दिगिभेन्द्रपाते दिग्गजानां पातः संचारो यस्मिन्देशे स तथा तस्मिन् । लोकालोकप्रदेशेऽपीत्यनेन सर्वत्रेत्याह । कथम्भूताः । नाकपाला इन्द्रादयो देवा वसुपाला वसुधापालाः । यद्वा । वसुपालाः कुबेरादयस्तेषां किरीटैर्जुष्टम् ।। २१ ।।

स यैः स्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतोऽपि वा ।
कोसलास्ते ययुः स्थानं यत्र गच्छन्ति योगिनः ।। २२ ।।

सत्यधर्मीया — यैः स रामः स्पृष्टो नमनादिना दृष्टश्चक्षुरादिना संवित्तः सम्यग्ज्ञातोऽनुगतोऽनुयातस्त इत्यावर्तते कोसलास्ते कोसला इव ते स्पर्शनादिकर्तारोऽपि यत्र योगिनो यद्भक्तिज्ञानादिमन्तो गच्छन्ति तत्स्थानं ययुः ।

खगा मृगास्तृणादयः पिपीलिकाश्च गर्दभाः ।
यदाऽसुरुत्तमा यतो नृवानरास्तु किं पुनः ।। इत्यादेः ।। २२ ।।

छलारी — स रामो यैः । भक्तिपूर्वकमिति शेषः । स्पृष्टो नमनादिना । दृष्टो वा चक्षुरादिना । उपलक्षणमेतत् । श्रुतो वा श्रोत्रादिना संवित्तः सम्यग्ज्ञातो वाऽनुगतः पृष्ठतो यातो वा । कोसला अयोध्यावासिनः । इत्युपलक्षणम् । सर्वेऽपीति ग्राह्यम् । यत्र योगिनो भक्तिज्ञानयोगवतो गच्छन्ति तत्स्थानं ययुरित्यन्वयः ।। २२ ।।

पुरुषो रामचरितं श्रवणैरुपधारयन् ।
आनृशंस्यपरो राजन् कर्मबन्धैर्विमुच्यते ।। २३ ।।

सत्यधर्मीया — पुरुषोऽधिकारी श्रवणै रामचरितमुपधारयन् । द्वयोरपि श्रवणयोश्चरितनावीन्येन नवीनतया पुरुरूपतेति श्रवणैरिति बहुवचनं सम्भवति । आनृशंस्यपरो मनोवागादिभिरितरहिंसा-मनासादयन्कर्मबन्धकर्मभिर्विमुच्यते । न नृशंसो नृशंससमस्तस्य भाव आनृशंस्यं तत्परस्तदासक्तो भूत्वा । आनृशंसस्य भाव आनृशंस्यम् । तत्परोऽतिहिंसकोऽपीत्यपि व्याकुर्वते ॥ २३ ॥

छलारी — भक्त्या चरितं श्रोतुः फलमाह ॥ पुरुष इति । श्रवणैः । बहुवचनमाद्यर्थे । श्रोत्रादिभिरित्यर्थः । उपधारयन् श्रोत्रेण श्रवणं, मनसा ध्यानं, वागिन्द्रियेण कथनमित्यादिरूपेण भक्तिपूर्वकं धारणं कुर्वन्नित्यर्थः । आनृशंस्यपरः प्रमादेनायोग्यकर्मकरोऽपि कर्मबन्धैर्दुष्कर्मलक्षण-प्रतिबन्धैः । अथवा । कर्मजन्यनानायोनिबन्धैरित्यर्थः । तस्मात्तच्छ्रवणादिकमवश्यं कार्यमिति ॥२३॥

राजोवाच —

कथं स भगवान् रामो भ्रातॄन् वा स्वयमात्मनः ।
तस्मिन् वा तेऽन्ववर्तन्त प्रजाः पौरास्त ईश्वरे ॥ २४ ॥

सत्यधर्मीया — श्रुतरामचरितोऽपि राजाऽजाततृप्तिः शुकं पृच्छति ॥ कथमिति । स भगवान् रामः स्वयमवर्ततेति प्रथमः प्रश्नः । आत्मनः स्वस्य भ्रातॄन् प्रति कथमवर्तत । ते भ्रातरस्तस्मिन्कथमन्ववर्तन्तेति मिलित्वैक इति द्वितीयः । प्रजाः सर्वाः प्रति कथमवर्तत स रामः । ते च पौरजना ईश्वरे कथमन्ववर्तन्तेति तृतीयः । दूरस्था अपि प्रजा रामस्वामिकग्रामभवा इति पौरा इत्युच्यन्त इति केचित्सामान्यविशेषभावमाश्रित्य समादधुः । उत्तरयेति शेषः । कथं स भगवान् रामो भ्रातृबन्धुष्ववर्तत । प्रजास्वौरसवद्रामः कथं वा राम ईश्वर इति पाठोऽपि कोशेषु दृश्यते । तस्यार्थः स कथमवर्ततेत्येकः । भ्रातृबन्धुषु भ्रातृलक्ष्मणादिषु बन्धुषु तज्जामात्रादिषु भ्रातृरूपबन्धुष्विति वा कथमवर्ततेति द्वितीयः । प्रजासु कथमवर्तत ताश्च रामे कथमवर्तन्तेति तृतीयः । मया न ज्ञातमिति नाज्ञापयेति विज्ञापयति ॥ ईश्वर इति । त्वमीश्वरो वक्तुं शक्त इत्यर्थः । अहं शक्तो यद्यपि त्वं तु नोपदेशार्ह इत्यतो न तथेत्याह ॥ औरसवदिति । त्वत्पुत्रवदहं शिष्योऽत उत्तरं वदेति शेषः । प्रश्नत्रितयानुयानेन रामो रामो राम इति सङ्गच्छद्वचनं स्कान्दवचनं रामो रामो राम इतीति चानुचकारेति ज्ञेयम् । औरसवदात्मापत्यानीव ताः प्रजा अन्ववर्तन्त वा कथं वेति योजयन्ति ॥२४॥

छलारी — रामकथायां विशेषजिज्ञासया राजा पृच्छति ॥ कथमिति । सः रामः स्वयं सीतया सह स्वगृहे कथमवर्ततेति प्रथमः प्रश्नः । स राम आत्मनः स्वस्य भ्रातॄन्प्रति कथमवर्ततेति द्वितीयप्रश्नः । ते भ्रातरः पौराः प्रजाश्चेश्वरे रामे कथमप्रावर्तन्तेति तृतीयप्रश्नः । यद्यपि पौराः

प्रजाशब्दवाच्यास्तथाऽपि ब्राह्मणपरिव्राजकन्यायेन भेदोऽवगन्तव्यः । क्रयविक्रयं कृष्यादिकं कृत्वा वैश्यवृत्त्योपजीविनः पौराः । तदन्ये पुरस्थाः प्रजा इति विवेकः ॥ २४ ॥

श्रीशुक उवाच —

अथादिशद् दिग्विजये भ्रातॄंश्च त्रिदशेश्वरः ।
आत्मानं दर्शयन् स्वानां पुरीमैक्षत सानुगः ॥ २५ ॥

सत्यधर्मीया — प्रथमतृतीययोरुत्तरमीरयति ॥ अथेति । अथाभिषेकानन्तरं भ्रातॄन्भरतशत्रुघ्ना-दीन् । लक्ष्मणप्रेषणस्याश्रवणाद्बहुवचनमाद्यर्थ इति प्रागुक्तबन्धवो ग्राह्याः । ताभ्यां सह तत्प्रेषणसम्भवात् । दिग्विजये आदिशत् । एतेन स्वयं विनेता ते च विनेया इत्युक्तमुत्तरमिति । लुप्तोपमेयम् । यथा त्रिदशेश्वर इन्द्रः स्वानां सुराणां यथा विनेता ते च यथा विनेयास्तथेति । त्रिदशेश्वरः सर्वसुपर्ववर्यो यस्तस्य कियदिदं दिग्विजयनमिति सूचयति वाऽनेनेति ज्ञेयम् । स्वानां प्रजानामात्मानं दर्शयन् स्वत्वं निमित्तीकृत्यात्मप्रदर्शनेन प्रजारञ्जनं जनस्य चात्मत्वेनानुसन्धानं ध्वनयामासेति ज्ञेयम् । यः सानुगः प्राक् चित्रकूटादिशृङ्गगतः स इदानीं सानुगोऽनुगैः सहितः सन् पुरीमयोध्यामैक्षतापश्यत् । इदमपि दययेति पौरानुवर्तनं प्रकारान्तरेणेति ज्ञेयम् ॥ २५ ॥

छलारी — तत्र प्रथमं तावत्स रामो भ्रातॄन्प्रति कथं प्रावर्ततेति द्वितीयप्रश्नस्योत्तरमाह ॥ अथेति । अथ राज्याभिषेकानन्तरं त्रिभुवनेश्वरो रामो दिग्विजयार्थं भातॄन् आदिशत् । तेऽपि तदाज्ञया दिग्विजयं चक्रुरिति शेषः । तृतीयप्रश्नस्योत्तरं वक्तुं किञ्चिदाह ॥ आत्मानमिति । स्वानां स्वभक्तानामात्मानं दर्शयन्वृन्दावनादागत्य श्रीकृष्ण इव रामोऽपि वनादागत्य भक्तजनानुकंपया पुरीमैक्षत । पुरिनिरीक्षणार्थं राजमार्गेण प्रतिवीथिं चचारेति भावः ॥ २५ ॥

आसिक्तमार्गां गन्धोदैः करिणां मदसीकरैः ।
स्वामिनं प्राप्तमालोक्य मत्तां वा सुतरामिव ॥ २६ ॥

सत्यधर्मीया — गन्धोदैश्चन्दनाद्युदकैः करिणां गजानां मदसीकरैर्दानोदकबिन्दुभिः प्राप्तं स्वामिनं च सुतरां मत्तामिवैक्षतेत्यन्वयः । वासितरामिवेति न सरलः पाठः । वासितरां कामोन्मत्तां गामिवेत्यर्थ इत्यर्थोऽपि विरलः ॥ २६ ॥

छलारी — पुरीं वर्णयति आसिक्तेति त्रिभिः । वाशब्दः समुच्चये । गन्धोदैर्गजानां मदसीकरैश्च मदजलबिन्दुभिश्चासिक्तमार्गाम् । कथम्भूताम् । रावणादीन्निहत्य प्राप्तं स्वामिनमालोक्य सुतरां हर्षेण मत्तां कामिनीमिव स्थिताम् ॥ २६ ॥

प्रासादगोपुरसभाचैत्यदेवगृहादिषु ।
विन्यस्तहेमकलशैः पताकाभिश्च मण्डिताम् ॥ २७ ॥

सत्यधर्मीया — पताकाभिर्विन्यस्ताभिर्मण्डितामलङ्कृताम् ॥ २७ ॥

छलारी — चैत्यं पाषाणादिभिर्बद्धं वृक्षमूलस्थानम् । देवगृहो देवालयः ॥ २७ ॥

पूगैः सवृन्तै रम्भाभिः पालिकाभिः सुवाससाम् ।
आदर्शैरंशुकैः स्रग्भिः कृतकौतुकतोरणाम् ॥ २८ ॥

सत्यधर्मीया — सवृन्तं वृन्तं प्रसवबन्धनमित्यमरः । वृन्तं प्रसवबन्धे स्याद्घटीधाराकुचाग्रयोरिति विश्वः । पालिकादिभिः साङ्कुरशरावादिभिः सुवाससां योषितां हस्तविन्यस्ताभिरादर्शैर्दर्पणैरंशुकै-र्वसनैः स्रग्भिर्मालाभिश्च कृतकौतुकतोरणां कृतं कौतुकं येषां तानि तोरणानि बहिर्द्वाराणि यस्यां सा ताम् ॥ २८ ॥

छलारी — सवृन्तैः फलस्तबकसहितैः पूगैः क्रमुकैः । कौशेयादिसुवाससां पताकाभिः । आदर्शैर्दर्पणैरंशुकैर्वस्त्रैः कृतानि विरचितानि कौतुकानि येषु तानि तोरणानि बहिर्द्वाराणि यस्यां सा तथा । तां पुरीम् । ऐक्षतेत्यनुषङ्गः ॥ २८ ॥

तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः ।
आशिषो युयुजुर्देव पाहीमां प्राक् त्वयोद्धृताम् ॥ २९ ॥

सत्यधर्मीया — एवमायान्तं राममर्हणपाणयः पौरास्तत्र तत्र वीथिषूपेयुः । आगतेषु वृद्धा आशिषश्च युयुजुः । तदेवमित्यावेदयति ॥ देवेति । हे देव प्राग्वराहावतारे त्वयोद्धृतां महीमिति शेषः । पाहि रक्षेति ॥ २९ ॥

छलारी — पौराणां तस्मिन्प्रवृत्तिमाह ॥ तमुपेयुरिति । प्राक् वराहवतारे त्वया पातालादुद्धृताम् । भूमिमिति शेषः । पाहीति शेषः । मङ्गलवचनानि युयुजुः ॥ २९ ॥

तं ताः प्रजा वीक्ष्य पतिं चिरागतं दिदृक्षयोत्सृज्य गृहान् स्त्रियो नराः।
आरुह्य हर्म्याण्यरविन्दलोचनं नतृप्तनेत्राः कुसुमैरवाकिरन् ॥ ३० ॥

सत्यधर्मीया — स्त्रियो नराश्चेति प्रजाः । हर्म्याणि प्रासादान् । नतृप्तनेत्राः नसमासः ॥ ३० ॥

छलारी — प्रजानां तस्मिन्प्रवृत्तिमाह ॥ तमिति । अनेन श्लोकद्वयेन पौराः प्रजाश्च कथं वर्तन्तेति तृतीयप्रश्नस्योत्तरमुक्तं भवति । नतृप्तनेत्रा नसमासोऽयम् ॥ ३० ॥

अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः ।
अनन्तगृहकोशाढ्यमनर्घ्योरुपरिच्छदम् ॥ ३१ ॥

सत्यधर्मीया — अनन्तगृहाणि चाम्बरचुम्बिमन्दिराणि चावान्तरागाराणि कोशाश्च धननिधानधामानि च तैराढ्यम् । अनन्तानि बहूनि गृहाणि तेषु कोशा ये तैराढ्यमिति वा । अनर्घ्याः उरवो बहवः परिच्छदा यस्मिंस्तत् । पूर्वराजभिः पूर्वराजैः । पूः व इति पदद्वयं पूः, व यथा प्रविष्टा तथा राजभिर्जुष्टं स्वगृहं प्रविष्ट इति वा ॥ ३१ ॥

छलारी — रामः स्वयं सीतया सह कथमवर्ततेति प्रथमप्रश्नस्योत्तरमाह ॥ अथेति । स्वगृहं प्रविष्टः सन् तस्मिन् सीतया सह रेमे इति पश्चमेनान्वयः । गृहं वर्णयति ॥ जुष्टमित्यादिना भूषणैरित्यन्तेन । पूर्वराजभी रघ्वादिभिः । समासान्तविधेरनित्यत्वात् पूर्वराजभिरिति साधु । अनन्ता अपरिमिता गृहा अनन्तगृहा नवरत्नानां कोशाश्च तैराढ्यम् ॥ ३१ ॥

विद्रुमोदुम्बरद्वारैर्वैदूर्यस्तम्भपङ्क्तिभिः ।
स्थलैर्मारकतैः स्वच्छैर्भातं स्फटिकभित्तिभिः ॥ ३२ ॥

सत्यधर्मीया — विद्रुमोदुम्बरद्वारैर्विद्रुमात्मकाश्च तदात्मकानि चैकशेषेण नपुंसकमनपुंसकेनेति तान्युदुम्बरा देहलयो द्वाराणि च तैः । उदुम्बरस्तु देहल्यां वृक्षजातौ तु पण्डके इति विश्वः । वैदूर्यस्तम्भपङ्क्तिभिः । वालवाये भवं वैदूर्यं विदूराज्ज्रो वालवायो विदूरं स्याद्वैदूर्यं वालवायजमित्यमरः । मारकतैर्मरकतमणिखचितैः । भित्तय उत्तानदारुलग्नाः ॥ ३२ ॥

छलारी — विद्रुममया उदुम्बरा देहल्यो येषु द्वारेषु तैर्द्वारैः स्वच्छैर्मारकतैरिन्द्रनीलमणिमयैः स्थलैः स्फटिकभित्तिभिश्च भातम् ॥ ३२ ॥

चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशुभिः ।
मुक्ताफलैश्चिदुल्लासैः कान्तकामोपपत्तिभिः ॥ ३३ ॥

धूपदीपैः सुरभिभिर्मण्डितैः पुष्पमण्डकैः ।
स्त्रीपुंभिः सुरसङ्काशैर्जुष्टं भूषणभूषणैः ॥ ३४ ॥

सत्यधर्मीया — पट्टिका वितानाः । वासोभिस्तत्र बद्धैर्वस्त्रैर्मणिगिणानामंशवो दीप्तयस्तैश्चिदुल्लासैरिति योग्यसर्वान्वयि । चिता स्वज्ञानमात्रेणावलोकनमात्रेणेति यावत् । उल्लासो विलोकयितॄणां यैस्ते तानिति वा तैः । कान्तकामोपपत्तिभिः कान्तः श्रीकान्तो रामस्तस्य कामा इच्छाविषयास्तेषामुपपत्तिः सम्पत्तिर्यैस्तैश्चित्रेत्यादीकृत्य मण्डकान्तपदैर्मण्डितमित्यखण्डितमन्वेति । स्त्रीपुम्भिः स्त्रीभिः सहिताश्च ते पुमांसश्च तैः । सुरसङ्काशैरमरसमैर्भूषणभूषणैर्भूषाणानां भूषणं यैस्तैर्जुष्टम् ॥ ३३,३४ ॥

छलारी — वाससां देदीप्यमानसुवर्णवाससां मणिगणानां चांशुभिर्दीप्तिभिश्चिच्छुद्धचैतन्यं तद्वदुल्लासैरुज्वलैर्मुक्तामणिभिर्मण्डितम् । यद्वा । चिदिति व्यस्तं पदम् । चित्कचिद्वैदूर्यस्तम्भादिषु यथा शोभमुज्वलैर्मुक्ताफलैर्मण्डितमित्यर्थः । कान्ताः कमनीयाः कामोत्पत्तय उपभोगसाधनानि ताभिः । पुष्पसमूहैर्मण्डितैः स्त्रीपुंभिर्जुष्टम् । पुनः कथंभूतैः । भूषणानां भूषणभूतैः ॥ ३३,३४ ॥

तस्मिन् स भगवान् रामः स्निग्धया प्रिययेष्टया ।
रेमे स्वारामचाराणामृषभः सीतया सह ॥ ३५ ॥

सत्यधर्मीया — तस्मिन्नगरे प्रीतिमत्या स्निग्धया भार्यया स्वयमपि तस्यां तथेत्याह । इष्टया स्वस्य प्रियया सीतया सह रेमे इति । तथाप्यसङ्गो ह्ययं पुरुष इति बोधयितुमेतदधिप इति वक्ति । स्वारामचाराणामत्यन्तवनसञ्चारिणां तपस्विनामिति यावत् । ऋषभः श्रेष्ठ इति ॥ ३५ ॥

छलारी — स्निग्धया स्वस्मिन्भक्तियुक्तया प्रियया भार्येच्छया इच्छानुसारिण्या सीतया सह रेमे । कथम्भूताः । स्वारामाः शोभनोद्यानानि तत्र चारः संचारो येषां देवादीनां तेषां ऋषभः ॥ ३५ ॥

बुभुजे च यथाकामं कामं धर्ममपीडयन् ।
वर्षपूगान् बहून् नृणामभिध्येयाङ्घ्रिपल्लवः ॥ ३६ ॥

इति श्रीमद्भागवते नवमस्कन्धे नवमोऽध्यायः ।

सत्यधर्मीया — धर्ममपीडयन्विहितमप्रतिहतं कुर्वन्नृणामभिध्येयोऽङ्घ्रिपल्लवो यस्य सः । कृत्यानां कर्तरि चेत्युक्तेर्युक्ता षष्ठी ॥ ३६ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे नवमोऽध्यायः ।

छलारी — निरन्तरमप्यनुरोधेषु सञ्चरतामीश्वर इत्यनेनातीवसौख्यं सूचयति । यथाकालं विहितकालमनतिक्रम्य कामान् बुभुजे । अन्यांस्त्रिवर्गान् । यद्वा । स्वभोगार्थमन्यान् जनान्नृणां नृभिरभिध्येयमङ्घ्रिपल्लवं यस्य ॥ ३६ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे नवमोऽध्यायः ॥ ९-९ ॥

॥ अथ दशमोऽध्यायः ॥

श्रीशुक उवाच —

कुशस्य चातिथिस्तस्मान्निषधस्तत्सुतो नभः ।
पुण्डरीकोऽथ तत्पुत्रः क्षेमधन्वाऽभवत् ततः ॥ १ ॥

सत्यधर्मीया — तत्सुतो निषधसुतस्तत्पुत्रो नभपुत्रः । ततः पुण्डरीकात् ॥ १ ॥

छलारी — द्वौ पुत्रौ कुशलवश्चेति । तत्र कुशस्य वंशमाह ॥ कुशस्येति । अतिथिः पुत्रोऽभवत् । अथ तस्मान्नभात् पुण्डरीकः । ततः क्षेमधन्वनः सकाशात् । देवानीक इत्युत्तरेणान्वयः ॥ १ ॥

देवानीकस्ततोऽहीनः पारिपात्रश्च तत्सुतः ।
ततो बलस्थलस्तस्माद् वज्रनाभोऽर्कसम्भवः ॥ २ ॥

सत्यधर्मीया — ततः क्षेमधन्वनोऽहीनो वा हीनो वा न नः किञ्चिद्धीनम् । अत्र सेतुबन्धनादिकथा बहुपुराणविरोधेन विवृताऽस्माभी रामायणविवरणे विलोकनीया विस्तरदरतोऽत्र न प्रदर्शितेति ज्ञेयम् । तत्सुतः पारिपात्रो वा पारियात्रो वा । तस्माद्बलस्थलाद्वज्रनाभः स चार्कसम्भवः सूर्यांश इत्यर्थः । यद्वा ततो वज्रनाभादर्कसम्भवोऽभूत् । अर्कस्य तन्नामकस्य सम्भव इति वा । न नामकरणामन्त्रणभोजनाभोजना यूयं वयं चेति न मन्दस्मितं तनुत ॥ २ ॥

छलारी — वज्रनाभ इत्यनन्तरं तस्मादिति शेषः । तस्माद्वज्रनाभादर्कसंभवाख्यः ॥ २ ॥

खगणस्तत्सुतस्तस्माद् विधृतश्चाभवत् सुतः ।
ततो हिरण्यनाभोऽभूद् योगाचार्यस्तु जैमिनेः ॥ ३ ॥

शिष्यः सकलमध्यात्मं याज्ञवल्क्योऽध्यगाद् यतः ।
योगं महोदयमृषिर्हृदयग्रन्थिभेदनम् ॥ ४ ॥

सत्यधर्मीया — तत्सुतः खगणस्तस्मात्खगणाद्विधृतस्ततो विधृतात् । योगाचार्यो योगशास्त्ररचयिता । जैमिनेः शिष्यो, यतो हिरण्यनाभात्सकलमध्यात्मं परमात्मविषयकं महोदयं महानुदय उच्छ्रयो येन तम् । हृदयग्रन्थिरज्ञानं तस्य भेदनं येन तम् । योगं भगवत्प्रीत्युपाय-समयमृषिर्ज्ञान्ययमध्यगात् ॥ ३,४ ॥

छलारी — स्वगणस्तत्सुतोऽर्कसम्भवसुतः । तस्मात्स्वगणात् । विधृतः सुतोऽभवत् । ततो विधृतस्य सकाशात् । हिरण्यनाभोऽभूत् । कथम्भूतः । जैमिनेः शिष्यो योगस्याध्यात्मयोगस्याचार्य उपदेशकर्ता । योगशास्त्रप्रवर्तक इत्यर्थः ॥ यतो हिरण्यनाभाद्याज्ञवल्क्यो ऋषिः । सकलमध्यात्मं परमात्मविषयं योगम् । अध्यगादित्यनुषङ्गः । महान्त उदयाः सिद्धयो यस्मात्तम् । हृदयग्रन्थेरज्ञानस्य भेदकम् ॥ ३,४ ॥

पुष्यो हिरण्यनाभस्य ध्रुवसन्धिस्ततोऽभवत् ।
सुदर्शनोऽथाग्निवर्णः शीघ्रस्तस्य मरुत् सुतः ॥ ५ ॥

सत्यधर्मीया — पुष्यो हिरण्यनाभसकाशादभवत् । ततः पुष्यात् । अथ ध्रुवसन्ध्यनन्तरं तस्मादिति यावत् । सुदर्शनोऽथाग्निवर्णस्तत्सुत इति यावत् । तस्याग्निवर्णस्य शीघ्रस्तस्य सुतो मरुत् ॥ ५ ॥

छलारी — ततो हिरण्यानाभात् । अथेत्यस्य च पूर्वत्रोत्तरत्र च सम्बन्धः । अथ ध्रुवसन्धेः सुदर्शनः । अथ सुदर्शनादग्निवर्णः । अथाग्निवर्णाच्छीघ्रः । तस्य शीघ्रस्य मरुत्तन्नामा सुतोऽभवत् ॥ ५ ॥

योऽसावास्ते योगसिद्धः कलापग्राममास्थितः ।
कलेरन्ते सूर्यवंशं नष्टं भावयिता पुनः ॥ ६ ॥

सत्यधर्मीया — योऽसौ मरुद्योगसिद्धः कलापग्राममास्थितः सन् कलेर्युगस्यान्ते नष्टमुत्सन्नं सूर्यवंशं पुनर्भावयिता ॥ ६ ॥

छलारी — मरुतं विशिनष्टि ॥ योऽसाविति । योगेन सिद्धो योगीत्यर्थः । कलापग्राममास्थितः सन् सूर्यवंशं भावयिता भविष्यति ॥ ६ ॥

तस्मात् तु सुश्रुतस्तस्य सन्धिस्तस्यापि मर्षणः ।
महस्वांस्तत्सुतस्तस्माद् विश्वसाह्वानजायत ॥ ७ ॥

सत्यधर्मीया — तस्मान्मरुतः । तस्य सुश्रुतस्य । तस्यापि सन्धेरपि मर्षणो नाम्ना । तत्सुतो मर्षणसुतस्तस्मान्महस्वतः ॥ ७ ॥

छलारी — तस्मान्मरुतः सुश्रुताख्यः । तस्य सन्धिः सन्धिनामकः ॥ ७ ॥

ततो बृहद्बलो यस्तु पित्रा ते समरे हतः ।
एते हीक्ष्वाकुभूपाला अतीताः शृण्वनागतान् ॥ ८ ॥

सत्यधर्मीया — ततो विश्वसाहुषो बृहद्बलः । स क इत्यत आह । यस्ते पित्राऽभिमन्युना समरे हतः संहतः । इक्ष्वाकुभूपाला अतीताः । अनागतान्भविष्यतः शृणु । अनेन स्वविवक्षां परीक्षितो ध्वनयति ॥ ८ ॥

छलारी — समरे बृहद्बलस्ते तव पित्राऽभिमन्युना हतः । ईक्ष्वाकुभूपालास्तद्वंशजन्यभूपा इत्यर्थः । अनागतानुत्पत्स्यमानान् ॥ ८ ॥

बृहद्बलस्य भविता पुत्रो नाम्ना बृहद्रणः ।
उरुक्षयः सुतस्तस्य वसुप्रीतिर्भविष्यति ॥ ९ ॥

सत्यधर्मीया — तस्य बृहद्रणस्य । तस्योरुक्षयस्य ॥ ९ ॥

छलारी — तस्येत्यनुवर्तते । तस्योरुक्षयस्य वत्सप्रीतः ॥ ९ ॥

प्रतिव्योमस्ततो भानुर्दिवार्को वाहिनीपतिः ।
सहदेवस्ततो भावी बृहदश्वोऽथ भानुमान् ॥ १० ॥

सत्यधर्मीया — ततो वसुप्रीतेस्ततः प्रतिव्योमनामकाद्भानुस्ततो दिवार्कस्ततो वाहिनीपतिस्ततः सहदेवस्ततः सहदेवाद्भावी भविष्यन्नित्यर्थः । शृण्वनागतानित्युक्तत्वात्पुनरेवमवक्तव्यमिति केचित् । तन्न । भविता स्मर्तव्यो मध्ये मध्ये स्मारणार्थं तथोक्तिरिति । भावी तन्नामको वा । बृहदश्वोऽथानन्तरं भानुमान् ॥ १० ॥

छलारी — तस्येत्यनुवर्तते । तस्य प्रतिव्योमस्ततो भानुस्ततो दिवार्कस्ततो वाहिनीपतिस्ततः सहदेवः । भावीत्येतत्सर्वत्रानुवर्तते । ततो बृहदश्वः ॥ १० ॥

प्रतीकाश्वो भानुमतः सुप्रतीकोऽथ तत्सुतः ।
भविता मरुदेवोऽथ सुनक्षत्रोऽथ रुक्षकः ॥ ११ ॥

सत्यधर्मीया — तत्सुतः सुप्रतीकतोकोऽथ मरुदेवानन्तरं सुनक्षत्रो भविता । अथ रुक्षकः ॥ ११ ॥

छलारी — तत्सुतः सुप्रतीकसुतः मरुदेवः ॥ ११ ॥

तस्यान्तरिक्षस्तत्पुत्रः सुतपास्तदमित्रजित् ।
बृहद्भोजस्तु तस्यापि बर्हिस्तस्मात् कृतञ्जयः ॥ १२ ॥

सत्यधर्मीया — तस्य रुक्षकस्य तत्पुत्रोऽन्तरिक्षसुतस्तत्तस्यामित्रजित्पुत्रस्तस्यामित्रजितस्तस्माद्बर्हेर्वा बर्हिषो वा कृतञ्जयः ॥ १२ ॥

छलारी — तत्तस्मादमित्रजित् । तस्माद्बर्हिः । तस्मात्कृतंजयः ॥ १२ ॥

रणञ्जयस्तस्य सुतः सञ्जयो भविता ततः ।
तस्माच्छक्तोऽथ शुद्धोदो लाङ्गलस्तत्सुतः स्मृतः ॥ १३ ॥

सत्यधर्मीया — तस्य कृतञ्जयस्य । तस्य रणञ्जयस्य । तस्मात्सञ्जयादथ शक्तानन्तरं शुद्धोदस्तत्सुतो लाङ्गलः स्मृतः ॥ १३ ॥

छलारी — अथ शाक्यात् ॥ १३ ॥

ततः प्रसेनजित् तस्माद् क्षुद्रको भविता ततः ।
कुणको भविता तस्मात् सुरथस्तनयस्ततः ।
सुमित्रो नाम निष्ठान्तस्त्वेते बार्हद्बला नृपाः ॥ १४ ॥

सत्यधर्मीया — ततो लाङ्गलात्तस्मात्प्रसेनजितस्ततः क्षुद्रकात्तस्मात्कुणकात्ततः सुरथात्सुमित्रोऽभवत् । स च निष्ठान्तो निष्ठाया वंशस्थितेरवधिभूतो, निरपत्य आसीदिति यावत् । बृहद्बलस्येमे गोत्रपुत्रा बार्हद्बला नृपाः ॥ १४ ॥

छलारी — तनयस्तनयनामकः । ततः सुमित्रः सुमित्रो नाम राजा । निष्ठाया वंशावलेरन्तोऽवधिभूतः । तत्र वंशः समाप्त इत्यर्थः । एतेन नृपा बार्हद्बला बृहद्बलोऽनागतानां मूलपुरुषस्तत्सम्बन्धिन इत्यर्थः ।। १४ ।।

इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति ।
यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ।। १५ ।।

इति श्रीमद्भागवते नवमस्कन्धे दशमोऽध्यायः ।

सत्यधर्मीया — निष्ठान्तपदं स्वयं व्याचष्टे ।। इक्ष्वाकूणामिति । तं सुमित्रम् । संस्थां संस्था व्यवस्थाप्रणिधिः समाप्याचारमन्त्रिष्वित्यभिधानम् ।। १५ ।।

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे दशमोऽध्यायः ।

छलारी — एतदेव विशदयति । इक्ष्वाकुसम्बन्धिनामयं वंशः सुमित्रान्तः सुमित्र एवान्तो यस्य स तथा भविष्यति । कुतः । यतस्तं सुमित्रनामकं प्राप्य संस्थां नाशं प्राप्स्यति । वंश इत्यनुवर्तते ।। १५ ।।

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे दशमोऽध्यायः ।

।। अथ एकादशोऽध्यायः ।।

श्रीशुक उवाच —
निमिरिक्ष्वाकुतनयो वसिष्ठमवृतर्त्विजम् ।
आरभ्य सत्रं सोऽप्याह शक्रेण प्राग् वृतोऽस्मि भोः ।। १ ।।

सत्यधर्मीया — इक्ष्वाकुकुमारस्य निमेः साक्षात्सुतो नेति शंसंस्तदुपयुक्तामाख्यायिकां तथा प्रकारान्तरेण सुतसम्पत्तिं च वदति कैश्चित् श्लोकैः । वसिष्ठं पुरोधसमृत्विजमवृत वव्रे । सत्रमारभ्य सम्भारान्सम्भृत्येति यावत् । अनेन सम्प्रति प्रतिरोद्धुं तदयुक्ततां सूचयति । भो विभो शक्रेण प्रागहमृत्विक्त्वे वृतोऽस्मि नेदानीं मदागमनस्यावसर इति भावः ।। १ ।।

छलारी — इक्ष्वाकोर्ज्येष्ठपुत्रविकुक्षेर्वंशपरिकरं निरूप्य द्वितीयपुत्रस्य निमेरौरसपुत्रो नाभूदिति दर्शयन् आख्यायिकामाह ॥ निमिरित्यादिना । निमिः सत्रमारभ्य वसिष्ठं ऋत्विजमवृत वव्रे । सोऽपि वसिष्ठोऽपि वृतोऽस्मि ऋत्विक्त्वेन स्वीकृतोऽस्मि ॥ १ ॥

तं निर्वर्त्यागमिष्यामि तावन्मां प्रतिपालय ।
तूष्णीमासीद् गृहपतिः सोऽपीन्द्रस्याकरोन्मखम् ॥ २ ॥

सत्यधर्मीया — तं शतक्रतुं निर्वर्त्य निष्पाद्य तावत्तत्कालपर्यन्तं मां प्रतिपालय मन्मार्गं निरीक्षस्वेति यावत् । इत्यब्रवीदित्यूह्यम् । तच्छ्रुत्वा च गृहपतिः गृहेण कलत्रमात्रेण सहितश्चासौ पतिश्च गृहस्य तन्मात्रस्य पतिरिति वा । अनेनापुत्रत्वाज्ज्वरोत्तप्तः पुरोहितश्च शापवश इति तूष्णीमासीत् । कारय ममेदानीमेवेत्यथवा तमुदवास्यायाहि तावत्तव मार्गं पश्यामीति वा नोवाच । शोककोपवश इति तात्पर्यमिति केचित् । गृहपतिः सत्रवान् । गृहपतिर्गृहस्थः स्यादन्त्याधाने च सत्रिणीति विश्वः । स वसिष्ठः ॥ २ ॥

छलारी — तत्र शक्रयागं निर्वर्त्य समाप्य तावत्पर्यन्तं मां प्रतिपालय प्रतीक्षस्व । गृहपतिर्निमिः ॥ २ ॥

निमिश्चलमिदं विद्वान्सत्रमारभतात्मवान् ।
ऋत्विग्भिरपरैस्तावद् यावत् तन्नागमद् गुरुः ॥ ३ ॥

सत्यधर्मीया — निमिरिदं कलेवरं चलमस्थिरमिति विद्वानात्मवान्मनस्वी प्रयत्नवानीश्वरासक्तिमानिति वा । अपरैर्ऋत्विग्भिर्यावद्गुरुर्नागमत्तावन्मध्य एव सत्रमारभतारब्धवान् । सत्रविदां विद्वानिति पाठेऽपि सत्रज्ञानिनां मध्ये विद्वान् । गुरुर्यावन्नागच्छत्तावन्मध्य एव सत्रमारभतेत्यन्वयः । सत्रविदां यथा यज्ञाङ्गभङ्गो न भवेत्तथा तज्ज्ञानिनां मध्ये विद्वान्निमिरित्यर्थो वा । पण्डितमानिन इत्युत्तरानुरूप्यात् ॥ ३ ॥

छलारी — सन्तस्त्रायन्त इति सत्त्रं परं ब्रह्म तद्विदां मध्ये विद्वांस्तेषां संशयच्छेत्तेत्यर्थः । आत्मवान्मनोजयवान् । अपरैर्वसिष्ठव्यतिरिक्तैः । यावता कालेन गुरुर्वसिष्ठः ॥ ३ ॥

शिष्यव्यतिक्रमं वीक्ष्य निर्वर्त्य गुरुरागतः ।
अशपत् पततां देहो निमेः पण्डितमानिनः ॥ ४ ॥

सत्यधर्मीया — मखं निर्वर्त्यागतो गुरुः शिष्यव्यतिक्रमं स्वमतिक्रम्य ऋत्विगन्तरमुखेन मखारम्भलक्षणमपराधमिति यावत् । पण्डितमानिनो निमेर्देहः पततामित्यशपत् ।। ४ ।।

छलारी — निर्वर्त्येन्द्रयागं समाप्य । आगतो गुरुः शिष्यस्य निमेर्व्यतिक्रमं सत्रारम्भण-रूपमपराधमित्यर्थः । पूर्वमेव गुरुप्रार्थनायाः कृतत्वात् ।। ४ ।।

निमिः प्रतिददौ शापं गुरवेऽधर्मवर्तिने ।
तवापि पततां देहो लोभाद्धर्ममजानतः ।। ५ ।।

सत्यधर्मीया — निमिरधर्मवर्तिने आवश्यकीं क्रियामुपेक्ष्य गत इति तथा निरपराधाय मह्यं शापमुपयुयोजेति चाधर्मवर्ती तस्मै । लोभादिन्द्रार्त्विज्यागच्छद्धनलोभाद्धर्मं मदुपकृतिरूपमजान-तस्तवापि देहः पततामिति प्रतिशापं ददौ ।। ५ ।।

छलारी — निर्निमित्तं शापदानमधर्म इत्याशयेनाधर्मवर्तिन इत्युक्तम् । लोभात्पौरोहित्यविषयात् । ।। ५ ।।

इत्युत्ससर्ज तं देहं निमिरध्यात्मकोविदः ।
मित्रावरुणयोर्जज्ञे ऊर्वश्यां प्रपितामहः ।। ६ ।।

सत्यधर्मीया — इति परस्परशापानन्तरं तं देहं विससर्ज । अध्यात्मकोविदोऽपि भगवज्ज्ञानिकुशलो वसिष्ठोऽपि देहं विससर्ज । तदनन्तरं मित्रश्च वरुणश्च देवताद्वन्द्वे चेत्यानङ् । ऊर्वश्यां दृष्टायां स्कन्ने रेतसि कुम्भ उम्भिते तयोः सकाशाज्जज्ञे ।

भगवन्निमिशापेन विदेहत्वमुपागमम् ।
मित्रावरुणजं तेज आविश त्वं महायशः ।
एतस्मिन्नेव काले तूर्वशी परमाप्सरा ।
यदृच्छया तमुद्देशमागता सखिभिर्वृता ।
ऊर्वश्या एवमुक्तस्तु रेतस्तन्महदद्भुतम् ।
ज्वलदग्निसमप्रख्यं तस्मिन्कुम्भे व्यवासृजत् ।
यः स कुम्भो रघुश्रेष्ठ तेजःपूर्णो महात्मनोः ।
तस्मिंस्तेजोमयौ विप्रौ सम्भूतावृषिसत्तमौ ।
पूर्वं समभवत्तत्रागस्त्यो भगवानृषिः ।

नाहं सुतस्तवेत्युक्त्वा मित्रं तस्मादपाक्रमत् ।
कस्यचित्त्वथ कालस्य मित्रावरुणसम्भवः ।
वसिष्ठस्तेजसा युक्तो जज्ञ इक्ष्वाकुदैवतम् ॥

इत्यादिरामायणोक्तेः । ऋग्वेदे पञ्चमाष्टकतृतीयाध्यायपञ्चविंशतिवर्गे च । उतासि मैत्रावरुणो वशिष्ठोर्वश्या ब्रह्मन् मनसोऽधिजातो द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वेदेवाः पुष्करे त्वाददन्त । स प्रकेत उभयस्य प्रविद्वांत्सहस्रदान उत वा सदानः । यमेन ततं परिधिं वयिष्यन्नप्सरसः परिजज्ञे वसिष्ठः । सत्रे ह जाताविषिता नमोभिः कुम्भे रेतः सिषिचतुः समानमिति श्रूयते । तस्या अर्थः । उतापि च । हे वसिष्ठ मैत्रावरुणयोः पुत्रोऽसि । हे ब्रह्मन् ऊर्वश्या अप्सरसो ममायं पुत्रः स्यादिति सङ्ल्पाद्द्रप्सं रेतो मित्रावरुणयोरूर्वशीदर्शनात्स्कन्नमासीत् । ततो जातोऽसि । तथा च वक्ष्यते । सत्रे ह जातावित्यृचि । एवं जातत्वात्त्वां दैवेन देवसम्बन्धिना तदुत्तमेन ब्रह्मणा हिरण्यगर्भेण प्राप्तवर इति विश्वेदेवाः पुष्करे । आददन्ताधारयन्त । तथा चादितेर्मित्रावरुणौ जज्ञाते इति प्रकृत्य पठ्यते ।

तयोरादित्ययोः सत्रं दृष्ट्वाऽप्सरसमूर्वशीम् ।
रेतश्चस्कन्द तत्कुम्भे न्यपतद्वा सतीवरे ।
तेनैव तु मुहूर्तेन वीर्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वसिष्ठश्च द्वावृषी सम्बभूवतुः ।
बहुधा पतितं रेतः कलशे च जलस्थले ।
जले वसिष्ठस्तु मुनिः सम्भूतो ह्युषिसत्तमः ।
कुम्भे त्वगत्स्यः सम्भूतो जले मत्स्यो महाद्युतिः ।
उदियाय ततोऽगस्त्यः शम्यामात्रो महातपाः ।
मानेन सम्मितो यस्मात्तस्माच्छाम्य इहोच्यते ।
यद्वा कुम्भादृषिर्जातः कुम्भेनापि हि मीयते ।
कुम्भ इत्यभिधानं च परिमाणस्य दृश्यते ।
ततोऽप्सु गृह्यमाणासु वसिष्ठः पुष्करे स्थितः ।
सर्वतः पुष्करे तं हि विश्वेदेवा अधारयन् ॥ इति ।

माने शम्यास्त्रीयुगकीलकमित्यमरः । हिरण्यशम्यमित्यृग्भाष्ये तस्य शम्यायुगाणीत्युक्तेर्युगकीलकं तस्य मात्रा परिमाणं यस्य स इत्यर्थः । मात्रा मानमिति विश्वः । स वसिष्ठः प्रकेतः प्रकृष्टज्ञानः केतुः केतश्चित्तिश्चित्तं मतिः क्रतुर्मनीषा मायेति गीताभाष्योक्तेः । उभयं दिवमवनिं च प्रविद्वान्प्रकर्षेण

जानन्सहस्रदानः सहस्रस्य दानो सोऽभवत् । यदा कदाचिद्यस्मै कस्मैचन सहस्रद इति विशेषः । क इत्यत आह । उत वाऽपि वा सदानो दानेन सहितः । निरुपसृष्टदानपदेन सर्वदानं सर्वदा चेति ज्ञेयम् । यमेन नियन्त्रा ततं व्याप्तं परिधिं वस्त्रं तद्वत्परिवीतं संसारप्रवाहं तत्प्रेरित इति यावत् । वयिष्यन्बध्नन्नप्सरस ऊर्वश्याः परिजज्ञे जातः । यमेन युग्मतया ततं व्याप्तं सर्वमिति स्वयं परिधिं संसारप्रवाहं वयन्बन्धानः सांसारिको भवन्निति व्याकुर्वते । सत्रे बहुकर्तृके यागे हेति पूरणे जातौ दीक्षितौ मित्रावरुणौ इषिता । डादेशः । इषितौ । नमोभिः परकृतस्तुतिशब्दैः कुम्भो वा सतीवरे कलशे समानमेकदैव रेतः सिषिचतुरसिञ्चतामिति प्रपितामहो वृद्धप्रपितामहो ममेति शेष इति केचित् । शेषे करणीये को विशेषो मत्पितुरित्यस्य त्याग इति मत्पितुरिति श्लिष्टः शेषः इति ज्ञेयम् । (मम प्रपितामहो वशिष्ठ इति शुकाचार्यवचनं कथं युज्यते । वसिष्ठस्य प्रपितामहपितृत्वात् । तत्कथं वसिष्ठपुत्रः शक्तिः शक्तिपुत्रः पराशरः पराशरपुत्रो वेदव्यासो व्यासपुत्रः शुक एवं सति शुकं प्रति वसिष्ठस्य प्रपितामहपितृत्वमेव न प्रपितामहत्वम् । अत्र विशेषोऽस्ति । वसिष्ठस्य शक्त्यादयः शतपुत्राः पूर्वं राक्षसो भवेति शप्तकल्माषपादराजेन भक्षितास्तदा शक्तिभार्या गर्भिणी तद्गर्भमपि भक्षितुमुद्युक्तः कल्माषपादस्तदा वसिष्ठस्तद्गर्भं माधवस्तवराजस्तोत्रेण रक्षित्वा जातं पुत्रं स्वस्य पुत्राभावात्स्वपुत्रत्वेन जातकर्मादि कृत्वा स्वपुत्रमकरोत् । अतः शुकस्य पिता व्यासः पराशरः पितामहो वसिष्ठः प्रपितामह इत्युक्तं युक्तम् ।) ॥ ६ ॥

छलारी — इत्युक्त्वा स्वदेहं विससर्ज । अध्यात्मकोविदस्तत्त्वज्ञानी वसिष्ठो निमिशापाद्देहम् । विससर्जेति शेषः । वसिष्ठो निमिशापेन देहोत्सर्जनानन्तरं कुत्रोत्पन्न इति तत्राह ॥ मित्रावरुणयोरिति । देवताद्वन्द्वेचेति दीर्घः । अयं भावः । मित्रावरुणयोरूर्वशीदर्शनाद्रेतःस्कन्ने सति ताभ्यां कुम्भे विषिक्तं तस्माद्वसिष्ठो जज्ञ इति । तथा च श्रुतिः । कुम्भे रेचः सिषिचतुः समानमिति । प्रपितामहो मम वसिष्ठो वृद्धप्रपितामह इत्यर्थः । वेदव्यासस्य पितृत्वात्पराशरस्य पितामहत्वाच्छक्तेः प्रपितामहत्वाच्छुकस्य वसिष्ठो वृद्धप्रपितामह इति ज्ञातव्यम् ॥ ६ ॥

गन्धवस्तुषु तद्देहं निधाय मुनिसत्तमाः ।
समाप्ते सत्रयागेऽथ देवानूचुः समागतान् ॥ ७ ॥

सत्यधर्मीया — गन्धवस्तुषु सुगन्धतैलादिषु तद्देहं निमिदेहं निधाय सत्रमपारयन् । सत्रयागे समाप्ते मुनिसत्तमा अध्वर्य्वादयः समागतानाहुत्याद्यर्थमाहूतानथ चागतान्देवानूचुः ॥ ७ ॥

छलारी — तद्देहं निमिदेहं गन्धवस्तुषु गन्धवासिततैलेषु ॥ ७ ॥

राज्ञो जीवतु देहोऽयं प्रसन्नाः प्रभवो यदि ।
तथेत्युक्ते निमिः प्राह मा भून्मे देहबन्धनम् ॥ ८ ॥

सत्यधर्मीया — किमाहुरित्यत आह ॥ राज्ञ इति । यदि प्रभवो यूयं प्रसन्नास्तर्हि राज्ञो निमेरयं रक्षितो देहो जीवतु सजीवो भवतु । तथेति देवैरुक्ते सति सजीवो निमिर्मम देहबन्धनं मा च भूदिति प्राह ॥ ८ ॥

छलारी — ऋषिसत्तमाः ऊचुः । हे प्रभवः । यूयं यदि प्रसन्नास्तर्हि जीवत्विति । मुनिभिरुक्तेति शेषः । तथेत्युक्ते देहो निमिर्देहबन्धनं देहसम्बन्धः ॥ ८ ॥

यस्य योगं न वाञ्छन्ति वियोगभयकातराः ।
भजन्ति चरणाम्भोजं मुनयो हरिमेधसः ॥ ९ ॥

सत्यधर्मीया — वियोगभयकातरा यस्य देहस्य योगं सम्बन्धं न वाञ्छन्ति मुनयो हरिश्चासौ मेधाश्च ज्ञानात्मकस्य तस्य चरणाम्भोजं भजन्तीति वा । चरणाम्भोजं चरणयोरम्भोजा रमाऽम्भोजो विधिश्च यस्य तं हरिं भजन्ति । एधसोऽरणेर्हरिं निष्कृष्य वह्निं यथा तथा भजन्तीति वा । वातार्कवह्निषु हरिरिति वोपालितः ॥ ९ ॥

छलारी — यस्य देहस्य वियोगभयेन कातरा उद्विग्नाश्चंचलाश्चरणांभोजम् । हरेरेति शेषः । हरिमेधसस्तत्त्वज्ञानिनः ॥ ९ ॥

देहं नावरुरुत्सेऽहं दुःखशोकभयाश्रयम् ।
सर्वत्रास्य यतो मृत्युर्मत्स्यानामुदके यथा ॥ १० ॥

सत्यधर्मीया — दुःखमन्तःस्था वेदना । शोकः बहिर्दृश्यमानं दुःखम् । दुःखं दुर्दुःखं खं सुखं तत्रापि दुरिति पूर्वं ग्रहणाद्दुःखं भूयिष्ठं सुखमल्पमिति ज्ञायते । दुर्दुःखमिति सम्प्रोक्तं सुखं खं चोच्यते बुधैरिति तात्पर्यान्तरात् । तस्यापि हेयत्वात् । शोकः केवलं दुःखं भयं येषामाश्रयो यत्रेति वा । यतः कारणादस्य देवस्य सर्वत्रापि मृत्युस्ततस्तमहं प्राप्य नावरुरुत्सेऽधोऽवरोहणं नेच्छामि । मत्स्यानां यथोदके मृत्युस्तथेति । सत्सु नानाविधेषु मीनोपादानं भाविस्वव्यापारानुकूलता कोपेनेति मन्तव्यम् । तेषामनिमिषत्वात् ॥ १० ॥

छलारी — तं देहं नावरुरुत्से न स्वीकर्तुमिच्छामि । अस्य देहस्य सर्वत्र मनुष्यादिदेहेषु ।। उदके समुद्राद्युदके ।। १० ।।

देवा ऊचुः—

विदेह उष्यतां कामं लोचनेषु शरीरिणाम् ।
उन्मेषणनिमेषाभ्यां लक्षितोऽध्यात्मसंस्थितः ।। ११ ।।

सत्यधर्मीया — शरीरिणां देहधारिणां जनानां लोचनेषु नयनेषु विदेहे स्थूलशरीरे रहितः सन्नेवोष्यतां वसतु । स त्वेवमवसेय इत्याह ।। उन्मेषणेति । पक्ष्ममीलननिमीलनाभ्यां लक्षितो ज्ञातोऽध्यात्मसंस्थितोऽधिकश्चैवाप्तबन्धकत्वेन स चासावात्मा विलक्षणं शरीरम् । तत्र संस्थितः कलेवरं वर्जयित्वा केवलं व्यापारकरणस्यासम्भावितत्वादिति केचित् । भगवदुपासनायुक्त इत्यभियुक्ताः । एतदुपात्तशापस्य वसिष्ठस्य दशा का तदज्ञानेऽयमेतदपि नानुमन्येतेत्यत आहुः । अध्यात्मस्थितोऽवशिष्टं काममूर्वशीच्छां निमित्तीकृत्य विदेहो विलक्षणदेहः सन् लक्षितोऽयमपि विदेहे उष्यतामित्यन्वयः । अनेनाध्यात्मकोविदो मित्रावरुणयोर्जज्ञ इत्यनुसृतं पूर्ववचनमित्यपि वर्णयन्ति । तदेतदुभयाभयं देवा दत्वाऽगच्छन्निति भावः ।। ११ ।।

छलारी — निमिर्विदेहः सन् लोचनेषूष्यतां वसतु । एवं सति युष्माभिः प्रार्थितं जीवितमस्य भविष्यतीति भावः । कथं ज्ञायत इति तत्राह ।। उन्मेषणेति । उन्मेषणनिमेषणाभ्यां प्रवर्तकत्वेन लक्षितो ज्ञायमानः । किमस्य कर्मेति तत्राह ।। अध्यात्मेति । अधिकश्चासावात्मा च हरिस्तत्र संस्थितः परमात्मोपासनायुक्त इत्यर्थः ।। ११ ।।

अराजकभयं नृणां मन्यमाना महर्षयः ।
देहं ममन्थुश्च निमेः कुमारः समजायत ।। १२ ।।

सत्यधर्मीया — राजाभावप्रयुक्तं भयम् ।। १२ ।।

छलारी — मृतादपि निमेर्देहाद्वंशप्रवृत्तिं दर्शयति ।। अराजकभयमिति ।। १२ ।।

जननाज्जनकः सोऽभूद् वैदेहस्तु विदेहजः ।
मिथिलो मथनाज्जातो मिथिला येन निर्मिता ।। १३ ।।

सत्यधर्मीया — तस्य नामप्रवृत्तिनिमित्तं च कथयति ।। जननादिति । जननाज्जनको वैदेहो विदेहनिमिजत्वात् । मथनाज्जात इति मिथिलः । मिथिलादयश्चेत्यत्र मथ्यन्ते रिपवोऽत्रेति निमित्तान्तरम् । शब्दस्तूभयथापि निपातितः । येन मिथिला नगरी च निर्मिता व्यरचि ।। १३ ।।

छलारी — अस्यान्वर्थानि त्रीणि नामान्याह ।। जननादिति । सः कुमारोऽसाधारण्येन जननाज्जनको विदेहो निमिस्तद्देहजन्यत्वाद्वै देहः । मिथिला येन निर्मितेत्यनेन व्युत्पत्त्यनन्तर-मर्थादुक्तम् ।। १३ ।।

तस्मादुदावसुस्तस्य पुत्रोऽभून्नन्दिवर्धनः ।
ततः सुकेतुस्तस्यापि देवरातो महीपतिः ।। १४ ।।

सत्यधर्मीया — तस्माज्जनेन लोकानामराजकभयभङ्गेन तस्माज्जनकात् । तस्योदावसोस्ततो नन्दिवर्धनात्तस्य सुकेतोर्देवरातः ।। १४ ।।

छलारी — तस्मात्कुमारादुदावसुः । देवरातस्तन्नामा ।। १४ ।।

तस्माद् बृहद्रथस्तस्य महावीर्यः सुधृत्पिता ।
सुधृतेर्धृष्टकेतुर्वै हर्यश्वोऽथ मरुस्ततः ।। १५ ।।

सत्यधर्मीया — तस्माद्देवरातात्तस्य बृहद्रथस्य सुधृतः पिता महावीर्यो नाम्ना । अथ धृष्टकेतोर्हर्यश्वस्ततो हर्यश्वान्मरुः ।। १५ ।।

छलारी — कथम्भूतः । महावीर्यः । सुधृत्पिता सुधृतो जनको महावीर्यात्सुधृन्नामकाज्जात इत्यर्थः । ततो धृष्टकेतोर्हर्यश्वः ।। १५ ।।

मरोः प्रतीन्धकस्तस्माज्जातः कृतरथो यतः ।
देवमीढस्तस्य सुतो विधृतोऽथ महाधृतिः ।। १६ ।।

सत्यधर्मीया — तस्मात्प्रतीन्धकात् । यतः कृतरथात्तस्य देवमीढस्य विधृतोऽथ महाधृतिः ।। १६ ।।

छलारी — यतः कृतरथाद्देवमीढो जातस्तस्य देवमीढस्य । अथ विधृतात् ।। १६ ।।

कृतिरातस्ततस्तस्मान्महारोमाऽथ तत्सुतः ।
स्वर्णरोमा सुतस्तस्य ह्रस्वरोमा व्यजायत ॥ १७ ॥

सत्यधर्मीया — ततो महाधृतेस्तस्मात्कृतिरातात्तत्सुतो महारोमकुमारस्तस्य स्वर्णरोमनाम्नस्ततो ह्रस्वरोम्णः ॥ १७ ॥

छलारी — ततो महाधृतेः कृतिरातोऽथानन्तरं तत्सुतः स्वर्णरोमाः । ह्रस्वरोमाख्यः सुतः ॥ १७ ॥

ततः सीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीम् ।
सीता सीराग्रतो जाता तस्मात् सीरध्वजः स्मृतः ॥ १८ ॥

सत्यधर्मीया — जनकमिथिलविदेहनामानि कुलस्यैवेति विशेषनिरुक्तिं दर्शयति ॥ यज्ञार्थमिति । सीरस्य लाङ्गलस्याग्रतस्तस्मात्सीरध्वजं चिन्हं ज्ञापकं यस्य स सीरध्वजः । ध्वजं चिन्ह इति विश्वः । ध्वजध्वजीति ध्वजिर्गत्यर्थः । सीता च सीरध्वजकन्यकेत्यादेः ॥ १८ ॥

छलारी — ततो ह्रस्वरोम्णः सीरध्वजो जज्ञे । सीरध्वजस्य जनकेति सांकेतिकं नाम । मिथिलाधिपतित्वान्मिथिलेति नाम । विदेहदेशाधिपतित्वाद्विदेह इति नामेति नामत्रयं प्रसिद्धि-बलात्ज्ञेयम् । कर्षतः । सीरध्वजापरपर्यायस्य । जनकस्येति शेषः । तस्माद्धेतोर्जनकः सीरध्वजः । सीताजन्महेतुत्वेन सीरध्वजं गमकं ज्ञापकं यस्य स तथा सीरध्वज इति स्मृतः । ध्वज गताविति धातोः ॥ १८ ॥

कुशध्वजस्तस्य पुत्रस्ततो धर्मध्वजो नृप ।
धर्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ ॥ १९ ॥

सत्यधर्मीया — तस्य सीरध्वजस्य ततः कुशध्वजाद्धर्मध्वजः ॥ १९ ॥

छलारी — तस्य सीरध्वजस्य ॥ १९ ॥

कृतध्वजात् केशिध्वजः खाण्डिक्यस्तु मितध्वजात् ।
कृतध्वजसुतो राजन्नात्मविद्याविशारदः ॥ २० ॥

सत्यधर्मीया — आत्मविद्याविशारदः कुशलः ॥ २० ॥

छलारी — कृतध्वजसुतः केशिध्वजः ॥ २० ॥

खाण्डिक्यः कर्मतत्त्वज्ञो भीतः केशिध्वजाद् गतः ।
भानुमांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु तत्सुतः ॥ २१ ॥

सत्यधर्मीया — केशिध्वजात्कृतध्वजजाद्भीतो, ज्ञानित्वाद्गतो वनम् । तस्य खाण्डिक्यस्य, तत्सुतो भानुमत्सुतः ॥ २१ ॥

छलारी — ततः केशिध्वजस्य । पण्डितत्वाद्देशान्तरं गतः । तस्य केशिध्वजस्य ॥ २१ ॥

शुचिस्तु तनयस्तस्मात् सनद्वाजस्ततोऽभवत् ।
ऊर्जकेतुः सनद्वाजादजोऽथ कुरुजित्सुतः ॥ २२ ॥

सत्यधर्मीया — तस्माच्छतद्युम्नात्तस्माच्छुचेस्तनयो नाम्ना । ततस्तनयनामकात्सनद्वाजोऽभवत् । तत इति वा तनयः पुत्रोऽभवत् । अन्यथा तनयस्तस्मात्सनद्वाजात्तत इत्येतदन्यतमे व्यर्थं स्यादिति ज्ञेयम् । अथोर्जकेतुसुतादजनामकात्कुरुजितः ॥ २२ ॥

छलारी —. तत इत्यस्योत्तरत्र सम्बन्धः । तत ऊर्जकेतोरजः सुतः । अथाजस्य कुरुजिन्नामसुतः ॥ २२ ॥

अरिष्टनेमिस्तस्यापि श्रुतायुस्तत्सुपार्श्वकः ।
ततश्चित्ररथो यस्य क्षेमापिर्मिथिलाधिपः ॥ २३ ॥

सत्यधर्मीया — तस्यारिष्टनेमेस्ततः श्रुतायोर्यस्य चित्ररथस्य क्षेमापिः ॥ २३ ॥

तस्माद्धेमरथस्तस्य सुतः सत्यरथस्ततः ।
आसीदुपगुरुस्तस्मादुपगुप्तोऽग्निसम्भवः ॥ २४ ॥

सत्यधर्मीया — तस्मात्क्षेमापेस्तस्य हेमरथस्य ततः सत्यरथात्तस्मादुपगुरोरुपगुप्तोऽग्निसम्भवोऽग्न्यंशः ॥ २४ ॥

छलारी — तस्य कुरुजितः । तस्येत्यस्योत्तरत्रापि सम्बन्धः । तस्यारिष्टनेमेः श्रुतायुः । तस्य सुपार्श्वकृत्तस्मादुपगुरोरुपगुप्तः । अस्योपगुप्तस्याग्निसंभवः । तन्नामा सुतः ॥ २४ ॥

वैवस्वतोऽथ तत्पुत्रो युयुधो यत्सुभाषणः ।
श्रुतस्ततो जयस्तस्माद् विजयोऽस्माद् ऋतः सुतः ॥ २५ ॥

सत्यधर्मीया — तस्योपगुप्तस्य । तत्पुत्रो वैवस्वतसुतो युयुधः । यद्यतः सुभाषणो विजयोऽस्माज्जयात्ततो विजयस्य ॥ २५ ॥

छलारी — अथाग्निसंभवाद्वैवस्वतः । युयुधानस्तत्पुत्रो वैवस्वतपुत्रः । सुभाषणः । तत्पुत्र इत्यनुवर्तते । युयुधानपुत्रः । ततः सुभाषणादस्माद्विजयादृतनामा सुतः ॥ २५ ॥

शुनकस्तत्सुतो जज्ञे वीरहव्यो धृतिस्ततः ।
बहुलाश्वो धृतस्तस्य कृतिरस्य महावशी ॥ २६ ॥

सत्यधर्मीया — शुनकः सुत इत्यन्वयः । ततो वीरहव्यात्तस्य बहुलाश्वस्यास्य धृतेः ॥ २६ ॥

छलारी — शुनकस्तत्सुतो ऋतसुतो वीरहव्यस्तत्सुतः शुनकसुतः सन् जज्ञे । ततो वीरहव्याद्धृतः । महावशी तन्नामा सुतः ॥ २६ ॥

एते वै मिथिला राजन्नात्मविद्याविशारदाः ।
योगेश्वरप्रसादेन द्वन्द्वैर्मुक्ता गृहेष्वपि ॥ २७ ॥

इति श्रीमद्भागवते नवमस्कन्धे एकादशोऽध्यायः ।

सत्यधर्मीया — योगेश्वरस्य याज्ञवल्क्यस्य प्रसादेन तत्त्वोपदेशमाहात्म्येन गृहेष्वपि सन्तो द्वन्द्वैः शीतोष्णादिभावैर्विमुक्ता आत्मारामा इति यावत् । मिथिलायां दह्यमानायां न मे दह्यति किञ्चनेत्यादिप्रसिद्धिः । शाण्डिल्यतत्त्वोक्तेर्व्यासो योगेश्वरस्तत्प्रसादेनेति वा । एवं हि तत्र विद्यमानेषु यतिषु भगवान्बादरायणः । जनकं तु निरीक्ष्यैव व्याजहार महीपतिमित्यारभ्याष्टादशाध्यायावसानमनुवर्णितमनुसन्धेयम् ॥ २७ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे एकादशोऽध्यायः ।

छलारी — एते निमिदेहोत्पन्ना जनकादयो मिथिलाधिपतित्वेन तन्नामका आत्मविद्याविशारदा ब्रह्मविद्याविशारदा गृहेषु स्थिता अपि योगेश्वरा योगेश्वरो याज्ञवल्क्यस्तत्प्रसादेन द्वन्द्वैः शीतोष्णादिभावैर्मुक्ताः । द्वन्द्वैर्मुक्ता इत्यनेनैतत्कीर्तनादिकमत्यन्तसफलमिति सूचयति ॥ २७ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे एकादशोऽध्यायः ।

॥ अथ द्वादशोऽध्यायः ॥

श्रीशुक उवाच —

अथातः श्रूयतां राजन् वंशः सोमस्य पावनः ।
यस्मिन्नैलादयो भूपाः कीर्त्यन्ते पुण्यकीर्तयः ॥ १ ॥

सत्यधर्मीया — कृष्णाद्युत्कृष्टपुरुषावतारतच्चरितादियुततया अतिश्रवणीयसोमवंशशंसनं प्रतिश्रुत्य तदुपयुक्तां काञ्चित्कथां कथयति ॥ अथेति । अतो वक्ष्यमाणैतद्धेतोः । अतः सूर्यवंश-शंसनानन्तरं पावयतीतरानिति स तथा । यस्मिन्वंशे ऐलादयः । मूलभूत इत्यैलोक्तिः । पुरस्तात् पुण्यकीर्तयश्च कीर्त्यन्तेऽतः पावनः स वंशः श्रूयताम् ॥ १ ॥

छलारी — एवं सूर्यवंशपरिकरं निरूप्यासमाप्तिसोमवंशमाह ॥ अथात इति । अथ सूर्यवंश-कथनानन्तरं पुण्यश्लोकराजवंशज्ञानं पुरुषार्थसाधनमतस्तस्मात्सोमवंशः श्रूयताम् । ऐलादयः । बुधादिलायां जातः पुरूरवा ऐलः स एवादिर्येषां ते ॥ १ ॥

सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात् ।
जातस्यासीत् सुतो धातुरत्रिः पितृसमो गुणैः ॥ २ ॥

सत्यधर्मीया — सहस्रशिरसः । सहस्रशीर्षा पुरुष इत्यादेः । पुंसः पुरुषरूपिणो नाभिह्रद-सरोरुहान्नाभिह्रद एव सरस्तद्रुहात्कमलाज्जातस्य धातुर्विधातुर्गुणैः पितृसमोऽत्रिः पुत्रः आसीत् ॥२॥

छलारी — पुंसोऽण्डान्तर्गर्भोदके शयानस्य पुरुषनामकस्य हरेरित्यर्थः । नाभिह्रद-सरोरुहाज्जातस्य धातुः ॥ २ ॥

तस्य दृग्भ्योऽभवत् पुत्रः सोमोऽमृतमयः किल ।
विप्रौषध्यम्बुगर्भाणां ब्रह्मणा कल्पितः पतिः ॥ ३ ॥

सत्यधर्मीया — तस्यात्रेर्दृग्भ्यो नेत्रानन्दाश्रुभ्यः । अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषान् । दत्तं दुर्वाससं सोममात्मेशब्रह्मसम्भवानित्युक्तेः । भार्यासाम्मुख्येन तत्दृग्भ्यां सह पितृदृग्भ्यां चेति दृग्भ्य इत्यक्तिरित्यपि केऽपि वर्णयन्ति । अमृतमयोऽमृतं माययति गमयति बहिः किरणद्वारेति स तथा । किलेति तदुद्भूत्यद्भुततां सूचयति । विप्रौषध्युडुगर्भाणामौषध्यम्बुगर्भाणामित्युभावपि सुभावौ पाठौ । विप्रा ब्राह्मणाः सोमो वै राजा ब्राह्मणानामोषधयः संवदन्ते सोमेन सह राज्ञेत्यादेः । ओषधयश्चोडव उडूनिव नक्षत्राणि । उड वास्त्रियामित्यमरः । गर्भाश्च तदीयगर्भोदकाश्च तेषामम्बुगर्भाणां कुमुदादीनां ब्रह्मणा पितामहेन पतिः कल्पितः ॥ ३ ॥

छलारी — तस्यात्रेर्दृग्भ्य आनन्दाश्रुभ्योऽत एवामृतमयः । किलेत्याश्चर्ये । अस्य वक्ष्यमाणदर्प-कारणमाह । विप्रेति । यः सोमः विप्राणामोषधीनामम्बुगर्भादीनां कुमुदादीनां पतिः पतित्वेन कल्पितः ॥ ३ ॥

सोऽयजद् राजसूयेन विजित्य भुवनत्रयम् ।
पत्नीं बृहस्पतेर्दर्पात् तारां नामाहरद् बलात् ॥ ४ ॥

सत्यधर्मीया — स सोमो राजसूयेनायजत् । बृहस्पतेः पत्नीं नाम नाम्ना तारां बलाद्दर्पात्स्वयम्भुवा दत्तमिति दर्पादहरज्जहार ॥ ४ ॥

यदा स देवगुरुणा याचितोऽभीक्ष्णशो मदात् ।
नात्यजत् तत्कृते जज्ञे सुरदानवविग्रहः ॥ ५ ॥

सत्यधर्मीया — यदाऽहरत्स सोमोऽभीक्ष्णशः पुरुवारं याचितोऽपि नात्यजत्तदा तत्कृते तारार्थं सुरदानवविग्रहः जज्ञे ॥ ५ ॥

छलारी — अभीक्ष्णशो बहुवारं तत्कृते तारार्थम् ॥ ५ ॥

शुक्रो बृहस्पतेर्द्वेषादग्रहीत् सासुरोडुपम् ।
हरो गुरुसुतस्नेहात् सर्वभूतगणावृतः ॥ ६ ॥

सत्यधर्मीया — असुरैः सहितश्च स उडुपश्च तमग्रहीद्दधार । हरः स्मरहरो गुरुसुतस्नेहाद्गुरोरङ्गिरसः सुत इति स्नेहात्सर्वभूतगणैः प्रमथयूथेनावृतः परिवृतः ॥ ६ ॥

छलारी — सुराणां दानवानां च विग्रहे कारणमाह ॥ शुक्र इति । बृहस्पतेर्द्वेषाद्बृहस्पतिविषयकद्वेषात् । उडुपमग्रहीत् । शरणागतं गुरुपत्नीसहितं सोमं शुक्रः सासुरः सन् जगृहे इत्यर्थः । सन्धिरार्षः । गुरोरंगिरसः सुतं बृहस्पतिमग्रहीत् । अङ्गिरसः सकाशात्प्राप्तविद्याधर इति प्रसिद्धिः ॥ ॥ ६ ॥

सर्वदेवगणोपेतो महेन्द्रो गुरुमन्वयात् ।
सुरासुरविनाशोऽभूत् समरस्तारकामयः ॥ ७ ॥

सत्यधर्मीया — सुराश्चासुराश्च सुरासुरं तस्य विनाशो यस्मिन्स तारकामयस्तारैव तारका । स्वार्थे कः । तत्प्रधानकस्तन्निमित्तक इति यावत् । समरो युद्धम् । ताराया अयं तारः स चासौ कामश्च तस्येदमिति पार्थ इत्यत्रेवाण् । तेन तदिच्छया या मौर्व्यो यानि यानानि वा यस्मिन्स इति वा । यः सर्वनामानिलयोर्मौर्वीयम् । यशो यानयोरिति विश्वः ॥ ७ ॥

छलारी — सुरासुराणां नाशो यस्मिन्स तथा । तारकामयो गुरोर्भार्या तारा तारैव तारका । स्वार्थे कप्रत्ययः । ताराप्रधानसमर इत्यर्थः ॥ ७ ॥

निवेदितोऽजोऽङ्गिरसा सोमं निर्भर्त्स्य विश्वकृत् ।
तारां स्वभर्त्रे प्रायच्छदन्तर्वत्नीं बृहस्पतिः ॥ ८ ॥

सत्यधर्मीया — अजो ब्रह्माऽङ्गिरसा बृहस्पतिपित्रा निवेदितोऽयमन्यायस्त्वयि सति कथमिति ज्ञापितः । अन्तर्वत्नीं तारां स्वभर्त्रे बृहस्पतये प्रायच्छद्वितताार ॥ ८ ॥

छलारी — अङ्गिरसा बृहस्पतिपित्रा निवेदितो विज्ञापितोऽजो ब्रह्मा बृहस्पतिस्तामन्तर्वत्नीं गर्भिणीमवैदबुध्यत ॥ ८ ॥

गर्भं त्यजाशु दुष्प्रज्ञे मत्क्षेत्रादाहितं परैः ।
नाहं त्वां भस्मसात् कुर्यां स्त्रियं सान्तानिके सति ॥ ९ ॥

सत्यधर्मीया — हे दुष्प्रज्ञे परैराहितम् । यद्यप्येकश्चन्द्र इति परेणेति वाच्यम् । तथापि सुवासिन्यविश्वसनीया चेत्सन्देहसन्दोहास्पदमिति लौकिकीं धाटीमाटीकमानः परैरित्युवाचेति ज्ञेयम् ।

आहितं गर्भमाशु मत्क्षेत्रान्मत्स्वामिकात्त्वद्रूपात्त्यज स्रंसय । अहं स्त्रियं त्वां भस्मसान्न कुर्यां तत्रापि सान्तानिके सुते सति स्त्रीमात्रं न घातये । त्वां तु गर्भिणीं न भस्मसात्करोमीति किं वक्तव्यमिति भावः । हे सान्तानिके सन्तानं कुं कुत्सितं तत्सम्बन्धिनीति सान्तानिके दुःसन्तानवति । हे असति स्वैरिणि स्त्रियं स्त्रीति न भस्ममात्कुर्यामिति वा । त्यज त्यजेति पाठे यत्परैराहितं तन्मत्क्षेत्रान्मत्क्षेत्रमततीति तत्तथा सन्तानं त्यज त्यजेति बहु हेयतया द्विरुदाजहारेति ज्ञेयम् ॥ ९ ॥

छलारी — बृहस्पतिराह ॥ त्यजेति । मत्क्षेत्रादित्यव्ययम् । मद्भार्यायां त्वयि निहितं गर्भमित्यर्थः । त्यज त्यजेत्याक्रोशाद्विरुक्तिः । गर्भिणीं न हन्यादित्युक्तेः । गर्भे सति न हन्यात् । गर्भे त्यक्ते मां हनिष्यतीति बिभ्यतीं प्रत्याह ॥ नाहमिति । कुत इत्यत आह ॥ स्त्रियमिति । हेतुगर्भमिदम् । हे सान्तानिके । दुष्टसन्तानयुक्ते । हे असति दुष्टे ॥ ९ ॥

तत्याज व्रीडिता तारा कुमारं कनकप्रभम् ।
तस्यां जज्ञे दस्युहन्ता कुमारः कनकप्रभः ॥ १० ॥

सत्यधर्मीया — कनकप्रभं कुमारं षण्मुखं सतीव गर्भं तत्याज । तस्यां तारायां दस्युहन्ता कनकप्रभः स्वर्णवर्णः कुमारो जज्ञे ॥ १० ॥

छलारी — तत्याज सुषुवे ॥ १० ॥

स्पृहामाङ्गिरसश्चक्रे कुमारे सोम एव च ।
ममायं न तवेत्युच्चैस्तयोर्विवदमानयोः ॥ ११ ॥

सत्यधर्मीया — आङ्गिरसो बृहस्पतिः सोमश्चन्द्रश्च स्पृहाश्चक्र इति पृथगन्वयः । तयोर्विवदमानयोः । भासनेत्याद्यात्मनेपदम् । तस्मिन्निति पाठे पुत्रविषय इत्यर्थः । सतोः ॥ ११ ॥

छलारी — अङ्गिरसो बृहस्पतेः । सोम एवं सोमोऽपि तस्मिन्कुमारे विवदमानयोः सतोः ॥११॥

पप्रच्छुर्ऋषयो देवा नैवोचे व्रीडिता च सा ।
कुमारो मातरं प्राह कुपितोऽलीकलज्जया ॥ १२ ॥

सत्यधर्मीया — ऋषयो देवाश्च पप्रच्छुः । सा व्रीडिता नैवोचे । अलीकलज्जया रहस्यं बहिः पततीत्यप्रियनिमित्तकलज्जया । अलीकमप्रियाकार्येति विश्वः । अकार्यमिति लज्जयेति वा ॥ १२ ॥

छलारी — पप्रच्छुः । तारामिति शेषः । अलीकलज्जयाऽनृतनिमित्तलज्जया ॥ १२ ॥

किं न वोचस्यसद्वृत्ते पितरं मे वदाशु वै ।
न त्वां तु भस्मसात् कुर्यामात्मावद्यविगूहीनीम् ॥ १३ ॥

सत्यधर्मीया — हे असद्वृत्ते दुराचारे । किन्न वोचसि । छान्दसम् । न वदसि पितरमन्यतरमाशु वद । उच समवाय इति शन्विकरणस्थोचधातोर्गणकार्यस्यानित्यत्वानुशासनाद्बहुलमेतन्निदर्शनमिति, शप्रत्यये किं उचसि समवायं समाहारं मैत्रावरुणिवद्दक्षरजोवच्चन्द्रस्य बृहस्पतेश्च करोषि किं न वा नैवम् । सोमसामानाधिकरण्याभावाद्बृहस्पतेः । अतो मे पितरमन्यतरं वदेति वा । यावत्तावदित्यध्याहार्यौ । अवद्यविगूहिनीं स्वपापं गूहयतीति सा तथा तां त्वां यावद्भस्मसान्न कुर्यां तावत्तत्त्वं वद ॥ १३ ॥

छलारी — असद्वृत्ते दुराचारे । न वोचसि न कथयसि । न वोचसीति छान्दसम् । आत्मावद्यस्य स्वदोषस्य निगूहिनीमाच्छादनकरीम् । आत्मावद्यनिगूहिनीमित्यनेन भस्मीकरणयोग्यत्वे सूचितेऽपि मातृशब्दवाच्यत्वात्त्वां न भस्मीकरोमीति सूचिता ॥ १३ ॥

ब्रह्मा तं तु विनिर्भर्त्स्य क्षेप्तारं मातुरन्तिके ।
तामाहूय समप्राक्षीद् रह एव तु सान्त्वया ॥ १४ ॥

सत्यधर्मीया — ब्रह्मा तं तु कुमारं निर्भर्त्स्य रे जाल्म किं जल्पसीति भर्त्सयित्वा । तत्र निमित्तमाह ॥ अन्तिके स्वसमीप इति । मातुर्मातरं क्षेप्तारं तिरस्कुर्वन्तम् । सान्त्वया वाचैव तां तारां रह एकान्ते आहूय समप्राक्षीत्पप्रच्छ ॥ १४ ॥

छलारी — मातुः क्षेप्तारं निन्दकं समप्राक्षीत्प्रश्नं चकार । रह एकान्ते सान्त्वया समाधानवाचा ॥ १४ ॥

सोमस्येत्याह शनकैः सोमस्तं तावदग्रहीत् ।
तस्यात्मयोनिरकृत बुध इत्यभिधां नृप ॥ १५ ॥

सत्यधर्मीया — यावच्छनकैरिति लज्जया सोमस्येत्याह तावत्सोमस्तं सुतमग्रहीदुपादत्त । आत्मा योनिः कारणं यस्य सः । बुध इत्यभिधामकृत ॥ १५ ॥

छलारी — तं कुमारम् । आत्मयोनिर्ब्रह्मा ।। १५ ।।

बुद्ध्या गम्भीरया येन पुत्रेणापोडुराण् मुदम् ।
ततः पुरूरवा जज्ञे इलायां य उदाहृतः ।। १६ ।।

सत्यधर्मीया — न नामेदं तक्रविकलस्य क्षीरसागरभट्टेति नामवदित्याह । गम्भीरया गहनया बुध्याति । येन पुत्रेणोडुराड् ऋक्षाध्यक्षो मुदमाप । ततस्तस्माद्बुधादिलायाम् । य उदाहृत इत्युदाहरणं तस्या एव सुद्युम्नत्वेन पुमवस्थाव्यवस्थयाऽभवदिति पूर्वोक्तस्मारणार्थमिति ज्ञेयम् । यद्वा पुरूरवा उदाहृतस्तस्येत्युत्तरेणान्वयः ।। १६ ।।

छलारी — बुध इति नामकरणनिमित्तमाह ।। बुद्ध्येति । येन पुत्रेण । ततो बुधात् । उदाहृतो द्वितीयाध्याये ।। १६ ।।

तस्य रूपगुणौदार्यशीलद्रविणविक्रमान् ।
श्रुत्वोर्वशीन्द्रभवने गीयमानान् सुरर्षिणा ।। १७ ।।

सत्यधर्मीया — सुरर्षिणा नारदेन ।। १७ ।।

छलारी — पुरूरवसः सकाशादुर्वश्यां प्रमुखाः षट् पुत्रा जाता इति वक्तुमुपोद्घातमाह ।। तस्येत्यादिना ।। १७ ।।

तदन्तिकमुपेयाय देवी स्मरशरार्दिता ।
मित्रावरुणयोः शापादापन्ना नरलोकताम् ।। १८ ।।

सत्यधर्मीया — तदन्तिकं पुरूरवसः समीपमुपेयाय प्रापत् । स्वयमेवागमने कारणमाह । स्मरस्य मन्मथस्य शरैरर्दितोपद्रुतेति । स्मरो नारदोक्तगुणविषयकस्थिरस्मरणं मनः स एव शरस्तेनार्दितेति वा । यथोक्तं छान्दोग्यभाष्ये । अस्थिरस्मरणं चित्तं स्थिरस्मरणं स्मर इति । मानुषी मानुषं प्रत्यागतेति नाद्भुतमित्यत आह ।। देवीति । देवोपभोग्येति देवीति तथा । तर्हि किमित्यापदियमापत्तस्या इत्यत आह ।। मित्रावरुणयोरिति । यद्यपि शाप उभाभ्यां न दत्तः किन्त्वेकेन मित्रेण । यथोक्तं रामायणे ।

तां तु मित्रः सुसङ्क्रुद्ध ऊर्वशीमिदमब्रवीत् ।
मयाऽभिमन्त्रिता पूर्वं कस्मात्त्वमवसर्जिता ।

पतिमन्यं वृतवती किमर्थं दुष्टचारिणि ।
अनेन दुष्कृतेन त्वं मत्क्रोधकलुषीकृता ।
मनुष्यलोकमास्थाय कश्चित्कालं निवत्स्यसि ।
बुधस्य पुत्रो राजर्षिः काशिराजः पुरूरवाः ।
तमभ्यागच्छ दुर्बुद्धे स ते भर्ता भविष्यतीति । तथाऽपि
तमेव कालं मित्रोऽपि वरुणत्वमकारयत् ।
क्षीरोदेन सहोपेतः पूज्यमानः सुरेश्वरैः । इति

तत्रैवोक्तेर्वरुणत्वं मित्रस्येति मित्रावरुणयोरित्युक्तिः ।

मित्रश्च वरुणश्चैव दीक्षितौ प्रेक्ष्य चोर्वशीम् ।
रेतः सिषिचतुस्सद्यस्तत्कुम्भे न्यदधुस्तदा ।

तां शप्तवन्तौ मनुजभोग्या भूम्यां भवेति तौ । इति । माधवः वेदव्याख्यायां पुराणान्तरमुदजहार तत उभयोरिति सम्भवति । किञ्च ब्रह्मशापोऽप्युपलक्षणीयः । यथोक्तं हरिवंशे ।

देवानुत्सृज्य सम्प्राप्ता तन्मे ब्रूहि बहुश्रुत ।
ब्रह्मशापाभिभूता सा मानुषं समुपस्थितेति ।

अतः सम्भवति मित्रावरुणयोः शापेनेतीति मन्तव्यम् । नरलोकतां मनुष्यसङ्गयोग्यशरीरवत्ताम् ॥ १८ ॥

छलारी — ननु देवी कुतो मनुष्यान्तिकमागतेति तत्राह ॥ मित्रावरुणयोरिति ॥ १८ ॥

निशाम्य पुरुषश्रेष्ठं कन्दर्पमिव रूपिणम् ।
धृतिं विहाय ललना उपतस्थे तदन्तिकम् ॥ १९ ॥

सत्यधर्मीया — रूपिणं रूपवन्तं धृतिं स्थगनम् । एतेन पुरूरसः पुरुपारवश्यं नार्या द्योत्यते । तदन्तिके उपतस्थे ॥ १९ ॥

छलारी — उपतस्थे तस्थौ ॥ १९ ॥

स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः ।
उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः ॥ २० ॥

सत्यधर्मीया — देवीमिति स्वप्राप्त्ययोग्यतां ध्वनयति ॥ २० ॥

छलारी — श्लक्ष्णया मधुरया ॥ २० ॥

राजोवाच —

स्वागतं ते वरारोहे आस्यतां करवाम किम् ।
संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः ॥ २१ ॥

सत्यधर्मीया — हे वरारोहे वरावुत्तमावारोहौ ऊरू यस्याः सा तत्सम्बुद्धिः । ते स्वागतं सुस्वागतमास्यतां त्वया । वयं किं करवाम किं कुर्मः । मया साकं संरमस्व । नौ आवयोः शाश्वतीः समा रतिः सुरतक्रीडासक्तिरस्त्वित्युवाचेत्यतीतेनान्वयः । करवाम इति बहुवचनेन मया नाविति वचनेन वाऽङ्गस्मरणं न नरवरस्येति ध्वन्यते । इतरत्प्रयोजनं त्वदीप्सितं चेन्मदादिभिः कर्तुं शक्यमिति वा करवाम किमिति । उत्तरत्र स्वकामनानुसारेण स्वतन्मात्रपर्यवसन्नं कार्यं तदिति मया नावित्युक्तिरिति ज्ञेयम् ॥ २१ ॥

छलारी — नावावयोः शाश्वतीर्बह्वीः समाः संवत्सरान् । रतिरस्तु ॥ २१ ॥

ऊर्वश्युवाच —

कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुन्दर ।
यदङ्गान्न रमा याति स दृष्टो हरिराश्रयः ॥ २२ ॥

सत्यधर्मीया — सुन्दर हे पुरूरवो यदङ्गाद्यस्य हरेरङ्गादुरोरूपाद्रमा न याति क्वापि तत्सौन्दर्यलुब्धा नापगच्छति स हरिस्तव दृष्ट आश्रयो यतोऽतः कस्या मनो दृष्टिश्च त्वयि न सज्जेत । अनेन यन्न रमा रमणमतिहायान्यत्र गन्तुमलमलङ्घ्यस्तदनुग्रहपात्रं त्वं मन्मात्रेणेति सूचयतीति वर्णयन्ति । यदङ्गात् । ल्यब्लोपनिमित्ता पञ्चमी । यदङ्गं निशाम्य मनो दृष्टिश्च कस्यास्त्वयि न सज्जेत सज्जेतैव । तत्र तन्त्रं सुन्दरेति । मन एवातो नर नरोत्तम नृपत्नीरित्यृग्भाष्ये तथा व्याकृतत्वात् । आयाति वैवश्येन । निराश्रया न शोभन्ते पण्डिता वनिता लता इत्युक्तेस्तत्राश्रयाभावान्मदाश्रयणमिति किं न स्यादित्यत आह । स हरिरिन्द्र आश्रयो दृष्टः सर्वप्रत्यक्षसिद्धः । तदपेक्षया सद्यः सौन्दर्यं त्वयीति कस्याः । शिष्टं यथावत् । हे नर नरोत्तर त्वयि माया मदाकर्षणशक्तिरतिप्रशस्ता । अतः स भगवान् अहरिरिन्द्रो नेत्यहरिस्तदिन्द्रभिन्न इन्द्रसदृश आश्रयो दृष्टः । नारदेन दर्शित इत्यन्तर्णीतण्यर्थो दृष्टशब्द इति वा । माया शक्तिविशेषे स्यात्प्रकृतौ कपटेऽपि चेति शब्दार्णवः । अतिशब्दः

प्रशंसायामित्यव्ययविश्वः । यदङ्गान्तरमासाद्य च्यवते हा रिरंसयेति पाङ्क्तः पाठः । तत्रार्थः । अङ्गान्तरमासाद्य मध्यदेहं वक्ष इति यावत् । प्राप्य रिरंसया रन्तुमिच्छया कस्या मनश्च्यवते न च्यवते । हा निश्चयः । यद्यतोऽङ्गान्तरं गोत्रभिद्गात्रादिकमासाद्यापि रिरंसया मनश्च्यवते प्रच्युत्य ततो नागादिति यावत् । ततः कस्या अन्यस्य मनो न सज्जेत दृष्टिश्च न सज्जेतेति वा ॥ २२ ॥

छलारी — अतो मम मनोदृष्टिश्च । यस्य तवांगान्तरं वक्षमासाद्य रिरंसया रन्तुमिच्छया । स्फुटं नेत्यनुवर्तते । न च्यवते नापयाति । तस्मादहं त्वया सह रंस इत्युत्तरेणान्वयः । पाठान्तरम् ॥ यदङ्गान्न रामा याति सदृष्टो हरिराश्रयः ॥ मनोहरत्वे निमित्तमाह ॥ यदङ्गादिति । रमा यस्य हरेरङ्गान्न याति नान्यत्र वर्तते । नित्याश्रितवक्षस्थलत्वात् । स हरिस्तवाश्रयो दृष्ट इत्यन्वयः । लक्ष्मी तत्सन्निधिपात्रत्वादित्यर्थः ॥ २२ ॥

एतावुरणकौ राजन् न्यस्तौ रक्षस्व मानद ।
संरंस्ये भवता साकं श्लाघ्यः स्त्रीणां वरः स्मृतः ॥ २३ ॥

सत्यधर्मीया — उरणकौ मेषौ न्यस्तौ विक्षेपरूपतया स्थापितौ । रक्षस्व । मानद मानप्रद । मा नद न मयेदं भवतीति न शब्दं कुर्विति वा । भवता साकं संरंस्ये । स्त्रीणां यः श्लाघ्यः स वरः स्मृतः ॥ २३ ॥

छलारी — केनचिद्व्याजेन जिगिमिषोस्तस्य समयबन्धप्रकारमाह ॥ एताविति द्वाभ्याम् । उरणकौ मेषौ न्यस्तौ निक्षेपकल्पनया स्थापितौ । संरस्ये त्वया सह रतिं करिष्ये । अस्माकमियमेव व्रतक्लृप्तिरित्याह ॥ श्लाघ्य इति । यः श्लाघ्यः कमनीयः स एव स्त्रीणां वरः पतिः स्मृतः । अतो विजातीयत्वं न दोष इति भावः ॥ २३ ॥

घृतं मे वीर भक्ष्यं स्यान्नेक्षे त्वाऽन्यत्र मैथुनात् ।
विवाससं तत् तथेति प्रतिपेदे महामनाः ॥ २४ ॥

सत्यधर्मीया — एतावत्तु तावता भवताऽऽवश्यं कार्यमिति समयबन्धं विदधाति ॥ घृतमिति । सद्यस्तप्तं भक्ष्यं स्यात् । मैथुनात् अन्यत्र तदन्यस्मिन्काले विवाससं वस्त्रहीनं नेक्षे । यदीक्षे कदाचित्तर्हि त्वां नेक्षे गच्छेयमिति तात्पर्यम् । तत्तयोक्तं त्रयमपि प्रतिपेदेऽनुमेने ॥ २४ ॥

छलारी — मैथुनादन्यत्र सुरतसमयमन्तरेण विवासं नग्नं त्वां नेक्षे न पश्यामि । अन्यथेतः । गमिष्यामीति शेषः । पुरूरवा उत्तरमाह ॥ तत्तथेति । प्रतिपेदेऽङ्गीकृतवान् ॥ २४ ॥

राजोवाच —

अहो रूपमहो भावं नरलोकविमोहनम् ।
को न सेवेत मनुजो देवीं त्वां स्वयमागताम् ॥ २५ ॥

सत्यधर्मीया — भावं शृङ्गारादिकं वीक्ष्य स्वयमागतामप्रार्थनयाताम् । सु अत्यन्तमय-माऽऽयुगैकाकिनीति यावत् । सा च साऽऽगता च तामिति वा ॥ २५ ॥

छलारी — तस्येङ्गितं हर्षोल्लासं दर्शयति ॥ अहो इति । अहो आश्चर्यकरं तव रूपम् । अहो आश्चर्यकरं तव भावं शृङ्गारादिभावं च । दृष्ट्वति शेषः । को न सेवेतेत्यन्वयः ॥ २५ ॥

शुक उवाच —

तया स पुरुषश्रेष्ठो रमयन्त्या यथार्हतः ।
रेमे सुरविहारेषु कामं चैत्ररथादिषु ॥ २६ ॥

सत्यधर्मीया — यथार्हतः कालाद्यानुकूल्येन । सुरविहारेषु सुराणां विहारो लीलाभ्रमणं सञ्चारो वा यत्र येषु । विहारो भ्रमणे स्कन्दे लीलायामिति विश्वः । कामं स्वेच्छानुसारं चैत्ररथं धनदवनमादिर्येषां तेषु नन्दनादिषु चित्ररथेन निर्वृत्तम् । तेन निर्वृत्तमित्यण् । अस्योद्यानं चैत्ररथमित्यमरः । सुरविहारेषु नन्दनादिष्विति शेषः । चैत्ररथादिषु चैत्रा एव चैत्रा अश्वतरीययुता रथाः क्षत्रियमुख्यचिन्हभूताः क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गादिति सूत्ररथस्त्वश्वतरीयुक्तश्चित्र इत्यभिधीयत इति मानाभ्यां तथाऽवगतेः । तै रथाश्वगमनं तदेवादिर्येषां गजादिगमनादीनां तेषु रेमे । नन्दनाद्यनिबध्यानुबन्धेनायमप्यर्थ विशेषो बोध्यः ॥ २६ ॥

छलारी — यथार्हतो राजयोग्यभोगसाधनद्रव्येण सुराणां विहारो येषु तथा तेषु चैत्ररथादि-षूद्यानादिवनेषु ॥२६॥

रममाणस्तया देव्या पद्मकिञ्जल्कगन्धया ।
तन्मुखामोदमुषितो मुमुदेऽब्दगणान् बहून् ॥ २७ ॥

सत्यधर्मीया — किञ्चल्कस्य गन्धः पद्मानां किञ्जल्कगन्धो यस्याः सेति विग्रहः । पद्मपदार्थस्य किञ्जल्कपदार्थे योग्यतयाऽन्वयः । त्रिलोकनाथवत् । अन्यथोपमानाच्चेतीत्वप्राप्तौ किञ्जल्कगन्ध्येति स्यात् । एवं चेत्केवलगन्धपदसमसनाभावात्तदप्राप्तिः । अस्पृष्टदोषगन्धायेत्यादिवदिति ज्ञेयम् । किञ्जल्कः केसरोऽस्त्रियामित्यमरः । तन्मुखामोदेन मुषितो वञ्चितः ॥ २७ ॥

छलारी — पद्मकिंजल्कगन्ध इव गन्धो यस्यास्तन्मुखामोदमुषितः प्रलोभितः सन् ॥ २७ ॥

अपश्यन्नुर्वशीमिन्द्रो गन्धर्वान् समचोदयत् ।
उर्वशीरहितं मह्यमास्थानं नातिशोभते ॥ २८ ॥

सत्यधर्मीया — मह्यं ममास्थानं सभा नातिशोभते नातिभासते ॥ २८ ॥

छलारी — मह्यं ममास्थानं सभा नैव शोभते । अतस्तां विचार्यानयेति समचोदयत् ॥ २८ ॥

त उपेत्य महारात्रौ तमसि प्रत्युपस्थिते ।
उर्वश्या उरणौ जह्रुर्न्यस्तौ राजनि जायया ॥ २९ ॥

सत्यधर्मीया — ते गन्धर्वा महारात्रौ मध्यरात्रे । महानिशा द्वे घटिके रात्रौ मध्यमयामयोरिति स्मृतिः । तमस्यन्धकारे जायया तद्धर्मिण्या राजनि न्यस्तावूर्वश्या उरणकौ जह्रुरपाहरन् ॥ २९ ॥

छलारी — महारात्रौ मध्यरात्रौ । राजनि राज्ञि । जाययोर्वश्या ॥ २९ ॥

निशम्याक्रन्दितं देवी पुत्रयोर्नीयमानयोः ।
हताऽस्म्यहं कुनाथेन नपुंसा वीरमानिना ॥ ३० ॥

सत्यधर्मीया — पुत्रयोस्तत्त्वेन त्रातयोराक्रन्दितं निशम्य श्रुत्वा । अनेन कृतसङ्केतनिकेतावेतौ नीतवन्त इति ध्वन्यते । नपुंसा निर्वीर्येण कुनाथेन कुत्सितेन पत्या वीरमानिनाऽहं हताऽस्मि ॥ ३० ॥

छलारी — पुत्रयोः पुत्रवत्पालितयोर्जिगमिषयोः । तस्याः परुषोक्तिमाह ॥ हताऽस्मीति । नपुंसा नपुंसकेन ॥ ३० ॥

यद्विस्रम्भादहं नष्टा हृतापत्या च दस्युभिः ।
यः शेते निशि सन्त्रस्तो यथा नारी दिवा पुमान् ॥ ३१ ॥

सत्यधर्मीया — यद्विस्रम्भाद्यस्मिन्विस्रम्भो विश्वासस्तस्मात् । विस्रम्भः केलिकलहे विश्वासे प्रणये वध इति विश्वः । नष्टेन्द्रादर्शनं गता । इदानीं हृतापत्येति नष्टा तत्प्रायेत्यप्यन्वयः । अनेन पत्या तत्त्वेन वृतेन यद्विस्रम्भान्नारदवचोविश्वासादिहाहृता च दस्युभिश्चोरैर्हृतेऽपत्ये यस्याः सा चाभवमिति

नष्टेति वा । यथा नारी निशि सन्त्रस्ता भीता सती शेते तथा त्वं दिवा च पुमान्निभीतचरण एव तात्पर्यं स्वानुभूततत्कत्वात्तस्याः ॥ ३१ ॥

छलारी — विस्रम्भाद्यस्मिन्विश्वासाद्यथा नारी निशि सन्त्रस्ता सती शेते । तथा त्वमपि रात्रौ सन्त्रस्तः सन् शेषे । अथ त्वं दिवैव पुमान् रात्रौ षण्ढतुल्य इत्यर्थः ॥ ३१ ॥

इति वाक्सायकैर्विद्धः प्रतोदैरिव कुञ्जरः ।
निशि निस्त्रिंशमादाय विवस्त्रोऽभ्यद्रवद् रुषा ॥ ३२ ॥

ते विसृज्योरणौ तत्र प्राद्योतन्त स्वविद्युता ।
आदाय मेषावायान्तं नग्नमैक्षत सा पतिम् ॥ ३३ ॥

सत्यधर्मीया — प्रतोदैरङ्कुशैः कुञ्जरो नखमुखकुञ्जेषु रो वक्तव्य इति मत्वर्थे रः । कुञ्जौ दंष्ट्रे अस्य स्त इति, कुञ्जेषु रमत इति रमेर्डो वा । गजो यथा तथा वाक्सायकैर्विद्धो विवस्त्रो दिगम्बरं च प्रकाशितवन्तः कृतकृत्यत्वात् । मेषौ च नैकदा गन्धर्वैरन्धकारे नीतौ किन्तु पूर्वमेकोऽनन्तरमेक इति ज्ञेयम् । यथोक्तं हरिवंशे ।

निशायामथ चागत्य मेषमेकं जहार सः ।
गन्धर्वागमनं ज्ञात्वा शापं तं च यशस्विनी ।
राजानमब्रवीत्तत्र पुत्रो मेऽह्रियतेति सा ।
एवमुक्तो विनिश्चित्य नग्नो नैवोदतिष्ठत ।
नग्नं मां द्रक्ष्यते देवी समयो वितथो भवेत् ।
ततो भूयस्तु गन्धर्वा द्वितीयं मेषमाददुरिति ।

तस्याः पुरूरवःसमीपे वासदिनान्यपि हरिवंशोक्तानि ज्ञेयानि ॥ तथा हि ।

तया सहावसद्राजा दशवर्षाणि पञ्च च ।

पञ्चषट्सप्तचाष्टौ च दश चाष्टौ च भारत । इमां गणानां स्वयमेव क्रोडीकृत्य विवृणोति । वर्षाण्येकोनषष्टिं तु तद्भक्त्या शापमोहितेति ॥ १०+५=१५+५=२०+६=२६+७=३३+८=४१+१०=५१ ॥ ५१+८=५९ ॥ इत्येकोनषष्टिसंवत्सरा ज्ञेयाः । न च माधवोदाहृतपुराणे -

इति सा समयं कृत्वा रमयामास तं नृपम् ।
चतुरब्दे गते रात्रौ देवैरुरणकद्वयं हृतम् ।

इत्युक्तिः कथमिति शङ्क्यम् । इन्द्रसभायां तदनिभालनदिनमारभ्य गन्धर्वैर्नालीकलोचनानयनालोचनकालश्चतुरब्द आत्मातश्चतुरब्दे गते मेषमोषणसमयस्तैरुपलब्ध इति तन्मात्रपरं तदित्युपपत्तेः । अथवा मानान्तरविवक्षया मानान्तरे चतुरब्ध्युक्तिः । मानवमानवरणेन हरिवंश इति संशयोत्तारसम्भवादिति प्रसङ्गसङ्गदनम् ॥ ३३ ॥

छलारी — प्रतोदैरंकुशैः । निस्त्रिंशं खड्गम् ॥ स्वविद्युता स्वप्रकाशेन । प्रद्योतन्त दीप्तिमकुर्वत ॥ ३३ ॥

ऐलोऽपि शयने जायामपश्यन् विमना अभूत् ।
तच्चित्तो विह्वलः शोचन् बभ्रामोन्मत्तवन्महीम् ॥ ३४ ॥

सत्यधर्मीया — तच्चित्तो महीं बभ्राम चचार । गन्धर्वैर्विद्युदप्यथ ।

उत्पादिताऽतिमहती यया तद्भवनं महत् ।
प्रकाशितं वै सहसा गन्धर्वैर्नग्नमैक्षत ।
नग्नं दृष्ट्वा तिरोभूता साऽप्सरा कामचारिणी ।
तिरोभूता तु तां दृष्ट्वा गन्धर्वा ह्यगमन् दिवम् ।
अपश्यन्नूर्वशीं तत्र विललाप सुदुःखितः ।
चचार पृथिवीं सर्वां मार्गमाणस्ततः । इति हरिवंशे ॥ ३४ ॥

छलारी — ऐल इलापुत्रः पुरूरवा बभ्राम । भ्रम अनवस्थान इति धातुः । पर्यटनं कृतवान् । विह्वल उद्विग्नः ॥ ३४ ॥

स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्सखीः ।
पश्यन् प्रहृष्टवदनः प्राह सूक्तं पुरूरवाः ॥ ३५ ॥

सत्यधर्मीया — तां च कुरुक्षेत्रे सरस्वत्याम् । तदित्यव्ययम् । लिङ्गविशिष्टपरिभाषा नित्या वा । तन्नामश्रुतिविवृत्यवसरे वक्ष्यामः । वीक्ष्य ताश्च पश्यन्नित्यन्वयः । अतो नातिरेकः । पश्यन्नित्यस्य पश्य इति केचित् । सम्भवति वीक्षेत्यनेनैकान्वये पश्यन्नित्यधिकमेव । चशब्दश्च सुश्लिष्ट इति चेत् ।

अगाधमेधोऽसि । पुरुविवरं रासि विवरणस्य । सत्यम् । पश्यतीति पश्यो जीवस्तद्वान् अर्शआद्यचि पश्यस्तद्वदाचरन्विक्लवस्तच्चित्त उन्मत्तवदिति । अनङ्गबाधया निरङ्गस्मरण एतर्हि तु तदवलोकेन जीववानिव जात इत्यत: प्रहृष्टवदन इति संलग्नमित्यवेहि ।

तत्रापि प्लक्षतीर्थे पुष्करिण्यां हिमवत्यां समाप्लुताम् । क्रीडन्तीमप्सरोभिश्च पञ्चभि: सह शोभनाम् । तां क्रीडन्तीं ततो दृष्ट्वेति हरिवंशोक्तेर्विशेषो ज्ञेय: । हिमवतीति नामवती पुष्करिणीति न सरस्वत्यामित्युक्तिबाधेति बोध्यम् । पुरूरवा: सखी: प्रति तया प्रदर्शितश्च । इदं सूक्तं प्राह । यथोक्तं तत्रैव-

ऊर्वशीता: सखी: प्राह स एष पुरुषोत्तम: ।
तस्मिन्नहमवात्सं वै दर्शयामास तं नृपम् ।
समाविग्नास्तत: सर्वे पुनरेव नराधिप: ।
जाये हे तिष्ठ मनसि घोरे वचसि तिष्ठ हे ।
एवामादीनि सूक्तानि परस्परमभाषतामिति ।। ३५ ।।

पुरूरसव ऊर्वश्या भाषणप्रतिभाषणम् ।
सूक्तेषूक्तानि सूक्तानि कुर्मोऽर्थान्मन्दसन्दृशे ।। १ ।।

ततश्चेदमष्टमाष्टकपञ्चमाध्यायप्रारम्भ: । प्राक्तनो वर्गश्चोरवर्ग इति सम्प्रदायोऽध्यापकानाम् । ऐलोर्वशीतिहासोऽत्र वैशद्याय प्रवर्ण्यत इत्यादीत्युर्वश्यैलसंवादमिममेषोऽप्यसूचयदित्यन्तानुक्रमणिका । तथा च वाजसनेयकम् । ऊर्वशी हाप्सरा पुरूरवसमैलं चकमत ह विन्दमानोवाच त्रि: स्ममाहो वैतसेन दण्डो हतादकामांस्मेत्यारभ्य तथेति तस्मै हविरासुस्तंहा यं ज्ञात्वाभिपरोवाद ह ये जाये मनसेत्यादीत्यन्तं विवरणरूपम् । अत्र सूक्ते प्रथमा ऋक् । हये जाय इति पुरूरवो वचनम् । हय इति हेत्यर्थे निपात: । अरतिवितरणात्सम्प्रति क्रूरे । मनसा मन:पूर्वकमस्मद्धितदात्री सती तिष्ठ । स्थितौ मम तवास्था कुत इत्यतो वक्ति । वचांसीति । वचांसि कथं मिश्रा । शसोडादेश: । मिश्राणि भाषणप्रतिभाषणरूपाणि मिलित्वा नु क्षिप्रम् । अद्य वा । कृणवावहै करवावहै । क्रि विहिंसाकरणयोश्च । धिन्विकृण्वोरचेत्युप्रत्यय: । समयेनेयता मया कृतानि किं मत्त: परं कार्यमित्यत आह ।। नाविति । नौ आवयोर्मन्त्रा एकान्तवार्ता एते वक्तुमुत्कण्ठा विषया अनुदितास: अनुदिता अनाख्याता: । चनेति निपातसमुदायश्चार्थे । परस्मिन्नहन् । उत्तरपुरुदिनेषु तथा परतरेऽहनि चरमेऽहनि च नापिति वा । अत एते मय: सुखनामैतत् । तिस्रो देवीर्मयो भुव इत्यृग्भाष्यटीकाटिप्पणीषु, तथा मय: कृणोषीति भाष्ये च सुखमातनोति भुव: सुखाश्रयीभूता: ।

मीङ्हिंसायामित्यस्मादसुन्प्रत्यये गुणायादेशयोश्च निष्पन्नस्य मयःशब्दस्य मीनाति हिनस्ति दुःखमिति व्युत्पत्त्या मयः सुखं कमिति शिवभातेत्यादिविंशतिसुखनामसु पाठात् । यद्वै सुखं तन्मय इति श्रुत्यन्तरादित्युक्तेर्नाकिरन् । अत एतानि कृणवावहा इति ॥ १ ॥

अथ द्वितीया । किमेता वाचेत्यूर्वशी शंसति । एता एतया । टाडादेशः । वाचा फलानुपलम्भिकया किं कृणवावा किं करवाव । अहं तु प्राक्रामिषं त्वामतिक्रम्यागतास्मि । अतिक्रमे निदर्शनं दर्शयति । उषसामग्रियेव वेति । बहूनामुषसां मध्येऽग्रे भवा । अग्राद्धस्तस्येयादेशः । पूर्वोषा गतातिथिर्यथा पुनर्नायाति तथाऽहमपीतो गता नागच्छामि । तस्माद्धे पुरूरवस्त्वं पुनरस्मात्सकाशादस्तं ग्रहं परेहि परागच्छ । त्वां प्रत्यागतं कथं न सत्करोषीत्यतोऽहमेवं दुरापेत्याह । अहं वात इव दुरापनेति । वातो यथा न धार्यस्तथाऽहं दुरापना दुष्प्रापाऽस्मि । अतः परेहि ॥ २ ॥

अथ तृतीया । इषुर्न श्रिय इति । तान्तस्तामस्तं पाहीति निरस्तो वक्ति । इषुधेर्निषङ्गान्निः सृत इषुरसना युजन्तः । असनायै अरिनिरसनाय न भवति । श्रिये विजयजनितसम्पदे न । रहोऽपि त्वद्विरहकातर्यादियं दशा शशिमुखि ममेति भावः । रंहिर्मानसिकवेगवानप्यहं गोषा वैरिसम्बन्धिनीनां गवां सम्भक्ता । जित्वा ता आनीतास्त्वमेतां त्वमेतां गृहाणेति विभाजको न भवामि । तथा शतसास्तच्छतं तत्सहस्रमित्यादेः शतस्याहिततोपहृतधनस्य विभाजकोऽपि नाभवम् । किञ्चावीरे स्वामिरहित इव नष्टे इतरैर्दृष्टेऽपि जने कर्मणि मन्त्रिर्वाह्ये सति हे सति न विद विद्युतत् न विद्योतते न शक्तिर्व्यक्ती भवति । उतापि धुनयः परान्कम्पयितारो मद्भटा उरा । सप्तम्या डादेशः । उरौ महति रणे मायुं मीयते प्रक्षिप्यत इति मायुःशब्दः कृवापाजीत्युण् । सिंहनादात्मकमिति यावत् । न चितयन्त न व्यजानन् । राजचिन्तया तेऽपि ज्ञानहीना जाता इति भावः । चिति संविज्ज्ञानेऽस्माण्णिचि संज्ञापूर्वकविधेरनित्यतया लघूपधगुणाभावश्छान्दसो लुङ् । अविरे स्वेतरवीररहिते क्रतौ । स क्रतुर्ज्ञानरूपत्वादित्युक्तेर्हराविषुः शरवत्तन्मयो भवेदित्यादेर्मम मनोरूपी बाणो रंहिर्वेगवान्न । हराविति सामान्योक्तं किञ्चिद्विविच्य वक्ति । इषुधेर्जङ्घाद्वन्द्वस्य । खजतूणीनिभवरजङ्घेत्युक्तेः । तद्विषय इति यावत् । उपमानवाचिपदेनोपमेयग्रहणं च विज्ये बिभर्षि धनुषी इत्यादिविलोकयितारो लोका आलङ्कारिकाः पश्यतः पश्य नीलोत्पलद्वन्द्वान्निः सरन्ति शिताः शरा इत्यादिकं च कथमिति न कथेयुः । असनेति ङसोडादेशः । नेत्युपमानेऽसनाऽसनस्य । असनबन्धूकेत्यमरः । असनसमसम-वस्त्रान्तस्येत्यर्थः । यथोक्तं द्वादशस्तोत्रे । असनोत्फल्लसुपुष्पकसमवर्णावरणान्त इति । स क्रतुः कीदृश इत्यतो वाऽहं कीदृश इत्यतो वाऽऽह । यो गोषा वेदसम्भक्ता गावो वाचस्तदात्मकत्वा-द्वेदग्रहः । वेदविभक्ता शतसा अपरिमितलोकानां तत्तद्योग्यतामनुसृत्य सम्पत् सम्भक्ताऽहमपि गोषाः

प्राग्भगवद्गतचित्तत्वाद्भगवद्गतेन्द्रियसर्वस्व इति स तथा । अशान्तगोभिर्विशतां तमिस्रमित्यादेः । उरा । उरस्सु स्थाने डा । यच्छ्रिये लक्ष्मै रातं तदपि न विद् विद्युतत् न प्रकाशते । स्मरणीयमुरो विष्णोरिन्दिरावासमीशतुरिति तदवश्यं स्मरणीयतयोक्तेः । धुनयः कम्पितारोऽन्तश्शत्रवो मायुं मम मरणं न चितयन्त नास्मरन् । जीवन्मृतो न मृत इत्येव वस्तुतस्त्वेवमवस्थित्यपेक्षया सैवावस्था वरेति तात्पर्यम् । तात्पर्यमेवं सर्वत्राप्यध्यात्मविषय आनेतुं शक्यं तथाऽपि विस्तरदरत आदरे सत्यप्युपरम्यत इति ज्ञेयम् । मीञ् हिंसायामिति स्मरणात् । तस्मादुणादयो बहुलमित्युणि वृद्धावायादेशे रूपं ज्ञेयम् ॥ ३ ॥

अथ चतुर्थी । इदमुत्तरं चेति द्वे ऊर्वशीवचने । तत्र प्रथमेन प्रथमतः कृतमुषसं प्रति पारोक्ष्येण सुदती वदति ॥ सा व स्विति । हे उषः सेयमूर्वशी वसु वसनमशनं वा वयोऽभ्यञ्जनेन मासृण्यादिसम्पादनम् । वसु वृद्धौषधाख्यान्नधनेषु यौक्त्रेंशुक इति विश्वः । वसु वस्त्रं वयोऽन्नं वा । श्वशुराय पुरूरवपित्रे दधती प्रयच्छती गृहे यदि स्थिता पतिं पुरूरवसं वष्टि कामयते तदा गृहाच्छ्वशुराशनमन्दिरादन्ति समीपे यदस्तं यत्र स्वपतिः स्वपिति तद्गृहं ननक्षे व्याप्नोति । अनेन स्मरशरवशता द्योत्यते । यस्मिन्ग्रहे चाकन्काङ्क्षत्यूर्वशी । आवः कुत्स इति ऋग्भाष्ये चाकन्नुक्तः कर्म यतः स्वतन्त्रेत्युक्तेः स्वतन्त्र इत्यर्थः । अत एव पुल्लिङ्गं चोपपन्नमिति ज्ञेयम् । करोतेः शत्रन्तस्येदमिति टीकाटिप्पणे । कृञो लटः शत्रादेशे बहुलं छन्दसीति शयः श्लौ श्लाविति द्वित्वं अभ्यासकार्ये दीर्घोकित इत्यत्र योगविभागादभ्यासाकार्ये दीर्घे छान्दसे ऋकारलोपे निष्पन्नाचाकशब्दात्सौ नञा निर्दिष्टमनित्यमिति नाभ्यस्ताच्छतुरिति निषेधस्य प्रवृत्तौ उगिदचामिति नुमि हल्ङ्याभ्य इति सुलोपे संयोगान्तलोपे च चाकन्निति । प्रथमपक्षे चकतृप्तावस्माण्यन्ताच्छत्र-प्रत्यये छन्दस्युभयथेत्यार्धधातुकत्वाण्णिलोपः शबभावश्च । यद्वा कमुकान्तावस्माल्लगन्ताल्लङि सिप्पभ्यासस्य नुमभावश्छान्दसो दीर्घोकित इति दीर्घत्वम् । सिलोपे च मोनो धातोरिति मकारस्य नकारे चाकन्निति ज्ञेयम् । दिवानक्तमहनि रात्रौ च वैतसेन शेपो वैतस इति पुंस्प्रजनस्येति निरुक्तम् । पुंस्प्रजनेन श्नथिता ताडिता च भवति ॥ ४ ॥

पञ्चमीमाह । त्रिःस्ममाह इति । हे पुरूरवस्त्वं मा मामह्नोऽहनि वैतसेन पुंप्रजनेन त्रिस्त्रिवारम् । द्वित्रिचतुर्भ्यः स्तुच् । श्नथयः स्म अश्नथयः । कृत्वोर्थप्रयोग इति कालवाचिनोहःशब्दादधिकरणे षष्ठी । उत अपि च स्मेति पूरणे । अव्यत्यै सपत्नीभिः सह पर्यायेण पतिमागच्छति या साऽव्यती तस्यै मे मह्यं पृणासि पूरयसि । एवं बुद्ध्या हे पुरूरवस्ते केतं निकेतमन्वायमन्वगमम् । यदा तदा हे वीर त्वं मे तन्वः शरीरस्य राजा रञ्जकः आसीः । इतः परमुपरमस्वेति भावः । व्यतयो देवा न

सन्ति यस्यां स्थल्यां साऽव्यतिस्तस्यै मानुषसभायाम् । ङेऽर्थादेशः । विद्यमानं केतं व्यतीं रवीविपदिति श्रुतिकृत्यवसरे विशेषेणाधिकत्वात्तु व्यतयो देवताः स्मृता इति कर्मनिर्णयभाष्योक्तेः । अथवाऽव्यत्यै शापहेतुपापापनोदार्थं व्यतीति पापमुद्दिष्टं तस्य पातो यतो भवेत् । व्यतीपातमिति व्यतीपातपदनिर्वचनपरपुराणवचने व्यतीति पापाभिधानमित्यभिधानात् । विशेषेणातिरत्ययो यस्याः सा न भवतीत्यव्यती तस्यै वा । जातिशब्दव्याकृत्यवसरे उपसर्गाश्चासन्निधाने ससाधनां क्रियामाहुः प्राचार्यः प्रान्ते वासीति ततोऽतिरत्ययवाचक इति तत्त्वनिर्णयटीकोक्तेः ॥ ५ ॥

अथ षष्ठी । पुरूरवो वचनम् ॥ या सुजूर्णिरिति । सुजूर्णिर्वेगवतीति यै तन्नाम्नी या श्रेणिर्या च सुम्न आधोह्निो वसवित्येतत्कर्मनिर्णयभाष्ये सुम्नं सुखमिति व्याख्यानात्सुम्ने सुखार्थमागता आपिः या च हृदे हृदये भावे चक्षुस्तद्दर्शनी भावज्ञा नाम्ना चक्षुः या च ग्रन्थिनी सन्दर्भं सन्दधती तदभिधा एवं पञ्चभिः सखीभिरेताभिः सह चरण्युश्चरणशीलोर्वशी ससार । ताश्च सख्योऽञ्जयः सालङ्कारा अरुणयोऽरुणवर्णा न सस्रुः प्रागिव न प्रापुः । व्यतिरेकं निदर्शनमाह ॥ धेनव इति । धेनवो नवप्रसवा गावो न इव । श्रिये श्रवणाय वत्सार्थं नुवन्ति शब्दं कुर्वन्ति । तथ नानवन्त नाशब्दयन् । यत्तु माधवोऽभ्यधात् । नकारः समुच्चये ताभिस्तिसृभिः सहाजगाम । द्वितीयव्याख्याने सुजवेति विशेष्यसमर्पकम् । प्रथमव्याख्यायां च ग्रन्थिनो सन्दर्भवती सोर्वशीति विशेष्यसमर्पकमिति । तच्चोभयथाऽपि तुच्छम् । भारतभारतीं नानुससार स इत्युपेक्ष्यः । तथा हि हरिवंशे ।

क्रीडन्तीमप्सरोभिश्च पञ्चभिः सह शोभनाम् ।
ऊर्वशीं ताः सखीः पञ्च प्राहैष पुरुषोत्तमः ॥

इत्यादि । समाविग्नास्ततः सर्वा इति प्राग्वदसरणे तथारणने च मानमिति मन्तव्यम् । राजा खिद्यतीति खेदेन वा समयोऽनया कृतो व्यतीतः कुतोऽत्र स्थेयमित्यनास्थया वा समात्यां समाविग्नेति तात्पर्यम् ॥६॥

अथ सप्तमी ॥ समस्मिन्निति । ऊर्वशीवचनम् । अस्मिन्पुरूरवसि जायमाने वर्धमाने ग्ना अप्सरसोऽपि समासत सङ्गता अभवन् । उतापि च । ईं एनम् । एमाशुमाशव इत्यृग्भाष्ये ईमेवेति वचनादवधारणार्थ इकारस्तस्य स्वगूर्ता एवेत्यन्वयो वा । स्वगूर्ताः स्वयमेवागच्छन्त्यो नद्यस्तासामाश्रयभूता अवर्धन् अवर्धयन् । किञ्च हे पुरूरवो यद्यस्मात्त्वा त्वां महे महते रणाय रमणीयाय संग्रामाय दस्युहत्याय च देवा अवर्धन् ॥ ७ ॥

अथैलवाक्यानि त्रीणि । अथाष्टमी । तत्रादितो द्वाभ्यामूर्वशीमन्याभिः सह स्तौति । स च यदास्विति । यद्यदा सहायभूतः पुरूरवा अत्कं स्वरूपं रूपनामात्क इति । जहतीषु परित्यजन्तीष्वमानुषीषु देवतासु मानुषः सन्निषेवेऽभिमुखं गच्छति तदा ता अप्सरसो मत् मत्तोऽप अपसृत्य । उपसर्गा हि धातुसम्बन्धेन तदर्थबोधहेतवः । केवलास्तु ससाधनक्रियावचना भवन्तीत्यतो व्यतीन्विशेषेणाधिकानित्युक्तमिति कर्मनिर्णयटीकादावुक्तेरपापसृत्येति युक्तम् । अत्रसन् । त्रसतिरत्र गतिकर्मा । गच्छन्ति । पलायने निदर्शनं तरसन्ती भुज्युर्नेति । तरसन्नामा मृगस्तस्य स्त्री तरसन्ती । भुज्युस्तद्भोगसाधनीभूतेति । यथा व्याधाद्भीता द्रवति । किञ्च रथस्पृशो रथे बद्धा अश्वानस्ते यथा पलायन्ते तथैता इति ॥ ८ ॥

अथ नवमी । यदासु मर्त इति । यद्यदा आस्वमृतासु देवयोनिषु मर्तो मनुष्यः पुरूरवा निःस्पृक् निःशेषं स्पृशन् क्षोणीभिर्वाग्भिः क्रतुभिश्च न कर्मभिश्च सम्पृक्ते सम्पर्कं करोति । ता अप्सरस आतय आड्य इव विद्यमानाः स्वाः । शरातिरातिरादिश्चेत्यमरः । पक्षिविशेषा इव तन्वः शरीराणि न शुम्भत नाशोभयन् न प्रकाशयन्तीति । अश्वासोऽश्वा न इव । क्रीलयः क्रीडन्त्यो दन्दशाना दन्तैरोष्ठं दंशतः । यथा चापल्येन धावन्तः स्वस्वरूपं न प्रकाशयन्ति यन्तुस्तथैता इति व्यथया कथयति । अज्यतिभ्यां चेतीण् । दन्दशाना इत्यप्सरसःपक्षेऽप्यन्वेति ॥ ९ ॥

अथ दशमी । विद्युन्नेति । अनयोर्वर्शी स्तौति । योर्वशी निष्पन्नतटित इव पतन्तीदविद्योत् द्योतते । अप्या अप इत्यन्तरिक्षनाम । तत्सम्बन्धिनी काम्या काम्यानि । अस्मदिष्टानि । भौमानि तु भरेदिति किं वक्तव्यमिति भावः । मे मह्यं भरन्ती धारयन्ती ददातीति यावत् । यदा गतायास्तस्याः सकाशादपः कर्मप्राप्तयो नर्य नरेभ्योऽत्र मानवेभ्यः परत्र नरेभ्यो विनाशशून्यत्वेन देवेभ्यो हितरूपः सुजातः कोमलकलेवरः पुत्रो जनिष्टोऽजनिष्ट । तदेयमूर्वशी मम दीर्घमायुरत्र पुत्रपौत्रादिपरम्परया परत्र नित्यायुर्मोक्षं च । प्रतिरत व्यतारीत् । प्रजामनुप्रजायसे नद्भुतेमर्त्यामृतमिति हि मन्त्रः । शश्वत्पुत्रेणेत्यारभ्यात्यायन्नधरन्तम इति ब्राह्मणम् ॥ १० ॥

अथैकादशी । इत्था गोपीथ्याय । निपातितः । गतम् । स्वार्थे ष्यञ् । वृध्द्यभावश्छान्दसः । पालनाय । विशेषानुक्तेः सर्वरक्षणाय । यद्वा गोपीथेषु भवो व्यापारः स च रक्षणलक्षण इति तस्मै । दिगादिर्यत् । यविष्ठयेत्यादिष्विवाधिक्ये वा यः । गौर्भूमिस्तस्याः पीथ्यं पीथं पालनं तस्मा इत्यप्यालपन्ति । जज्ञिषे जातोऽसि पुत्ररूपेण । आत्मा वै पुत्रनामासीति श्रुतेः । आदरात्तदेवो-दीरयति । हे पुरूरवो मे ममोदरे ओजो वीर्यं तदत्र रेतो दधाथ निहितवान् । तव्द्याप्तं फलोपलम्भकमिति यावत् । अस्तु तथाऽपि न कथयेति कथयति । अहं विदुषी भविष्यज्ज्ञा

सस्मिन्सर्वस्मिन् । राजस इतिवत्सर्वशब्दस्य सादेशः । समशब्दस्य वा सर्वनामसंज्ञातः स्माआदयः समशब्दमलकारलोपोदेति । अहन्नहनि त्वां चाशासं शिक्षितवत्यस्मि । त्वं मे मम वचनं नाशृणोः । किञ्च त्वमभुक् अपालयिता प्रतिश्रुतमपारयन्निति यावत् । वदासि हये जाय इत्यादिकम् । वदेर्लेट्यडागमः । अत्र वाजसनेयकम् । ऊर्वशी अप्सराः पुरूरवसमैलं चकमे तं हविन्दमानोवाच त्रिः स्म माऽन्हो वैतसेन दण्डेन हतेत्यादि ॥ ११ ॥

अथ द्वादशी । कदा सूनुरिति । पुरूरवा वदति । कदा कस्मिन्काले सूनुर्जातस्तवोदरतः सन्पितरं मामिच्छादिच्छेत् । लोटि शपि इषुगमियमाञ्छ इति छादेशः । लोटो डाटावित्यडागमः । कदा वा विजानत् । पितरं मामधिगच्छन् चक्रन् क्रन्दमानो भ्रमन्वा । बालानां स्वभावोऽयम् । अश्रु न वर्तयद्वर्तयेच्च । किञ्च कः किं प्रकारः सन्मनसाऽसौ दम्पती जायापती त्वां मां चेति वियूयोद्विश्लेषयेत् । यु मिश्रणामिश्रणयोः । यौतेश्छान्दसः शपः श्लुः । तुजादित्वादभ्यासदीर्घः । अद्याधुना यद्यदाऽग्निर्ज्वलनवदुज्वलन्निति गर्भः श्वशुरेषु दीदयन्मत्पित्राद्युत्तमगतिप्रापकत्वाद्दीप्यते । दीदेति दीप्तिकर्मेति नैरुक्तो धातुः ॥ १२ ॥

अथ त्रयोदशी । ऊर्वशीवचः प्रतिब्रवाणीति । हे पुरूरवास्त्वां प्रतिब्रवाणि प्रतिवच्मि । तदपत्यमश्रुबाष्पं वर्तयते वर्तयिष्यति । आध्ये आध्याते सति शिवायै कल्याणे समुपस्थिते सति चक्रन्नुदन्नश्रु अश्रूणि विमुञ्च न क्रन्दन्न । आह्वानं कुर्वदिव तदपत्यं ते तुभ्यं प्रहिनव प्रहिणोमि । तन्नेतरदित्याह । यदिति । अस्मे अस्मासु ते त्वत्तो निहितं त्वमस्तं गृहं परेहि गच्छ । हे मूर मूढ । रलयोर्लडयोस्तथा वबयोश्चैक्यवड्ढ्योस्तत्त्वान्मूढेत्युक्तिः । मा मां न ह्यापो मा प्राप्नोषि । हिनवेत्यत्र हिनोतेश्छन्दसि लुङ्लङ्लिट इति भविष्यदर्थे लङिति पोमादेशो गुणः । अन्त्यलोपश्छान्सः । बहुलवचनादडभावः । आप आप्लृव्याप्तौ लिटि तिङा तिङो भवन्ति थलोणलिति माधवोऽली-लिखद्यद्यपि नाचिन्तयद्विसर्गमार्गम् । अतः स्थलो णसादेशश्छासः ॥ १३ ॥

अथ चतुर्दशी । पुरूरवाः सुदेवो अद्येति । त्वया सह क्रीडावानयं देहोऽद्यात्रैव प्रपतेदपततु । अथवाऽनावृदनावृतः सन् परमां परावतं दूरादपि दूरदेशं गन्तवै । तुमर्थे तवैन्प्रत्ययः । गन्तुं महाप्रस्थानं तु तनोत्वद्य । अथवा शक्तिवियुक्तश्चेद्यत्र कुत्रापि गन्तुं निर्ऋतेः क्षमानामैतत् । पृथिव्या उपतस्थे । पृष्टे शयीत शयनं कुर्यात् । अथाथवा वृकाः श्वापदो रभसासो बुभुक्षा वेगवन्तोऽद्युर्भक्षयन्तु । एतेन गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः । ममापि जन्म तत्रैव भूयाद्यत्र गतो भवानित्यादिवद्विना विनाशं नाशनं शुनामिति मरणमर्थितवान्पार्थिव इति व्यज्यते । मा मृथा इत्युत्तरमत एव सुलग्नम् । अत्र च वाजसनेयकम् । सुदेवो द्यो द्वा बध्नीत प्रवापते तदेनं वृका

वा श्वानो वाऽद्युरिति हैव तदुवाचेति । श्रुतौ वृकपदं श्वाद्युपलक्षणमिति ज्ञायते । खेदेनेदमनुमोदनं मोदिनीनाथस्येति ज्ञेयम् ।। १४ ।।

अथ पञ्चदशी । तमितरा तरुणी प्रत्युवाच । हे पुरूरवस्त्वं मा प्रपप्तः पत न । पतेर्लुङि लृदित्वात्पुषाद्युतेत्यादिना च्लेरङ् । पतः पुमिति पुम् । अथ मा मृथा मृतिं नाप्नुहि । म्रियतेर्लुङि थासि ह्रस्वादङ्गादिति सिचो लोपः । तथा त्वा त्वमशिवासोऽमङ्गला वृकासो वृको मोक्षन् उ मैव भक्षयन्तु । अदेर्लुङि लुङ्सनोर्घस्लृिति घस्लादेशः । मन्त्रे घसेति चेर्लुक् । गमहनेत्युपधालोपः । शासिवसीत्यादिना षत्वम् । खरि चेति चर्त्वक्षत्वे । बाहुलकादडभावः । मया चेयमुपचारिता न मनःपूर्वमपचार आचरितः कुत इयं तत्याज मामिति न राजन्कुतुकी भव भवताऽपि न किञ्चिद्दुश्चरितमाचरितमस्मत्स्वभाव एवायमित्यावेदयति ।। नवा इति । स्त्रैणानि स्त्रीकृतानि सख्यानि न वै सन्ति न फलोपलम्भकानि भवन्ति । अतो न सन्त्येव । तत्र हेतुमाह ।। एतेति । एता एतानि सख्यानि सालावृकाणां हृदयाणि तानि यथा विस्रब्धान्वत्सादीन् त्वत्स्याम इति कामयन्ते तद्वत् । अत्र वाजसनेयकम् । मैतदामृथा नवै स्त्रैणं सख्यमस्ति पुनर्गृहा निहीति हैनं तदुवाचेति । इत्यष्टमपञ्चमे तृतीयो वर्गः ।। १५ ।।

अथ षोडशी । यद्विरूपेति । यद्यदा विरूपा मानवतनुसम्पर्कात्पतिसम्मत्या विविधरूपेति वा । मनुष्येषु मर्त्येष्वचरं तदा रात्रीरेकोनषष्ठिवर्षे दिनरात्रीश्चतस्रः शरदश्चतुः संवत्सरी वाऽवसम् । सुखातिशयेन दिनातिशयेप्येवमुक्तिस्तथा विपरीते विपर्ययस्योक्तिश्च प्रथमतात्पर्ये । अहस्तु मासशब्दोक्तं यत्र चिन्तायुतं व्रजेत् । एवं संवत्सराद्यं च विपरीते विपर्यय इति नाममहोदधाविति । अन्यथा वर्षाण्येकोनषष्ठि त्विति भारते विरोधापत्तेः । अद्यापि जनाभाणकं बहुसंवत्सरवासेऽपि दिनचतुष्टयं वासः कृत इति । रात्रीरित्यत्यन्तसंयोगे द्वितीया । घृतस्य स्तोकं सकृदेकवारमह्नोऽश्ना तावदेव तेनैव स्तोकेनेदं सम्प्रति ततृषाणा अतितृप्ता चरामि इदं क्षेत्रादिकं चरामि । आज्यस्य प्राज्यत्वेऽपि स्तोकमित्युक्तिर्लोकदृष्टिबाधाबाधार्थम् ।। १६ ।।

अथ सप्तदशी ।। अन्तरिक्षप्रामिति । स्वतेजसाऽन्तरिक्षं पुरयन्त्री वृषणाकक्ष्यप्रेतिवत् । प्रपूरण इति धातुः । तथा रजसो रञ्जकस्य मन्मनोहरस्मयोदकादेर्विमानीं निर्मात्रीमूर्वशीं वशिष्ठः समानां मध्ये वसतामतिशयेनातिशयिता वसिष्ठ इव ममतां स्त्रीममतामुचथ्यभार्यां समाधातुं कुशल इति वा । उपशिक्षामि शिक्षित्वा वशं नयामि । सुकृतस्य सुकर्मणो रातिर्दाता पुरूरवाश्च त्वा त्वामुपतिष्ठादुपतिष्ठन्मे हृदयं तप्यते । अतो निस्वेतेति राजोवाच । हृदयं हृद्यं सदमप्रतीत्यप्यर्थः ।। १७ ।।

अथाष्टादशी । ऊर्वशीवाक्यम् । ऐल त्वा त्वामिमे देवा मृत्युबन्धस्तमाकाङ्क्षन्निति तब्दन्धुत्वम् । यथा ईं यथैतद्भवसि भविष्यसि प्रजाः प्रकर्षेण जायमानास्त्वं ते सम्बन्धिनो यष्टव्यतया देवान्हविषा यजासि यजसि । स्वर्गे स्वर्ग एव त्वमपि मादयासेऽस्माभिः सहेत्याहुरित्यर्थः । अतो हित्वा त्वं मदभिलाषं सुखीभवेति पुरूरवसं प्रत्युवाचेति तात्पर्यम् । इत्यष्टमपञ्चमे चतुर्थो वर्गः ॥ १८ ॥

छलारी — पुरुरवाः सरस्वत्यां तन्नामिकायां नद्यामुर्वशीं वीक्ष्य पश्च तत्सखींश्च पश्यन्सूक्तं प्राह ॥ अहो जायेति । सूत्रोक्तप्रकारेणेत्यर्थः ॥ ३५ ॥

अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि ।
मन्त्रा अद्याप्यनिर्वृत्ता वचांसि कृणवावहै ॥ ३६ ॥

सत्यधर्मीया — प्रायो मताभिप्रायः स्याच्छ्लोकोऽपि नेति नेति नो । श्रुत्यर्थः श्रुतिमात्रेणाथाऽति किञ्चिद्विविच्यते । ह ये अहो इति । तिष्ठ न त्यक्तुमर्हसीति मनसा तिष्ठेति सूचितादरप्रदर्शकम् । वञ्चसीति न वृता कथा इति प्रथयितुं मन्त्रा इति गुप्तभाषणानीत्यर्थः । वचांसि कृणवावहै इत्यनुवादः । अद्याप्यनिर्वृत्ताऽसमाप्ता इति स्वास्थां तच्छ्रवणे सूचयति । घोरे खेदकत्वात् मत्प्राणसङ्कट इत्यर्थः ॥ ३६ ॥

छलारी — किं तत्सूक्तमित्यतोऽर्थतस्तत्प्रतिगृण्हाति ॥ अहो जाये तिष्ठेति । अहो जाये तिष्ठ मनःपूर्वकं पूर्ववत्तिष्ठ मां त्यक्तुं नार्हसि । तिष्ठ तिष्ठेत्यादराद्विरुक्तिः । हे घोरे सुरतशौण्डे । नौ मन्त्राः सुरतमन्त्रा अनिर्वृत्ता अथाऽपि अपरिसमाप्ता इत्यर्थः । वचांसि कृणवावहै करवावहै ॥ ३६ ॥

सुदेवोऽयं पतत्यत्र देवि दूरं हृतस्त्वया ।
खादन्त्येन वृका गृध्रस्त्वत्प्रसादस्य नास्पदम् ॥ ३७ ॥

सत्यधर्मीया — समयो न गमनीय एतदुपयोगिनीः काश्चिद्दच इति फलिताभिलपनेन कमललपना तुष्टा तिष्ठेदिति मतिस्ता विहाय सुदेवोऽद्य प्रपतेदित्येतामृचमर्थतो राजा विराजयति ॥ सुदेव इति । हे देवि लीलाशालिनि । अनेन मार्जारक्रीडामूषकप्राणसङ्कटाभाणकं ध्वन्यते । परावतमित्यवधिर्न निरूपित इति दूरमित्युक्तिः । हृत इत्यनेन पारवश्यं द्योतयति । त्वयेत्यनेन कारणान्तरं वा काकतालीयं वा वारयति । वृकास इत्युपलक्षणमिति गृध्रा इति सूचयति प्रायेण । त एव शवरुचयः ।

गोवर्धनसितच्छत्रदण्डवद्भासते च कः ।
गृध्रा इत्युत्तरं यस्य प्रश्नस्य तदिहोत्तरम् ॥

इति नीतिकारः । को गोवर्धनसितछत्रस्य दण्डवद्भासते शवभुजश्च क इति प्रश्नद्वयम् । तत्र केशवस्य श्रीकृष्णस्य भुज इत्येकम् । शवभुजः क इति द्वितीयस्य गृध्रा इति यस्य प्रश्नस्योत्तरं तदिह द्वितीयप्रश्न उत्तरमिति तदर्थः । तत्र हेतुः । त्वत्प्रसादस्य नास्पदमिति । आस्पदं प्रतिष्ठायामिति निपातितः शब्दः ॥ ३७ ॥

छलारी — सारसङ्ग्रहेण मध्ये काश्चन ऋचो विहाय सुदेवो यं पतत्यत्रेत्येनां ऋचमर्थत उदाहरति ॥ सुदेव इति । हे देवि । सुदेवः क्रीडादिसाधनो मम देहः । अत्र कुरुक्षेत्रे पतति पतेत् । हे देवि । त्वयाऽयं देहो दूरं हृतो दूरेऽपहृतस्त्वत्प्रसादस्य नास्पदमनास्पदम् । एनं देहं वृकाः खादन्ति ॥३७॥

ऊर्वश्युवाच —

मा मृथा पुरुषोऽसि त्वं मा स्म त्वाऽद्युर्वृका इमे ।
क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ॥ ३८ ॥

सत्यधर्मीया — पुरुषोऽसीति नाबलाबलाक्रिया युक्ता युक्तं स्तम्भनं तत्र त्वं शक्त इति सूचयति । इमे वृका रभसास इति सूचयितुमिम इत्युक्तिः । अद्युरिति उक्षन्नित्यदधातो रूपमिति निरूपयति । श्रुतौ पदं तु अशिवासः उ इति क्षन्निति रूपं निरूपितमस्माभिः श्रुतिविवृत्यवसरेऽवसेयम् । प्रथमाष्टकषष्ठाध्यायतृतीयवर्गेऽक्षन्नमी मदं त ह्यवप्रिया अधूषतेति चोक्तेर्वृकासोऽपि त्वां मोक्षन् उक्षतिरत्र भक्षणार्थः । मास्माद्युर्न लालाजलेन प्रोक्षयित्वा भक्षयेयुरिति प्राचीनव्याकरणं दुरध्यापकमूर्ध्वध्वंसो भवतु तन्मुखश्रुतपदपाठादित इति ते निर्लिप्ता इति मन्तव्यम् । न भवत्येव वृकाणां तदादीनां यथा हृदयं निर्दयं तथैतासां हृदयमिति सख्यं सख्यं नेत्युक्तिः ॥३८॥

छलारी — हे पुरूरवाः । त्वं मां मृथा म्रियस्व पुरुषोऽसि । अतो धैर्यमावहेति भावः । इमे वृकाः प्रसिद्धास्त्वां मा स्माद्युः । इदानीमुर्वशी पुरूरवसं प्रति हितमुपदिशति ॥ क्वापीति । वृकाणां सालवृकाणां यथा हृदयं यथा कुटिलं तथा स्त्रीणामपि हृदयं कुटिलम् । अतः क्वापि सख्यं स्त्रीभिर्न कार्यमित्यर्थः ॥ ३८ ॥

स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः ।
घ्नन्त्यल्पार्थेऽपि विस्रब्धं पतिं भ्रातरमप्युत ॥ ३९ ॥

सत्यधर्मीया — कियद्भिः पदैस्तत्सम्पन्निरूपिता चेदपि नालमबलानामिति द्वाभ्यां श्लोकाभ्यां तदद्वन्द्वतामाह ॥ स्त्रिय इति । अकरुणाः क्रूरा दुर्मुखाः । वैकल्पिको ङीबिति टाप् । प्रिये पत्यौ वा

स्वेष्टविषये वा साहसं बलात्करो यासां ताः । साहसं तु बलात्कारे कृतकार्ये दमेऽपि चेति विश्वः । साहसो बलात्कार इति व्याख्या लेखकहस्तदोषतो वा विशेषानुशाशनमूला वेति ज्ञेयम् । विश्रब्धं यं कञ्चन पतिमपि । उत भ्रातरं चेत्यन्वयः । अल्पार्थेऽपि प्रयोजनेऽपि घ्नन्ति नाशयन्ति ॥ ३९ ॥

छलारी — एतदेव विवृणोऽति ॥ स्त्रिय इति । दुर्मर्षा अमर्षणयुक्ताः प्रिये प्रेष्ठा अपि महासाहसो यासां तांस्तथा । एतदेव विविच्य दर्शयति ॥ घ्नन्तीति । विस्रब्धं विश्वस्तम् ॥ ३९ ॥

विधायालीकविस्रम्भमज्ञेष्वत्यन्तसौख्यदाः ।
नवं नवमभीप्सन्त्यः पुंश्चल्यः स्वैरवृत्तयः ॥ ४० ॥

सत्यधर्मीया — इयं परिणीततरुणीनां दशा दशा याऽस्मदादीनामितोऽपि वैचित्र्यमित्याह ॥ विधायेति । अलीकविश्रम्भं मिथ्याविश्वासं विधायाज्ञेष्वतदर्हेष्वत्यन्तसौख्यदा रत्यात्यन्तिकसुखप्रदा नवं नवं पुरुषमभीप्सन्त्यः कामबाधात्कामयन्त्यः । नवं नवमित्यनेन न जातुचिज्जातिविवेकेप्सा तासामस्तीति ध्वन्यते । अत एव पुंश्चल्यः । यद्वा नवं नवं धनादिकमभीप्सन्त्यः पुंश्चल्यो धनिकपुंमात्रगामिन्यो भ्रातृपित्रादिभिरप्रत्तेऽन्नदौ ताः किं कुर्युरित्यत आह ॥ स्वैरीति । न विद्यते वृत्तिर्जीविका यासां तास्तथा स्वैः स्वकीयैः प्रत्ते चिताय तद्गुरुच इति भावः । स्वैरवृत्तयो ये पुमांसस्तत्र नवनवमभीप्सन्त्य इति वा । व्यख्यानव्याख्येयभाव इत्यादिकं त्वछनम् ॥ ४० ॥

छलारी — अलीकविस्रंभं कपटविश्वासं विधायाज्ञेष्वत्यन्तसौख्यदा इव प्रतीयमाना नवं नवपुरुषमभीप्संत्य इच्छन्त्यः । पुंश्चल्य इत्यस्य विवरणं स्वैरवृत्तय इति । घ्नन्तीति पूर्वेणान्वयः ॥४०॥

संवत्सरान्तेऽपि भवानेकरात्रं मयेश्वर ।
वत्स्यत्यपत्यानि च ते भविष्यन्त्यपराणि भोः ।
अन्तर्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरीम् ॥ ४१ ॥

सत्यधर्मीया — भो ईश्वर पते संवत्सरान्ते । अनेनेदानीमहमन्तर्वत्नीति द्योत्यते । एकरात्रं भवान्मया सह वत्स्यति । तेऽपराण्येतद्गर्भगार्भकेतराण्यपत्यानि च भविष्यन्ति ॥ ४१ ॥

छलारी — तं सांत्वयति ॥ वत्सरान्त इति । भो ईश्वर पते । भवान्मया सहैकरात्रं वत्स्यति वासं करिष्यति । सुरतलीला मञ्जु भविष्यतीत्यर्थः । तथाऽपराण्यपत्यानि भविष्यन्ति । अपराणीति वचनादन्तर्वत्नीं गर्भिणीमुपालक्ष्य ज्ञात्वा ॥ ४१ ॥

पुनस्तत्र गतोऽब्दान्ते ऊर्वशीं वीरमातरम् ।
उपलभ्य मुदा युक्तः समुवास तया निशाम् ॥ ४२ ॥

सत्यधर्मीया — तत्र प्लक्षतीर्थे वीरमातरं पुमपत्यजननीं तया सह ॥ ४२ ॥

छलारी — तत्र कुरुक्षेत्रे वीरमातरं वक्ष्यमाणानामायुःश्रुतायुरित्यादिषट् पुत्राणां मातरमित्यर्थः । समुवास सम्भोगलक्षणसुरतमनुभूतवान् ॥ ४२ ॥

अथैनमुर्वशी प्राह कृपणं विरहातुरम् ।
गन्धर्वानुपधावेमांस्तुभ्यं दास्यन्ति मामिति ॥ ४३ ॥

सत्यधर्मीया — अथ समयातिगमनानन्तरं विरहातुरं कृपणं दीनं पुरूरवसं प्रति प्राह । इमान् उरणहरणकृतस्तदादीन्यष्टव्यान्देवानुपधाव स्तुहि । ते च तुष्टा मां तुभ्यं दास्यन्त्यग्निस्थालीमग्निपात्रम् ॥ ४३ ॥

छलारी — उपधाव शरणं गच्छ । धावुगतिशुध्योरिति धातोः । त्रिकरणशुद्ध्या स्तुतिं कुर्वित्यर्थः । मां दास्यन्ति मत्सालोक्यं दास्यन्तीत्यभिप्रायः । अत एवोर्वशीलोकमिति वक्ष्यति ॥४३॥

तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप ।
ऊर्वशीं मन्यमानस्तां नाबुध्यत चरन् वने ॥ ४४ ॥

सत्यधर्मीया — तामूर्वशीमेव मन्यमानः स्थालीयमिति वने चरन्नाबुध्यत न व्यजानात् ॥४४॥

छलारी — अग्निस्थालीमग्निस्थापनयोग्यपात्रम् । अनेनाग्निना यज्ञं कृत्वोर्वशीं प्राप्स्यसीत्यभिप्रायेणाग्नियुक्तस्थालीं ददुः । स तु तां स्थालीमेवोर्वशीं मन्यमानः स्थाल्या युक्तो वने चरन् । नेयमुर्वशी किंत्वग्निस्थालीत्यबुध्यत ॥ ४४ ॥

स्थालीं न्यस्य वने गत्वा गृहानध्युषितो निशि ।
त्रेतायां सम्प्रवृत्तायां मनसि त्रय्यवर्तत ॥ ४५ ॥

सत्यधर्मीया — निशि वने स्थालीं न्यस्य गृहानध्युषितस्तत्रावात्सीदित्यर्थः । परस्मिन्दिने त्रेतायां युगे सम्प्रवृत्तायां युगारम्भतिथिः प्रवृत्तेत्यर्थः । ऊर्वशीं ध्यायतस्तस्य राज्ञो मनसि त्रयी । तात्कालिकतोकान्गृहीत्वा गतः सन् । यथोक्तं हरिवंशे– तानादाय कुमारांस्तु गमनायोपचक्रमे । सपुत्रस्तु गृहं ययावित्यादि । अग्न्याधानादिसाधनवेदत्रयमवर्तत प्रकाशितमभूत् ॥ ४५ ॥

छलारी — सः पुरूरवाः । अग्निस्थालीं वने न्यस्य क्षिप्य निशि गृहान् गत्वा तां निशामध्युषितोऽभूत् । अथ परस्मिन्दिवसे । त्रेतायां संप्रवृत्तायां त्रेतायुगारंभसमये जाते सति । उर्वशीं चिन्तयतस्तस्य राज्ञो मनस्यग्न्याधानादिसांगयज्ञप्रकाशकवेदत्रयं प्रकाशितमभूदित्यर्थः ॥ ४५ ॥

स्थालीस्थानं गतोऽश्वत्थं शमीगर्भं विलक्ष्य सः ।
तेन द्वे अरणी कृत्वा ऊर्वशीलोककाम्यया ॥ ४६ ॥

सत्यधर्मीया — स्थालीस्थानं स्थाली यत्र स्थापिता तत्स्थानं शमीगर्भमश्वत्थमालक्ष्य शमी ह्यभूत्स्थाली वन्हिस्त्वश्वत्थो जात इति विज्ञाय । तेन छिन्नेन शमीगर्भाश्वत्थेन द्वे अरणी कृत्वोर्वशी लोककाम्यया ॥ ४६ ॥

छलारी — तदर्थं विचार्याग्निस्थालीप्रदानेऽभिप्रायं ज्ञात्वाऽग्निस्थालीस्थानं गतः । तत्र सः पुरूरवाः शमीगर्भं शमीवृक्षेणाधिष्ठितमश्वत्थं विलक्ष्य विशेषतो दृष्ट्वा स्थाली शमी जाताऽग्निस्त्वश्वत्थो जात इति विज्ञाय शमीगर्भमश्वत्थं छित्वा तेन शमीगर्भाश्वत्थेन द्वेऽरणी कृत्वोत्तराधरारणिभेदेन निधाय । अरणिं ममन्थेति शेषः ॥ ४६ ॥

उर्वशीं मन्त्रतो ध्यायन्नधरारणिमुत्तराम् ।
आत्मानमुभयोर्मध्ये यत् तत् प्रजननं प्रभुः ॥ ४७ ॥

सत्यधर्मीया — उर्वशीमन्त्रतो जनिष्टोऽपोतर्य इत्यादिमन्त्रतः । प्रकृत्यऽन्तःपादमव्ययपर इति जनिष्टोऽप इत्यत्र प्रकृतिभावः । अनेन सुदेवोऽद्येति व्याख्यातम् । अधरारणिमूर्वशीमात्मान-मुत्तरामुपरितनीमरणिमुभयोः स्वस्योर्वश्याश्चेत्युभयोर्मध्ये तत्प्रजननं च मनसा ध्यायन्ममन्थेति शेषः । प्रभुरिति मन्त्रतन्त्राद्यप्रच्युतिसामर्थ्यं दर्शयति ॥ ४७ ॥

छलारी — मथनेऽनुसन्धानप्रकारमाह ॥ उर्वशीमिति । उर्वशीमधरारणिमात्मानं पुरूरवनामकं स्वात्मानमुत्तरारणिं च चिन्तयन् । उभयोररण्योर्मध्ये यत्प्रजननं प्रजननसाधनं संबन्धविशेषं तत्र मनसा ध्यायन् अरणिं ममन्थेति पूर्वेणान्वयः । प्रभुरित्यनेन सर्वध्यानादिसामर्थ्यं दर्शयति ॥ ४७ ॥

तस्य निर्मथनाज्जातो जातवेदा विभावसुः ।
त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ॥ ४८ ॥

सत्यधर्मीया — तस्य तत्कर्तृकमथनात्तस्यारणिद्वन्द्वस्येति वा जातवेदा वाऽस्मीति । तृतीयपञ्चकषट्त्रिंशत्खण्डे । जातवेदस्यं शंसिति प्रजापतिः प्रजा असृजत ताः सृष्टाः पराच्य एवायं न व्यावर्तन्त ता अग्निना पर्यगच्छती अग्निमुपावर्तन्त तमेवाद्याप्युपावृताः सोब्रवीज्जाता वै प्रजा अनेनाविदमिति यदब्रवीज्जाता वै प्रजा अनेनाविदमिति तज्जातवेदस्यं समभवज्जातवेदसो जातवेदस्त्वं तथा विश्वरूपं करिणं जातवेदसमिति षट्प्रश्नटीकायां जातस्य सर्वस्य वेदितारं जातमिदं सर्वं चराचरं वेत्तीत्यादिना तन्निरुक्तिर्ज्ञेया । तद्ब्राह्मणखण्डखण्डखण्डस्यायमर्थः । जातवेदोदेवताकं सूक्तं जातवेदस्यं शंसतीति । प्रजापतिः प्रजा असृजतोत्पादयत् । ताः सृष्टाः प्रजाः पराच्यः पराङ्मुखा एवायन्नगच्छन् यदा न व्यावर्तन्त ता यत्रासते तत्रैवाग्निना पर्यगच्छत् । अग्निं प्राकाराकारं कृतवान् । ताः प्रजा अग्निमुपावर्तन्त तमेवाग्निमद्याप्युपावृतास्तदुल्लङ्घालवस्तन्मध्य एवावर्तन्त । स प्रजापतिर्जाता वै प्रजा अनेनाग्निनाऽविदमज्ञासिषम् । तस्यैवानुवादो यदब्रवीज्जाता वै प्रजा अनेन विदितमितीति हेतोस्तज्जातवेदस्यं तत्संज्ञमभवत् । प्रतिपाद्योऽग्निस्त्रिवृत्त्रिभिराहवनीयादित्रिरूपैर्वर्तत इति वा । त्रीण्येव रूपाणि वृणोतीति वा त्रिवृत्पुत्रत्वे कल्पितो नरकत्राणात्तत्वम् ॥ ४८ ॥

छलारी — तस्य राज्ञो निर्मथनाज्जातवेदा अग्निर्जातः । स विभावसुरग्निस्त्रय्या विद्यया वेदत्रयसंज्ञया प्रतिपाद्य त्रिवृत् त्रिभिराहवनीयादिरूपैर्वर्तत इति त्रिवृत् । त्रिरूपः सन् । राज्ञा पुरूरवसा । पुत्रत्वे कल्पित इत्यन्वयः । पुण्यलोकप्रापकत्वात् ॥ ४८ ॥

तेनायजत यज्ञेशं भगवन्तमधोक्षजम् ।
उर्वशीलोकमन्विच्छन् सर्वदेवमयं हरिम् ॥ ४९ ॥

सत्यधर्मीया — तेन त्रिवृताऽग्निं यज्ञेशं भगवन्तमधोक्षजमूर्वशीलोकं तत्सालोक्यं सर्वदेवमयं हरिं सर्वसुपर्वप्रधानमयजत ॥ ४९ ॥

छलारी — तेनाग्निनोर्वशीसालोक्यं सर्वदेवमयं सर्वदेवप्रधानम् ॥ ४९ ॥

एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः ।
देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ॥ ५० ॥

सत्यधर्मीया — पुरा कृते वेद एक एव राशीभूतः । अकारो वा सर्वा वागिति वेदोऽकारात्मा वर्ततेति वा । सर्ववाङ्मयः प्रणवः । तद्यथा सर्वाणि पर्णानि शङ्कुना सन्तृण्णान्येवमोङ्कारेण सर्वा वाक्सन्तृण्णेति श्रुतेः । देवो देवता । गतम् । अग्निरप्येऽकोविभक्तः । वर्णो ब्राह्मणादिरेकः ॥ ५० ॥

छलारी — त्रेतायुगे पुरूरवसः प्रकाशाद्वेदत्रयाभिव्यक्तिं वक्तुं कृतस्थितिं तावद्दर्शयति ॥ एक एवेति । पुरा कृतयुगे एक एव वेदो मिश्रीभूत आसीत् । तस्य मूलवेद इत्याख्या । न ऋगादिनामानि । स वेदस्त्रेतायुगे त्रिधाऽभवत् । ततश्चतुर्धाऽभवत् । ते च वेदा ऋङ्निगदादिनामान उपवेदनामानश्च । द्वापरे तु भारतेन सह पञ्चधाऽभवन् । ते च ऋग्वेदयजुर्वेद इत्यादिनामानोऽवान्तर-वेदनामानश्चेति । कलौ प्रायेणोत्सन्नाः । अत्राथर्वणभाष्यं प्रमाणम् । एको वेदः कृते ह्यासीत्त्रेतायां स त्रिधाऽभवत् । स एव पञ्चधा जातो द्वापरं प्राप्य वै युगम् । उत्सन्नः स कलिं प्राप्य वेदप्रायेण सर्वशः । नैव कृते सामादिनामानि तदा वेदस्य चाभवन्निति । वेदस्य मूलवेदादिनामकत्वे मूलवेदादुद्धृता उपवेदा उच्यन्ते । ततश्चावान्तरवेदा उद्धृता इति । ऋचः स ऋच उद्धृत्येति ऋग्भाष्यटीकावाक्यं प्रमाणमिति । ततश्च चतुर्धाऽभवदित्यत्र प्रागेव चतुर्धा विभक्तं वेदं ऋङ्निगदादिरूपं वेदं व्यक्तीकृत्वेति तत्त्वप्रकाशिकावाक्यं प्रमाणामिति । सर्ववाङ्मयः सर्वासां वेदवाचां प्रधानभूतस्त्रिमात्रात्मप्रणवोऽपि ह्येक एव । न तु चतुर्मात्रप्रणवादिभेदभिन्नः । उक्तं चैकादशस्कन्धतात्पर्ये । प्रणवस्थानेकविधत्वं त्रिमात्रमादितः कृत्वा यावच्चानन्तमातृकाः । ''प्रणवास्ते विभेदेनानन्ताः परिकीर्तिताः । एकमात्रोत्तराः सर्वे परं ब्रह्माभिधायका'' इति । एको नारायण एव देवतात्वेन पूज्यः । अन्ये ब्रह्माद्या मनुनामका न देवतया पूज्याः किन्तु विद्यात्वादिनैव पूज्याः । इदमप्युक्तमाथर्वणभाष्ये । ब्रह्मरुद्रेन्द्रपूर्वैस्तु नामभिः प्रोच्यते हरिः । देवतात्वेन चेज्यः स ब्रह्माद्या मनुनामकाः । वक्तृत्वेन पितृत्वेन कारित्वेनैव चादरात् । इज्यन्ते देवताः सर्वा न तु देवतया क्वचित् । अनन्ययाजिनस्ते तु तस्मात्कार्तयुगा जना इति । अग्निरप्येक एव । अग्निरिति प्रथमा सप्तम्यर्थे । सप्तसु प्रथमेति सूत्रात् । तथा च तस्मिन्काले एको हरिरेवाग्निः । अग्नौ । अग्निष्टोमादियज्ञेष्विति यावत् । ब्रह्मरुद्रेन्द्रादिनामभिरीज्य इति शेषः । न ब्रह्मादयः । न च कृतयुगे सर्वेषां ध्याननिष्ठत्वात्तत्र यज्ञादिकर्मसद्भावे प्रमाणाभाव इति वाच्यम् । अग्निष्टोमादिभिर्यज्ञैः सर्वदेवस्थितं हरिम् । यजन्ति तांश्च कारित्वाद्वसुस्तस्मात्तथाऽयजत् । पृथक् पृथक् च त्रेतायां यजन्ते देवतागणान् । यथा कृते तथा प्राज्ञास्त्रेतायां बहुधा तत इति । तथा पूज्यो यज्ञैः सोपचारैर्ध्येयो वेद्यश्च सर्वदेति । तथा । एवं वायोः पितरं विष्णुमेव यजन्ति देवैः सह ये कृते जनाः । तथा विष्णुं यजन्ते न तु कश्चिदन्यमित्याथर्वणभाष्यादिस्थवर्णानामेव यज्ञादिकर्मसद्भावे प्रमाणत्वादिति । वर्णश्च समुदायैक-वचनमेतत् । ब्राह्मणादिसमूहोऽपि ब्राह्मणादिसर्वजन इति यावत् । एक एव भगवन्निष्ठ एवाभूत् । कृते भागवताः सर्वे वेदाश्च पुरुषास्तथेत्युक्तेः । जनोऽखिलो विष्णुपरो बभूवेत्युक्तेश्च । न चेदं वचनं त्रेतायुगस्थजनपरमिति वाच्यम् । त्रेतायां वर्तमानायां कालः कृतसमोऽभवदित्युक्तेरित्युक्तम् ॥ ५० ॥

पुरूरवस एवासीत् त्रयी त्रेतामुखे नृप ।
अग्निना प्रजया राजा लोकं गान्धर्वमेयिवान् ॥ ५१ ॥

इति श्रीमद्भागवते नवमस्कन्धे द्वादशोऽध्यायः ।

सत्यधर्मीया — पुरूरवसः सकाशादेव त्रेतामुखे तद्युगारम्भे त्रयी प्रकारत्रयोपेता श्रुतिराहवनीयाद्याह्वयेन प्रकारत्रयोपेतेनाग्निना प्रजया कृतेन तत्त्वेन गान्धर्वं लोकमेयिवान् । अनन्तरं च यज्ञेशमधोक्षजं हरिमित्याद्युक्तेर्गान्धारयन्वर्तते यद्गन्धर्वस्तेन केशव इति वचनात्सम्पादितभगवज्ज्ञानो मुक्तिमगादित्यपि वक्ति ॥ लोकमिति । लोकं प्रकाशं ज्ञानमिति यावत् । एयिवाननन्तरं गान्धर्वं भगवल्लोकं चैयिवान् । एको वेदः कृते ह्यासीत्त्रेतायां स त्रिधाऽभवत् । स एव पञ्चधा जातो द्वापरं प्राप्य वै युगम् । उत्सन्नः स कलिं प्राप्य वेदः प्रायेण सर्वशः । नैवं ऋक्सामादिनामानि तदा वेदस्य चाभवन्नित्यथर्वणभाष्यम् । ऋचः स ऋच उद्धृत्य ऋग्वेदं कृतवान्विभुः । यजूंषि निगदाश्चैव तथा सामानि सामतः । ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वण इत्यादेरेतन्नामानश्चत्वारो वेदा आविर्भूता मुख्यतो भगवतः । राजा त्ववान्तरव्यञ्जक इति मन्तव्यमिति केचित् । चतुर्धाऽभवदित्यत्र प्रागेव चतुर्धा विभक्तं वेदमृङ्निगदादिरूपं व्यक्तीकृत्येति तत्त्वप्रकाशिका । सर्ववाङ्मयः प्रणवोऽप्येकः । अनन्तरं त्र्याद्यात्मतया विभक्तः । अनन्तमात्रान्तमुदाहरन्ति यं त्रिमात्रपूर्वं प्रणवोच्चयं बुधा इति मध्व विजयः । त्रिमात्रमादितः कृत्वा यावच्चानन्तमात्रकाः । प्रणवास्ते विभेदेन ह्यनन्ताः परिकीर्तिताः । एकमात्रोत्तराः सर्वे परब्रह्माभिधायका इत्येकादशतात्पर्ये । तदा कृते नारायण एक एव देवो देवता चेतीज्यः । इतरे तु विद्याद्यनुबन्धेनार्हणीया न तु देवतात्वेन ब्रह्मरुद्रेन्द्रपूर्वैस्तु नामभिः प्रोच्यते हरिः । देवतात्वेन चेज्यः स ब्रह्माद्या मनुनामकाः । वक्तृत्वेन पितृत्वेन कारित्वेनैव चादरात् । इज्यन्ते देवताः सर्वा न तु देवतया क्वचित् । अनन्ययाजिनस्ते तु तस्मात्कार्तयुगाजना इत्यथर्वणभाष्यम् । एकोऽग्निरेकस्मिन्नग्नौ तन्नामभिरिज्यो हरिः । न च कृतयुगे कृतध्यानाः सर्वेऽपीति नेज्या यदा तदा किमिज्यो हरिरितरे सुरा इज्या इति चिन्ता तदनन्तरं हरिरेवेज्य इत्युत्तरं च सम्भवतस्तदेव कथमित्यत्राग्निष्टोमादिभिर्यज्ञैः सर्वदेवस्थितं हरिम् । यजन्ति तांश्च कारित्वाद्वसुस्तस्मात्तथाऽयजत् । पृथक् पृथक्च त्रेतायां यजन्ते देवतागणान् । यथा कृते तथा प्राज्ञस्त्रेतायां बहुधा तत इति । पूज्यो यज्ञैस्सोपचारैर्ध्येयो वन्द्यश्च सर्वदेति । एवं वायोः पितरं विष्णुमेव यजन्ति देवैः सह ये कृते जनाः । तथा विष्णुं यजन्ते न तु कश्चिदन्यमित्याथर्वणभाष्यम् । मुक्ता अपि यजन्ति का कथा कार्तयुगजनानामित्यत्र कृष्णो मुक्तैरिज्यते वीतमोहैरित्याद्याचार्यवचनं च । वर्णश्चैक एव ब्राह्मणादिवर्णो भगवन्निष्ठः । कृते भागवताः सर्वे वेदाश्च पुरुषास्तथेति । जनोऽखिलो विष्णुपरो

बभूवेति च । न रामराज्यस्थत्रेतायुगीयजनपरमिति कथमेतत्परमित्यत्र त्रेतायां वर्तमानायां कालः कृतसमोऽभवदित्यादिकानि च मानानि कृतचर्यायामनुसन्धेयानि । इति कृतयुगस्थितिमुक्त्वा त्रेतायुगस्थितिं दर्शयति पुरूरवस इतीत्यवतारयन्ति ॥ ५१ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे द्वादशोऽध्यायः ।

छलारी — एवं कृतयुगस्थितिमुक्त्वा त्रेतायुगस्थितिं दर्शयति ॥ पुरूरवस इति । मुखे त्रेतायुगोपक्रमकाले एकवेदस्त्रयी त्रित्वावच्छिन्नः । त्रिविध इत्यर्थः । पुरूरवसः सकाशात्त-तश्चतुर्धाऽभवदित्यादि पूर्वोक्तरीत्या ज्ञातव्यम् । गन्धर्वप्रसादेन लब्धं लोकमुर्वशीलोकमग्निं प्रजया पुत्रत्वेन कल्पितोऽग्निना । एयिवान्प्राप्तः ॥ ५१ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे द्वादशोऽध्यायः ।

॥ अथ त्रयोदशोऽध्यायः ॥

ऐलस्य चोर्वशीगर्भात् षडासन्नात्मजा नृप ।
आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः ॥ १ ॥

सत्यधर्मीया — ऐलस्य पुरूरवस ऊर्वशीगर्भादायुप्रसवानन्तरिकादात्मजाः षट् आसन् । अन्यथा ऐलपुत्रा बभूवुस्ते सप्तदेवसुतोपमा इति भारतविरोधापत्तेः । चकारोऽनुक्तैकपुत्रसमुच्चयार्थः । स चायुर्धामनामा वसुः । विश्वायुश्चैव धर्मात्मा श्रुतायुश्च तथापरः । दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुता इति हरिवंशशंसितसुतान्यतमोऽत्र गृहीतस्तद्गृहीतेतरः स्वीकार्यः । नाम्नां व्यत्यासस्तु न द्वन्द्वताभ्युपगमाप्रतिद्वन्द्वः । सत्यायुरय इत्यत्र ढ्रलोपदीर्घाभाश्छान्दस इति केचित् । केचित्तु सत्यायूरय इति पठन्ति । परन्तु बहुलकोशेषु न दृश्यते स पाठः । वस्तुतस्तु सत्यायुरय इति पाठेऽपि सत्यायुना सहितश्चासौ रयश्चेत्युत्तरपदलोपसमासे न काऽप्यनुपपत्तिरिति ज्ञेयम् । इति शब्दस्याध्या-हृतजय इति षट् इत्यन्वयः । आसन्नः पूर्वमूर्वश्याः स्वसमीपे निवेदितश्च सः । षट् चान्य आसन्नश्चायुरेकश्चेति षडासन्नास्ते च ते आत्मजाश्च । आसन्निति पूर्वश्लोकादावृत्तमनुमतवचनकं सदन्वेतीति सूच्यते ॥ १ ॥

छलारी — ब्रह्मणोऽत्रिः । अत्रेः सोमः । सोमाद्बुधः । बुधात्पुरूरवाः । तस्य पुत्रानाह ॥ ऐलस्य चेति । पुरूरवस इत्यर्थः । सत्यायूरय इत्यत्र ढूलोप इति दीर्घः । जय इत्यनन्तरमितिशब्दोऽध्याहार्यः ॥ १ ॥

श्रुतायोर्वसुमान् पुत्रः सत्यायोश्च श्रुतञ्जयः ।
रयस्याद्भुत एकस्तु जयस्य तनयोऽमितः ॥ २ ॥

सत्यधर्मीया — आयोरायतो वंश इति तमुत्तरत्र शंसयिष्यन्सूचीकटाहन्यायेन द्वितीयस्य श्रुतायोरन्वयमाह ॥ श्रुतायोरिति । सत्यायोस्तृतीयस्य रयस्याद्भुत एकस्त्विति पाठेऽद्भुत इत्याश्चर्य एक एको नाम्नाऽऽसीदित्यर्थः । अथवाऽद्भुत इत्येक आसीदित्यर्थः । रयस्य सुत एकश्चेत्येकमुखः पाठः । अमितो नाम्ना ॥ २ ॥

छलारी — आयोर्वंशमुत्तरत्र वक्ष्यन् क्रमेण श्रुतायुप्रभृतीनां पञ्चानां वंशमाह ॥ श्रुतायोरित्यादिना । जयस्यामितोऽमितसंज्ञः ॥ २ ॥

भीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः ।
तस्य जह्नुः सुतो गङ्गां गण्डूषीकृत्य योऽपिबत् ॥ ३ ॥

सत्यधर्मीया — अथेत्यवान्तरवंशसूचने । ततो भीमात् ततः काञ्चनात् । तस्य होत्रकस्य जह्नुः सुतः । यतः गङ्गां भागीरथीं गण्डूषीकृत्याचम्यापिबत् । अनन्तरं तत्याज । अतः सा जान्हवी नाम्नाऽभवदिति पूरयितव्यम् । यथोक्तं हरिवंशे ।

सौहित्रिर्योऽभवज्जह्नुः केशिन्या गर्भसम्भवः ।
आजह्ने यो महत्सत्रं सर्वमेधं महामखम् ।
पतिलोभेन यं गङ्गा पतित्वेऽभिससार ह ।
नेच्छतः प्लावयामास तस्य गङ्गामतत्सदः ।
स तया प्लावितं दृष्ट्वा यज्ञवाटं समन्ततः ।
सौहित्रिरवदद् गङ्गां क्रुद्धो भरतसत्तम ।
एष ते त्रिषु लोकेषु सङ्क्षिप्यापः पिबाम्यहम् ।
अस्य गङ्गे बले यस्य सद्यः फलमवाप्नुहि ।
राजर्षिणा ततः पीतां गङ्गां दृष्ट्वा महर्षयः ।
उपनिन्युर्महाभागां दुहितृत्वेन जाह्नवीमित्यादि ॥ ३ ॥

छलारी — अथ भीमस्य । ततः काञ्चनात् । यो जह्नुर्भगीरथप्रार्थनेन गङ्गाया भूमिं प्रत्यागमनकाले गङ्गां गण्डूषीकृत्याचम्यापिबत् ॥ ३ ॥

जह्नोस्तु पूरुस्तत्पुत्रो बलाकश्चात्मजोऽजकः ।
ततः कुशः कुशस्यापि कुशाम्बुस्तनयो वसुः ॥ ४ ॥

कुशनाभश्च चत्वारो गाधिरासीत् कुशाम्बुजः ॥ ५ ॥

सत्यधर्मीया — तस्य पूरोस्तस्य बलाकस्य । ततोऽजकात् कुशः । कुशाम्बुस्तनयो नाम्ना वसुः कुशनाभश्चेति चत्वारः । गाधिः कुशाम्बुज आसीत् । एतन्नामद्वैविध्यं रामायणश्रीविष्णुपुराणादितोऽवसीयते । एषः कुशाम्बुः शक्रतुल्यः पुत्रो भवेदिति तपश्चकार । तं चोग्रतपसमवलोक्य मा भवत्वन्योऽस्मत्तुल्यवीर्य इत्यात्मनैवेन्द्रः पुत्रत्वमगात्स गाधिर्नाम कौशिकोऽभूदित्यादि विष्णुपुराणे । बलवान्कुशनामसुतस्त्वासीदित्यादि रामायणे । तथा गाधिर्गाधीति वाऽभिधाद्वयं तत्सुतस्यापीति ज्ञेयम् । गाधिनस्तनयस्त्वासीद्गाधिरित्येष विश्रुतः । गाधेः पुत्रो महातेजाः कुशनाभ इत्यादि रामायणोक्तेः । हरिवंशे च ।

पुत्रत्वं कल्पयमास स देवेन्द्रः सुरोत्तमः ।
स गाधिरभवद्राजा मघवन्कौशिकः स्वयम् ।
पौरकुत्स्याभवद्भार्या गाधिस्तस्यामजायतेति ॥ ४,५ ॥

छलारी — तस्येत्यस्यानुकर्षः । तस्य बलाकस्याजक आत्मजः । कुशस्यापि कुशाम्बुरित्यादिचत्वारः सुताः । कुशाम्बुजो गाधिरित्येकस्य नामद्वयम् । कुशपुत्रात् । कुशनाभादिति शेषः । गाधिरासीत् । तदुक्तं संग्रहरामायणे बालकाण्डपञ्चमसर्गे । कुशनाभसुताद्भूयात्कुशपौत्रान्महाबलात् । गाधिनाम्नो निजं जन्म रामायाह स्म कौशिक इति ॥ ४,५ ॥

तस्य सत्यवतीं कन्यामृचीकोऽयाचत द्विजः ।
वरं विसदृशं मत्वा गाधिर्भार्गवमब्रवीत् ॥ ६ ॥

सत्यधर्मीया — तस्य गाधिनः सत्यवतीं नाम्ना ऋचीको द्विजोऽयाचत । सर्वथा कन्यां न दास्यामीत्यवचने द्विजत्वं हेतुः । शापभयादिममेकमसाध्यमुपदेशमुपदिदेशेत्याह ॥ वरमिति । वार्धककार्कश्यादितो विसदृशं तनयाननुरूपम् ॥ ६ ॥

छलारी — गाधेः पुत्रो विश्वामित्रो ब्रह्मर्षिरभवदित्युत्तराध्याये वक्ष्यति गाधेरभून्महातेजा इत्यादिना। तत्र तावत्परशुरामावतारचरितं वक्तुं गाधेः कन्यावंशमाह ॥ तस्य सत्यवतीमित्यादिना। तस्य गाधेर्विसदृशमननुरूपं भार्गवं ऋचीकम्। दक्षिणवामयोरेकतः श्यामः कर्णौ येषां ते। सर्वस्मिन्नङ्गे, चन्द्रस्येव वर्चो येषां ते। शुल्कं मौल्यम्। न चेदपि पर्याप्तमस्मत्कन्यकायाम्। यतः कुशिकाः कौशिका वयं इति। कुशिकान्वय इति पाठे यतः कुशिकान्वय इति प्रसिद्ध इति योजना ॥ ६-७ ॥

एकतः श्यामकर्णानां हयानां चन्द्रवर्चसाम्।
सहस्रं दीयतां शुल्कं कन्यायाः कुशिकान्वयः ॥ ७ ॥

सत्यधर्मीया — एकत एकस्मिन्भागे श्यामः कर्णौ येषां ते तथा तेषां चन्द्रवर्चसां सर्वाङ्गीणचन्द्रकान्तीनां शुभ्राणामित्यर्थः। शुल्कं कन्यामूल्यम्। कुशिका वयमिति पाठे यतो वयं कुशिका अतो दुर्मिलोऽस्मदनुबन्धस्ततश्चैवं कुर्वित्यर्थः। कुशिकान्वय इति पाठे कुशिकानामन्वयः सम्बन्धो यस्य स एवं चेद्भविष्यसीत्यर्थः ॥ ७ ॥

इत्युक्तस्तन्मतं ज्ञात्वा गतः स वरुणान्तिकम्।
आनीय दत्वा तानश्वानुपयेमे वराङ्गनाम् ॥ ८ ॥

सत्यधर्मीया — तन्मतं जरठ इति मामसाध्ये कर्मणि न्ययुङ्क्तायमिति ज्ञात्वा तानेकतः श्यामकर्णानानीय दत्वा वराङ्गनां सत्यवतीमुपयेमे ॥ ८ ॥

छलारी — तांस्तादृशान्। श्वश्रा भार्या मात्रा उभयैर्मन्त्रैः पक्तैर्ब्राह्मैर्मन्त्रैश्चरुं श्रपयित्वा प्रपच्याभिमन्त्र्य तवेदं तव मातुरिदमिति निगद्य संस्थाप्य। स्नातुं गतः ॥ ८ ॥

स ऋषिः प्रार्थितः पत्न्या श्वश्र्वा चापत्यकाम्यया।
श्रपयित्वोभयैर्मन्त्रैश्चरुं स्नातुं गतो मुनिः ॥ ९ ॥

सत्यधर्मीया — पत्न्या सपत्न्या सत्यवत्या श्वश्रा गाधिभार्यया चापत्यकाम्यया पुत्रेच्छया वा तदिच्छत्येत्युभयत्रान्वयि वेदम्। उभयैर्ब्रह्मक्षत्रोभयजातियोग्यैः सात्त्विकै राजसैश्च मन्त्रैश्चरुं होमं श्रपयित्वा पक्वीकृत्य मुनिर्ऋचीकः। अमुनिरिति छेदे तवेदं तवेदमित्युक्त्वा गत इत्यर्थः सम्पद्यते। यथोक्तं हरिवंशे।

उवाचाहूय तां भर्ता ऋचीको भार्गवस्तदा ।
उपयोज्यश्चरुरयं त्वया मात्रा त्वयं तव ।
तस्यां जनिष्यते पुत्रो दीप्तिमान्क्षत्रियर्षभः ।
तवापि पुत्रं कल्याणि धृतिमन्तं तपोधनम् ।
शमात्मकं द्विजश्रेष्ठं चरुरेष विधास्यति ।। इति ।

चरुशब्देनोपलक्षणीयं वृक्षालिङ्गनं तथा तद्व्यत्यस्तिरपि ज्ञेया । उक्तमरण्यपर्वणि ।

आलिङ्गेतां पृथग्वृक्षौ साऽश्वत्थं त्वमुदुम्बरम् ।
आलिङ्गने चरौ चैव चक्रतुस्ते विपर्ययम् ।। इति ।। ९ ।।

तावत् सत्यवती मात्रा स्वचरुं याचिता सती ।
श्रेष्ठं मत्वाऽनयाऽयच्छन्मात्रे मातुरदात् स्वयम् ।। १० ।।

सत्यधर्मीया — तावत्तदा गत्यन्तरा स्वचरुं स्वार्थं क्लृप्तमनया स्वमात्रा श्रेष्ठं मत्वा किञ्चिदपि स्वभार्यापक्षपातेन स चरुः पुरुभिर्मन्त्रैः श्रपितः स्यादिति मात्रे स्वचरुमयच्छत् । मातुः स्वयमदात् जघास । मातुः सम्बन्धितया दत्तं च परस्परदानेनास्य चरोः फलाधायकतेति ज्ञायते च हरिवंशोपरि । तथा हि ।

चरुमादाय यत्नेन सा तु मात्रे न्यवेदयत् ।
माता तु तस्य दैवेन दुहित्रे स्वं चरुं ददौ ।। इति ।। १० ।।

छलारी — तावत्तदा भार्यायां भर्तुः स्नेहात्पुत्रीयं चरुं श्रेष्ठं मत्वाऽनया मात्रा स्वमात्रा याचिता सत्यवती स्वचरुं मात्रे ददौ । मातुश्चरुं स्वयमदाद्भक्षितवती । आडभावः छान्दसः ।। १० ।।

तद् विज्ञाय मुनिः प्राह पत्नीं कष्टमकारषीः ।
घोरो दण्डधरः पुत्रो भ्राता ते ब्रह्मवित्तमः ।। ११ ।।

सत्यधर्मीया — वनादागतस्तत् पत्नीश्वश्रूभ्यां कृतं विनिमयम् विज्ञाय तपःशक्त्या । यथोक्तं तत्रैव । तामृचीकस्ततो दृष्ट्वा योगेनाभ्यनुसृत्य चेति । नः कष्टमसम्मतत्वात् । तत्किं कष्टमित्यत आचष्टे ।। घोरो दण्डधरः पुत्र इति । ते भ्राता श्वश्रुसुतः ।। ११ ।।

छलारी — कष्टं जुगुप्सितम् । तदेवाह । ते पुत्रो घोरो दण्डधरः सर्वसंहारको भविष्यति । भ्राता ब्रह्मवित्तमो भविष्यतीति ॥ ११ ॥

प्रसादितः सत्यवत्या मैवं भूदिति भार्गवः ।
अथ तर्हि भवेत् पौत्रो जमदग्निस्ततोऽभवत् ॥ १२ ॥

सत्यधर्मीया — एवं मा न भूदिति सत्यवत्या प्रसादित उत्तरमाहेत्यप्याह ॥ मैवं भूदिति भार्गव इति । एवं त्वज्ञपितानुकूलं मा सर्वथा पुत्रपौत्रादिपारम्पर्येण तद्भून्न भवेत् । माङि लुङ् सर्वलकारापवाद इत्युक्तेर्न भवेदित्यर्थः । तर्हि ममार्थना निरर्थकेत्यत एवं व्यवस्थया तव दुरवस्थानिस्तार इति दारान्प्रत्युदाहरति ॥ अथेति । पौत्रो घोरो भवेत् । तत एवमुक्त्यनन्तरं जमदग्निरभवत्पुत्र इति शेषः । न च चरोर्मन्त्रैर्नातन्त्री भवतः कथमित्यवस्था जातेत्यतस्तपः सामर्थ्यमृषेरेव विनियमनमपर्यवसायि बभूवेति न सत्यवतीयाश्चाया व्यभिचारो न च व्यभिचारश्चरोरिति मन्तव्यम् । यथोक्तं हरिवंशे ।

इच्छन् लोकानपि मुने सृजेथाः किं पुनः सुतम् ।
शमात्मकमृजुं त्वं मे पुत्रं दातुमिहार्हसि ।
काममेवंविधः पौत्रो मम स्यात्तव च प्रभो ।
यद्यन्यथा न शक्यं वै कर्तुमेतद्द्विजोत्तम ।
ततः प्रसादमकरोत्स तस्यास्तपसो बलात् ।
भद्रे नास्ति विशेषो मे पौत्रे वा वरवर्णिनि ।
ततः सत्यवती पुत्रं जनयामास भार्गवम् ।
तपस्यभिरतं दान्तं जमदग्निं शमात्मकम् ।
भृगोश्चरुविपर्यासे रौद्रवैष्णवयोः पुरा ।
जगत्यां वैष्णवेशे तु जमदग्निरजायतेति ॥ १२ ॥

छलारी — घोरो दण्डधरः पुत्रो मा भूदिति प्रसादितो भार्गव आह ॥ अथ तर्हीति । ते पौत्रो घोरो भविष्यतीति । पुत्रस्तु ब्रह्मज्ञानी भविष्यतीत्यर्थः । न चैतावता वरस्य वैयर्थ्यम् । परंपरया जनकत्वादिति हृदयम् । ततो भार्गवात्सत्यवत्यां जमदग्निः पुत्रोऽभवदित्यर्थः ॥ १२ ॥

सा चाभूत् सुमहापुण्या कौशिकी लोकपावनी ।
रेणोः सुतां रेणुकां वै जमदग्निरुवाह याम् ॥ १३ ॥

सत्यधर्मीया — सा च सत्यवत्यपि नाम्ना कौशिकी नदीति शेषः । यथोक्तं तत्रैव । कौशिकीति समाख्याता प्रवृत्तेयं महानदीति । रेणोरिक्ष्वाकुकुलभवस्य राज्ञः सुतां नाम्ना रेणुकां तस्या एव कामलीति नाम च । यथोक्तम् । इक्ष्वाकुवंशप्रभवो रेणुर्नाम नराधिपः । तस्य कन्या महाभागा कामली नाम रेणुका । रेणुकायां तु कामल्यामित्यादि । अत एव न कामलेयो जघानामुं हैहयं क्षत्रपुङ्गवमिति पद्मपुराणविरोध इति ज्ञेयम् । यां जमदग्निरुवाह तस्यामित्युत्तरेणान्वयः ॥ १३ ॥

छलारी — सा च सत्यवती कौशिकी नामिका नद्यभूत् । यामुवाह ॥ १२ ॥

तस्यां वै भार्गवऋषेः सुता वसुमदादयः ।
यवीयान् जज्ञ एतेषां राम इत्यभिविश्रुतः ॥ १४ ॥

सत्यधर्मीया — भार्गवर्षेर्जमदग्नेर्वसुमानेवादिर्येषां ते । यवीयान्कनिष्ठः ॥ १४ ॥

छलारी — तस्यां भार्गवर्षेर्जमदग्नेर्वसुमदादयः । अभवन्निति शेषः । एतेषां निर्धारणे षष्ठी ॥ १४ ॥

यमाहुर्वासुदेवांशं हैहयानां कुलान्तकम् ।
त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीम् ॥ १५ ॥

सत्यधर्मीया — यं वासुदेवांशं साक्षादधोक्षजं पद्मनाभांशम् । एतन्नानावताराणां निधानं बीजमव्ययमिति वचनात् । आहुः । हैहयानां यत्कुलं तदन्तकम् । हेहयानामिति सुपठम् । तद्राजस्य बहुषु तेनैवास्त्रियामिति तद्राजा । ञो लुकूबहुष्वित्युक्तेः । न वृत्तविच्छित्तिश्च । अथवा हैहयशब्द एवायमखण्डस्तेन तद्राजलोपो न ज्ञायत इति च हैहयानामिति पाठः । अस्त्रियामित्युक्तेः । हैहयानां प्रजानामिति वा । त्रिःसप्तकृत्वो एकविंशतिवारम् ॥ १५ ॥

छलारी — यं रामं वासुदेवांशं वासुदेवः पद्मनाभो यस्यांशमाहुः । एतन्नानावताराणां निदानं बीजमव्ययमित्युक्तेः । त्रिसप्तिकृत्व एकविंशतिवारमित्यर्थः ॥ १५ ॥

दृप्तं क्षत्रं भुवो भारमब्रह्मण्यमधार्मिकम् ।
रजस्तमोधृतमहन् फल्गुन्यपि कृतेंऽहसि ॥ १६ ॥

सत्यधर्मीया — दृप्तमहङ्कृतं भारं तद्रूपं तत्प्रयोजकं दृप्तत्वादिकं रजस्तमोधृतं रजस्तमसी तत्प्रयोज्यरागद्वेषौ धृते येन । वृतपाठोऽपि वृतोऽस्माभिः । तदर्थश्च स्फुटः । अंहसि तदपराधे फल्गुन्यल्पेऽप्यहन्हतवान् ॥ १६ ॥

छलारी — क्षत्रवधे मुख्यकारणमाह ।। दृप्तमिति । भुवो भारभूतं क्षत्रं दुष्टक्षत्रियसमूहं रजस्तमोभ्यां रागद्वेषाभ्यां वृतमहन्हतवान् । फल्गुन्यल्पेऽहसि अपराधे ।। १६ ।।

राजोवाच —

किं तदंहो भगवतो राजन्यैरजितात्मभिः ।
कृतं येन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः ।। १७ ।।

सत्यधर्मीया — तनीयस्येनसि कृते कृतमनेनानेन सांहननं हैहयानामिति श्रुतवान्परीक्षित् परीक्षणीयं तदंह इति पृच्छति ।। किमिति । अजितात्मभिरजितोऽवशीकृत आत्मा मनो येषां ते तैरभीक्ष्णशः पुरुवारम् ।। १७ ।।

छलारी — राजन्यैः क्षत्रियैरजितात्मभिरजितमनस्कैः । येनापराधेनाभीक्ष्णशो बहुवारम् ।।१७।।

श्रीशुक उवाच —

हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः ।
दत्तं नारायणस्यांशमाराध्य परिकर्मभिः ।। १८ ।।

बाहून् दशशतं लेभे दुर्धर्षत्वमरातिषु ।
अव्याहतेन्द्रियौजश्रीतेजोवीर्ययशोबलम् ।। १९ ।।

सत्यधर्मीया — अर्जुनः कार्तवीर्यार्जुनो दत्तं दत्तात्रेयमत्रिपुत्रम् । आत्मेशब्रह्मसम्भवानित्युक्तेर्नारायणस्यात्मनोंऽशं साक्षात्कलाम् । परिकर्मभिः परिचर्याभिराराध्य बाहून्दशशतं सहस्रसङ्ख्याकान् लेभे । अरातिष्वमित्रेषु दुर्धर्षत्वमप्रधृष्यतां च तथाऽव्याहतानि चेन्द्रियाणि यानि तेषामोजोऽवष्टम्भनसामर्थ्यमर्थादव्याहतताऽपीन्द्रियेष्वर्थनालभ्येति सूचितम् । श्रीः शोभा च सम्पद्वा तेजश्च शरीरकान्तिः प्रभावो वा वीर्यमस्त्रादिलभ्यं यशः कीर्तिश्चैतैः सहितं च तद्बलं च शारीरं सामर्थ्यं च लेभ इत्यन्वयः । योकारं प्रत्यन्तरासहायपुस्तकन्यस्तं विलोक्याजश्रीरौत्पत्तिश्रीरिति व्याख्यातम् । अनिर्वाहात्परन्तु न लग्नम् । औत्पत्तिकत्वे सम्पद आराधनसाधनसाध्यगणगणनौचित्यादिति चिन्तयन्ति । प्रत्यन्तरेषु यौजः श्रीतेज इत्यादि दृश्यते पाठो व्याकृतवन्तश्च केचित् ।। १८,१९ ।।

छलारी — कार्तवीर्यार्जुनेन कृतमपराधं वक्तुं तस्य दर्पहेतुमैश्वर्यादिकमाह ।। हैहयानामित्यादिना । दत्तं दत्तात्रयनामकम् । परिकर्मभिर्हरिपरिचर्यारूपकर्मभिः ।। अरातिषु शत्रुषु दुर्धर्षत्वं वरं च लेभे ।

अव्याहतान्युभयविधेन्द्रियाणि च । ओजोऽवष्टंभशक्तिश्च । श्रीः शरीरकान्तिश्च । तेजो वीर्यादिकं च । लेभ इत्यनुषङ्गः । द्वन्द्वैकवद्भावोऽयम् ।। १८,१९ ।।

योगेश्वरत्वमैश्वर्यं गुणा यत्राणिमादयः ।
चचाराव्याहतगतिर्लोकेषु पवनो यथा ।। २० ।।

सत्यधर्मीया — विष्णोर्दत्तात्रेयनाम्नः प्रसादाद्योगवीर्यवानिति वचनात् यत्र यस्मिन्योगेश्वरत्वे ऐश्वर्यमणिमादयश्च स्वत एव सम्पद्यन्ते सम्पन्नैतद्योगेश्वरत्वं लेभ इत्यन्वयः । स पवनो वायुर्यथा तथाऽव्याहतगतिरप्रतिहतगतिश्चचार भूमाविति शेषः ।। २० ।।

छलारी — योगेश्वरत्वं योगसामर्थ्यरूपमैश्वर्यं यत्र यस्मिन्नैश्वर्येऽणिमादयो गुणा अन्तर्भूतास्तादृशमैश्वर्यं लेभ इत्यर्थः ।। २० ।।

स्त्रीरत्नैरावृतः क्रीडन् रेवाम्भसि मदोत्कटः ।
वैजयन्तीं स्रजं बिभ्रद् रुरोध सरितं भुजैः ।। २१ ।।

सत्यधर्मीया — रेवाम्भसि नर्मदोदके । रेवा तु नर्मदा सोमोद्भवा मेखलकन्यकेत्यमरः । नर्मदातोयमाश्रित्येत्यादिरामायणेन नैव संवाद्यम् । सरितं नदीं भुजै रुरोध प्रवाहोपहतिं चक्र इति भावः ।। २१ ।।

छलारी — रेवाया नर्मदाया अम्भसि क्रीडन् जलक्रीडां कुर्वन्सरितं नर्मदां रुरोध प्रवाहस्तंभनं कृतवान् ।। २१ ।।

विप्लावितं स्वशिबिरं प्रतिस्रोतःसरिज्जलैः ।
नामृष्यत् तस्य तद्वीर्यं वीरमानी दशाननः ।। २२ ।।

सत्यधर्मीया — प्रतिस्रोतःसरिज्जलैरुपरि प्रसरत्सरिद्वारिभिर्बाह्वपवाहितत्वात्प्रवाहस्य शिबिरं विप्लावितं श्रुत्वा वीरमानी तत्त्वेनाभिमानवान्दशाननो नामृष्यन्न सेहे । यथोक्तं रामायणे ।

तमद्भुततमं दृष्ट्वा राक्षसौ शुकसारणौ ।
सन्निवृत्तावुपागम्य रावणं तमथोचतुः ।। इत्यादि ।

शिबिरं तदादिसदाशिवसपर्योपयुक्तपुष्पोपहारादिकं चाम्बुपप्लुतं दृष्ट्वा । तथा हि रामायणे

पुष्पोपहारं सकलं रावणस्य जहार ह । रावणोऽर्धसमाप्तं तमुत्सृज्य नियमं तदा । इति । असहने हेतुर्वीरमानीति ॥ २२ ॥

छलारी — रावणो दिग्विजये माहिष्मतीपुर्याः समीपे नर्मदायां देवपूजां कुर्वन् कार्तवीर्यार्जुनेन प्रवाहस्यावरोधात्प्रतिस्रोतः सरिज्जलैः । प्रतिस्रोतः प्रतिगमनं येषां सरिज्जलानां तथा तैर्विप्लावितं स्वशिबिरमालक्ष्य तद्वीर्यं नामृष्यत् न सहे ॥ २२ ॥

गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्बिषः ।
माहिष्मत्यां सन्निरुद्धो मुक्तो येन कपिर्यथा ॥ २३ ॥

सत्यधर्मीया — स्त्रीणां समक्षमिति बह्वक्षमताहेतुरिवात्यवमानहेतुरिति ज्ञेयम् । माहिष्मत्यां तन्नगर्यां येन कार्तवीर्येण यथा कपिस्तथा सन्निरुद्धो मुक्तश्च । पुलस्त्यप्रार्थितोऽमुचदिति हृदयम् । ततः पुत्रकृतस्नेहात्कम्पमानो महाधृतिः । माहिष्मतीपतिं द्रष्टुमाजगामेत्यारभ्य पुलस्त्याज्ञां प्रगृह्याथ पार्थिवेन्द्रो मुमोच वेत्यन्तेन रामायणोक्तेः । कपिर्यथा तथा निरुद्धो मुक्तो मानपूर्वकं मुक्त इत्यर्थः । इदमप्यवादीदादिकविः । प्रपूज्य दिव्याभरणस्रगम्बरैरित्यादिना । कपिर्वाली यथाऽमुचत्तथा येन मुक्त इति वा ॥ २३ ॥

छलारी — कृतकिल्बिषः क्रीडन्तमभिभावितुं प्रवृत्तोऽत एवापराधात्कार्तवीर्यार्जुनेन गृहीतो रावणो माहिष्मत्यां पुर्यां कपिर्यथा कपिरिव सन्निरुद्धश्च येनावज्ञया मुक्तश्च ॥ २३ ॥

स एकदा तु मृगयां विचरन् विजने वने ।
यदृच्छयाऽऽश्रमपदं जमदग्नेरुपाविशत् ॥ २४ ॥

सत्यधर्मीया — यदृच्छया हरीच्छया ॥ २४ ॥

छलारी — इदानीं श्रीरामस्य कार्तवीर्यार्जुनकृतमपराधं दर्शयन्नाह ॥ स एकदेत्यादिना ॥ २४ ॥

तस्मै स नरदेवाय मुनिरर्हणमाहरत् ।
ससैन्यामात्यवाहाय हविर्धान्या तपोधनः ॥ २५ ॥

सत्यधर्मीया — हविर्धान्या कामधेन्वा ॥ २५ ॥

छलारी — नरवीराय कार्तवीर्यार्जुनभूपाय हविर्धान्या कामधेन्वा । अर्हणं आतिथ्यादि ॥ २५ ॥

स वीरस्तस्य तद् दृष्ट्वा आत्मैश्वर्यातिशायनम् ।
तन्नाद्रियन्नग्निहोत्रीं साभिलाषः स हैहयः ॥ २६ ॥

हविर्धानीमृषेर्दर्पान्नरान् हर्तुमयोजयत् ।
तां ते माहिष्मतीं निन्युः सवत्सां क्रन्दतीं बलात् ॥ २७ ॥

सत्यधर्मीया — स वीरः कार्तवीर्यस्तस्य जमदग्नेरात्मैश्वर्यातिशायनमात्मन ऐश्वर्यस्यातिशायनमतिक्रम्य वर्तनं दृष्ट्वा गोमात्रेण साङ्गोपाङ्गचतुरङ्गसेनासत्कारोपयुक्तं तदिति यावत् । तदात्मैश्वर्यं नाद्रियन् कियन्मदीयं तुच्छमिति तत्रादरं न कुर्वन् । अग्निहोत्रीयां गामुद्दिश्य साभिलाषः साशः स हैहयस्तामृषेर्हविर्धानीं हर्तुं नरान्दूतानयोजयन्नियुयोज । तत्र हेतुमाह ॥ दर्पादिति । ते दूतास्तां माहिष्मतीं निन्युः । तान्ते रुषौ ग्लानिमति, ऋषेरिति विपरिणतं सत्सप्तम्यन्तमेवान्वेति । सति सवत्सां क्रन्दतीं बलान्निन्युरिति वा । तदातिथ्यमनाद्रियत् । अन्यत्राभिलाषवतः पुरुषस्यान्यत्र न रुचिरिति प्रसिद्धमित्यन्नानादरणं गोगौरवादिति ज्ञेयमिति व्याकुर्वते ॥ २६,२७ ॥

छलारी — आत्मैश्वर्यातिशायिनमतीत्य वर्तमानम् । तस्य जमदग्नेस्तदैश्वर्यं दृष्ट्वा तत्तेन कृतमर्हणं नाद्रियन्ननादरं कुर्वन् अग्निहोत्रीयकामधेनुं प्रति साभिलाषोऽभूत् । सहैहयो हैहयदेशस्थैः सहितः ॥ हविर्धानीं कामधेनुं नरान् भृत्यान्हर्तुं नेतुं माहिष्मतीं स्वपुरीम् ॥ २६,२७ ॥

अथ राजनि निर्याते राम आश्रम आगतः ।
श्रुत्वा तत् तस्य दौरात्म्यं चुक्रोधाहिरिवाहतः ॥ २८ ॥

सत्यधर्मीया — तस्यार्जुनस्य । आहतः पदाऽहिरिव चुक्रोध कोपं दर्शयामासेत्यर्थः । अत्र कपिलकोपविषये मानमानन्दतीर्थवर्यैरुदाहृतमिति न पराक्रान्तम् ॥ २८ ॥

छलारी — राजनि कार्तवीर्यार्जुननामके राज्ञि । आहतः । दण्डेनेति शेषः ॥ २८ ॥

परशुं योजयामास सतूणं चर्मकार्मुकम् ।
अन्वधावत दुर्धर्षो मृगेन्द्र इव यूथपम् ॥ २९ ॥

सत्यधर्मीया — सतूणं तूणाभ्यां सहितं चर्मकार्मुकं परशुं चेति योजयामास स्वसंयुक्तीकृतवान् धृतवानिति यावत् । अन्वधावत दुर्धर्ष इति पाठः सरलोऽप्रयासम् । सानुप्रासश्च दुर्मर्ष इति पाठोऽपि

काचित्कः सम्भवदर्थः । प्रथमपाठे, एकादशस्कन्धे तेजस्वी तपसा दीप्तो दुर्धर्ष इति श्लोकतात्पर्ये पराभवो धर्षणं स्यादवज्ञानमथाऽपि वा । न तत्सत्सु सदा कुर्यात्सहसा शपनं न चेति साद्गुण्य इत्युक्तेः परपराभवनाशक्य इत्यर्थः । योजयामासान्वधावत चेति योजना ॥ २९ ॥

छलारी — योजयामासोत्तेजितं कृतवान् । वैकुण्ठे योजयामासेति वा । कार्मुकं गृहीत्वेति शेषः । मृगेन्द्रः सिंहो यूथपं गजयूथपम् ॥ २९ ॥

तमापतन्तं भृगुवर्यमोजसा धनुर्धरं बाणपरश्वधायुधम् ।
ऐणेयचर्माम्बरमात्मधामभिर्युतं जटाभिर्ददृशे पुरीं नृपः ॥ ३० ॥

सत्यधर्मीया — एणस्य स्त्री एणी तस्या इदमित्यर्थे एण्या ढञिति ढञि एयादेशे चैणेयम् । ऐणेयमेण्याश्चर्माद्यमित्यमरः । कृष्णाजिनमेवाम्बरं वस्त्रं यस्य स आत्म स्वरूपभूतं धाम तेजो यासां ताभिर्जटाभिरात्मनो धामानि तेजांसि तैर्जटाभिश्च युताम् पुरीं प्रत्योजसाऽऽपतन्तं भृगुवर्यं नृपः कार्तवीर्यो ददृशे ॥ ३० ॥

छलारी — कृष्णाजिनं तदेव अम्बरं यस्य स तथा । अर्कवद्बालार्कवद्धाम तेजो यासां ताभिर्ददृशे ॥ ३० ॥

अचोदयद्धस्तिवरांश्च पत्तिभिर्गदासिबाणर्ष्टिशतघ्निशक्तिभिः ।
अक्षौहिणीः सप्तदशातिभीषणास्ता राम एको भगवानसूदयत् ॥ ३१ ॥

सत्यधर्मीया — हस्तिवरान्गजराजांस्तत्सादिनो वा पत्तिभिः पदातिभिः । गदा चासिश्च बाणाश्चर्ष्टयश्च शतघ्नयश्च तैः सहिताः शक्तयो येषां ते तैरतिभीषयन्तीति तास्तथा । अत्यन्तं भीषणं याभिस्ताः सप्तदशाक्षौहिणीः या अचोदयत्ता राम एक एवासूदयत् । भगवानित्येतदसङ्गतताप्रच्युत्या इति ज्ञेयम् ॥ ३१ ॥

छलारी — अर्जुनो या अक्षौहिणीरचोदयद्रामस्ता असूदयद्धतवानित्यन्वयः । कथम्भूताः । अक्षौहिणीर्हस्त्यादिभिः सहिता गदादिभिश्च सहिताः ॥ ३१ ॥

यतो यतोऽसौ प्रहरन् परश्वधो मनोनिलौजाः परचक्रसूदनः ।
ततस्ततश्छिन्नभुजोरुकन्धरा निपेतुरुर्व्यां हतसूतवाहनाः ॥ ३२ ॥

सत्यधर्मीया — यतो यतो यत्र यत्र परश्वधः परशुर्मनोनिलौजा मनश्चानिलौजा मनश्चानिलश्चेन्मिलितौ तयोरोजोऽवष्टम्भशक्तिर्बलं वा यस्य सः । अभूतोपमा । परचक्रं परसैन्यं सूदयतीति स तथा हरेश्चक्रमायुधत्वेन प्रसिद्धमत एतदपेक्षया किञ्चित्सामर्थ्यविशेषोऽधिकस्तत्र स्यादित्यतो वाऽऽह ।। परचक्रसूदन इति । परस्य चक्रवत्सूदयतीति स तथेति प्रहरन् गत इति शेषः । ततस्ततस्तत्र तत्र हतसूतवाहनाः सन्तश्छिन्नभुजोरुकन्धरा उर्व्यां निपेतुः ।। ३२ ।।

छलारी — परेषां चक्रं सैन्यं सूदयतीति तथा । चक्रं सैन्यरथांगयोरित्यभिधानम् । मनोवदनिलवदोजो वेगो यस्य स तथा । मनोवद्वेगोऽनिलवदवष्टंभ इति वा । ओजोऽवष्टम्भबलयोरिति यादवः । असौ रामो यतो यतो यत्र यत्र प्रहरन् शत्रुशिरः संहरन् परश्वधो यस्य स तथा । तादृशः सन् गतः, तत्र तत्र परेषां वीरा निपेतुरित्यन्वयः । कथम्भूताः । छिन्ना भुजा उरवः कन्धराश्च येषाम् । हताः सूता वाहनानि च येषाम् ।। ३२ ।।

दृष्ट्वा स्वसैन्यं रुधिरौघकर्दमे रणाजिरे रामकुठारसायकैः ।
विवृक्णचर्मध्वजचापविग्रहं निपातितं हैहय आपतद् रुषा ।। ३३ ।।

सत्यधर्मीया — रणाजिरे रणाङ्गणे रुधिरौघकर्दमे रक्तसङ्घपङ्के विवृक्णाश्छिन्ना चर्मध्वजचापविग्रहा यस्य तत् । पातितं दृष्ट्वा हैहयो रुषाऽऽपतत् ।। ३३ ।।

छलारी — हैहयः कार्तवीर्यार्जुनो रुधिरोघो रक्तप्रवाहस्तेन युक्तकर्दमे निपातितं स्वसैन्यं दृष्ट्वा । आपतत् । कुठारसायकैर्विवृक्णचर्मादयो यस्य तत् विग्रहो देहः ।। ३३ ।।

अथार्जुनः पञ्चशतेषु बाहुभिर्धनुष्षु बाणान् युगपत् स सन्दधे ।
रामाय रामोऽस्त्रभृतां समग्रणीस्तानेकबद्धेषुभिरच्छिनत् समम् ।। ३४ ।।

सत्यधर्मीया — पञ्चशतेषु धनुःषु बाहुभिरितरैस्तत्सङ्ख्यैर्युगपद्बाणान्सन्दधे । अस्त्रभृतां मध्ये समग्रणीरतिश्रेष्ठ एकस्मिन्नेव धनुषि बद्धाः सन्धिता इषवो बाणास्तैरेक एव । धाराविरामाभावात्तथा बद्धा इषवस्तैरिति वा समं युगपदच्छिनत् ।। ३४ ।।

छलारी — स कार्तवीर्यार्जुनो बाहुभिर्गृहीतेषु पञ्चदशेषु धनुःषु तावद्भिर्बाहुभिस्तावतो बाणान् रामाय सन्दधे । एकधन्वा एकमेव धनुर्यस्य स तथा रामस्तानि धनूंषि समं सह तत्क्षणमेवाच्छिनत् ।। ३४ ।।

पुनः स्वहस्तैरचलान् मृधेऽङ्घ्रिपानुत्क्षिप्य वेगादभिधावतो युधि ।
भुजान् कुठारेण कठोरनेमिना चिच्छेद रामः प्रसभं हसन्निव ॥ ३५ ॥

सत्यधर्मीया —— स्वहस्तैरचलान्पर्वतान्पुनरङ्घ्रिपान्पादपानुत्क्षिप्य मृधे वेगादभिधावतो युधि । इतरस्मिञ्जने रणं त्यक्त्वा सति परीक्षके कठोरनेमिना निशितधारवता कुठारेण प्रसभं बलाद्धसन्निव लोकलोचनमपेक्ष्य द्विभुजस्य मम तव च सहस्रहस्तस्याननुरूपो रण इति हासः । अथवा नायासोऽस्यासेति द्योतयत्यनेनेति ज्ञेयम् । चिच्छेदाच्छिनत् ॥ ३५ ॥

छलारी —— पुनः स्वहस्तैर्मृधे साधनभूतान् अचलान् अङ्घ्रिपान्वृक्षान् उत्क्षिप्य वेगादभिधावतोऽर्जुनस्य भुजान्कठोरनेमिना शितधारेण कुठारेण हसन्निवाच्छिनदित्यन्वयः ॥ ३५ ॥

कृन्तबाहोः शिरस्तस्य गिरिशृङ्गमिवाहरत् ।
हते पितरि तत्पुत्रा अयुतं दुद्रुवुर्भयात् ॥ ३६ ॥

सत्यधर्मीया —— कृन्ताश्छिन्ना बाहवो यस्य तस्य गिरिशृङ्गमिव विद्यमानं शिरोऽहरज्जहार । पितरि कार्तवीर्ये हते सति तत्पुत्राः कार्तवीर्यजा अयुतं दशसहस्रसङ्ख्याका भयाद्राम-संहृतिभीतेर्दुद्रुवुः ॥ ३६ ॥

छलारी —— कृत्ताः छिन्ना बाहवो यस्य स तथा । तस्य पितरि कार्तवीर्यार्जुने ॥ ३६ ॥

अग्निहोत्रीमुपावृत्य सवत्सां परवीरहा ।
समुपेत्याश्रमं पित्रे परिक्लिष्टां समार्पयत् ॥ ३७ ॥

सत्यधर्मीया —— अग्निहोत्रीं तदुपयुक्तां परिक्लिष्टां मार्ग इतस्ततो भ्रामणेनोपावर्त्य स्वाश्रमं प्रति । उपावर्त्याश्रमं समुपेत्य पित्रे तां समार्पयत् । समर्पयदिति लेखकहस्तदोषोऽत्रेव बहुत्रेति ज्ञेयम् ॥३७॥

छलारी —— उपावर्त्य परावृत्य । इततस्तत आकर्षणादिना परिक्लिष्टम् । क्लेशोपेतां समर्पयत् । अडभावश्छान्दसः ॥ ३७ ॥

स्वकर्म तत्कृतं रामः पित्रे भ्रातृभ्य एव च ।
वर्णयामास तच्छ्रुत्वा जमदग्निरभाषत ।
राम राम महाबाहो भवान् पापमकारषीत् ॥ ३८ ॥

सत्यधर्मीया — तद्वर्णयामास तच्छ्रुत्वेत्यन्वयनान्न तच्छब्दाधिक्यम् । स्वकर्म तत्कृतं कार्तवीर्यकृतं चेति वा । अकार्षीत् ॥ ३८ ॥

छलारी — तत्कृतमर्जुनकृतं च ॥ ३८ ॥

अवधीर्नरदेवं यत् सर्वदेवमयं वृथा ।
वयं हि ब्राह्मणास्तात क्षमयाऽर्हणतां गताः ॥ ३९ ॥

सत्यधर्मीया — तत्किमित्यत आह । यत्सर्वदेवमयं सर्वसुपर्वसान्निध्योपेतं नरदेवं राजानं वृथा निष्प्रयोजनम् । तान्हत्वा तद्राज्यकरणाधिकारहीना वयमिति तात्पर्येणाह ॥ वयं हीति । क्षमया शान्त्याऽर्हणतां माननीयतां गतास्ते च क्षमया भूम्यैवार्हणतां गता इति हृदयम् ॥ ३९ ॥

छलारी — सर्वदेवमयं सर्वदेवप्रचुरं नरदेवं कार्तवीर्यार्जुनरूपम् । अर्हणतां पूज्यताम् ॥ ३९ ॥

यथा लोकगुरुर्देवः पारमेष्ठ्यमगात् पदम् ।
क्षमया रोचते लक्ष्मीः ब्राह्मी सौरी यथा प्रभा ।
क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः ॥ ४० ॥

सत्यधर्मीया — क्षमैव सर्वसम्पत्तिक्षमेति सदृष्टान्तमाचष्टे ॥ यथेति । यथा क्षमया लोकगुरुः । गुरुर्ब्रह्माखिलस्येत्यादेः । पारमेष्ठ्यं पदं सत्यलोकस्वाम्यमधाद्दधार । ब्राह्मी ब्राह्मणसम्बन्धिनी लक्ष्मीः सम्पत्क्षमया क्षान्त्यैव रोचते । सूरसूरार्यमादित्येत्यमरात्सूरस्येयं सौरी प्रभा यथा तथा क्षमिणां शिखादिः ॥ ४० ॥

छलारी — यया क्षमया । लोकगुरुर्ब्रह्मा पारमेष्ठ्यं पदम् । सत्यलोकाधिपत्यमिति यावत् ॥ यथा सौरी सूर्यसम्बन्धिनी प्रभा रोचते । तथा ब्राह्मी ब्राह्मणसम्बन्धिनी लक्ष्मीः सद्विद्योपदेशादिजन्या शोभा ॥ ४० ॥

राज्ञो मूर्धावसिक्तस्य वधो ब्रह्मवधाद् गुरुः ।
तीर्थसंसेवया चांहो जह्यङ्गाच्युतचेतनः ॥ ४१ ॥

इति श्रीमद्भागवते नवमस्कन्धे त्रयोदशोऽध्यायः ।

सत्यधर्मीया — मूर्धावसिक्तस्य मूर्धाभिषिक्तस्य चक्रवर्तिन इति यावत् । वधो ब्रह्मवधाद्गुरुस्तदपेक्षयाऽतिपापापादकः । यथोक्तमानुशासनिके शान्तिपर्वणि ।

दशसूनासमश्चक्री दशचक्रसमो ध्वजी ।
दशध्वजीसमो विप्रो दशविप्रसमो नृपः ।। इति ।

अयमखण्डमण्डलाधीश इति गुरुरित्यनिदंमुद्रणादुदीरणमिति ज्ञेयम् । अङ्ग मदङ्गज । अच्युतचेतनस्तन्मनस्कः सन् तीर्थसंसेवया पुण्यतीर्थस्नानादिना तदंहस्तद्धननजनितपापं जहि नाशय । हन्तेर्ज इत्युक्तेः ।। ४१ ।।

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे त्रयोदशोऽध्यायः ।

छलारी — मूर्धावसिक्तस्य मूर्धाभिषिक्तस्य चक्रवर्तिन इत्यर्थः । तीर्थसेवया । चकाराद्यमनियमादिभिश्च । अच्युते नारायणे चेतना बुद्धिर्यस्य स तथा ।। ४१ ।।

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे त्रयोदशोऽध्यायः ।

।। अथ चतुर्दशोऽध्यायः ।।

श्रीशुक उवाच —

पित्रोपशिक्षितो रामस्तथेति कुरुनन्दन ।
संवत्सरं तीर्थचर्यां चरित्वाऽऽश्रममाव्रजत् ।। १ ।।

सत्यधर्मीया — संवत्सरमेकं चरित्वा कृत्वाऽऽश्रमं, स्वमश्रमं यथा भवति तथेति वा ।। १ ।।

छलारी — पित्रा रामस्य महात्म्यमजानता जमदग्निनोपशिक्षितः पूर्वोक्तरीत्या शिक्षितः । पापरहितोऽपि हर्यवतारो भार्गवरामः । तथेत्युक्त्वा । अयोग्यजनं मोहयन्नेवेति शेषः । स्वेच्छयैव तीर्थयात्रारूपं प्रायश्चित्तं चरित्वा स्वाश्रममावृजदिति ।। तदुक्तम्–

अपापमपि देवेशं पितरः संन्यवारयन् ।
अजानन्तोऽस्य माहात्म्यं मोहितास्तस्य मायया ।
मोहयन्मायया लोकं चक्रे चापचितिं वधे ।
पुण्यपापादिनिर्मातुः कुतः पापादिसङ्गतिरिति चेति ॥ १ ॥

कदाचिद् रेणुका याता गङ्गायां पद्ममालिनम् ।
गन्धर्वराजं क्रीडन्तमप्सरोभिरपश्यत ॥ २ ॥

सत्यधर्मीया — याता सती । पद्मानां मालाऽस्यास्तीति स तथा । तमप्सरोभिः क्रीडन्तमपश्यतापश्यत् ॥ २ ॥

छलारी — रेणुका तत्पत्नी याता । गङ्गां प्रतीति शेषः । गङ्गायां क्रीडन्तं क्रीडां कुर्वन्तमित्यन्वयः ॥ २ ॥

विलोकयन्ती क्रीडन्तमुदकार्थं नदीं गता ।
होमवेलां न सस्मार किञ्चिच्चित्ररथस्पृहा ॥ ३ ॥

सत्यधर्मीया — क्रीडन्तं गन्धर्वराजमुदकार्थं नदीं गता विलोकयन्ती होमवेलां न सस्मार । तन्नाम स्वयमेव मूलकृदाह ॥ किञ्चिच्चित्ररथस्पृहेति ॥ ३ ॥

छलारी — किञ्चिदीषच्चित्ररथे गन्धर्वराजे स्पृहा यस्याः सा ॥ ३ ॥

कालात्ययं तं विलोक्य मुनेः शापविशङ्किता ।
आगत्य कलशं तस्थौ पुरोधाय कृताञ्जलिः ॥ ४ ॥

सत्यधर्मीया — कालात्ययं तं विलोक्याङ्गस्मृतिमती मुनेः शापविशङ्किता सती कलशं गृहे पुरो निधाय तस्थौ ॥ ४ ॥

छलारी — कालात्ययं होमकालातिक्रमम् । कलशं पुरोधाय भर्तुरग्रे निधाय ॥ ४ ॥

व्यभिचारं मुनिर्ज्ञात्वा पत्न्याः प्रकुपितोऽब्रवीत् ।
घ्नतैनां पुत्रकाः पापामित्युक्तास्तां न चक्रिरे ॥ ५ ॥

सत्यधर्मीया — व्यभिचारं किञ्चिच्चित्ररथस्पृहेत्युक्तम् । मनसा चित्ररथस्पृहारूपम् । हे पुत्रका एनां पापां घ्नतेत्यब्रवीदिति पित्रोक्तास्तां हिंसां न चक्रिरे । तन्नेति पाठे हननमिति वा तद्वचनं वेत्यर्थः ।। ५ ।।

छलारी — घ्नत हतां कुरुत । व्यभिचारमानसां ताम् । मातृहत्याम् ।। ५ ।।

रामः सञ्चोदितः पित्रा भ्रातॄन् मात्रा सहावधीत् ।
प्रभावज्ञो मुनेः सम्यक् समाधेस्तपसश्च सः ।। ६ ।।

सत्यधर्मीया — भ्रातॄन् मात्रा सहावधीत् । तेषां च वधः स्वाज्ञोल्लङ्घनान्मुनिना ज्ञापित इति ज्ञेयम् । माता गरीयसी मातरित्यादेः कथं रामो मातरं तातबोधितो घातयामसेत्यत आह ।। प्रभावज्ञो मुनेः पितुरिति । समाधेस्तपसश्च प्रभावज्ञ इत्यन्वेति ।। ६ ।।

छलारी — आज्ञातिलङ्घिनां भ्रातॄणां मातुश्च वधे संचोदितः सन्मुनेः समाधेस्तपसश्च प्रभवाज्ञः । यदि न हन्यां तर्हि मामपि शपेत् । यदि तु हन्यां तर्हि मयि सन्तुष्टः संस्तानपि जीवितुं समर्थ इति जानन्नित्यर्थः ।। ६ ।।

वरेण छन्दयामास प्रीतः सत्यवतीसुतः ।
वव्रे हतानां रामोऽपि जीवितं चास्मृतिं वधे ।। ७ ।।

तात्पर्यम् — **'जामदग्न्यो वरं वव्रेऽनन्तशक्तिरपि स्वयम् । पितुर्मान्यत्वसिध्यर्थं लोके लोकेश्वरः प्रभुः । अपापमपि देवेशं पितरः संन्यवर्तयन् । अजानन्तोऽस्य माहात्म्यं मोहितास्तस्य मायया । मोहयन्मायया लोकं चक्रे चापचितिं वधे । पुण्यपापादिनिर्मातुः कुतः पापादिसङ्गतिरि' ति च ।।८।।**

सत्यधर्मीया — वरेण छन्दयामासेति श्लोके साक्षादधोक्षजस्य वरवरणं पितरं प्रत्युच्यते । तदसम्भवि भगवतीत्यतः प्रमाणेन तदर्थमाह ।। जामदग्न्य इति । प्रभुर्लोकेश्वरः स्वयमनन्तशक्तिर्भगवान् सन्नपि वरं वव्रे । पितुर्जमदग्नेर्लोके मान्यतासिद्ध्यर्थमपापं स्वभावतो देवेशं पितरो जमदग्निमुख्या न्यवारयन् । अस्य रामस्य माहात्म्यमजानतः । अज्ञाने च निमित्तमाह ।। तस्य रामस्यैव मायया मोहिता इति । अपचितिं प्रायश्चित्तम् । पुण्यपापादिनिर्मातुस्तद्घटयितुः । पापमकार्षीः । तीर्थसंसेवया चांहो जहि । पित्रोपशिक्षितो रामः संवत्सरं तीर्थचर्यां चरित्वेत्यादि-तात्पर्यमनेनोक्तं वेदितव्यम् । यद्यपि तत्तत्पद्यांशशङ्काशमनायमानीयस्तत्तदंशः शंसनीयस्तथाऽपि स्कान्दसन्दानसन्दर्भानुसारेणोदाहरणमिति ज्ञेयम् । अतो यथायोग्यं योज्यमिति नासङ्गतिः ।। अथ

पद्यार्थः । सत्यवत्याः सुतो जमदग्निः प्रीतः स्वाज्ञानवज्ञानसन्तुष्टश्छन्दयामास वरं वरयेत्याज्ञापयामास । यं स रामोऽपि हतानां मातृभ्रातॄणां जीवितं वव्रे । तथा वधे स्वकृतवधविषये चास्मृतिम् अस्मानयमहन्निति स्मृत्यभावं वरं वव्रे ॥ ७ ॥

छलारी — सत्यवतीसुतः सत्यवत्या गाधिराजपुत्र्याः सुतो जमदग्निः स्ववचनकारिणं स्वपुत्रं रामं वरेणाच्छादयामास ॥ वरं वरयेति रामं प्रत्युवाच । प्रभू रामोऽपि पितुर्मान्यत्वसिद्ध्यर्थं स्वेन महतां मात्रादीनां जीवितं जीवनरूपवरम् । वधेऽस्मृतिरूपवरं च वयं रामेण हता इति स्मरणशून्यत्वलक्षणं वरं च वव्रे प्रार्थयामासेति ॥ तदुक्तम् ॥ जामदग्न्येर्वरं वव्रेऽनन्तशक्तिरपि स्वयम् । पितुर्मान्यत्वसिद्ध्यर्थं लोके लोकेश्वरः प्रभुरिति ॥ ७ ॥

उत्तस्थुस्ते कुशलिनो निद्रापाय इवाञ्जसा ।
पितुर्विद्वांस्तपोवीर्यं रामश्चक्रे सुहृद्वधम् ॥ ८ ॥

सत्यधर्मीया —निद्रापाये निद्राया अपायेऽतिक्रमे जाग्रतो जना इव कुशलिनः । सा च ते च ते । उत्तस्थुः । पितुस्तपोवीर्यं विद्वानिति रामः सुहृद्वधं चक्रे ॥ ८ ॥

छलारी — ते वसुमदादयो निद्रापाये निद्रापगमे यथा तिष्ठन्ति तथोत्तस्थुः । ननु रामोऽत्यन्तनिन्दितं मात्रादिवधं कथं चकारेत्यत आह ॥ पितुर्विद्वान् इति ॥ ८ ॥

येऽर्जुनस्य सुता राजन् स्मरन्तः स्म पितुर्वधम् ।
रामवीर्यपराभूता लेभिरे शर्म न क्वचित् ॥ ९ ॥

सत्यधर्मीया — का कथा कार्तवीर्यपुर्यामवर्ततेत्यत आह ॥ य इति । येऽर्जुनस्य सुता दशासहस्रसङ्ख्या पितुर्वधं स्मरन्तः । रामवीर्यपराभूता इत्यनेन समक्षसमरासमर्था इति सूचयति । क्वचिदपि शर्म न लेभिरे ॥ ९ ॥

छलारी — सर्वक्षत्रियवधे कारणं वक्तुमाह ॥ येऽर्जुनस्य सुता इत्यादिना । शर्म सुखं न लेभिरे ॥ ९ ॥

एकदाऽऽश्रमतो रामे सभ्रातरि वनं गते ।
वैरं सिषाधयिषवो लब्धच्छिद्रा उपागमन् ॥ १० ॥

सत्यधर्मीया — सभ्रातरि सभ्रातृके वनं गते सति । नद्यृतश्चेति सामान्यतः समासान्तविधेरनित्यतया न कबिति ज्ञेयम् । यद्यपि द्विमातेति ऋक् परव्याकृतौ समाधान एतस्मिन्

शक्ये वक्तुम् । मातृमातृकयोर्भेदेनोपादानात् कबपि विभाष्यत इति गत्यन्तरं प्रदर्शितमिति ज्ञेयम् । कथमुत्तरा मातरित्यस्येदमुत्तरमनुसन्धेयम् । वैरं तत्कार्यं सिषाधयिषवः साधयितुमिच्छवो लब्धछिद्रा लब्धावसराः ॥ १० ॥

छलारी — वैरं पितृहन्तू रामस्य पितृहननं कारयितव्यमित्येवं रूपं द्वेषं सिसाधयिषवः साधयितुमिच्छवो लब्धछिद्रा लब्धावसराः ॥ १० ॥

दृष्ट्वाऽग्न्यागार आसीनमावेशितधियं मुनिम् ।
भगवत्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः ॥ ११ ॥

सत्यधर्मीया — अग्न्यागारमग्नेरग्निहोत्रस्यागारं गृहम् । विद्यादगारमागारमापगामपगामपीति द्विरूपकोशः । उत्तमश्लोके भगवत्यावेशितधियं जघ्नुः । ये शर्म न लेभिरे ते पापनिश्चया जघ्नुः । स ज्ञानी चेदपि चेतो हरेर्जानन् तूष्णीकोऽभवदिति ज्ञेयम् । अन्यथा मृतपुत्राद्युत्थापनादिकार्यं न स्यादिति भावः ॥ ११ ॥

छलारी — अग्न्यागारेऽग्निहोत्रगृहे । भगवत्येवावेशिता धीर्यस्य तम् ॥ ११ ॥

याचामानाः कृपणया राममात्राऽतिदारुणाः ।
प्रसह्य शिर उत्कृत्य जग्मुस्ते क्षत्रबन्धवः ॥ १२ ॥

सत्यधर्मीया — राममात्रा रेणुकया प्रसह्य बलात्कृत्य क्षत्रबन्धवस्तदाभासाः ॥ १२ ॥

छलारी — क्षत्रबन्धवाः क्षत्रियाभासाः । उत्कृत्य छित्वा निन्युः । जमदग्नेः शिर इति शेषः ॥ १२ ॥

रेणुका दुःखशोकार्ता निघ्नन्त्यात्मानमात्मना ।
राम रामेति तातेति विचुक्रोशोच्चकैः सती ॥ १३ ॥

सत्यधर्मीया — आत्मानमुरःपुरःसरमम् आत्मना करादिना उच्चकैरुच्चैः ॥ १३ ॥

छलारी — शोकः प्रलापः आत्मना देहैकदेशेन । हस्तेनेति यावत् । आत्मानं देहवक्षसीत्यर्थः ॥ १३ ॥

तदुपश्रुत्य दूरस्था हा रामेत्यार्तवत्स्वरम् ।
त्वरयाऽऽश्रममासाद्य ददृशुः पितरं हतम् ॥ १४ ॥

सत्यधर्मीया — तदाक्रोशनम् । आर्तवदिति स्वार्थे वतिः । आर्तमार्तिः । भावे क्तः । आर्तिमत्स्वरं वा । ददृशुः सर्वे कुमाराः ॥ १४ ॥

छलारी — दूरस्थाः । सुता इति शेषः । तस्या मातुः स्वरमित्यन्वयः ॥ १४ ॥

ते दुःखरोषामर्षार्तिशोकवेगविमोहिताः ।
हा तात साधो धर्मिष्ठ त्यक्त्वाऽस्मान् स्वर्गतो भवान् ॥ १५ ॥

सत्यधर्मीया — दुःखादीनां वेगेन विमोहिताः ॥ १५ ॥

छलारी — कण्ठादीनां शोषणमार्तिराधिर्दुःखादीनां वेगेनातिशयेन विमोहिताः ॥ १५ ॥

विलप्यैवं पितुर्देहं निधाय भ्रातृषु स्वयम् ।
प्रगृह्य परशुं रामः क्षत्रान्ताय मनो दधे ॥ १६ ॥

सत्यधर्मीया — एवं विलप्य तात्पर्यं तूक्तं स्मर्तव्यम् । क्षत्रान्ताय तन्नाशं कर्तुं मनो दधे ॥१६॥

छलारी — क्षत्रान्ताय क्षत्रकुलनाशाय मनो दधे जगाम च ॥ १६ ॥

गत्वा माहिष्मतीं रामो ब्रह्मघ्नविहतश्रियम् ।
तस्यां स शीर्षभी राज्ञां मध्ये चक्रे महागिरिम् ॥ १७ ॥

सत्यधर्मीया — ब्रह्मघ्नैः कार्तवीर्यजैस्तन्निमित्तमिति यावत् । विहता श्रीः शोभा यस्याः सा ताम् । गत्वा तस्याम् । राज्ञां, यद्यपि तरतमभावेन भावी राजैक एव । तथाऽपि योग्यता तत्सुतेष्वस्तीति राज्ञामित्युक्तिरिति ज्ञेयम् । परितः पुर्यविद्यमानावन्तरावनीश्वरान् हत्त्वा हित्वा देहं शिरोमात्रमानीय तैः सहैतेषां च शीर्षभिर्मध्ये महागिरिं चक्र इति वा ॥ १७ ॥

छलारी — ब्रह्मघ्नैरर्जुनसुतैर्विहता श्रीर्यस्यास्तां माहिष्मतीं पुरीं गत्वा तस्यां स रामो तेषां शीर्षभिर्माहिष्मतीं मध्ये महान्तं गिरिं चक्रे ॥ १७ ॥

तद्रक्तेन नदीं घोरामब्रह्मण्यभयावहाम् ।
हेतुं कृत्वा पितृवधं क्षत्रेऽमङ्गलकारिणि ॥ १८ ॥

सत्यधर्मीया — तद्रक्तेनोद्रिक्तेन घोरां नदीं चक्रे । केषां घोरेत्यत आह । अब्रह्मण्याश्च ब्राह्मणद्वेषिणस्तेषां भयावहं । क्षत्रे तदेकदेशेऽमङ्गलकारिणि सति पितुर्वधं हेतुं निमित्तं कृत्वेति ॥ १८ ॥

छलारी — अब्रह्मण्यानां द्वेषिणां भयकारिणां नदीं चक्र इति पूर्वेणान्वयः । तथाऽपि सर्वक्षत्रियवधे किं कारणं तदाह ॥ हेतुं कृत्वेति । क्षत्रियसमूहेऽमङ्गलकारिण्यन्यायवर्तिनी सती ॥१८॥

त्रिः सप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां विभुः ।
स्यमन्तपञ्चके चक्रे शोणितोदान् ह्रदान् नव ॥ १९ ॥

सत्यधर्मीया — शमन्तपञ्चके कुरुक्षेत्रे शोणितोदान् शोणितान्येवोदानि येषु ते । तान्नव ह्रदांश्चक्रे ॥ १९ ॥

छलारी — स्यमन्तपञ्चके कुरुक्षेत्रे । नव नवसङ्ख्याकान् शोणितान्येवोदान्युदकानि येषु तथा तान्ह्रदान् चक्रे ॥ १९ ॥

पितुः कायेन सन्धाय शिर आधाय बर्हिषि ।
सर्वदेवमयं देवमात्मनमयजन्मखैः ॥ २० ॥

सत्यधर्मीया — पितुरिति कायपदेन शिरःपदेनाप्यन्वेति । बर्हिष्यास्तृतदर्भेषु सर्वदेवमयं तत्प्रधानमात्मानं परमात्मानं स्वयमेव वा । मखैरयजत् ॥ २० ॥

छलारी — पितुः शिरः । आनीयेति शेषः । कायेन सन्धाय सन्धितं देहं बर्हिषि वेदिकामध्ये दर्भसमूहे आधाय मखैर्मखसाधनैः स्रुक्स्रुवादिभिराज्यादिभिश्चायजदन्त्येष्टिं चकारेति भावः ॥ २० ॥

ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशम् ।
अध्वर्यवे प्रतीचीं वा उद्गात्र उत्तरां दिशम् ॥ २१ ॥

सत्यधर्मीया — होत्रे प्राचीं दिशं ददाविति सर्वत्रान्वेति । ब्रह्मणे दक्षिणां दिशमध्वर्यवे प्रतीचीं दिशमित्यन्वेति । उद्गात्रे उत्तरां दिशमिति । ननु यदि दिशमिति वक्तव्यमवश्यं तर्हि पुनरेकवारं प्रतीचीं दिशमित्यपि वक्तव्यम् । न वक्तव्यं चेद्ददावितिवदेकवारमेव वक्तव्यम् अनुवृत्त्याऽप्यन्वयसम्भवादिति चेत् । सत्यम् । शङ्का निरातङ्का । तथाऽपि निर्मत्सरः शृणोषि चेत्किञ्चिदुच्यते । प्रतीचीत्वप्राचीत्वोदीचीत्वदक्षिणात्वादयस्त्वव्यवस्थिता इति ध्वननमेवात्र दिक्शब्दानिबन्धनफलमिति

तत्त्यागसम्भवात् । यथोक्तं तत्त्वनिर्णयटीकायाम् । अस्माकं प्राच्या एवान्येषां प्रतीचीत्वात् । मैवम् । दिक्स्वरूपमधिकृत्यैतदुच्यते उत प्राच्यादिशब्दवाच्यत्वम् । नाद्यः । स्वरूपस्य व्यवस्थितत्वात् । न द्वितीयः । सम्बन्धिशब्दत्वात् । न हि पितापुत्रादिशब्दा अव्यवस्थिता इत्येतावता पित्रादिस्वरूपं तच्छब्दवाच्यत्वं वा वास्तवं भवतीति ॥ २१ ॥

छलारी — उद्गात्रे सामगाय ॥ २१ ॥

अन्येभ्योऽवान्तरदिशः काश्यपाय च मध्यतः ।
आर्यावर्तमुपद्रष्ट्रे सदस्येभ्यस्ततः परम् ॥ २२ ॥

सत्यधर्मीया — अन्येभ्यो नेष्ट्रादिभ्योऽवान्तरदिशो मध्यतो मध्यमामुपद्रष्ट्रे न्यूनाधिकभावेन भवेत् यथा तथा कर्मसाक्षिणे । ततो दिगवान्तरदिङ्मध्यार्यावर्तभिन्नमन्यत् ॥ २२ ॥

छलारी — उपद्रष्ट्रे न्यूनातिरिक्तकर्मसाक्षिणे । आर्यावर्तं तन्नामकदेशविशेषम् । परमवशिष्टम् ॥ २२ ॥

ततश्चावभृथस्नानविधूताशेषकिल्बिषः ।
सरस्वत्यां ब्रह्मनद्यां रेजे व्यभ्र इवांशुमान् ॥ २३ ॥

सत्यधर्मीया — अवभृथस्नानेन विधूतमशेषाणामविशेषेण मज्जनवज्जनानां किल्बिषं येन सः । ब्रह्मनद्यामेवं भगवत्सान्निध्ययुतायां सरस्वत्यां नाम्ना । व्यभ्रो विगतान्यभ्राणि मेघा यस्मादसौ व्यभ्रः । सोंऽशुमान् सूर्यः स इव रेजे ॥ २३ ॥

छलारी — ब्रह्मनद्यां ब्रह्माधिष्ठितत्वेन ब्रह्मनदीति प्रसिद्धायां सरस्वत्यामवभृथस्नानेन जनस्याशेषतः किल्बिषं यस्य स तथा । व्यभ्रो मेघच्छाययांऽशुमानिवादित्य इव रेजे इत्यन्वयः । अनेनावभृथस्नानेन जनस्याशेषतः किल्बिषं विध्वस्तं भवतीति निदर्शनाय निर्दोषेण रामेणावभृथस्नानमकारीति सूचितं भवति ॥ २३ ॥

स्वदेहं जमदग्निस्तु लब्ध्वा संज्ञानलक्षणम् ।
ऋषीणां मण्डले सोऽभूत् सप्तमो रामपूजितः ॥ २४ ॥

सत्यधर्मीया — संज्ञानलक्षणं संज्ञानं स्मृतिस्तदेव लक्षणं यस्य तदिति । केऽपि संज्ञानं ज्योतीरूपमिति निरूपयन्ति । स्वदेहं लब्ध्वा रामपूजितो ऋषीणां मध्ये सप्तमो ऋषिरभवत् ॥ २४ ॥

छलारी — जमदग्निस्तु संज्ञानलक्षणं ज्योतिर्मयलक्षणं स्वयोग्यदेहं लब्ध्वा सप्तर्षीणां मण्डले सप्तमऋषिरभवत् ॥ २४ ॥

जामदग्न्योऽपि भगवान् रामः कमललोचनः ।
आगामिन्यन्तरे राजन् वर्तयिष्यति वै बृहत् ॥ २५ ॥

सत्यधर्मीया — जामदग्न्योऽपि भगवान् राम आगामिन्यष्टमे सावर्णिमन्वन्तरे बृहद्ब्रह्म वेदमुत्सन्नं वर्तयिष्यति प्रवर्तयिष्यति । तत्प्रवर्तको भविष्यतीति भावः ॥ २५ ॥

छलारी — आगामिन्यन्तरे भविष्यन्मवन्तरेऽष्टमे सावर्णिमन्वन्तरे बृहद्ब्रह्म वेदलक्षणं वर्तयिष्यति । वेदप्रवर्तकेषु सप्तर्षिष्वेकतमो भविष्यतीत्यर्थः ॥ २५ ॥

आस्तेऽद्यापि महेन्द्राद्रौ न्यस्तदण्डः प्रशान्तधीः ।
उपगीयमानचरितः सिद्धगन्धर्वचारणैः ॥ २६ ॥

सत्यधर्मीया — महेन्द्रो माहेन्द्रगिरिर्न्यस्तदण्डस्त्यक्तेतरबहिःशिक्षः । किञ्च प्रशान्तधीः प्रशान्तस्य हरेर्धीर्येन सः । भगवदवगमक इति यावत् । अद्याप्यास्ते ॥ २६ ॥

छलारी — महेन्द्रादौ देवसमूहे न्यस्तदण्डस्त्यक्तदण्डः प्रशान्तधीः । शान्तकोप इति यावत् ॥ २६ ॥

एवं भृगुषु विश्वात्मा भगवान् हरिरीश्वरः ।
अवतीर्य परं भारं भुवोऽहन् बहुशो नृपान् ॥ २७ ॥

सत्यधर्मीया — समग्रस्य तात्पर्यं स्वयं मूलकृदेव लपति ॥ एवमिति । परं भारं तद्रूपान्नृपांस्तदपसदान्बहुशस्त्रिःसप्तकृत्वोऽहन् हतवान् । किं कुर्यात्तैः स्वदुःखे दत्त इत्यतोऽप्याह ॥ बहुश इति । पूर्णसुखोऽपि ॥ २७ ॥

छलारी — भृगुषु भृगुवंशेऽवतीर्यावतारं कृत्वा भुवो भारं केवलं भारभूतान्नृपान् अहन्संहृतवान् ॥ २७ ॥

गाधेरभून्महातेजाः समिद्ध इव पावकः ।
तपसा क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसम् ॥ २८ ॥

विश्वामित्रस्य चैवासन् पुत्रा एकशतं नृप ।
मध्यमस्तु मधुच्छन्दा माधुच्छन्दस एव ते ॥ २९ ॥

सत्यधर्मीया — द्वितीयचरुप्रभवप्रभावमाह ॥ गाधेरिति । तपसा तल्लब्धवरैश्च क्षात्रमुत्सृज्य क्षत्रत्वं त्यक्त्वा ब्रह्मवर्चसं ब्राह्मणत्वमनेन लक्ष्यते लेभे प्राप । यथोक्तम् । वरेण विप्रत्वमवाप योऽसाविति ।

स तु वव्रे वरं राजन् ब्राह्मणः स्यामहं त्विति ।
तथेति चावदद् ब्रह्मा सर्वलोकपितामहः ॥ इति गदापर्वणि ।

इति स्तुता वेदमाता प्राह गम्भीरया गिरा ।
विश्वामित्र ब्राह्मणोऽसि द्विजत्वं दत्तवत्यहम् ।
वसिष्ठसाम्यं भविता ममोपासनया मुने ।
ऋषिर्मम भव त्वं हि तस्माच्छ्रेष्ठो न संशयः । इति कावेरीमाहात्म्ये ।

ब्रह्मर्षे स्वागतं तेऽस्तु तपसाऽस्मि सुतोषितः ।
ब्राह्मण्यं तपसोऽग्रेण प्राप्तवानसि कौशिक । इति रामायणे चतुराननवचनम् ।

प्रतिगृह्य ततो धर्मस्तथैवोष्णं तथा नवम् ।
भुक्त्वा प्रीतोऽस्मि विप्रेति तमुक्त्वा स मुनिं गतः ।
क्षत्रभावादपगतो ब्राह्मणत्वमुपागतः ।
धर्मस्य वचनात्तत्र विश्वामित्रस्तथाऽभवत् ॥ इत्याद्युद्योगपर्वणि ।

च्यवनाद्वरदानेन रुचिकस्य स्वसम्भवात् ।
क्षत्रवादादपगतो ब्राह्मणत्वमुपागतः ।
स्वस्यैव तपसा चापि ब्राह्मण्यं समवाप्तवान् । इति शान्तिपर्वणि ।

ततः प्रसादितो देवैर्वसिष्ठो जपतां वरः ।
सख्यं चकार ब्रह्मर्ष इदमस्त्विति चाब्रवीत् ।

इति रामायणे वसिष्ठवचः । अस्मन्मतेऽनुगतसामान्याभावात्क्षत्रत्वापगमोऽप्ययं सम्भवी । विस्तरस्तु मासेन शूद्रो भवति ब्राह्मणो रसविक्रयादित्याद्युदाहृत्य सुधायामुदितोऽनुसन्धेयः । तमृत्विज ऊचुस्त्वमेव नोऽस्यान्हः संस्थमधिगच्छेत्यथ हैनं शुनःशेपोऽञ्जःसवं ददर्श । तमेताभिश्चतसृभिरभिसुषाव यच्चिद्धि त्वं गृहे गृह इत्यथैनं द्रोणकलशमभ्यवनिनायोच्छिष्टं

चम्वोर्भरेत्येतयर्चाऽथ हास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः सस्वाहाकाराभिर्जुहुवाञ्चकार । अथैनमवभृथ मभ्यवनिनाय त्वन्नोऽग्ने वरुणस्य विद्वानित्येताभ्यामथैनमत ऊर्ध्वमग्निमाहवनीयमुपस्थापयाञ्चकार । शुनश्चिच्छेपं निन्दितं सहस्रादित्यथ ह शुनःशेपो विश्वामित्रस्याङ्कमाससाद । सहोवाचाजीगर्तः । सौयवसिषे पुनर्मे पुत्रं देहीति । नेति होवाच विश्वामित्रो देवा वा इमं मह्यमरासतेति स ह देवरातो वैश्वामित्र आस ।तस्यैते कापि लेयबाभ्रवाः स होवाचाजीगर्तः । सौयवसिस्त्वमेहि विह्वयावहै इति । स होवाचाजीगर्तः । सौयवसिराङ्गिरसो जन्मनास्याजीगर्तिः श्रुतः कविः । ऋषे पैतामहात्तन्तोर्मापगाः पुनरेहि मामिति । स होवाच शुनःशेपो दर्शुस्त्वा शासहस्तन्नयच्छूद्रे ह लप्सता । गवां त्रीणि शतानि त्वमवृणीथा मदङ्गिर इति । स होवाचाजीगर्तः । सौयवसिस्तद्वै मा गात तपति पापं कर्म मया कृतम् । तदहं निह्नवे तुभ्यं प्रतियन्तु शतं गवामिति । स होवाच शुनःशेपो यः सकृत्पापं कर्म कुर्यात्कुर्यादेनत्ततोऽपरम् । नापगाः शौद्रीयान्यायादसन्धेयं त्वया कृतमित्यसन्धेयमिति ह विश्वामित्र उपपाद । स होवाच विश्वामित्रो भीम एव सौयवसिः शासेन विशिशासिषुः । अस्थान्मैतस्य पुत्रो भूर्ममैवोपेहि पुत्रतामिति । स होवाच शुनःशेपः स वै यथा नोज्ञपया राजपुत्र तथा वद । यथैवाङ्गिरसः सन्नुपेयां तव पुत्रतामिति । स होवाच विश्वामित्रो ज्येष्ठो मे त्वं पुत्राणां स्थास्तव श्रेष्ठा प्रजा स्यात् । उपेया दैवं मे दायं तेन वै त्वोपमन्त्रय इति । स होवाच शुनःशेपः संज्ञानानेषु वै ब्रूयात्सौहार्दाय मे श्रियै यथाहं भरत ऋषभोपेयां तव पुत्रतामिति ।

अथ ह विश्वामित्रः पुत्रानामन्त्रयामास समधुच्छन्दाः शृणोत ऋषभो रेणुरष्टकः । एके च भ्रातरः स्थासौ ज्येष्ठ्याय कल्पध्वमिति ॥ तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः । पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशत्कनीयांसस्तथा ज्यायांसो न ते कुशलं मेनिरे ।ताननुव्याजहार तान्वः प्रजा भक्षीष्टेति । त एतेऽन्ध्राः पुण्ड्राः शबराः पुलिन्दा मूतिबा इत्युदन्त्या बहवो भवन्ति । विश्वामित्रा दस्यूनां भूयिष्ठाः । स होवाच मधुश्छन्दाः । पञ्चाशता सार्धं यन्नः पिता सञ्जानीते तस्मिंस्तिष्ठामहे वयम् । पुरस्त्वा सर्वे कुर्महे त्वामन्वञ्चो वयं स्मसीति । अथ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव । ते वै पुत्राः पशुमन्तो वीरमन्तो भविष्यथ ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त मा । पुर एता वीरवन्तो देवरातेन गाथिनाः । सर्वै राध्यास्ततपुत्रा एष वः सद्विवाचनम् । एष वः कुशिका वीरो देवरातस्तमन्वित । युष्मांश्चिद्दायं म उपेता विद्यां यामु च विद्मसि । ते सम्यञ्चो वैश्वामित्राः सर्वे साकं सरातयः । देवराताय तस्थिरे धृत्यै श्रैष्ठ्याय गाथिनाः । अधीयत देवरातो ऋक्थयोरुभयोर्ऋषिः । जह्नूनां चाधिपत्ये दैवे वेदे च गाथिनाम् । तदेतत्परऋक् शतगाथं शौनःशेपमाख्यानं तद्धोता राज्ञेऽभिषिक्तायाचष्टे हिरण्यकशिपावासीन आचष्टे । हिरण्यकशिपावासीनः प्रतिगृणाति । यशो वै

हिरण्यं यशसैवेनं तत्सममध्वर्योरोमित्यृचः प्रतिगर एवं तथेति गाथाया ओमिति वै दैवं तथेति मानुषं दैवेन चैतैन तन्मानुषेण च पापादेनसः प्रमुञ्चति तस्माद्यो राजा विजिती स्यादप्ययजमान आख्यापयतैवैतच्छौनःशेपमाख्यानं न हास्मिन्नल्पं च नैनः परिशिष्यते सहस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्र एते चैवासने श्वेतश्चाश्वतरीरथो होतुः पुत्रकामा हाख्यापयेरन् लभन्ते ह पुत्रान् लभन्ते ह पुत्रान् ॥

अत्रोपयुक्ततदुपयुक्तसप्तमपञ्चकतृतीयाध्यायगतखण्डद्विकार्थः ॥ एवं दन्धनीकृतबन्धनः शुनः शेपोऽचरत्किम् । परत इत्यत ईरयति ॥ तमृत्विज इति । तमुक्तरीत्या मुक्तमृत्विजो विश्वामित्रादय ऊचुः । तद्वचनमेव विवेचयति वेदपुरुषः ॥ त्वमेवेति । हे शुनःशेप त्वमेव नोऽस्माकम-स्यान्होऽभिषेचनायाभिधावतः संस्थं समाप्तिमधिगच्छ प्राप्नुहि । हरिश्चन्द्रहस्ततोऽनुष्ठापयेति यावत् । अथ तदृत्विगुक्त्यनन्तरं शुनःशेप एतं यागं अञ्जःसवम् । अञ्जः सम्यक् सवः सोमाभिषवो यस्मिन् योगे तं तादृशमनङ्गभङ्गं ददर्श प्रेक्षितवान् । निश्चिकायेति यावत् । तं सोमं यच्छिद्धीत्यादि-भिश्चतुसृभिर्ऋग्भिः सहस्वाहाकारैः सोममुच्छिष्टं चम्वोर्भरेत्येतयर्चा तं द्रोणकलशं प्रत्यवनिनाय नीत्वाऽपूरयत् । भरेत्युक्तेः । अथ भरणानन्तरं अस्मिन् होमेऽन्वारब्धे पूर्वाभिश्चतुसृभिर्ऋग्भिः सोमं सहस्वाहाकाराभिर्जुहवाञ्चकार ।

यत्र ग्रावेति सूक्तं नवर्चम् । तत्र यच्चिद्धीति पञ्चमीमारभ्य चतुसृभिरभिषवः । उच्छिष्टमित्यादिकं नवमी तया द्रोणकलशपूरणम् । यत्र ग्रावेत्यादिभिश्चतुसृभिर्होम इत्येवं कृत्स्नस्य सूक्तस्य विनियोगः । अथ होमानन्तरमेनमवभृथं तत्साधनं सर्वं तत्स्थलं प्रति नीतवान् त्वन्नो अग्ने वरुणस्येत्यादिकाभ्यामृग्भ्यां तद्यागं कृतवान् । अथेति । मङ्गलसूचकं कार्यान्तरस्येति ज्ञेयम् । तत ऊर्ध्वमित्यूर्ध्वमित्यन्यथा न वक्तव्यं स्यात् । तत ऊर्ध्वं तदुपर्येनमाहवनीयमग्निमुपस्थापयाञ्चकार । तन्मन्त्रः । शुनश्चिच्छेपं निन्दितं सहस्रादिति चतुर्थे मण्डलेऽपि वेत्यादिऋग्भाष्योक्तेः । हरिश्चन्द्रमुपस्थाने प्रेरयदिति यावत् । असाङ्कर्येण पशुविनियोगशंसनादञ्जःसवोजमिति ज्ञेयम् । विश्वामित्राजीगर्तयोः संवादं दर्शयति ॥ अथ हेति । अथाभिषेचनीयसमाप्त्यनन्तरं हरिश्चन्द्रसहितेषु ऋत्विक्षु विस्मृतेषु कथा काचिदत्र पूरणीया । अजीगर्तोऽप्राक्षीत्प्रेक्षावतः । शुनःशेपः किं कुमारो ममोत क्रेतुरथवा कस्यचिदपरस्येति । तत्र सभास्तारास्तदिच्छयेत्युत्तरमाहुः । तदुपश्रुत्य शुनःशेपः किं चर्चयेति स्वसम्मतविश्वामित्रपुत्रत्वः ॥ अथ तदनन्तरमिति । विश्वामित्रस्याङ्कमुत्सङ्गमाससाद । अथानन्तरं सौयवसिरजीगर्तः शुनःशेपपिता क्रतुर्जातः साङ्गः अङ्गरोगविकलश्च हरिश्चन्द्रोऽतो मे

मम। हे ऋषे विश्वामित्र पुत्रं देहीति स उवाच ह। स विश्वामित्रो हरीच्छयाऽयमायातः पोतोऽत एनं न वितरामि। तं किञ्च देवा इमं मह्यमरासत ददुः। ममायं जात इति। वैश्वामित्रो देवैरातत्वाद्देवरातश्चेति नामद्वन्द्वनिरुक्तिर्ज्ञेया। आस। यथा द्रौणेरुलूकेन कृतमप्यास बोधकमित्येतत्सुधाभिधानाद्विभक्तिप्रतिरूपकमव्ययं वा। यदिदमुपासत इति तलवकारश्रीटिप्पणानुसारेणासगतीत्यादिधात्वन्तरस्य रूपं वेति ज्ञेयम्। विवृतं चास्माभिरपि प्राक्ततोऽनुसन्धेयम्। तस्य शुनःशेपस्य कापिलेयाः कपिलगोत्रोत्पन्ना उत्पन्नाश्च तथा बभ्रुगोत्रे ते बान्धवा आसासुः। अथ विश्वामित्रेण निराकृतोऽजीगर्तः शुनःशेप त्वमिह विश्वामित्रोत्सङ्गसङ्गं विहाय गेहं प्रत्येवागच्छ जननीजनकश्चेत्यावां त्वां विह्वयावहै आकरवावहै। इत्युक्तावप्यत्यक्ततदङ्कं तूष्णीकं निरीक्ष्य कयाचिद्गाथया पुनः शुनःशेपं पिता प्राह ॥ स हेति। त्वमाङ्गिरसोऽङ्गिरगोत्रोत्पन्नो जन्मनाऽऽजीगर्तिरजीगर्तस्य ममापत्यमसि। जन्मनेत्युभयान्वयि वा। कविर्विद्वानिति श्रुतः प्रख्यातश्च। अतो ऋषे त्वं पैतामहात्प्रजापतिसम्बन्धिनस्तन्तोः सन्तानात् मापगा अपगत उपगतोऽन्वयान्तरान्वयम्। मा भूः पुनर्मा मामेहि आगच्छेति गीतं पित्रा श्रुत्वा स्वयमपि गाथयोत्तरं वक्ति ॥ स हेति। सदस्यास्तदितरे लोकाश्च यत्क्रूरं कर्म शूद्रेष्वत्यन्तनीचेष्वपि नालप्सत न लब्धवन्तः। तत्किमित्यतस्तावदेकमुक्त्वा मूकयति। शासहस्तं शासो मद्विशसनसाधनमसिः स हस्ते यस्य तं। त्वा त्वामदर्शुर्दृष्टवन्तः। हे अङ्गिरो मन्मन्निमित्तं मत् मूलतयेति यावत्। गवां त्रीणि शतानि क्रयसमये शतं शतं रज्जुसमासज्जनक्षणे विशसनासिविशानीकरणे शतमेवं त्रीणि शतान्यवृथा वृतवानसीति नाशायोद्यतस्य तव नाशायोग्येत्यूच इति सुतोक्तः। सौयवसिरजीगर्त उवाच तां गाथामाह ॥ तद्वा इति। हे तात पितः। अनुक्रोशप्रदर्शनम्। मया यत्पापं कर्म कृतं तन्मा मां तपति दहति तन्निह्नवे परिहरणं कथमित्यत्तः कथयति ॥ तुभ्यमिति। गवां शता। जसो डादेशः। शतानि तुभ्यं प्रतियन्तु त्रीणि शतानि त्वमेव गृहाण गृहीतो न ते भ्रातरौ द्वे शते इति भावः। इति पित्र्युक्त्यनन्तरं शुनःशेपः पुनर्गाथान्तरेणाह ॥ य इति। यः कश्चित्पुमान्सकृदेकवारं पापकं पापं कुर्यात्ततः कृताद्दुष्कृतादपरमितस्ततोऽपि नीचं मन्मातृहत्येदानीं प्रवृत्तस्य पुनः कुटुम्बनिकुरुम्ब-निवृत्तिप्रवर्तनं भवेदिति कुर्यादेव। अभ्यस्ततत्यागस्य दुःसाध्यत्वात्। तथा हि कस्त्यक्षति सिद्धविद्यामित्यादेः। शौद्रीयान्यायाद्दुर्जननीतेर्नापिगायतोऽतस्त्वया कृतं पापं पुनरसन्धेयं प्रतिसन्धानायोग्यमिति सुतः। अथ विश्वामित्रो वक्ति। असन्धेयमप्रतिसन्धानयोग्यं तव पापमिति शुनःशेपेनोक्तं तदसन्धेयत्वं विश्वामित्र उपपादकयुक्त्योपपादितवान्। तदुपपादनार्थमेवेमां गाथामचकथत्। असौ सौयवसिः सूयवसप्रसूतोऽजीगर्तो भीम एव भयकारणमेव शासेन खड्गेन विशिशासिषुर्विशासनं कर्तुकामोऽस्थात्स्थितोऽभूत्। अत एतस्य पुत्रो मा भूः। ममैव पुत्रतामुपेहीति शुनःशेपं विश्वामित्र

उवाच । अथ तयोरुक्तिप्रत्युक्ती वक्ति ॥ स होवाच शुनःशेप इति । विश्वामित्रेणैवमुक्तः शुनःशेपो गाथया गाधितनयाय कथयति ॥ स वा इति । हे राजपुत्र । अनेन सन्नपि क्षत्रियस्तपसा सम्पादितब्राह्मणत्व इति तन्माहात्म्यं सूच्यत इति ज्ञेयम् । त्वं यथा जात्यन्तरतां यातो यातोऽहं पित्रन्तरपुत्रतामिति सूचयितुं वैवमुक्तिः । राजजातीयः सन्नथ येन प्रकारेण नोस्मान् अभिज्ञपय । आ सम्यग्ज्ञपय ज्ञायते । तथैवाहमाङ्गिरसः सन्नपि तव पुत्रतामुपेयां पुत्रत्वं तथा वद । यथा त्वं ब्राह्मणत्वं सम्पादितवांस्तथा मामप्याङ्गिरसं वैश्वामित्रं वादय जनैरिति हृदयम् । विश्वामित्रोऽप्यथ गाथया कथयति । हे शुनःशेप त्वं मम पुत्राणां तन्मध्ये ज्येष्ठः स्याः । नैकपर्याप्तं मदाप्तं श्रैष्ठ्यमित्याह ॥ तवेति । प्रजासन्ततिरपि श्रेष्ठा स्यात् देवैर्दत्तमिति दैवं दायमपत्यत्वरूपं त्वमुपेयाः प्राप्नुहि । तेन वै पुत्रत्वेनैव त्वा त्वामुपमन्त्रये व्यवहराणि । शुनःशेपः स्वाभिप्रेतं तन्मुखतो वादयितुं गाथामाह ॥ स होवाचेति । संज्ञानानेषु मां पुत्रं जानत्सु तवेतरसुतेषु सर्वे मां ब्रूयात् । ज्येष्ठत्वेन व्यवहरत् । ज्येष्ठं पिता कनिष्ठं मातेति द्वयोर्द्वयोः प्रीतिपात्रत्वोक्तेस्तथैव स्वस्य निर्गतिकतयैवं दशापन्नेति क्लिष्टो ज्यैष्ठ्यं वृतवानिति भावः । कानिष्ठ्यं चेत्पितृसौमनस्यं न प्राप्यत इति हृदयम् । इयदनर्थस्य तन्मूलत्वाच्च । तच्च मे मम सौहार्दाय भ्रातृभिः स्नेहातिशयाय । यकारोऽधिकोऽधिकतां स्नेहस्य बोधयति । श्रियै सम्पदे च सम्पद्यते । हे भरतर्षभ भरतवंशजोत्तंस विश्वामित्रैवं चेत्तव पुत्रतामुपेयां तथैतान् सुतान्प्रति वदेति तात्पर्यम् । अथ विश्वामित्रः पुत्रानामन्त्रयामास । आगतांस्तांस्तन्मध्ये यश्च मधुश्छन्दा नाम यश्चर्षभो यश्च रेणुर्यश्चाष्टक एतदादयः श्रुणोत मद्वाणीं शृणुत । एकेन यूयं भ्रातरः स्थ ते सर्वेऽस्मै शुनःशेपाय ज्यैष्ठ्याय युष्मज्ज्यैष्ठ्याय कल्पध्वमभिमानं त्यक्त्वा तज्ज्यैष्ठ्यं वृणुत । एकेन च भ्रातर इत्येकसारल्ये-नानुदाहरन्नुदाहरन्नेकेचनास्मा इति वैरल्येन वेदपुरुषः केषाञ्चिदनोङ्करणज्ञानं च विश्वामित्रस्यास्तीति भावमाविर्भावयामासेति ज्ञेयम् ॥

तत्र पुत्राः कियन्तस्ते च किमवदन्नित्यत आह । एकशतं पुत्रा आसुः । गता मधुश्छन्दास्तु मध्यमस्ततो ज्यायांसः कनीयांसश्चेत्याहत्यैकशतम् । तत्तत्र ज्यायांसो ये ते पितुर्वचनं कुशलं स्वेष्टदं न मेनिरे ।ताननुलक्ष्य विश्वामित्रो व्याजहार शापरूपं वचनं व्याहरणं ज्ञेयम् । वः प्रजाः पुत्राद्या अन्तानन्तो येषामस्ति ते देहास्तांश्छ्वादीनिति यावत् । भक्षीष्ट भक्षन्ताम् । त एत एवं शप्ता अन्ध्राः पुण्ड्राः शबलाः पुलिन्दा मूतिबा इति पञ्चविधा उदन्त्या जातितोऽत्यन्तमन्ते भवाः चण्डाला इति यावत् । बहवः पुनरवान्तरभेदवन्तश्च दस्यूनां तस्कराणां मध्ये भूयिष्ठा अतिशयेन भूयांसो भूयिष्ठा वैश्वामित्रा भवन्तीति ज्येष्ठपुत्रवृत्तमुक्त्वा मधुश्छन्दसा सहितैकपञ्चाशत्सुतवृत्तं गाथया दर्शयति ॥ स हेति । समधुश्छन्दाः पञ्चाशताः कनीयसा सार्धं साकं सुतत्वाविशेषादेते पितुराज्ञावज्ञातारः किंवा नेति सन्दिहानं पितरं प्रयत्नगौरवं कुत इति यथा भवेदाकर्णनं तस्य तथा पारोक्ष्येण शुनःशेपं

प्रतीत्युक्त्वा तोषयन्ति । यन्न इति । नः पिता यत्सञ्जानीते सम्यग्जानाति तस्मिन्वयं तिष्ठामहे शुनःशेप त्वां पुरस्तात्कुर्महे । ज्येष्ठं त्वा त्वां कृत्वा च सर्वे वयम् । अनेन द्विर्वचनेन संशयं व्यनाशयदिति ज्ञेयम् । अन्वञ्चोऽनुगच्छन्तः स्मसि भवाम इति । श्रुतेतरसुतवृत्तः किं विश्वामित्रश्चकारेत्यत आह ।। अथेति । एतदेकपञ्चाशत्सुतशंसनानन्तरं प्रतीतो विश्वासं प्राप्तः सन्पुत्रांस्तुष्टावास्तौषीत् । तां प्रथमां गाथां कथयति । ये यूयं मे नानमनुगृह्णन्तः स्वीकुर्वन्त आज्ञां मां वीरवन्तं स्वधर्मशूरसूनुमन्तमकर्त कृतवन्तस्ते पुत्राः पशुमन्तः । पशवो हि देवास्तद्वत्त्वं च तत्सौमनस्येनेति ज्ञेयम् । पशुर्भगवान्वा । पालनात्सुखरूपत्वात्पशुनामा जनार्दन इति छान्दोग्यभाष्योक्तेः । प्रसिद्धपशुमत्त्वमित्यप्यर्थः । वीरवन्तः पुत्रवन्तो वीरवत्तममित्यत्रेव वीर्यवन्त इति वा । भविष्यथ ।

अथ द्वितीयामाह ।। पुर इति । पुरो युष्मत्पुरत एत्रा गन्त्रा देवरातेन सह गाथिनाः । गाथिशब्दो गाधिशब्दपर्यायः । थकारस्थाने धकारो धकारस्थाने थकारश्चाधस्मान्नो ददिर्भवेत्यादौ बहुलमुपलब्ध इति गाधिपौत्रा वीरवन्तः सर्वेऽपि सर्वैः राध्या आराध्याः पूज्याश्च भविष्यथ एषः शुनःशेपो वः सद्विवाचनं सन्मार्गोपदेशं करिष्यतीति । सन्मार्गवचनरूप एवेति । तृतीयामाह ।। एष व इति । हे कुशिका वो युष्माकमेषः शुनःशेपो वीरो विविधमीरयतीति स तथा नियन्ता । ज्येष्ठ इति यावत् । यो देवरातस्तमन्वित अनुगता भवत । मे मदीयं दायं युष्मांश्चोपेतं प्राप्स्यति । चकारात्तं देवरातं च । यामु च यामपि काञ्चन विद्यां वयं विद्मसि जानीमः साऽपि युष्मानपि । आ सम्यगुपेतेत्यन्वयः । चतुर्थीयं गाथा ।। ते सम्यञ्च इति । हे वैश्वामित्रा मम पुत्रा गाथिना गाधिपौत्रास्ते वयं सर्वेऽपि सम्यञ्चः समीचीनमनस्का ये च देवरातेन साकं सार्धं सरातयः । रातिर्मैत्र्यं तेन सहिताः । शूरराताय इत्यृग्भाष्ये चैव मित्राणीत्युक्तेः । रातिर्देयस्वापतेयदानम् । तेन सहिता इति वा । एतादृशाः सन्तो देवराताय । चतुर्थी षष्ठ्यर्थे । षष्ठ्यर्थे चतुर्थी वाच्या । या खर्वेण पिबति तस्यैव खर्व इति वैदिकोक्तेः । मम कायसूनव इति च । यथा देवरातस्य धृत्यै ततः स्वपोषणाय तच्छ्रैष्ठ्याय च तस्थिरे स्थिताः । अतः सम्यञ्चो वयम् । समवप्रविभ्य इत्यन्यतमोपपादकत्वाभावश्छान्दसमात्मनेपदम् ।

पञ्चमीमाह ।। अधीयत इति । इकृस्मरण इति स्मरणात् । स्मृतिकारैरधीयते स्मर्यते । किं तदित्यत आह ।। देवरात इति । उभयोरजीगर्तविश्वामित्रयोस्तत्सम्बन्धिऋक्थयोर्धनयोर्ऋषिर्द्रष्टा तद्योग्य इति यावत् । द्व्यामुष्यायणत्वात् । जह्नूनामजीगर्तमूलपुरुषजह्नुवंशसम्भवाः सर्वेऽपि जह्नवस्तेषां चाधिपत्ये स्वाम्ये । तथा दैवे देवसम्बन्धिनि कर्मणि । तथा वेदे मन्त्रे च तथा गाथिनां गाधिसम्बन्धिनां

चाधिपत्य इत्यादिकमादिवत् अयं योग्य इति । उक्तमुपाख्यानमुपसंहरति ॥ तदेतदिति । कस्य नूनं निधारयेत्यन्ताः सप्तनवतिसङ्ख्या ऋचः । हं नः सहमित्यादिकाः तिस्रः । एवमृचां शतम् । परशब्द श्राधिकवार्चा । शर्वोक्तऋक्शतात्परः । एकत्रिंशत् सङ्ख्यायन्वित्याद्या गाथा यस्मिन्सन्ति तत्परऋक्शतगाथम् । तथा च शुनः शेपदृष्टम् (९७) सप्तनवतिसङ्ख्याः । मधुश्छन्दोदृष्टास्तिस्रो ब्राह्मणोक्ता एकत्रिंशद्गाथाश्च यस्मिन्सन्ति तत्परऋक्शतगाथं शौनःशेपम् ।

हरिश्चन्द्रो ह वैधस इत्यादिकं शुनःशेपविषयं सर्वमाख्यानं तद्धोता अभिषिक्ताथ राजसूयक्रत्वङ्गाभिषेचनीये कर्मणि तस्मै राज्ञे आचष्टेऽकथयत् । तत्रेत्थम्भवितव्यमुभाभ्यामित्याह ॥ हिरण्यकशिपाविति । हिरण्यकशिपौ तत्तन्तुनिर्मितकशिपौ आसीन आचष्टे । अध्वर्युरपि हिरण्यकशिपावासीनो वक्ष्यमाणं प्रतिगरं ब्रूयात् । यस्माद्धिरण्यं यशोहेतुत्वाद्यद्यशस्तत एनं राजानं यशसा समृद्धयति समृद्धं यशस्विनं करोत्यतस्तत्रोपवेश आवश्यक इति भावः । प्रतिगरं गृणाति । होत्रुक्ताथा एकैकशो ऋचोऽन्तेऽध्वर्योरोमिति प्रतिगरो भवति । तत्तदृगवसितावध्वर्युः कुर्यादोङ्कारोच्चारमिति भावः ।

होतृप्रयुक्तगाथायास्तु तथेति ब्रूयात्स एव प्रतिगरः प्रणवः क्व प्रणेतव्यस्तथेति क्वेत्यतो व्यवस्थामाह ॥ ओमितीति । दैवैरङ्गीक्रियमाणार्थे तथेति च मानुषं तदङ्गीकारे उभाभ्यां भाविफलमाह ॥ दैवेनेति । एनं यजमानं दैवेन प्रणवेन मानुषेण तथेत्यनेन च प्रतिगरेण पापादैहिकादेनसः पारत्रिकदुःखवन्नरकादेः साधनात्प्रमुञ्चति मोचयति । क्रतुमानेवं भवतु भवति चाक्रतुः कथमित्यतः कथयति । यस्मादुपाख्यानं पापापनोदकं तस्माद्यो राजा विजिती विजितं च विजयस्तद्वान् स्यात् । सो यजमानोऽप्ययाजी सन्नप्येतच्छौनःशेपाख्यानमाख्यायैतैव स्वपुरतो नादयेत् । तथा सति तस्मिन्नेतदाख्यानं श्रुतवति क्षितिपतावल्पं स्वल्पमेन ऐहिकपारत्रिकफलोपलम्भकं पापं न परिशिष्यतेऽवशिष्टं भवति । विना दक्षिणां नार्थसिद्धिरिति तामाह ॥ सहस्रमिति । आख्यात्रे होत्रे सहस्रं गवां दद्यात्प्रतिगरित्रे चाध्वर्यवे शतं दद्यात् । एत आसने होत्रध्वर्युभ्यामुपविष्टे हिरण्यकशिपुरूपे ताभ्यामेव दद्यात् । अश्वतरीरथश्चित्र इत्यर्थः । यथोक्तम् । क्षत्रियत्वावगतिसूत्रभाष्ये रथस्त्वश्वतरीयुक्तश्चित्र इत्यभिधीयत इत्यादि । तस्यैव क्षत्रमुख्यचिह्नत्वात् । श्वेतः श्वेतं रूप्यमिति विश्वात् श्वेतमस्त्यत्रेति श्वेतो रजतालङ्कृत इति यावत् । स च होतुर्देय इत्यर्थः । अक्रतुः कृतो राज्ञः कल्पोऽभिहितः । इदानीं पुत्रकामानां तदवाप्तिमाह ॥ पुत्रकामा इति । ह प्रसिद्धौ । पुत्रकामाय तेऽपि आख्यापयेरन् । शौनःशेपमाख्यानं ब्राह्मणमुखाच्छृणुयुः । पुत्रान् लभन्ते ह लभन्ते । हेति प्रसिद्धौ । अध्यायान्तेऽभ्यासस्तु मानिको भवन्सर्वाध्यायोक्तार्थनिर्धारकः । यथोक्तं भाष्ये । प्रथमे द्वितीयेऽध्याये

चावधारणार्थं सर्वस्याप्युक्तस्याध्यायमूलतः । द्विरुक्तिं कुर्वते प्राज्ञा अध्यायान्ते विनिर्णय इति वाराहसंहितायाम् । सर्वाध्यायार्थावधारणार्थाऽध्यायान्ते द्विरुक्तिः । उक्तं च गारुडे । अध्यायान्ते द्विरुक्तिः स्याद्वेदे वा वैदिकेऽपि वा । विचारो यत्र सज्जेत पूर्वोक्तस्यावधारणे । अनुक्तानां प्रमाणानां स्वीकारश्च कृतो भवेत् । विनिन्द्य चेतरान्मार्गान्सम्पूर्णफलता तथेतीति ।

ललितं कलितार्थं नो पदं परिमितः पदम् ।
विवृतं तत्कविवृतमस्तु हृत्प्रियमस्तु च ।

एकशतं मधुश्छन्दसा सहैकोत्तरशतं पुत्रा मध्यमत्वान्मधुश्छन्दसस्तेन सहिता इति ते माधुश्छन्दसा तन्नाम पित्रा कृतम् । पुत्रा अवापुरिति भावः ॥ २८,२९ ॥

छलारी — तदेव गाधेः कन्यावंशं निरूप्य प्रकृतमाह ॥ गाधेरभूदिति । महातेजो विश्वामित्रः क्षात्रं क्षत्रियत्वं ब्रह्मवर्चसं ब्राह्मणत्वम् ॥ तस्य विश्वामित्रस्यैकशतं पुत्रा आसन् । तेषामेकोत्तरशतानां पुत्राणां मध्ये मध्यमः स तु मधुच्छन्दो नाम । स तु मधुच्छन्दसा युक्ताः ये पञ्चाशत्पुत्रास्ते मधुच्छन्दसः सकाशात्कनिष्ठा मधुच्छन्दस नामानो भवन्ति नान्ये । तस्य विश्वामित्रस्यैकशत-पुत्रार्थमासुरित्यादि ब्राह्मणं चेममेवार्थं वक्ति ॥ २८,२९ ॥

पुत्रं कृत्वा शुनःशेपं देवरातं च भार्गवम् ।
आजीगर्तं सुतानाह ज्येष्ठ एष प्रकल्प्यताम् ॥ ३० ॥

सत्यधर्मीया — पुत्रं स्वत एव स्वोत्सङ्गसङ्गिनं देवरातं च भार्गवं तद्गोत्रमाजीगर्तमजीगर्तगोत्रजं सुतान् ज्यायः ॥ ३० ॥

छलारी — शुनःशेपस्य माहात्म्यमुपरिष्टात्प्रचक्षत इत्युक्तं प्रपञ्चयितुमाह ॥ पुत्रं कृत्वेति । अत्र किं वदन्ति । मम पुत्रो भवेति विश्वामित्रेणोक्तः शुनःशेपो विश्वामित्रं प्रत्याह । अहमजीगर्तस्य मुनेर्मध्यमः पुत्रः । अतोऽहं पितृभ्यां ममतां विहाय विक्रीतः । हे विश्वामित्र । त्वत्पुत्राणामहं श्रेष्ठश्चेत्तव पुत्रः स्यामित्युक्तो विश्वामित्रस्तस्मिन्कृपया शुनःशेपं ज्येष्ठपुत्रं कृत्वा सुतानाह ॥ ज्येष्ठ एषः प्रकल्प्यतामिति । देवैर्विश्वामित्राय दत्तवान् । देवरातशब्दवाच्यं भार्गवं भृगुवंशोत्पन्नम-जीगर्तमजीगर्तापत्यमेषः शुनःशेपो युष्माकं ज्येष्ठः प्रकल्प्यताम् । भवद्भिरिति शेषः ॥ ३० ॥

यो वै हरिश्चन्द्रमखे विक्रीतः पुरुषः पशुः ।
स्तुत्वा देवान् प्रजेशादीन् मुमुचे पाशबन्धनात् ॥ ३१ ॥

सत्यधर्मीया — कत्य: क्लृप्तश्च किं कार्य इत्यत: कथयति ॥ य इति । हरिश्चन्द्रस्य राज्ञो यज्ञे ब्रह्मादीनुषोऽन्तान् बन्धनात्तत्रिकात् ॥ ३१ ॥

छलारी — अनेन विशेषणत्रयेण ज्येष्ठत्वकल्पनायां वैशेष्यान्तरमाह ॥ य इति द्वाभ्याम् । य: शुन:शेपो हरिश्चन्द्रयज्ञेऽजीगर्तेन पित्रा रोहिताय विक्रीत: पुरुषाख्य: पशुरभूत् । पश्चात्प्रजेशादीन् ब्रह्मादिदेवान्स्तुत्वा तत्प्रसादात्पाशबन्धनान्मुमुचे मोचयामास ॥ ३१ ॥

यो रातो देवयजने देवैर्गाधिसुताय सः ।
देवरात इति ख्यातः शुनःशेपस्तु भार्गवः ॥ ३२ ॥

सत्यधर्मीया — देवताभिवितरणादेवंनामा स इत्याह ॥ य इति । पितृस्थापितनामाह ॥ शुन:शेप इति ॥ ३२ ॥

छलारी — देवानां यजनं यस्मिंस्तस्मिन्यज्ञे । यो देवै रातस्त्रातस्तैरेव विश्वामित्राय रातो दत्त: । यो भार्गवोऽपि गाधिवंशे देवरात इति ख्यात: ॥ ३२ ॥

ये मधुच्छन्दसो ज्येष्ठाः कुशलं मेनिरे न तत् ।
अशपत् तान् मुनिः क्रुद्धो म्लेच्छा भवत दुर्जनाः ॥ ३३ ॥

सत्यधर्मीया — मधुश्छन्दसस्तत्सकाशान् म्लेच्छा आन्ध्रादयो दुर्जना दुष्टप्रजाश्च ॥ ३३ ॥

छलारी — शुन:शेपो ज्येष्ठत्वेन कल्प्यतामिति विश्वामित्रेणोक्ता ये पञ्चाशत्पुत्रा मधुच्छन्दसो ज्येष्ठास्ते शुन:शेपज्येष्ठत्वम् । स्वात्मानं कनिष्ठमिति यावत् । तत्कुशलं साधु । न मेनिरे । मध्यमत्वस्यानर्थावहत्वं दृष्ट्वा तं न कृतवन्त इत्यर्थ: । तत: किमभूदिति तत्राह ॥ अशपदिति । मुनिर्विश्वामित्र: ॥ ३३ ॥

स होवाच मधुच्छन्दाः सार्धं पञ्चाशता ततः ।
यन्नो भवान् सञ्जानीते तस्मिंस्तिष्ठामहे वयम् ॥ ३४ ॥

सत्यधर्मीया — पञ्चाशता पञ्चाशतेतरेण । श्रुतौ यद्यपि शुन:शेपं प्रत्युक्तिरिति श्रूयते । गौरवं पित्र्यमिति बोधयितुमत्रापरोक्ष्येण वाणीति प्रवीणैर्ज्ञेयम् । तस्मिन् पित्रनुशिष्टे मार्गे वयं तिष्ठामहे । प्रकाशनस्थेयाख्ययोश्चेति सूत्रादात्मनेपदता । तदेवं निश्चित्य वर्तामहे । स्वाशयकरणतुष्ट आशास्त आशिष: । हे पित: । तिष्ठामेति वा ॥ ३४ ॥

छलारी — पञ्चाशता पञ्चाशत्संख्याकैः कनिष्ठैः साकं सह मधुच्छन्दा उवाच । नोऽस्माकं ज्येष्ठत्वं कनिष्ठत्वं वा भवान्पिता सञ्जानीते आज्ञापयति । तस्मिन्विषये तिष्ठामह इति ॥ ३४ ॥

ज्येष्ठं मन्त्रदृशं चक्रुः त्वामन्वञ्चो वयं स्म हि ।
विश्वामित्रः सुतानाह वीरवन्तो भविष्यथ ॥ ३५ ॥

सत्यधर्मीया — त्वामन्वञ्चो वयं स्म हीत्युक्त्वा मन्त्रदृशं ज्येष्ठं चक्रुः । सुतान्मधुश्छन्दस आदीन्यूयं वीरवन्तो भविष्यथेत्याह । जीवतोर्वाक्यकरणादृणसंशोधनेन च । गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रतेत्यादेः स्ववचनकरणतुष्ट आशास्त आशिष इति भावः ॥ ३५ ॥

छलारी — एवमुक्त्वेति शेषः । ये पुत्रा मन्त्रदृशं कस्य नूनमित्यादि ऋग्वेदद्रष्टारं शुनःशेपं ज्येष्ठं चक्रुः । कथं चक्रुरिति तत्राह ॥ त्वामन्वंच इति ॥ भो देवरात । वयं त्वामन्वंचोऽनुवर्तमानाः कनिष्ठाः स्म हि भवाम हि प्रसिद्धम् । प्रसन्नो विश्वामित्रः । कं वरं प्रायच्छदिति तत्राह ॥ विश्वामित्र इति । वीरवन्तः पुत्रवन्तः ॥ ३५ ॥

ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त मा ।
एष वः कौशिका वीरो देवरातस्तमन्वित ॥ ३६ ॥

सत्यधर्मीया — श्रुतिमेव ग्रन्थकृत्पठति ॥ य इति । अनेन सर्वो वेदोदितोऽयमर्थो मया सङ्गृहीत इति द्योतयति ॥ ३६ ॥

छलारी — कुतोऽयं वरो दत्त इति तत्राह ॥ य इति । ये भवन्तो मे मानमनुगृण्हन्तः परिपालनलक्षणमनुग्रहं कृतवन्तो मा मां वीरवन्तं पुत्रवन्तमकर्त कृतवन्तः । हि यस्मात्तस्माद्यूयमपि वीरवन्तो भविष्यथेति । वीरवन्तमकर्तेति ब्राह्मणवाक्यानुसारेण वेदतुल्यमिति प्रकाशयति । हे कौशिकाः । एषो देवरातो वो युष्मदीयः कौशिक एव यत एषो वीरो मम पुत्रस्तमेन-मन्वितानुवर्तध्वम् ॥ ३६ ॥

अन्ये चाष्टकहारीता जयक्रतुमदादयः ।
एवं कौशिकगोत्रं तद् वैश्वामित्रैः पृथग्विधम् ।
प्रवरान्तरमापन्नं तद्धीत्येवं प्रकल्पितम् ॥ ३७ ॥

सत्यधर्मीया — अन्ये चाष्टकादयस्तमन्ववर्तन्तेति शेषः । तदविभक्तं कौशिकगोत्रं वैश्वामित्रैर्विश्वामित्रपुत्रैः पृथग्विधमेके च शप्ताः केचनानुगृहीता गृहीत एक इति पृथग्विधं नानाप्रकारं तत्कौशिकगोत्रम् । प्रवरो नामावान्तरभेदो न तु वंशान्तरता । तथा च स्मृतिः । एक एव ऋषिर्यो यत्प्रवरेष्वनुवर्तते । तावत्समानगोत्रत्वं विना भृग्वन्तिरोगणादिति । अत एवाश्वलायनबौधायनादिभिः कौशिकानां देवरातप्रवरत्वमुक्तमित्यवगन्तव्यमिति व्याचख्युः । इति हेतोरेवं प्रकल्पितमुपाधि-वशात्प्रवरान्तरतया त्याज्यगोत्रद्वयकत्वेन प्रकल्पितमभूत् ॥ ३७ ॥

छलारी — अन्ये चाष्टकादयस्तस्य सुता आसन् । उपसंहरति ॥ एवमिति । एके शप्ता एकेऽनुगृहीता अन्यस्तु पुत्रत्वेन स्वीकृतः । इत्येवं कौशिकगोत्रं पृथग्विधं नानाप्रकारं जातं तच्च प्रवरान्तरमापन्नं प्राप्तं हि यस्मादेवं देवरातज्येष्ठत्वेन तत्प्रकल्पितम् । अत्र प्रवरो नाम तस्मिन्नेव वंशेऽवान्तरभेदः । न तु वंशान्तरम् । तथा च स्मृतिः । एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते । तावत्समानगोत्रत्वं विना भृग्वंगिरोगणादिति । अत एवाश्वलायनबौधायनादिभिः कौशिकानां देवरातप्रवरत्वमुक्तमित्यवगन्तव्यम् ॥ ३७ ॥

यः पुरूरवसः पुत्र आयुस्तस्याभवन् सुताः ।
नहुषः क्षत्रवृद्धश्च रजी रामश्च वीर्यवान् ।
अनेना इति राजेन्द्र क्षत्रवृद्धान्वयं शृणु ॥ ३८ ॥

सत्यधर्मीया — श्रुतायोः श्रावयित्वाऽन्ववायमायोर्वंशं शुकः शंसति ॥ य इति । तस्यायोर्नहुषः क्षत्रवृद्धो रजी रामश्चानेना इति सुता अभवन्नित्यन्वयः । आयोः पुत्रास्तथा पञ्च सर्वे वीरा महारथाः । स्वर्भानुतनयायां च प्रभायां जज्ञिरे नृप । नहुषः प्रथमं जज्ञे वृद्धशर्मा ततः परम् । रम्भो रजिरनेनाश्चेति हरिवंशशंसनात्क्षत्रवृद्धशर्मेति शर्मान्तरं तथा रामस्य रम्भेत्यभिधाभेदो ज्ञेयः । तत्रैव क्षत्रवृद्धस्य मे शृण्वित्याद्युक्तेः । सूचीकटाहन्यायेन वृद्धान्वयं प्रशंसन् प्रतिशृणोति ॥ क्षत्रवृद्धान्वयं शृण्विति ॥ ३८ ॥

छलारी — श्रीकृष्णावतारप्रस्तावाय यस्य वंशे कृष्णावतारस्तद्वंशस्यातिविततत्वात् सूचीकटा-हन्यायेन पुरूरवसः पुत्राणां श्रुतायुप्रभृतीनां पञ्चानां कनिष्ठानां वंशानुक्त्वेदानीं प्रथमस्यायोर्वंशमाह ॥ यः पुरूरवसः पुत्र इति । रजीराम इत्यत्र रजिः, रामः इति पदच्छदोऽनेना इति । तस्य सुता अभवन्नित्यन्वयः । नहुषान्वयस्य राज्यार्हत्वात्क्षत्रवृद्धान्वयस्य तदनर्हत्वात्सूचीकटाहन्यायमनुसन्दधानः क्षत्रवृद्धान्वयं वक्ति ॥ क्षत्रवृद्धान्वयमिति ॥ ३८,३९ ॥

क्षत्रवृद्धसुतस्यासन् सुहोत्रस्यात्मजास्त्रयः ।
काश्यः कुशो गृत्समद इति गृत्समदादभूत् ॥ ३९ ॥

सत्यधर्मीया — क्षत्रवृद्धसुतस्य सुहोत्रस्येति सामानाधिकरण्यम् । काश्यः कुशो गृत्समद इति त्रयः पुत्रा आसन् ॥ ३९ ॥

शुनकः शौनको यस्य बह्वृचप्रवरो मुनिः ।
काश्यस्य काशिस्तत्पुत्रः सुराष्ट्रो दीर्घतमःपिता ॥ ४० ॥

सत्यधर्मीया — शुनकस्तस्य बह्वृचप्रवरो मुनिर्ऋग्वेदप्रवर्तकप्रवरः शौनकः । काश्यस्य काशिस्तत्पुत्रः । सुराष्ट्रो दीर्घतमसो ममतासुतेतरः पिता दीर्घतपःसुत इति हरिवंशकीर्तनात्तपसोऽन्ते सुमहतो जातो धन्वस्य धीमतः । पुनर्धन्वन्तरिर्देव इति निरुक्तेस्तत्रैव पाठ एव वा ॥ ४० ॥

छलारी — क्षत्रवृद्धसुतस्य सुहोत्रस्य काश्यः कुशो गृत्समद इति त्रय आत्मजाः सुता आसन्नित्यन्वयः । गृत्समदाच्छुनकः । अभूदिति सम्बन्धः । यस्य शुनकस्य बह्वृचप्रवरो वेदवेत्तॄणां श्रेष्ठः । शौनको मुनिः सुतोऽभूत् काश्यस्य काशिनामा पुत्रोऽभूत् सुराष्ट्रस्तत्पुत्रोऽभूत् । कथम्भूतः । दीर्घतमसः पुत्रः पिता सुराष्ट्रस्य दीर्घतमाः सुत इति यावत् ॥ ४०,४१ ॥

धन्वन्तरिर्दीर्घतमस आयुर्वेदप्रवर्तकः ।
यज्ञभुग् वासुदेवांशः स्मृतिमात्रार्तिनाशनः ॥ ४१ ॥

सत्यधर्मीया — दीर्घतपसो धन्व इति सुत इत्यध्याहर्तव्यम् । धन्वस्तु दीर्घतपसो विद्वान् धन्वन्तरिस्तत इति तत्रैवोक्तेः । दीर्घतपसस्तदपत्यस्य धन्वस्य धन्वन्तरिरायुर्वेदप्रवर्तकः । वासुदेवांशो यज्ञभुक् स्मृतिमात्रादार्तिनाशन इति भगवदितरताभ्रमभ्रंशार्थं जलधिजन्मन इदं जन्मान्तरं ज्ञेयम् । जनमेजयः । कथं धन्वन्तरिर्देवो मानुषेष्विह जज्ञिवान् । एतद्वेदितुमिच्छामि तन्मे ब्रूहि यथातथम् । वैशम्पायनः । धन्वन्तरेः सम्भवोऽयं श्रूयतां भरतर्षभ । स सम्भूतः समुद्रात्तु मथ्यमानेऽमृते पुरेत्यारभ्याब्जस्त्वमिति होवाचेत्यादिकं गर्भीकृत्य धन्वन्तरिस्त्वित्यन्तेन हरिवंशेनेतरद्विस्तरतो ज्ञेयम् ॥ ४१ ॥

छलारी — दीर्घतमसः सुत आयुर्वेदप्रवर्तको वैद्यशास्त्रप्रवर्तकः ॥ ४१ ॥

तत्पुत्रः केतुमान् यस्य जज्ञे भीमरथस्ततः ।
दिवोदासो द्युमांस्तस्मात् प्रतर्दन इति स्मृतः ॥ ४२ ॥

सत्यधर्मीया — तत्पुत्रो धन्वन्तरितनयस्ततो भीमरथात्तस्माद्दिवोदासात्प्रतर्दन इति स्मृतः सुतोऽभूत् ॥ ४२ ॥

स एव शत्रुजिद्वत्सो ऋतध्वज इतीरितः ।
तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः ॥ ४३ ॥

सत्यधर्मीया — स एव प्रतर्दन एव शत्रुजिद्वत्सो ऋतध्वजः कुवलयाश्वश्चेतीरितो नामान्येकस्यैवेमानीति व्याचख्युः । हरिवंशविरोधं सेहिरे त इति ज्ञेयम् । प्रतर्दनस्य पुत्रौ द्वौ वत्सगर्भौ सुविश्रुतौ । वत्सपुत्रो ह्यलर्क इत्युक्तेः । तत इत्यत्राप्यन्वेति । ततः प्रतर्दनाद्वत्सोऽभूत् । स एव वत्स इतीरित एव शत्रुजिदादिकुवलयाश्वेत्यन्तनामभिः प्रोक्त इत्यन्वयनेन तदविरोधो ज्ञेयः ॥४३॥

छलारी — ततः प्रतर्दनादिशब्दवाच्यात् द्युमतः सकाशादलर्कादयः सुताः जाताः । द्युमतोऽनेकानि नामानि अभूवन्नित्याह ॥ प्रतर्दन इति स्मृत इति ॥ ४३ ॥

षष्ठिवर्षसहस्राणि षष्ठिवर्षशतानि च ।
नालर्कादपरो राजा बुभुजे मेदिनीं युवा ॥ ४४ ॥

सत्यधर्मीया — ततो वत्सादलर्कात्पुरातनगीतश्लोकार्धेन स्वयमर्धं संयोज्य तन्महिमानमाह व्यास इति शुको वक्ति । षष्ठिवर्षसहस्राणीति । यथोक्तं हरिवंशे । अलर्कं प्रति राजर्षिश्लोको गीतः पुरातनैः । षष्ठिवर्षसहस्राणि षष्ठिवर्षशतानि च । युवा रूपेण सम्पन्न आसीत्काशिकुलोद्वहः । लोपामुद्राप्रसादेन परमायुरवाप सः । तस्यासीत् सुमहद्राज्यं रूपयौवनशालिन इत्यादि । अलर्कादपरोऽन्यो युवा सन्नेव मेदिनीं न बुभुजे । गतम् ॥ ४४ ॥

छलारी — अलर्कं स्तौति ॥ षष्ठिरिति । षट्सहस्रोत्तरषष्ठिसहस्रवर्षाणीत्यर्थः । तथेत्यध्याहारः । अलर्कादपरो राजा युवा तथा न बुभुजे ॥ ४४ ॥

अलर्कात् सन्ततिस्तस्मात् सुनीथोऽथ सुकेतनः ।
धर्मकेतुः सुतस्तस्मात् सत्यकेतुरजायत ॥ ४५ ॥

सत्यधर्मीया — सन्ततिः सुतः । अथ सुनीथात्तस्मात्सुकेतनाद्धर्मकेतोः ॥ ४५ ॥

छलारी — सन्नतिसंज्ञः । तस्मादित्यत्र पूर्वत्रोत्तरत्र च सम्बन्धः ॥ ४५ ॥

धृष्टकेतुस्ततस्तस्मात् सुकुमारः क्षितीश्वरः ।
वीतिहोत्रोऽस्य भर्गोऽतो भार्गभूमिरभून्नृपः ॥ ४६ ॥

सत्यधर्मीया — ततो धृष्टकेतोः सुकुमारः अस्य सुकुमारस्य अस्य भर्गस्य अतो भार्गभूमिः ॥ ४६ ॥

छलारी — ततः सत्यकेतोर्धृष्टकेतुः । तस्मादित्यस्योत्तरत्रापि सम्बन्धः । तस्मात्सुकुमाराद्वीतिहोत्रः ॥ ४६ ॥

इतीमे काश्यजा भूपाः क्षत्रवृद्धान्ववायिनः ।
रम्भस्य रभसः पुत्रो गम्भीरश्चक्रकस्ततः ॥ ४७ ॥

तस्य क्षेत्रे ब्रह्म जज्ञे शृणु वंशमनेनसः ।
शुद्धस्ततः शुचिस्तस्मात् त्रिककुद् धर्मसारथिः ॥ ४८ ॥

सत्यधर्मीया — क्षत्रवृद्धस्यान्वयो वंशः सोऽस्त्येषामिति ते तथा । कश्यपस्य सन्तानजा रामस्य रम्भस्य वा ततो रभसाद्गम्भीरश्चक्रकश्चेति द्वौ जातौ गम्भीरस्ततो गम्भीराच्चक्रक इति वा तस्येति सुलग्नमेतदर्थ इति ज्ञेयम् । तस्य चक्रकस्य क्षेत्रे कलत्रे ब्रह्म ब्राह्मणकुलम् । अनेनसो वंशं शृणु । ततोऽनेनसस्तथा शुद्धात्तस्माच्छुचेस्तस्मात्त्रिककुदः ॥ ४७,४८ ॥

छलारी — काश्यस्य सन्तानजा भूपाः क्षत्रवृद्धस्यान्ववायो वंश एषामस्ति तथा । वंशोऽन्ववाय सन्तान इत्यभिधानम् । अल्पत्वात्क्षत्रवृद्धानुजस्य राभस्य वंशमाह ॥ राभस्येति । ततो गम्भीरस्ततश्चक्रकः । क्षेत्रे भार्यायां ब्रह्म ब्राह्मणकुलमायोः कनिष्ठपुत्रस्य । अनेनसो वंशमाह ॥ शृणु वंशमिति । ततोऽनेनसस्तस्मात्त्रिककुप् तस्माद्धर्मः सारथिर्यस्य स कृतकृत्यः ॥ ४७,४८ ॥

ततः शान्तरया जज्ञे कृतकृत्यः स आत्मवान् ।
रजेः पञ्चशतान्यासन् पुत्राणाममितौजसाम् ॥ ४९ ॥

सत्यधर्मीया — ततो धर्मसारथेः शान्तरयाः कृतकृत्यो जज्ञे । आत्मवान् स्वेनैव स्ववान् पुत्ररूपस्वरूपान्तररहित इत्यर्थः । रजेरायुस्तृतीयपुत्रस्य ॥ ४९ ॥

छलारी — यत आत्मज्ञानी । अतः पुत्रोत्पादनं न कृतवानित्यर्थः । आयोस्तृतीयपुत्रस्य रजेर्वंशमाह ॥ रजेरिति ॥ ४९ ॥

देवैरभ्यर्थितो दैत्यान् हत्वेन्द्रायाददाद् दिवम् ।
इन्द्रस्तस्मै पुनर्दत्वा गृहीत्वा चरणौ रजेः ॥ ५० ॥

आत्मानमर्थयामास प्रह्लादात् परिशङ्कितः ।
पितर्युपरते पुत्रा याचमानाय नो ददुः ॥ ५१ ॥

सत्यधर्मीया — रजये रजेश्चरणौ गृहीत्वाऽऽत्मानमर्थयामास । जीवयेति प्रह्लादात्परिशङ्कित इति चरणग्रहणनिमित्तम् । पितर्यग्रजौ याचमानायेन्द्राय त्रिविष्टपं नो ददुः ॥ ५०,५१ ॥

छलारी — तस्मै रजिनामकाय पुनर्दिवं दत्वाऽऽत्मानं स्वात्मानं स्वाधिपत्यं ददावित्यर्थः । प्रह्लादोऽसुरो बलवांश्च । अतस्तस्मात्परिशङ्कितो भीतः पितरि रजिनामके मृते सति याचमानायेन्द्राय स्वर्गं नो ददुरित्यन्वयः ॥ ५०-५१ ॥

त्रिविष्टपं महेन्द्राय यज्ञभागान् समाददुः ।
गुरुणा हूयमानेऽग्नौ बलभित् तनयान् रजेः ॥ ५२ ॥

सत्यधर्मीया — किञ्च यज्ञभागान्स्वयमाददुः स्वयं गृहीतवन्तः । यथोक्तं हरिवंशे । शक्रच्यावनप्रतिष्ठापनेबदरीफलमात्रं तु पुरोडाशं विधत्स्व मे । ब्रह्मर्षे येन तिष्ठेयं तेजसाप्यायितः सदा । ब्रह्मन् कृशोऽहं विमना हृतराज्यो हृताशनः । हतौजा दुर्बलो मूढो रजिपुत्रैः कृतः प्रभो । बृहस्पतिः । तेषां च बुद्धिसम्मोहमकरोद्द्विजसत्तमः । नास्ति वादार्थं शास्त्रं च धर्मविद्वेषणं परम् । परमं तर्कशास्त्राणामसतां तन्मनोऽनुगमित्यारभ्य हतवीर्या इत्यन्तेन । गुरुणा बृहस्पतिनाऽग्नौ हूयमाने आभिचारिकमन्त्रैः । अनेन रणमारणासुशकता कौशिकस्य द्योत्यते ॥ ५२ ॥

छलारी — स्वयं यज्ञभागान्समाददुश्च । तेषां मतिभ्रंशाय गुरूणा बृहस्पतिनाऽभिचारकविधानेनाग्नौ हूयमाने सति बलभिद्बलारातिरिन्द्रो रजेस्तनयानवधीत् ॥ ५२ ॥

अवधीद् भ्रांशितान् मार्गान्न कश्चिदवशेषितः ।
प्रतिक्षत्रः क्षत्रवृद्धात् सञ्जयस्तत्सुतो जयः ॥ ५३ ॥

सत्यधर्मीया — मार्गाद्भ्रंशितानुन्मादादिमत इति यावत् । कश्चिदपि पञ्चशतमध्ये । क्षत्रवृद्धस्य सन्तत्यन्तरं शंसति ॥ प्रतिक्षत्र इति । तत्सुतः प्रतिक्षत्रपुत्रस्तत्सुतः सञ्जयसुतः ॥ ५३ ॥

छलारी — सिंहावलोकनन्यायेनाह ॥ प्रतिक्षत्रः क्षत्रवृद्धादिति । अनेन क्षत्रवृद्धस्य द्वौ पुत्रौ सहोत्रः प्रतिक्षेत्रश्चेति । तत्र सुहोत्रवंशः प्राक् प्रतिपादितः । इदानीं प्रतिक्षत्रस्य वंश उच्यत इत्युक्तं भवति । तत्सुत इत्यस्योभयत्र सम्बन्धः । सञ्जयस्तत्सुतः ॥ ५३ ॥

ततः कृतः कृतस्यापि जज्ञे वीर्यधनस्ततः ।
सहदेवस्ततोऽहीनो जयत्सेनस्तु तत्सुतः ॥ ५४ ॥

सत्यधर्मीया — ततो जयात्ततो वीर्यधनात्ततः सहदेवादहीनस्तत्सुतोऽहीनसूनुः ॥ ५४ ॥

छलारी — सहदेवस्तत इत्यत्र तत इत्यस्यावृत्तिः । ततः सहदेवादहीनः ॥ ५४ ॥

सङ्कृतिस्तस्य च जयः क्षत्रधर्मा महारथः ।
क्षत्रवृद्धान्वया भूपा इमे शृण्वथ नाहुषान् ॥ ५५ ॥

इति श्रीमद्भागवते नवमस्कन्धे चतुर्दशोऽध्यायः ।

सत्यधर्मीया — तस्य सङ्कृतिस्तस्य जयस्य महारथः क्षत्रधर्मा । इमे क्षत्रवृद्धान्वया भूपाः । अथ नाहुषान् शृणु ॥ ५५ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे चतुर्दशोऽध्यायः ।

छलारी — तस्य जयत्सेनस्य संकृतिस्तस्य च संकृतेर्जयः । तं विशिनष्टि ॥ क्षत्रधर्मा महारथ इति । नाहुषान् भूपान् ॥ ५५ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे चतुर्दशोऽध्यायः ।

।। अथ पञ्चदशोऽध्यायः ।।

श्रीशुक उवाच —

यतिर्ययातिः संयातिरायातिर्वियतिः कृतिः ।
षडिमे नहुषस्यासन् इन्द्रियाणीव देहिनः ।। १ ।।

सत्यधर्मीया — नहुषसन्ततिमाह ।। यतिरिति । इमे षट् सुता देहिनः षडिन्द्रियाणीवासन् । षड्ढोतारमिति यथा ।। १ ।।

छलारी — नहुषस्य सन्ततिमनुक्रमति ।। यतिरित्यादिना । षडितीन्द्रियाणीत्यत्रापि सम्बन्धः ।। १ ।।

राज्यं नैच्छद् यतिः पित्रा दत्तं तत्परिणामवित् ।
यत्र प्रविष्टः पुरुष आत्मानं नावबुध्यते ।। २ ।।

सत्यधर्मीया — पित्रा नहुषेण यतिर्दत्तं राज्यं स्वस्य ज्यैष्ठ्यान्नैच्छत् । तत्परिणामविदिति निमित्तोत्कीर्तनम् । तत्करिष्यमाणविकारवित् । तदेव विशदयति ।। यत्रेति । यत्र राज्यादिविषये प्रविष्ट आसक्तः पुरुष आत्मानं स्वं परमात्मानं च नावबुध्यते ।। २ ।।

छलारी — तस्य राज्यस्य परिणाममनर्थहेतुत्वं वेत्तीति तथा । तत्र हेतुः ।। यत्रेति । आत्मानं स्वात्मानं परमात्मानं वा ।। २ ।।

पितरि भ्रंशिते स्थानाद् इन्द्राण्या धर्षणाद् द्विजैः ।
प्रापितेऽजगरत्वं च ययातिरभवन्नृपः ।। ३ ।।

सत्यधर्मीया — पितरि नहुषे स्थानादिन्द्राण्याः शच्या धर्षणान्मानसात् । इन्द्रवरुणेत्यालुक् । द्विजैर्वाहितशिबिकोऽगस्त्यादिभिः शापद्वाराऽजगरत्वं च प्रापिते सति । उक्तं च वनपर्वणि ।

अहं हि दिवि दिव्येन विमानेन चरन् पुरा ।
अभिमानेन मत्तः सन् कञ्चिन्नान्यमचिन्तयम् ।
ब्रह्मर्षिदेवगन्धर्वयक्षराक्षसपन्नगाः ।
करान् मम प्रयच्छन्ति सर्वे त्रैलोक्यवासिनः ।
चक्षुषा यं प्रपश्यामि प्राणिनं पृथिवीश्वरम् ।

तस्य तेजो हराम्याशु तद्धि दृष्टेर्बलं महत् ।
ब्रह्मर्षीणां सहस्रं हि उवाह शिबिकां मम ।
स मामपनयो राजन् भ्रंशयामास वै श्रियः ।
तत्र ह्यगस्त्यः पादेन वहन् स्पृष्टो मया मुनिः ।
अगस्त्येन ततोऽस्म्युक्तो ध्वंस सर्पेति वै रुषा ।
ततस्तस्माद्विमानाग्र्यात्प्रच्युतश्च्युतभूषणः ।
प्रपतन् बुबुधेऽऽत्मानं व्यालीभूतमधोमुखम् ।

इत्यादिना । तथोद्योगपर्वणि च । वहन्तु त्वां महाभागेत्यारभ्याथ मामस्पृशन्मूर्ध्नि पादेनाधर्मपीडित इत्याद्यन्तरीकृत्य -

ध्वंसः पापपरिभ्रष्टः क्षीणपुण्यो महीतलम् ।
दशवर्षसहस्राणि सर्परूपधरो महान् ।
विचरिष्यसि पूर्णेषु पुनः स्वर्गमवाप्स्यसि ।

इति । इत्यादिना । षष्ठे च नीतस्तिरश्चां गतिमिन्द्रपत्न्येत्युक्तेः पादेनर्षिशीर्षताडनानुगुणं गूढपादजगरत्वमगस्त्योक्तमिति विभावनीयम् । वनपर्वणि यद्यप्यगस्त्येनेत्युक्तं । तथाऽपि तत्संस्थेन भृगुणेति वाच्यम् । यथोक्तं दानधर्मे ।

ततो भृगुर्महातेजा मैत्रावरुणिमब्रवीत् ।
निमीलयस्व नयने जटा यावद्विशामि ते ।
स्थाणुभूतस्य तस्याथ जटाः प्राविशदच्युतः ।
भृगुः स सुमहातेजाः पातनाय नृपस्य च ।
ततोऽगस्त्यो मदपतिं वाक्यमाह विशाम्पते ।
योजयस्वेति मां क्षिप्रं कं च देशं वहामि ते ।
इत्युक्तो योजयामास नहुषस्तेन तं मुनिम् ।
भृगुस्तस्य जटान्तःस्थो बभूव हृषितो भृशम् ।
न चापि दर्शनं तस्य चकार स भृगुस्तदा ।
वरदानप्रभावज्ञो नहुषस्य महात्मनः ।

न चुकोप तदाऽगस्त्यो युक्तोऽपि नहुषेण वै ।
तं तु राजा प्रतोदेन चोदयामास भारत ।
न चुकोप स धर्मात्मा ततः पादेन देवराट् ।
अगस्त्यस्य तदा क्रुद्धो वामेनाभ्याहनच्छिरः ।
तस्मिंश्छिरस्यभिहते स जटान्तर्गतो भृगुः ।
शशाप बलवत्क्रुद्धो नहुषं पापचेतसम् ।
यस्मात्पदाहतः क्रोधाच्छिरसीमं महामुनिम् ।
तस्मादाशु महीं गच्छ सर्पो भूत्वा सुदुर्मते ।
इत्युक्तः स तदा तेन सर्पो भूत्वा पपात ह ।। इति ।

अत्रापि विशेषः ।

वेदप्रामाण्यविषये पृष्टो नेत्याह मूढधीः ।
प्रमाणमिति तेनोक्ते शिरस्येनं पदाहनत् ।
तदा भृगुं तस्य जटासु लीनः कदाऽपि तस्याक्षिपथं न यातम् ।
आविश्य कञ्जप्रभवः शशाप व्रजस्व पापाजगरत्वमेव ।।

इति महाभारततात्पर्यनिर्णयतोऽवसेयः । मूलमगस्त्य इति वनपर्वणि तथोक्तिः । न भृगुणाऽपि ब्रह्मदत्तवरके दत्तोऽकिञ्चित्करः स्याच्छाप इत्याविश्य कञ्जप्रभव इत्यभ्यधुराचार्या इति सर्वैककण्ठ्यं ज्ञेयम् ।। ३ ।।

छलारी — इन्द्राण्या धर्षणाच्छच्याः संस्पर्शनिमित्तात्पितरि नहुषे द्विजैरगस्त्यादिभिः स्वर्गस्थानाद्भ्रंशिते सति अजगरत्वं महासर्पत्वं प्रापिते सति । केनचिन्निमित्तेन नहुषस्य स्वर्गाधिपत्ये प्राप्ते शचीसंभोगेच्छायामगस्त्यादिभिरजगरो भवेति शापे दत्ते सत्यजगरो बभूवेति भावः ।। ३ ।।

चतसृष्वादिशद् दिक्षु भ्रातॄन् गोप्तॄन् यवीयसः ।
कृतदारो जुगोपोर्वीं काव्यस्य वृषपर्वणः ।। ४ ।।

राजोवाच —

ब्रह्मर्षिर्भगवान् काव्यः क्षत्रबन्धुश्च नाहुषः ।
राजन्यविप्रयोः कस्माद् विवाहः प्रातिलोमकः ।। ५ ।।

सत्यधर्मीया — ययातिर्यत्यनन्तरजो यतिरपि स्वनामानुगुणं चक्र इति ज्ञेयम् । भ्राता ज्यायान्यवीयसो भ्रातॄंश्चतुसृषु दिक्षु प्रादिशत् । कृतदारः काव्यस्य शुक्राचार्यस्य वृषपर्वणश्च कन्यायां ब्राह्मणस्य शुक्रस्य चक्रवर्तिनो ययातेश्च विवाहादिकोऽनुबन्धः कथं सम्बद्ध इति पृच्छति परीक्षिदित्याह ॥ राजेति । प्रातिलोमको विवाहः कस्माद्धेतोरभूद्भदेति राजोवाचेत्यनेनान्वयः ॥ ४,५ ॥

छलारी — चतसृषु दिक्षु यवीयसः कनिष्ठान्संयाति पूर्वान् भ्रातॄन् आदिशत् । काव्यस्य शुक्रस्य वृषपर्वणो राज्ञः । कन्याभ्यामिति शेषः । कृतदारो ययातिः ॥ प्रातिलोम्येन विवाहः कथं घटत इति पृच्छति ॥ ब्रह्मर्षिरिति । नाहुषो नहुषसुतो ययातिः प्रतिलोमतो व्युत्क्रमाद्व्यत्यासतो विवाहः कस्मादासीत् ॥ ४,५ ॥

श्रीशुक उवाच —

एकदा दानवेन्द्रस्य शर्मिष्ठा नाम कन्यका ।
सखीसहस्रसंयुक्ता गुरुपुत्र्या च भामिनी ॥ ६ ॥

सत्यधर्मीया — दैववशादेवैवमभूत् किञ्च कचशामतश्चेत्याख्यायिकामुखेनाख्याति ॥ श्रीशुक इति । सखीनां सहस्रं तेन युक्ता । गुरुपुत्र्या उशनसः सुतया देवयान्येत्यन्वयः ॥ ६ ॥

छलारी — न प्रातिलोमतादोषो, दैववशादिदं पाणिग्रहणं प्राप्तं न तु मानुषवदिति प्रकाशयितुमाख्यां कथयति ॥ एकदेति । गुरुपुत्र्या देवयान्या संयुक्ता व्यचरदिति द्वयोरन्वयः । भामिनी तेजस्विनी ॥ ६ ॥

देवयान्या पुरोद्याने पुष्पितद्रुमसङ्कुले ।
व्यचरत् कलगीतालिनलिनीपुलिनेऽबला ॥ ७ ॥

सत्यधर्मीया — पुष्पितेति तारकादिः । कलगीता अलयो यस्यां सा । नलिनी पद्मिनी तस्याः पुलिनं तस्मिन् ॥ ७ ॥

छलारी — कलगीता अलयो यस्मिंस्तथोक्तम् । तादृशं नलिनीपुलिनं यस्मिंन्पुरोद्याने तत्तथोक्तं तस्मिन् । अबलेति शर्मिष्ठाविशेषणम् ॥ ७ ॥

जलाशयं समासाद्य कन्याः कमललोचनाः ।
तीरे न्यस्य दुकूलानि विजहुः सिञ्चतीर्मिथः ॥ ८ ॥

सत्यधर्मीया — अनन्तरं जलाशयं मिथः सिञ्चतीः सिञ्चन्त्योऽम्भोभिषेकं कुर्वन्त्यो विजह्रुरक्रीडन् ॥ ८ ॥

छलारी — सिंचतीः सिञ्चन्त्यो विजन्हुर्जलक्रीडां चक्रुः ॥ ८ ॥

व्रजन्तं वीक्ष्य गिरिशं सह देव्या वृषे स्थितम् ।
सहसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ॥ ९ ॥

सत्यधर्मीया — देव्योमया सहसा व्रीडिताः स्त्रियो वासांसि पर्यधुर्दध्रुः ॥ ९ ॥

छलारी — देव्या पार्वत्या । पर्यधुः परिधानं चक्रुः । स्त्रियः कन्याः ॥ ९ ॥

शर्मिष्ठाऽजानती वासो गुरुपुत्र्याः समव्ययत् ।
स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् ॥ १० ॥

सत्यधर्मीया — शर्मिष्ठा वृषपर्वसुताऽजानती द्वयोः सारूप्यात् गुरुपुत्र्या वासः समव्ययत् । व्येञ् संवरणे संवीतवती । स्वीयं स्वस्मै हितमिति स्वीयं स्वकीयमिति तात्पर्यार्थ इति ज्ञेयम् । विस्तृतं स्कन्धान्तरविवरणे । मत्वा देवयानी प्रकुपिता सती इदं वक्ष्यमाणमब्रवीत् ॥ १० ॥

अहो निरीक्ष्यतां मह्यं दास्याः कर्म ह्यसाम्प्रतम् ।
अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ॥ ११ ॥

सत्यधर्मीया — मह्यं मम असाम्प्रतमयुक्तम् । शुनी श्वस्त्री अध्वरे हविरिवास्मद्धार्यं वस्त्रं धृतवतीत्यहो निरीक्ष्यतामित्युवाच ॥ ११ ॥

छलारी — मह्यं मम दास्याः शर्मिष्ठाया असांप्रतमन्याय्यम् । हविरिव पुरोडाशमिव ॥ ११ ॥

यैरिदं तपसा सृष्टं मुखं पुंसः परस्य वै ।
धार्यते यैः परञ्ज्योतिः शिवः पन्थाश्च दर्शितः ॥ १२ ॥

सत्यधर्मीया — तस्या दास्यं स्वस्याः स्वाम्यं येन तद्ब्राह्मणमहत्त्वमाह ॥ यैरिति । यैर्ब्राह्मणैरिदं विश्वं तपसा सृष्टं च्यवनादिभिः । यथोक्तं शान्तिपर्वणि । कृतपूर्वाह्निकः प्रायात्सभार्यस्तद्वनं प्रति । ततो ददर्श नृपतिः प्रासादं सर्वकाञ्चनम् । मणिस्तम्भसहस्राढ्यमित्यारभ्य सर्वमन्तरधीयतेत्यन्तेन ।

तद्ब्राह्मणकुलं परस्य पुंसः श्रीहरेर्मुखं तज्जातं तदाश्रितं च । वैशब्दो ब्राह्मणोऽस्य मुखमासीदित्यादिश्रुतिप्रसिद्धिद्योतकः । यैः परञ्ज्योतिर्नारायणो हृदि धार्यते उपासनादिना । यैः शिवः पन्था वेदमार्गो दर्शितः ॥ १२ ॥

छलारी — स्वकुलप्रशंसार्थं ब्राह्मणानां माहात्म्यं कथयति ॥ यैरित्यादिना । इदं विश्वं यैर्ब्राह्मणैस्तपसा सृष्टं ये परस्य पुंसो मुखं मुखादुत्पन्नत्वेन श्रेष्ठा इत्यर्थः । यैरिदं परंज्योतिर्ब्रह्माख्यं धार्यते यैश्च शिवः पन्था वेदमार्गः ॥ १२ ॥

येऽपीदमुपतिष्ठन्ते लोकनाथाः सुरेश्वराः ।
भगवानपि विश्वात्मा पावनः श्रीनिकेतनः ॥ १३ ॥

सत्यधर्मीया — ये लोकनाथाः सुरेश्वरास्तेऽपीदं द्विजकुलमुपतिष्ठन्ते याजनादिके । विश्वात्मा भगवाञ्छ्रीनिकेतनो यानुपतिष्ठते । नमस्ते शिरसाऽसकृदित्यादेः ॥ १३ ॥

छलारी — ये लोकनाथाः सुरेश्वरास्तेऽपीदं ब्राह्मणकुलमुपतिष्ठन्तेऽग्निमुखेन हविरादातुं प्रतीक्षन्ते । विश्वात्मा भगवानपि यत्र संनिहितः ॥ १३ ॥

वयं तत्रापि भृगवः शिष्योऽस्या नः पितासुरः ।
अस्मद्धार्यं धृतवती शूद्रो वेदमिवासती ॥ १४ ॥

सत्यधर्मीया — विप्रमात्रमेवं वयं चैतादृशा इति ततोऽपि स्वान् विशेषयन्ती भाषते ॥ वयमिति । तत्रापि ब्राह्मणकुलेऽपि अस्याः शर्मिष्ठायाः पिता नः शिष्यः । गुरुपुत्रीत्वादेवमवादीदिति ज्ञेयम् । शूद्रो वेदं यथा धृतवांश्चेत् प्रत्यवेति तथेयमसती चास्मद्धार्यं धृतवतीति । अध्ययने जिह्वाच्छेद इत्यादेः ॥ १४ ॥

छलारी — तत्रापि ब्राह्मणेष्वपि भृगवो भृगुकुलोत्पन्नाः । अत एव श्रेष्ठा इति शेषः । अस्याः पिता वृषपर्वा नः शिष्यः । असती दुष्टा ॥ १४ ॥

एवं क्षिपन्तीं शर्मिष्ठा गुरुपुत्रीमभाषत ।
रुषा श्वसन्ती नागीव धर्षिता दष्टदच्छदा ॥ १५ ॥

सत्यधर्मीया — नागी नागवेणीव धर्षिता पराभवं प्राप्ता । गतम् । दष्टदच्छदा सन्दष्टोष्ठा । दष्टौ दच्छदौ यया सा ॥ १५ ॥

छलारी — धर्षिता भर्त्सिता तुच्छीकृतेत्यर्थः । दष्टदच्छदा दष्टोष्ठा ॥ १५ ॥

आत्मवृत्तिमविज्ञाय कत्थसे बहु भिक्षुकि ।
किं न प्रतीक्षसेऽस्माकं गृहान् बलिभुजो यथा ॥ १६ ॥

सत्यधर्मीया — भिक्षुकी आत्मवृत्तिं स्वजीविकामविज्ञायाज्ञात्वा बहु यथा तथा विकत्थसे । तद्भिक्षुकीत्वं स्पष्टयति । यथा बलिभुजः सारमेयास्तथाऽस्माकं गृहान्न प्रतीक्षसे किं । प्रतीक्षस एव ॥१६॥

छलारी — हे भिक्षुकि । आत्मवृत्तिमात्मस्थितिं बहु कत्थसे निष्ठुरवचनं वदसि न प्रतीक्षसे किं बलिभुजः श्वानः काका वा ॥ १६ ॥

एवंविधैः सुपरुषैः क्षिप्त्वाऽऽचार्यसुतां सतीम् ।
शर्मिष्ठा प्राक्षिपत् कूपे वासस्त्वादाय मन्युना ॥ १७ ॥

सत्यधर्मीया — एवंविधैरिति पदमेकम् । एवं विधाः प्रकारा येषु तैः सपरुषैः क्षिप्त्वा तिरस्कृत्य वास आदाय मन्युनाऽऽचार्यसुतां कूपे प्राक्षिपत् । नग्नां मग्नामपि चकारेति भावः ॥ १७ ॥

छलारी — वास आदाय नग्नं कृत्वेत्यर्थः ॥ १७ ॥

तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन् ।
प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह ॥ १८ ॥

सत्यधर्मीया — तस्यां शर्मिष्ठायाम् । कूपे पतितां ताम् ॥ १८ ॥

छलारी — तां देवयानीम् ॥ १८ ॥

दत्वा स्वमुत्तरं वासस्तस्यै राजा विवाससे ।
गृहीत्वा पाणिना पाणिमुज्जहार दयापरः ॥ १९ ॥

सत्यधर्मीया — स्वमुत्तरमुत्तरीयं वासो दत्वा विवाससे दिगम्बरायै पाणिना स्वस्य पाणिम् । तस्य ज्जहार कूपतः । उकोऽनुबन्ध इत्यत आह ॥ दयापर इति ॥ १९ ॥

छलारी — उत्तरमुत्तरीयं पाणिम् । तस्या इति शेषः । उज्जहार । कूपादिति शेषः ॥ १९ ॥

तं वीरमाहौशनसी प्रेमनिर्भरया गिरा ।
राजंस्त्वया गृहीतो मे पाणिः परपुरञ्जय ।
हस्तग्रहोऽपरो मा भूद् गृहीतायास्त्वया हि मे ।। २० ।।

सत्यधर्मीया — औशनसी उशनसोऽपत्यं । प्रेम्णा निर्भरोऽतिशयो यस्यां सा तया गिरा वाचा । हे परपुरञ्जय राजन् । त्वया गृहीतो मे मम पाणिर्हि यतोऽतः अपरस्त्वदितरस्त्वया गृहीतायाः पाणिग्रहः पाणिं गृह्णातीति स तथा मा भून्न भवतु । किं तादृशविशङ्कटसङ्कटवती त्वमित्यतोऽप्याह ।। हिम इति । मरणकारणहिमे सति मामुज्जहार गृहीतश्च मया। ययातेर्नेतरो वरो मम भवेदित्याशयः ।। २० ।।

छलारी — प्रेमनिर्भरया स्नेहपूर्णया । हस्तं गृण्हातीति हस्तग्रहः पाणिग्रहणकर्ताऽपरोऽन्यो न स्यात् । परंपुरजय शत्रुसंहारक ।। २० ।।

एष ईशकृतो वीर सम्बन्धो नौ न पौरुषः ।
यदिदं कूपमग्नाया भवतो दर्शनं मम ।। २१ ।।

सत्यधर्मीया — वर्णावरोऽहं कथं कथय बाले तव वरः स्यामित्यत ऐशी कृतिरनन्यथा भाविनीति भामिनी वदति ।। एष इति । पौरुषः पित्रादिपुरुषालोचितः । दैवी विचित्रा गतिरिति त्वदागतिरत्रेति देवयान्याह ।। यदिदमिति ।। २१ ।।

छलारी — निषिद्धोऽयं प्रातिलोमसम्बन्ध इति चेत्तत्राह ।। एष इति । कूपमग्नाया मम भवतो यदिदं दर्शनमेषः सम्बन्ध ईशकृतः श्रीनारायणविहितः । न पौरुषः पुरुषयत्नसाध्यो न भवति ।।२१।।

न ब्राह्मणो मे भविता हस्तग्राहो महाभुज ।
कचस्य बार्हस्पत्यस्य शापाद् यमशपं पुरा ।। २२ ।।

सत्यधर्मीया — भूपं प्रति 'करग्रहो भवेत्क्षत्रिय एवेति' कचशापोऽस्त्यत उचित इति याचित इत्याह ।। न ब्राह्मण इति । बार्हस्पत्यस्य बृहस्पतेः पुत्रस्य शापात् । सोऽपि नानयेन मां शशापेत्याह ।। यमशपं पुरेति । मृतसञ्जीवनी विद्या न कविं मत्पितरं विहायान्यत्रास्तीति कचो विचोदितः । स्वपित्रोपायतो विद्यां च द्विषत्सु तस्यापि ख्यात्यै उपदिदेश । स चाधिगतविद्यो गन्तुमुद्यतो यदा तदाऽहं चैकत्र सहवासतस्तस्य गुणलुब्धा ममतया मम भवतु भवान् धव इत्यवदम् । हे भगिनि! मैवं

ब्रूया इत्यूचे सुचेताः । ततोऽहं प्रतिहतकामा कामार्ताऽतिरुषाऽनवद्यापि विद्याऽफलिष्यतीत्यशपम् । सोऽपि नेतःपरं सजातीयः पतिः स्यात्तवेत्यशपदित्याख्यायिकाऽनेन सङ्गृहीता । यथोक्तमादिपर्वणि ।

जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम् ।
पौरोहित्याय राज्यार्थे काव्यं तूशनसं परे ।
ब्राह्मणौ तावुभौ नित्यमन्योन्यस्पर्धिनौ भृशम् ।
न हि वेद स तां विद्यां यां काव्यो वेद वीर्यवान् ।
सञ्जीवनीं ततो देवा विषादमगमन्परम् ।
ततो देवा भयोद्विग्नाः काव्यादुशनसस्तदा ।
ऊचुः कचमुपागम्य ज्येष्ठं पुत्रं बृहस्पतेः ।
भजमानान्भजस्वास्मान् कुरु साहाय्यमुत्तमम् ।
या सा विद्या निवसति ब्राह्मणेऽमिततेजसि ।
शुक्रे तामाहरत्क्षिप्रं भागमाङ्नो भविष्यसि ।
वृषपर्वसमीपे स द्रष्टुं शक्यस्त्वया द्विज ।
रक्षते दानवांस्तत्र न स रक्षत्यदानवान् ।
तमाराधयितुं शक्तो भवान् पूर्ववयाः कविम् ।
देवयानीं च दयितां सुतां तस्य महात्मनः ।
त्वामाराधयितुं शक्तो नान्यः कश्चन विद्यते ।
शीलमाधुर्यदाक्षिण्यैराचारेण दमेन च ।
देवयान्यां हि तुष्टायां विद्यां तां प्राप्स्यसि ध्रुवम् ।
तथेत्युक्त्वा ततः प्रायाद्बृहस्पतिसुतः कचः ।
असुरेन्द्रपुरे शुक्रं दृष्ट्वोवाच प्रणम्य च ।
ऋषेरङ्गिरसः पौत्रं पुत्रं साक्षाद्बृहस्पतेः ।
नाम्ना कच इति ख्यातं शिष्यं गृह्णातु मां भवान् ।
ब्रह्मचर्यं चरिष्यामि त्वय्यहं परमं गुरो ।
अनुमन्यस्व मां ब्रह्मन् सहस्रं परिवत्सरान् ।

शुक्रः उवाच–

कच सुस्वागतं तेऽस्तु प्रतिगृह्णामि ते वचः ।
अर्चयिष्येऽहमर्च्यं त्वामर्चितोऽस्तु बृहस्पतिः ॥

वैशम्पायन उवाच -

कचस्तु तत्तथेत्युक्त्वा प्रतिजग्राह तद्व्रतम् ।
आराधयन्नुपाध्यायं देवयानीं च भारत ।
गायन्नृत्यन् वादयंश्च देवयानीमतोषयत् ।
पञ्चवर्षशतान्येवं कचस्य चरतो व्रतम् ।
तत्रातीयुरथो बुद्ध्वा दानवास्तं ततः कचम् ।
गा रक्षन्तं वने दृष्ट्वा रहस्येकममर्षिताः ।
जघ्नुर्बृहस्पतेर्द्वेषाद्विद्यारक्षार्थमेव च ।
हत्वा शालावृकेभ्यश्च प्रायच्छंल्लवशः कृतम् ।
ततो गावो निवृत्तास्ता अगोपाः स्वं निकेतनम् ।
तां दृष्ट्वा रक्षती गास्तु कचो नाभ्यागतो वनात् ।
उवाच वचनं काले देवयान्यथ भारत ॥

देवयान्युवाच –

आहुतं चाग्निहोत्रं ते सूर्यश्चास्तंगतः प्रभो ।
अगोपाश्चागता गावः कचस्तात न दृश्यते ।
व्यक्तं हतो मृतो वाऽपि कचस्तात भविष्यति ।
तं विना न च जीवेयमिति सत्यं ब्रवीमि ते ॥

शुक्र उवाच–

अयमेहीति शब्दाच्च मृतं सञ्जीवयाम्यहम् ।
ततः सञ्जीवनीं विद्यां प्रयुज्य कचमाह्वयत् ।
भित्वा भित्वा शरीराणि वृकाणां स विनिर्गतः ।
आहूतः प्रादुरभवत्कचो हृष्टोऽथ विद्यया ।
कस्माच्चिरायितोऽसीति पृष्टस्तामाह भार्गवीम् ।
हतोऽहमिति चाचख्यौ पृष्टो ब्राह्मणकन्यया ।
समिधश्च कुशादीनि काष्ठभारं च भामिनि ।
गृहीत्वाऽऽश्रममारात्तं वटवृक्षं समाश्रितः ।
गावश्च सहिताः सर्वा वृक्षच्छायामुपाश्रिताः ।
असुरास्तत्र मां दृष्ट्वा कस्त्वमित्यभ्यचोदयन् ।

बृहस्पतिसुतश्चाहं कच इत्यभिविश्रुतः ।
इत्युक्तमात्रे मां हत्वा पेषीकृत्य तु दानवाः ।
दत्वा शालावृकेभ्यस्तु सुखं जग्मुः स्वमालयम् ।
आहूतो विद्यया भद्रे भार्गवेण महात्मना ।
त्वत्समीपमिहायातः कथञ्चित्समजीवितः ।
स पुनर्देवयान्योक्तः पुष्पाहारो यदृच्छया ।
वनं ययौ कचो विप्रो ददृशुर्दानवाश्च तम् ।
पुनः सम्पेषयित्वा तं समुद्राम्भस्यमिश्रयन् ।
चिरं गतं पुनः कन्या पित्रे तं सन्न्यवेदयत् ।
विप्रेण पुनराहूतो विद्यया गुरुदेहजः ।
पुनरावृत्य तद्वृत्तं न्यवेदयत तद्यथा ।
देवयानी पुनश्चाह कदाचिद्वन्यमाहर ।
उक्तोऽगच्छद्वनं तत्र दानवा ददृशुः पुनः ।
ततस्तृतीयं तं हत्वा दग्ध्वा कृत्वा च चूर्णशः ।
प्रायच्छन्ब्राह्मणायैव सुरायामसुरास्तथा ।
देवयान्यथ भूयोऽपि पितरं वाक्यमब्रवीत् ।
पुष्पाहारप्रेषणकृत्कचस्तात न दृश्यते ॥

शुक्र उवाच-

बृहस्पतेः सुतः पुत्रि कचः प्रेतगतिं गतः ।
विद्यया जीवितोऽप्येवं हन्यते करवाणि किम् ।
मैवं शुचो मा रुद देवयानि न त्वादृशी मर्त्यमनुप्रशोचेत् ।
यस्यास्तव ब्रह्म च ब्राह्मणाश्च देवाः सेन्द्रा वसवोऽथाश्विनौ च ॥
सुरद्विषश्चैव जगच्च सर्वमुपस्थाने सन्नमति प्रभावात् ।
अशक्योऽसौ जीवयितुं द्विजातिः सञ्जीवितो वध्यते चैव भूयः ॥

देवयान्युवाच ॥

यस्याङ्गिरा वृद्धतमः पितामहो बृहस्पतिश्चापि पिता तपोनिधिः ।
ऋषेः पुत्रं तमथो वाऽपि पौत्रं कथं न शोचेयमहं न रुन्ध्याम् ।

स ब्रह्मचारी च तपोधनश्च सदोत्थितः कर्मसु चैव दक्षः ।
कचस्य मार्गं प्रतिपत्स्ये न भोक्ष्ये प्रियो हि मे तात कचोऽनुरूपः ।
आकारयामास तदा देवयान्याः कृते विभुः ।
गुरोर्भीतो विद्यया चोपहूतः शनैर्वाक्यं जठरे व्याजहार ।
प्रसीद भगवन्मह्यं कचोऽहमभिवादये ।
यथा बहुमतः पुत्रस्तद्वत्कुर्यात्तु मां भवान् ।
तमब्रवीत्केन इहोपनीतो ममोदरे तिष्ठसि ब्रूहि वत्स ।
असुरैः सुरायां भवतोऽस्मि दत्तो हत्वा दग्ध्वा चूर्णयित्वा च काव्य ।
किं ते प्रियं ते करवाणि वत्से वधेन मे जीवितं स्यात्कचस्य ।
नान्यत्र कुक्षेर्मम भेदनेन दृश्येत्कचो निहतो देवयानि ॥

देवयान्युवाच–

द्वौ मां शोकाविग्नकल्पौ दहेतां कचस्य नाशस्तव चोपघातः ।
कचनाशे मम शर्म नास्ति तवोपघाते जीवितुं नास्ति शक्तिः ॥

शुक्र उवाच–

संसिद्धिरूपोऽसि बृहस्पतेः सुत यं त्वां भक्तं भजते देवयानी ।
विद्यामिमां प्राप्नुहि जीवनीं त्वं न चेदिन्द्रात्कचरूपी त्वमेव ।
न निवर्तेत्पुनर्जीवन् कश्चिदन्यो ममोदरात् ।
ब्राह्मणं वर्जयित्वैकं तस्माद्विद्यामवाप्नुहि ।
गुरोः सकाशात्समवाप्य विद्यां भित्वा कुक्षिं निर्विचक्राम विप्रः ।
दृष्ट्वा च तं पतितं ब्रह्मराशिमुत्थापयामास मृतं कचोऽपि ।
विद्यामित्यारभ्य ऋषेरङ्गिरसः पुत्र भर्ता भवितुमर्हसि ।
अनवद्याङ्गि पूजनीयतरा मम ।
गुरुपुत्रस्य पुत्रो वै, यत्रोषितं विशालाक्षि त्वया चन्द्रनिभानने ।
तत्राहमुषितो भद्रे कुक्षौ तस्य महात्मनः ।
भगिनी प्रत्याख्यास्यसि चोदितः ।
ततः कच न विद्या ते सिद्धिमेषा गमिष्यति ॥

कच उवाच–

ऋषिपुत्रो न ते कश्चिज्जातु पाणिं ग्रहीष्यति ।
फलिष्यति न ते विद्या यन्मामुक्तवती ह्यसि ।

अध्यापयिष्यामि च यत्तस्य विद्या फलिष्यतीत्यन्तेन । मात्स्येऽपि सुरापानाद्धश्वनीयं प्रायणीय इत्याद्युक्तेः । तदैव शुक्रशापः सुरापविषये तत्रैवोक्तः । यो ब्राह्मणोऽद्यप्रभृतीह कश्चिन्मोहात्सुरां पास्यति मन्दबुद्धिः । तपोपहा ब्रह्महा चैव स स्यादस्मिंल्लोके गर्हितः स्यात्परे चेत्यादिना । मघवा तदा,

तथेत्युक्त्वाऽथ चक्राम सोऽपश्यत वने स्त्रियः ।
क्रीडन्तीनां च कन्यानां वने चैत्ररथोपमे ।
वायुर्भूत्वा सवस्त्राणि सर्वाण्येवाभ्यमिश्रयत् ।
ततो जलात्समुत्तीर्य कन्यास्ताः सहितास्तदा ।
वस्त्राणि जगृहुस्तानि यथासन्नान्यनेकशः ।

ततो वासो देवयान्याः शर्मिष्ठा जगृहे तदा । व्यतिमिश्रमजानन्ती दुहिता वृषपर्वण इत्युक्तेः । मिश्रीकरणेन परस्य व्यत्यासे च शुक्रकोपो भवतीति शक्रभाव इति भावः ॥ २२ ॥

छलारी — ब्राह्मणपुत्र्यास्तव ब्राह्मण एव भर्ता न तु क्षत्रियो युक्तः । प्रतिलोमाप्रवेशादित्याशङ्कां परिहरति ॥ न ब्राह्मण इति । बृहस्पतेः सुतः कचः शुक्रान्मृतसंजीवनीविद्यामध्यगीष्ट । तदा च देवयानी तं पतिं चकमे । सः कचो गुरुपुत्रिणा, मम पूज्येति न तामुदवहत् । ततश्च सा कुपिता सती तवेयं विद्या न फलत्विति शशाप । तदनन्तरं कचस्तव ब्राह्मणः पतिर्न भवत्वित्यशपदितीयमाख्यायिकाऽनेनोच्यते । अहं पुरा पूर्वं यं कचं प्रत्यशपं शप्तवती बार्हस्पत्यस्य बृहस्पतेरपत्यस्य तस्य कचस्य शापान्मे ब्राह्मणो हस्तग्राहो न भवतीत्यतस्त्वमेव मम पाणिग्रहणं कुरु ॥ २२ ॥

ययातिरनभिप्रेतं दैवोपहृतमात्मनः ।
मनस्तु तद्गतं बुध्द्वा प्रतिजग्राह तद्वचः ॥ २३ ॥

सत्यधर्मीया — प्रार्थितो ययातिस्तां किं नेत्युत पतिः स्यामित्युक्तवानित्यतोऽङ्गीचकारेतीरयति ॥ ययातिरिति । अनभिप्रेतं प्रातिलोम्यादैवोपहृतं क्व सा मृगशावाक्षी क्व वा मृगया काहं दैवमेवैतद्धटकमिति दैवोपहृतम् । किञ्चात्मनः स्वस्य मनश्च तद्गतं देवयानीनिविष्टं बुद्ध्वा । तद्वचः तस्या वचः प्रतिजग्राह । यया भावी तिरानन्द इति तद्वचो जग्राहेति वा ॥ २३ ॥

छलारी — अनेन ययातिः किं कृतवानिति तत्राह ॥ ययातिरिति । अशास्त्रीयत्वादनभिप्रेतमपि दैवेनोपहृतं प्रापितं बुद्ध्वा न ह्यधर्मे मदीयं मनो गच्छेन्मम मनश्च तस्यां गतमतो न मे दोष इति बुद्ध्वा तस्या वचः प्रतिजग्राह तां भार्यात्वेनाङ्गीचकार । प्रायः सतां न मनः पापमार्गे गच्छेदिति ह्यात्मनश्च सत्यमित्युक्तेः सतां मनः पापमार्गं न गच्छेदिति द्रष्टव्यम् ॥ २३ ॥

गते राजनि सा वीरे तत्र स्म रुदती पितुः ।
न्यवेदयत् ततः सर्वमुक्तं शर्मिष्ठया कृतम् ।। २४ ।।

सत्यधर्मीया — राजनि ययातौ गते याते सत्युक्तं परुषभाषणं कृतं कूपप्रक्षेपादिकं च न्यवेदयत् । यदि मद्वचनादेव मां नेच्छसि नराधिप । त्वामेव वरये पित्रोः पश्चाज्ज्ञास्यसि गच्छ वै इत्यादिपूर्वोक्तिरप्युभयोर्ग्रहगमनात् मानसिकानभिप्रेतत्वाभिप्रायेण ययातेः पितुरनुमत्याऽपि पतिर्भवेदेवेति देवयानी भावेन लग्नेति ज्ञेयम् । अतो नैतद्वैसंवाद्यम् । घूर्णिकामुखत आवेदयित्वा गत्वा स्वयं च न्यवेदयत् । यथोक्तं तत्रैव । त्वरितं घूर्णिके गच्छेत्यारभ्याध्यायावसानं तदुक्तिशुक्रोक्तिपूर्वकम् । मात्स्ये च । त्वरितं घूर्णिके गच्छ सर्वमाचक्ष्व मे पितुरित्यारभ्याध्यायावसित्ययमर्थ उक्तो विस्तरतोऽवसेयः ।। २४ ।।

छलारी — स्ववृत्तान्तं श्रुत्वा तत्रागतस्य पितुः पुरतो रुदती सती भिक्षुकीत्याद्युक्तं कृतं कूपप्रक्षेपादि सर्वं न्यवेदयत् ।। २४ ।।

दुर्मना भगवान् काव्यः पौरोहित्यं विगर्हयन् ।
स्तुवन् वृत्तिं च कापोतीं दुहित्रा स ययौ पुरात् ।। २५ ।।

सत्यधर्मीया — दुर्मनाः पौरोहित्यं विगर्हयन् । अनेनैव भिक्षुक्यभवन्मम दुहितेति निन्दन् कापोतीमुञ्छःकणश आदानमित्युक्तोञ्छवृत्तिं । कपोताः पाषाणभक्षकास्तद्वृत्तिं । स्तुवन् दृषत्कण्टकादिभिरुदरपूरणं वरमिति गृणन् । यदैवमवादीत्काव्यस्तत्प्रभृति दुर्भृतिजीवनापेक्षया दृषदादिपूरणेन जीवनं कर्तुं शक्यमित्याभाणकं प्रावर्ततेति ज्ञेयमिति वा । दुहित्रा सह पुराद्ययौ । ननु भारतोक्तेः ततः काव्यो भृगुश्रेष्ठः समन्युरुपगम्य ह । वृषपर्वाणमासीनमित्युवाचाविचारयन्नित्यत्र च पुराद्गमनोक्तेर्विरोध इति चेत् । देवयानीसान्त्वनार्थं तया यातस्तां बहिः प्रस्थाप्यागत्य वृषपर्वाणमनुशास्य तेन सह पुनर्बहिर्गत्वा शान्तां पुरमानिनायेति भावविभावनेनाविरोधोपपत्तेः । यथोक्तं पुनस्तत्रैव । प्रविशामि पुरं तात तुष्टाऽस्मि द्विजसत्तमेति ।। २५ ।।

छलारी — काव्यः शुक्रः कापोतीमुंच्छवृत्तिम् ।। २५ ।।

वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितम् ।
गुरुं प्रसादयन् मूर्ध्ना पादयोः पतितः पथि ।। २६ ।।

सत्यधर्मीया — प्रत्यनीकानां नाकौकसां विवक्षितमेव विवक्षितं यस्य सः । प्रत्यनीका विवक्षिता रक्षितव्या इति येन स वा तम् । गुरुं मूर्ध्ना प्रसादयन् परुषं रुषोक्त्वा गच्छतः पादयोः पथि पतितः ।। २६ ।।

छलारी — तं गुरुं प्रत्यनीका देवास्ते विवक्षिता जयं प्रापणीया इत्यभिप्रेतं यस्य तथाभूतं ज्ञात्वा ॥ २६ ॥

क्षणार्धमन्युर्भगवाञ्छिष्यं व्याचष्ट भार्गवः ।
कामोऽस्याः क्रियतां राजन् नैनां त्यक्तुमिहोत्सहे ॥ २७ ॥

सत्यधर्मीया — अस्या देवयान्याः ॥ २७ ॥

छलारी — शिष्यमुत्थाप्येति शेषः । अस्या देवयान्याः कामोऽपेक्षाविशेषः । एनां देवयानीम् । ॥ २७ ॥

तथेत्यवस्थिते प्राह देवयानी मनोगतम् ।
पित्रा दत्ता यतो यास्ये सानुगा यातु मामनु ॥ २८ ॥

सत्यधर्मीया — अवस्थिते कर्तुमोङ्कृतवती देवयानी स्वमनोगतं प्राह । पित्राऽहं दत्ता यतो यत्र यास्ये तत्र सानुगा सस्वदासीजनो मामनुयातु । अहं सानुगा पर्वतशिखरगा चेदपि मामनुयातु तनया तवेत्यप्यर्थो ज्ञेयः ॥ २८ ॥

छलारी — यदभीष्टं तत्तथा करिष्य इत्युक्त्वा वृषपर्वण्यवस्थिते सति वृषपर्वणा तव किं कर्तव्यमिति पृष्टा देवयानी मनोगतं स्वमनसि स्थितं कार्यं प्राह । अहं पित्रा कस्मैचिद्वराय दत्ता सती यतो यत्र यास्ये तत्रानुयातु ॥ २८ ॥

स्वानां तत् सङ्कटं वीक्ष्य तदर्थस्य च गौरवम् ।
देवयानीं पर्यचरत् स्त्रीसहस्रेण दासिवत् ॥ २९ ॥

सत्यधर्मीया — शर्मिष्ठा नर्मैव मर्मस्पृग्जातमिति स्वकसङ्कटं वीक्ष्यानुमेने हीनवृत्तिमित्याह ॥ स्वानां पित्रादीनामिति । सङ्कटं वीक्ष्य गुरुप्रसादे सम्पादिते तदर्थस्य तदनुगरूपप्रयोजनस्य गौरवं भावि च वीक्ष्य स्त्रीसहस्रेण स्त्रियश्च सहस्रसङ्ख्याकास्ताभिः सहितं यत्सहस्रमाहत्य सहस्रद्वयेन । यथोक्तमादिपर्वणि । द्वाभ्यां कन्यासहस्राभ्यां द्वे कन्ये परिवारिते । द्विसहस्रेण कन्यानां तथा शर्मिष्ठया सहेति । दासिवद्दासीवत्पर्यचरत् । देवयान्युवाच ।

याचतो भिक्षुकस्याहं स्तुवतः प्रतिगृह्णतः ।
स्तूयमानस्य दुहिता कथं दासी भविष्यसि ।

शर्मिष्ठोवाच ।

येन केनचिदार्तानां ज्ञातीनां सुखमावहे ।
अतस्त्वामनुयास्यामि यत्र दास्यति ते पितेति तत्रैवोक्तेः।

पर्यचरत्सिषेवे ॥ २९ ॥

छलारी — शर्मिष्ठा तत्सर्वं श्रुत्वा यद्यहं नानुगमिष्यामि तदा गुरुद्रोहान्मत्कुलं सर्वं नष्टं भविष्यतीति यत्स्वानां संकटं वीक्ष्य तदर्थस्य तदनुगमनप्रयोजनलक्षणस्य गौरवं गुरुप्रसादेन स्वकुलाभिवृद्धिलक्षणमस्तीति मनसा निश्चित्य स्त्रीसहस्रेण परिवृता तत्तथा करिष्यामीति पितरमुक्त्वा देवयानीं दासीव पर्यचरत् ॥ २९ ॥

नाहुषाय सुतां दत्वा सह शर्मिष्ठयोशनाः ।
तमाह राजञ्छर्मिष्ठां मा धास्तल्पे तु कर्हिचित् ॥ ३० ॥

सत्यधर्मीया — सह शर्मिष्ठया उशना शुक्रो नाहुषाय ययातये । राजन् ययाते । शर्मिष्ठां कर्हिचिदपि तल्पे शयनीये मा धाः मा धत्स्व । तल्पे भावप्राधान्येन भार्यात्वे मा धाः मा कार्षीः । तल्पं तु शयनीये स्यात्तल्पमट्टकलत्रयोरिति विश्वः । तल्पेऽन्नमात्रे तद्योग्यां माहेति वा । सम्पूज्या सततं राजन्मा चैनां शयनेऽऽह्वयेरिति तत्राप्युक्तेः । न भार्यां कुर्या इत्यर्थः ॥ ३० ॥

छलारी — उशनाः शुक्रो नाहुषाय नहुषपुत्राय ययातये शर्मिष्ठया सह सुतां देवयानीं दत्वा शर्मिष्ठां तल्पे मा धास्तां नोपगच्छेरित्यर्थः ॥ ३० ॥

विलोक्यौशनसीं राज्ञीं शर्मिष्ठा सुप्रजां क्वचित् ।
तमेव वव्रे रहसि सख्याः पतिमृतौ सति ॥ ३१ ॥

सत्यधर्मीया — औशनसीं राज्ञीं नृपपत्नीं सुप्रजां शोभनापत्यवतीं गतम् । सख्याः पतिं तमेव ययातिमेव ऋतौ तत्काले सति शर्मिष्ठा वव्रे ॥ ३१ ॥

छलारी — औशनसीं देवयानीं तमेव ययातिमेव सख्या देवयान्याः पतिं तस्य तत्पतित्वे तस्या दासीतुल्यत्वमुक्तं ऋतौ ऋतुकाले ॥ ३१ ॥

राजपुत्र्याऽर्थितोऽपत्ये धर्मं चावेक्ष्य धर्मवित् ।
स्मरञ्छुक्रवचः काले दिष्टमेवाभ्यपद्यत ॥ ३२ ॥

सत्यधर्मीया — राजपुत्र्याऽर्थितो धर्मविद्धर्मज्ञो धर्मं याचितमुचितं देयं मयेति स्वस्मरणादागच्छन्तम् । यथोक्तम् ।

सा त्वां प्रासाद्य याचे त्वामृतुं देहि नराधिप ।

ययातिः ।

वेद त्वां शीलसम्पन्नां दैत्यकन्यामनिन्दिताम् ।
रूपं च ते न पश्यामि सूच्यग्रमपि निन्दितम् ।
किञ्चाब्रवीन्मामुशना देवयानीं यदावहम् ।
नेयमाव्हयितव्या ते शयने वार्षपर्वणी ।

शर्मिष्ठा ।

न नर्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन्न विवाहकाले ।
प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि ।
पृष्टन्तु साक्ष्ये प्रवदन्तमन्यथा वदन्ति मिथ्या पतितं नरेन्द्र ।
एकार्थितायां तु समर्थितायां मिथ्या वदन्तं त्वनृतं निहन्ति ।

ययातिः ।

राजा प्रमाणं भूतानां स नश्येत मृषा वदन् ।
अर्थकृच्छ्रमपि प्राप्य न मिथ्या वक्तुमुत्सहे ।

शर्मिष्ठा ।

समावेतौ मतौ राजन्पतिः सख्याश्रयः पतिः ।
समं विवाहमित्याहुः सख्यामसि वृतः पतिः ।
दातव्यं याचमानेभ्य इति मे व्रतमाहितम् ।
त्वं च मां याचसे कामं ब्रूहि किं करवाणि ते ।

इत्यादि । इति व्रतमितीरयन् पराशर्यो न काञ्चन परिहरेद्व्रतमिति श्रुतिपातनिकार्थस्य नावसरं व्यतारीदिति मतैतदभिमत आचार्यवर्यश्छान्दोग्योपनिषद्भाष्ये, अत्यागाच्च स्वभार्याणां मुच्यते नात्र संशय इति च सामसंहितायामिति व्याख्यातवान् । एकस्य बव्ह्यो जाया भवन्तीत्यादेर्बहुषु योषित्सु पाणिगृहीतीषु न काञ्चन परिहरेदिति तदर्थः । इतरस्तु परस्त्रीपारवश्येन कृतव्याख्यानमित्युपेक्ष्यमिति श्रीवेदेशतीर्थश्रीपादैरुक्तत्वात्तथा भार्याद्वये परित्यागादेकस्यादुष्टचेतसेति माधवस्तवराजोक्तेश्च स्वीकार्यो न स्वीकार्यश्चेति ज्ञेयम् । शुक्रवचो मा धास्तल्पे तु कर्हिचिदिति वचः स्मरन् स्मरशरार्दितां च तां

स्मरन् स्मरंश्च स्वप्रतिज्ञां च ययातिभागधेयमेवाभ्यपद्यत । बलीयसी दैवमेवेत्यबलालापं लालयामास भूप इति भावः ॥ ३२ ॥

छलारी — अपत्ये तादर्थ्ये सप्तमी । अपत्यार्थं धर्मं च न काञ्चन स्वयं परिहरेत्तद्व्रतमिति श्रुतेः । स्वयमागतां परिहर्तुमशक्यं चेति धर्ममवेक्ष्य शुक्रवचः स्मरन्नपि दिष्टमेव दैवमेवात्र कारणमिति निश्चित्य । काले ऋतुकालेऽभ्यपद्यत । तामिति शेषः ॥ ३२ ॥

यदुं च तुर्वसुं चैव देवयानी व्यजायत ।
द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ ३३ ॥

सत्यधर्मीया — व्यजायत जनयामास । नन्वादिपर्वणि कुमारमित्युक्तिरत्र तु तत्रित्वोक्तिश्च कथमिति चेत् । तत्रैवोत्तरत्र नेत्रं निधेहि । त्रयोऽस्यां जनिताः पुत्रा राज्ञाऽनेन ययातिना । दुर्भगा मम द्वौ पुत्रावित्यत्र तु वोत्तरं भविष्यति । अहो मम मोहो जातः । हन्त तर्हि तत्रैव परस्परं विरोधो दुश्शमनः सम्पन्न इति चेत् । त्रयाणामपि यमलतां बोधयितुं पितूरेतःपातस्यैककालिकत्वादेक-वचनमिति न्यक्कृतस्तव चमत्कार इति प्रशमं व्रज । अथवा राज्ञ आज्ञाकारी महानेक इति तथोक्तिरितरावकिञ्चित्करावित्यनुक्तिः । यद्वक्ष्यति । अकर्तोचरितं पितुरिति । वस्तुतस्तु त्रय इत्यविरोधः । एतत्पक्षे भारते मात्स्यादौ चानुक्तं पुनः पुनर्वार्षपर्वणीरमणं स्वीकार्यम् । शुक्रः ।

धर्मज्ञः सन्महाराज यो धर्ममकृथाः प्रियम् ।
तस्माज्जरा त्वामचिराद्धर्षयिष्यति दुर्जय ।

ननु न काञ्चनेत्यादिश्रुत्यर्थो न भारतवचनवैरूप्यादिति । तथा हि । ययातिः ।

ऋतुं वै याचमानाया भगवन्नान्यचेतसा ।
दुहितुर्दानवेन्द्रस्य धर्म्यमेतत्कृतं मया ।
ऋतुं यो याचमानाया न ददाति पुमान्धृतः ।
भ्रूणहेत्युच्यते ब्रह्मन्स इह ब्रह्मवादिभिः ।
अभिकामांस्त्रियश्च गम्यां रहसि याचितः ।

नोपैति सहधर्मेण भ्रूणहेत्युच्यते बुधैरितीति चेत् । चेतश्चेतः परं वा प्रवेशय पद्येषु । नान्यचेतसा गम्यामिति । धर्मेणेति सा चानन्यपाणिगृहीतीति । नेतरनरकामुकी न स्वैरिणी गम्या कुलादिमतीत्ये-तैर्विशेषणैस्तां विशेषाशेषवित् । अन्यथा राज्यभाक्तं तदपत्यानां न स्यादित्युक्त एवार्थः । तथा पूर्वं

वयः परित्यज्य जरासन्धोऽन्वपद्यतेत्युक्तेरव्यवहृतिः व्यवहृतिर्लडर्थतयाऽस्माभिर्वर्णिता युक्तेति मन्तव्यम् ।। ३३ ।।

छलारी — व्यजायताजीजनत् ।। ३३ ।।

गर्भसम्भवमासुर्या भर्तुर्विज्ञाय भामिनी ।
देवयानी पितुर्गेहं ययौ क्रोधविमूर्च्छिता ।। ३४ ।।

सत्यधर्मीया — आसुर्या असुरताया भर्तुर्ययातेर्विज्ञाय क्रमात् । यथोक्तमादिपर्वणि । देवयान्युवाच ।

किमिदं वृजिनं सुभ्रूः कृतं वै कामलुब्धया । शर्मिष्ठा उवाच । ऋषिरभ्यागतः कश्चित् । देवयानी उवाच । शोभनं भीरु यद्येवं कथं स ज्ञायते द्विजः । गोत्रनामाभिजनतो वेत्तुमिच्छामि तं द्विजम् । शर्मिष्ठा उवाच । ओजसा तेजसा चैव दीप्यमानो यथा रविः । तं दृष्ट्वा मम न प्रष्टुं शक्तिरासीच्छुचिस्मिते । देवयानी उवाच । यद्येवं तर्हि शर्मिष्ठे न मन्युर्विद्यते ममेति । पितुः शुक्रस्य मध्येऽध्वराजप्रार्थनादिकमलक्षयित्वेति ज्ञेयम् । यथोक्तम् । तत्र व्यथितस्तदा । अनुवव्राज सम्भ्रान्तः पृष्टतः सान्त्वयन्नृपः । न्यवर्तत न चैवाथ क्रोधसंरक्तलोचनेत्यादि ।। ३४ ।।

छलारी — आसुर्याः शर्मिष्ठाया भर्तुः सकाशाद्गर्भसंभवं गर्भोत्पत्तिम् ।। ३४ ।।

प्रियामनुगतः कामी वचोभिरभिमन्त्रयन् ।
न प्रसादयितुं शेके पादसंवाहनादिभिः ।। ३५ ।।

सत्यधर्मीया — अभिमन्त्रयन् गुप्तजपनमपनयनार्थं रुषः कुर्वन् ।। ३५ ।।

छलारी — अभिगतोऽभिमुखं गतः । वचोभिः सांत्ववचनैरुपमन्त्रयन्प्रसादयन् संवाहनं स्पर्शः ।। ३५ ।।

शुक्रस्तमाह कुपितः स्त्रीकामानृतपूरुष ।
त्वां जरा विशते मन्द विरूपकरणी नृणाम् ।। ३६ ।।

सत्यधर्मीया — तं स्वोपचारमुपचरन्तं, ययातिश्च पूजयामास भार्गवमिति तत्रोक्तेः । स्त्रीकाम अनृतपुरुष मिथ्याभाषिपुरुष । येन तारुण्येन मत्तो वार्षपार्वणीसङ्गममकार्षीस्तदेव गमयामीति कोपपरवशो बभाष इति भाषते ।। त्वां जरेति । नृणां विरूपत्वसम्पादका जरा त्वां विशते

इत्युक्तेस्तत्सक्तेश्चाव्यवधानं सूचयति । लटेवं त्वं विशेत्यशंसनेन च जरा स्वातन्त्र्येण विनियमनं मनसि वर्तत इति ध्वनयामासेति ज्ञेयम् ।आत्मनेपदेन व्यत्यसनयोग्यतां ध्वनयति । जरां विशते तुभ्यं विरूपकरणी विलक्षणरूपान्तरप्रापिका चेति तदान्तरङ्गिको भावश्च व्यत्ययेन ध्वनित इति वा ।।३६।।

छलारी — विकृतं रूपं करोतीति तथा ।। ३६ ।।

ययातिरुवाच —

अतृप्तोऽस्म्यद्य कामानां ब्रह्मन् दुहितरि स्म ते ।
व्यत्यस्यैतां यथाकामं वयसा यो हि दास्यति ।। ३७ ।।

सत्यधर्मीया — हे ब्रह्मन् शुक्र । कामानां कामैर्विषयभोगैरतृप्तोऽनलम्बुद्धिरस्मि । भवतु भवांस्तथा । मम किं कथयसि । त्वं कोऽहं क इति न किलेत्यालपति । ते तव दुहितरि पुत्र्यां देवयान्यामिति । कामसंबन्धितृप्तिशून्य इति वा । दुहितरीत्यनेन तृप्तेरुभयसंबन्धित्वेन तदतृप्तिमपि सूचयति स्म । निन्दितामेतां जरामित्यन्वयो वा । अकालालाभान्निन्दितता । यो तनयो वयस्तरुणतां दास्यति तस्मा एतां व्यत्यस्य विनिमयेन दत्वा यथाकाममिच्छानुसृति वयसा तदीयेन वर्त इति ।।३७।।

छलारी — कामानां भोगैरिति शेषः । अत एव ममानुग्रहः कर्तव्य इत्याह ।। व्यत्यस्येति । यो मह्यं स्वयं यस्तारुण्यमभिधास्यति तस्मिन्नेतां जरां व्यत्यस्य संक्रमय्य तद्वयसा यथाकामं भुञ्जे । इति प्रार्थयामासेति शेषः । तर्हि तथाऽस्त्विति लब्धव्यवस्थितिरभूदिति ज्ञेयम् ।। ३७ ।।

श्रीशुक उवाच —

इति लब्धव्यवस्थानः पुत्रं ज्येष्ठमवोचत ।
यदो तात प्रतीच्छेमां जरां देहि निजं वयः ।। ३८ ।।

सत्यधर्मीया — एवमर्थितः कविरोश्चकारेत्यर्थमितिना सूचयति । यथोक्तम् ।

नाहं मिथ्या ब्रवीम्येतज्जरां प्राप्नोषि भूमिप । जरामेनां त्वमन्यस्मै सङ्क्रामय यदीच्छसीति । भारते आदिपर्वणि । इत्यनुग्रहमनसोशनसा लब्धं व्यवस्थानं येन स तथा । ज्येष्ठं पुत्रमिदमुवाच । प्रतीच्छ गृहाण ।। ३८ ।।

छलारी — इति लब्धव्यवस्थानो जराया व्यवस्थितिर्येन सः । प्रतीच्छ गृहाण ।। ३८ ।।

मातामहकृतां वत्स न तृप्तो विषयेष्वहम् ।
वयसा भवदीयेन रंस्ये कतिपयाः समाः ॥ ३९ ॥

सत्यधर्मीया — त्वन्मातामहविहितोऽयं घातस्तात यतस्ततस्त्वमेवैतद्गृहीत्वा वितर तव वय इत्यवयति ॥ मातामहेति । प्रान्तपर्यन्तं नेत्याह । रंस्ये कतिपयाः समाः संवत्सरानिति ॥ ३९ ॥

छलारी — मातामहकृतां शुक्रकृताम् । जरामिति पूर्वेणान्वयः ॥ ३९ ॥

यदुरुवाच —

नोत्सहे जरया स्थातुमन्तरा प्राप्तया तव ।
अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ॥ ४० ॥

सत्यधर्मीया — अन्तरा मध्ये । पूरुषो ग्राम्यं सुखमविदित्वा वैतृष्ण्यं वितृष्णतां नैत्यतो जरया स्थातुं नोत्सहे ॥ ४० ॥

छलारी — अन्तरा प्राप्तया मध्ये प्राप्तया । कुतो नोत्सह इति तत्राह ॥ अविदित्वेति । अविदित्वाऽननुभूय । वैतृष्ण्यं वैराग्यम् ॥ ४० ॥

तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत ।
प्रत्याचख्युरधर्मज्ञा ह्यनित्ये नित्यबुद्धयः ॥ ४१ ॥

सत्यधर्मीया — अधर्मज्ञाः जीवतोर्वाक्यकरणादिकर्मज्ञानहीनाः अनित्ये क्षणक्षयिष्णुनि शरीरे वयसि वा । यदुतुर्वसुद्रुह्यानूनामनाज्ञाकारिणां क्रमात्स सन्ततिराज्यानर्हतात्मा म्लेञ्छराजतात्मा दाशदेशेशतात्मा च बालकबाल्यमृत्यात्मा चेति चतुर्णां शापो भूपं प्रति उक्त आदिपर्वणि ज्ञेयः ॥ ४१ ॥

छलारी — प्रत्याचख्युर्निराकृतवन्तः ॥ ४१ ॥

अपृच्छत् तनयं पूरुं वयसोनं गुणाधिकम् ।
न त्वमग्रजवद् वत्स मां प्रत्याख्यातुमर्हसि ॥ ४२ ॥

सत्यधर्मीया — वयसोनं गुणैरधिकं च पूरुमपृच्छत् । तव वयो देहीत्यप्राक्षीत् । नानयमयं तनुयादिति मततद्गुणोऽपि ज्ञातचतुरस्थल्याज्ञाभङ्ग इति किञ्चिच्छङ्कितचेता मुखबन्धं तनुते ॥ न त्वमिति । अग्रजा इवाग्रजवत् ॥ ४२ ॥

छलारी — अनित्ये यौवने वयसोनं कनिष्ठं मां मदाज्ञामित्यर्थः । प्रत्याख्यातुं निराकर्तुम् ॥४२॥

पूरुरुवाच —

को नु लोके मनुष्येन्द्र पितुरात्मकृतः पुमान् ।
प्रतिहर्तुं क्षमो यस्य प्रसादाद् विन्दते परम् ॥ ४३ ॥

सत्यधर्मीया — गुणाधिकतास्थेमानं तन्वंस्तनुज आह ॥ को न्विति । आत्मकृतः शरीरनिर्मातुः को नु पुमान्प्रतिहर्तुं नेति प्रतिव्याहर्तुं क्षमः शक्तः । न केवलं कलेवरमात्रनिर्मातृतैहिकी किन्तु यत्प्रसादेन परं हरिं विन्दते प्राप्नोति । यो जरां गृह्णाति तस्य राज्यं भवेदिति राजार्थना शुक्राज्ञा च तद्विषयेऽनुसन्धेया । यथोक्तं मात्स्ये । ययातिः । राज्यभाक् सम्भवेद्ब्रह्मन् पुण्यभाक्कीर्तिभाक् तथा । यो दद्यात्तु वयः पुत्रस्तद्भवाननुमन्यताम् । वयो दास्यति यः पुत्रः स वै राजा भविष्यतीत्यादिना ॥ ४३ ॥

छलारी — आत्मकृतः शरीरकर्तुः । प्रतिकर्तुं निराकर्तुम् । परं ब्रह्म विन्दते जानाति, परलोकं विन्दते प्राप्नोतीति वा ॥ ४३ ॥

उत्तमश्चिन्तितं कुर्यात् प्रोक्तकारी तु मध्यमः ।
अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ॥ ४४ ॥

सत्यधर्मीया — प्रागेव परस्परं न वित्तवार्तोऽहम् । नो चेद्विना त्वदाज्ञां प्रार्थनयाऽनया जरा राजन्ग्रहीतुं शक्येति पश्चात्तापमर्थादुपदर्शयन् वक्ति ॥ उत्तम इति । अश्रद्धयाऽविश्वासेन । उक्तावप्यकर्ता पितुः उच्चरितं शर्धरूपः । अकर्तारश्च स्वज्येष्ठा इति पितृसमास्तानिदमपदेशेन निनिन्द कथं पुरुज्ञः पूरुरिति शङ्कां तेषां समेषां सम्पादितशापत्वान्न तन्निन्दने नाहं प्रत्यवेयामिति पुरुभावरूपविशेषसूचकस्तुः पराचकारेति ज्ञेयम् ॥ ४४ ॥

छलारी — चिन्तितम् । पितुरिति सम्बन्धः । उच्चरितं पुरीषप्रायः ॥ ४४ ॥

इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः ।
सोऽपि तद्वयसा कामान् यथावज्जुजुषे नृपः ॥ ४५ ॥

सत्यधर्मीया — प्रमुदितः पितृसेवोपयुक्तं वयो जातमिति जातसन्तोषः । सङ्क्रमणं तु शुक्रस्मरणबलतः । यथोक्तं तत्रैव । सङ्क्रामयिष्यसि जरां यथेष्टं नहुषात्मज । मामनुध्याय भावेनेति । सोऽपि ययातिरपि जुजुषे असेवत ॥ ४५ ॥

छलारी — इत्युक्त्वा सोऽपि ययातिरपि जुजुषे बभुजे ॥ ४५ ॥

सप्तद्विपपतिः सम्यक् पितृवत् पालयन् प्रजाः ।
यथोपजोषं विषयान् जुजोषाऽव्याहतेन्द्रियः ॥ ४६ ॥

सत्यधर्मीया — यथोपजुषं स्वप्रीत्यनुसारेण ॥ ४६ ॥

छलारी — पितृवन्नहुषवत् । अप्रतिहतेन्द्रियपाटवशक्तिर्ययातिर्यथोपजोषं यथा सुखम् ॥ ४६ ॥

देवयान्यप्यनुदिनं मनोवाग्देहवस्तुभिः ।
प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः ॥ ४७ ॥

सत्यधर्मीया — वस्तुभिः तत्प्रीतिपदार्थैः प्रेयसो भर्तुः ॥ ४७ ॥

छलारी — प्रेयसः पत्युः । प्रेयसी परमप्रिया ॥ ४७ ॥

अयजद् यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणैः ।
सर्वदेवमयं देवं सर्ववेदमयं हरिम् ॥ ४८ ॥

सत्यधर्मीया — भूरिदक्षिणैर्बहु दक्षिणा येषां तैः । भूरि सुवर्णमेव दक्षिणा येषां त इति वा । भूरिर्ब्रह्माच्युतेशेषु भूरिप्राज्यसुवर्णयोरिति विश्वः । सर्वदेवप्रधानमिति सर्वदेवमयं सर्ववेदवेद्यं च हरिमयजत् ॥ ४८ ॥

छलारी — मयट् प्राधान्यार्थः ॥ ४८ ॥

यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः ।
नानेव भाति नाभाति स्वप्नमायामनोरथः ॥ ४९ ॥

सत्यधर्मीया — माधवाराधनमेव मेधैर्विधातव्यं कुत इत्यत आह ॥ यस्मिन्निति । यस्मिन्निदं विश्वं विरचितं व्योम्नि जलदावलिरिव नानेव भात्यपेक्षितमुपेक्षितं नाभाति स्वप्नमायामनोरथवद-स्थिरम् । व्याख्यातचरमिदं पदत्रयम् ॥ ४९ ॥

छलारी — तस्य यजनकालेऽनुसन्धानप्रकारमाह ॥ यस्मिन्निति । अस्य तमेवेत्युत्तरेणान्वयः । इदं सर्वं जगद्यस्मिन्हरौ विरचितं सम्बद्धम् । यदाश्रयतया तिष्ठतीत्यर्थः । तत्र दृष्टान्तः ॥ व्योम्नीवेति ।

यथा मेघावलिराकाशश्च यथा तिष्ठति तथेत्यर्थः । ननु जगतो मिथ्यात्वात्कथं तदाश्रयतयाऽवस्थानमित्यत आह ।। नानेवेति । इवेत्यस्योत्तरत्रानुषङ्गः । नाना नानाविधं जगज्जीवानां सृष्टिकाले भाति प्रलयकाले न भाति । तत्र दृष्टान्तः ।। स्वप्नमायामनोरथ इति । स्वाप्नपदार्थः स्वप्नावस्थायां प्रतीयते सुप्तौ न प्रतीयते तद्वदित्यर्थः । एवमेव मायामनोरथ इवेति व्याख्येयम् । तदुभयं जगद्भगवान् । ईक्षत इति शेषः । तथा च जगतः सर्वदेश्वरेण दृश्यमानत्वान्न मिथ्यात्वमिति भावः ।। तदुक्तम् ।। क्वचिद्विभातं क्वच तत्तिरोहितमविद्धदृक् साक्ष्युभयं तदीक्षत इति । अन्यत्रापि ।। न च मायाविना माया दृश्यते विश्वमीश्वरः। सदा पश्यति तेनेदं न मायेत्यवधार्यतामिति । यद्वा । स्वप्नमायामनोरथ इवेदं जगदनित्यम् । अस्वतन्त्रं चेति शेषः । कुतः । अनित्यत्वविकारित्वपारतन्त्र्यादिरूपतः स्वाप्नादिसाम्यं जगतो न तु बोधनिवर्तत इत्युक्तेः ।। ४९ ।।

तमेव हृदि विन्यस्य वासुदेवं गुहाशयम् ।
नारायणमणीयांसं निराशीरयजत् प्रभुः ।। ५० ।।

सत्यधर्मीया — गुहाशयं हृदयगुहानिहितं वासुदेवं । गतम् । निराशीरितरविषयाभिलाषरहितः । श्लोकद्विकान्वयि ।। ५० ।।

छलारी — गुहाशयं हृदयगुहास्थितम् । निराशीः फलेच्छारहितः ।। ५० ।।

एवं वर्षसहस्राणि मनःषष्ठैर्मनःसुखम् ।
विदधानोऽपि नातृप्यत् सार्वभौमः कदिन्द्रियैः ।। ५१ ।।

इति श्रीमद्भागवते नवमस्कन्धे पञ्चदशोऽध्यायः ।

सत्यधर्मीया — मनःषष्ठैः कदिन्द्रियैः कुत्सितानि च तानीन्द्रियाणि च तैः । कोः कत्तत्पुरुषेऽचीति कदादेशः । मनःसुखं विदधानः सार्वभौमः । गतम् । नातृप्यत्तृप्तो नाभूत् ।। ५१ ।।

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे पञ्चदशोऽध्यायः ।

छलारी — मनः षष्ठैः मनसा सह षट् संख्याकैः कदिन्द्रियैर्दुष्टेन्द्रियैः । मनःसुखं मनःप्रीतिम् । विदधानः कुर्वन् ॥ ५१ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे पञ्चदशोऽध्यायः ।

॥ अथ षोडशोऽध्यायः ॥

श्रीशुक उवाच —

स इत्थमाचरन् कामांस्त्रैणोऽपह्नवमात्मनः ।
बद्ध्वा प्रियायै निर्विण्णो गाथामेतामगायत ॥ १ ॥

सत्यधर्मीया — स्त्रैणः स्त्रीजितः स ययातिः कामान् विषयानाचरन् भुञ्जान आत्मनोऽपन्हवं भाविनमनर्थं बुद्ध्वा निर्विण्णः प्रियायै देवयान्यै अन्यापदेशेनैतां गाथामगायत ॥ १ ॥

छलारी — ययातेर्वैराग्यप्रकारं दर्शयति । स इत्थमिति । स्त्रीजितः कामान्विषयान् आचरन् उपभुंजान आत्मनोऽपन्हवं नित्यसुखहानिलक्षणं नाशं विज्ञाय निर्विण्णो विरक्त एतां वक्ष्यमाणत्वेन बुद्धिसंनिहितां गाथां स्वकीयवृत्तान्तरूपमितिहासमगायदन्यापदेशेन स्ववृत्तान्तमकथयदित्यर्थः ॥ १ ॥

शृणु भार्गव्यमूं गाथां मद्विधाचरितां भुवि ।
धीरा यस्यानुशोचन्ति वने ग्रामनिवासिनः ॥ २ ॥

सत्यधर्मीया — हे भार्गवि भृगुकुलजाते । मद्विधैः स्त्रैणैराचरितां । वने धीराः संसारासारताज्ञानेन वनवासिनो ग्रामवासिनश्च प्राक् । एतेन किञ्चित्तदनुभूय वनं भवनं चक्रुस्ते यस्य ग्रामनिवासिन इत्यत्रापि योज्यम् । आचरणमनुशोचन्ति । अहो मोहोऽस्य नश्यति वृथेति क्लिश्यन्ति ॥ २ ॥

छलारी — हे भार्गवि । वने स्थिता धीरा यस्य ग्रामनिवासिनः कामिनो गृहस्थस्य मद्विधस्य स्त्रीजितस्य मादृशस्याचरितम् । दृष्ट्वेति शेषः । अनुशोचन्ति । तस्या गाथां शृणु ॥ २ ॥

बस्त एको वने कश्चित् विचिन्वन् प्रियमात्मनः ।
ददर्श कूपे पतितां स्वकर्मवशगामजाम् ॥ ३ ॥

सत्यधर्मीया — स्वयं न्यस्तो बस्तः पदे पदे चाजायास्तां सुजातां विन्यस्य विरक्त्युत्पत्त्यै चान्यापदेशेनोपदिशति ।। बस्त इति । एको निस्सहाय आत्मनः प्रियं विचिन्वन्कूपे पतितां काञ्चिदेकाकिनीं स्वकर्मवशगामजां छागीं ददर्श ।। ३ ।।

छलारी — आत्मानं लक्षीकृत्याह ।। बस्त इति ।। ३ ।।

तस्या उद्धरणोपायं बस्तः कामी विचिन्तयन् ।
व्यधत्त तीर्थं उद्धृत्य विषाणाग्रेण रोधसि ।
सोत्तीर्य कूपात् सुश्रोणी तमेव चकमे किल ।। ४ ।।

सत्यधर्मीया — तस्या उद्धरणोपायं कामी बस्तो विचिन्तयन्नालोचयंस्तीर्थेऽवतारप्रदेशे व्यधत्त । तीर्थमुद्धृत्येति सुललितः पाठः । विषाणाग्रेण तीर्थमवतारमार्गं व्यधत्तेत्यर्थः । तीर्थं गतम् । तां विवर्त्य विषाणाग्रेणेति स्फुटस्फुटताविघटनाय । कराग्रेणेति हृदयम् । रोधसि तीरे उद्धृत्य व्यधत्त तमेवोन्नेतारं चकमे ।। ४ ।।

छलारी — तीर्थे कूपजले विवृत्य किञ्चिदवतीर्य विषाणाग्रेणोद्धृत्य रोधसि तटे । न्यधत्तेति शेषः।।४।।

तया वृतं समुद्वीक्ष्य बह्व्योऽजाः कान्तकामिनीः ।
पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं यावकोविदम् ।। ५ ।।

सत्यधर्मीया — तयैकया वृतं कान्तकामिनीः कान्तमपेक्षमाणाः कामिन्यो वध्वोऽजाः पीवानं पुष्टं प्रेष्ठम् । मीढ्वांसं रेतःसेकशक्तं । श्मश्रुलम् । सिध्मादिर्लच् । एतेन क्षत्रियतां कटाक्षयति । यावकोविदं केवलं कुल्माषभक्षकमपरत्र गोधूमादिभक्षकम् । याभकोविदमिति पाठे मीढ्वांसमभिलषितसेचकम् । मीढ्वानस्माकं भूयादिति ऋग्भाष्यटीकायां मीढ्वान् सेचको दाता स्वामी चेति व्याख्यानात् । दातारं स्वामिनं वा । याभकोविदं मैथुनकुशलम् ।। ५ ।।

छलारी — सोऽजो तया वृत्तं समावृतं युक्तमित्यर्थः । शर्मिष्ठाप्रमुखा लक्षीकृत्याह ।। बह्व्योऽजा इति । कान्तकामिनीः पतिकामितवत्यस्तमेव भेजुः । पीवानं पुष्टं श्मश्रुलं बहुलश्मश्रुयुक्तं मीढ्वांसं रेतःसिक्तारं रतिसमर्थमित्यर्थः । यावकोविदं यावान्नभक्षणपाटवोपेतम् ।। ५ ।।

स एकोऽजवृषस्तासां बह्वीनां रतिवर्धनः ।
रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ।। ६ ।।

सत्यधर्मीया — अजवृषस्तदधिपः तासां बह्वीनामित्यप्याच्छादनार्थम् । यद्वा देवयानीशर्मिष्ठे भार्ये बह्वी । तदतिरिक्ताश्च काश्चन सन्ति तदङ्गसङ्गिन्योऽङ्गना इति बहुवचनोपपत्तिः । तथा ह्यादिपर्वणि । यौवनेन चरन् कामान् युवा युवतिभिः सह । ययातिरथ पत्नीभ्यां दीर्घकालं विहृत्य च । विश्वाच्या सहितो रेम इति । काम एव ग्रहस्तेन ग्रस्त आत्मानं भगवन्तं स्वं वा नावबुद्ध्यत न ज्ञातवान् ॥ ६ ॥

छलारी — अजवृषोऽजश्रेष्ठो नावबुद्ध्यत । अडभावश्छान्दसः ॥ ६ ॥

तमेव प्रेष्ठतमया रममाणमजाऽन्यया ।
विलोक्य रूपसंलग्ना नामृष्यद् बस्तकर्म तत् ॥ ७ ॥

सत्यधर्मीया — तमेवाजवृषमेव प्रेष्टतमयाऽत्यन्तप्रियतमयाऽन्ययाऽजया रममाणं विलोक्य । रूपसंलग्ना रूपं सौन्दर्यं संलग्नं यस्यां सा । कुचसंलग्नेति पाठे कुचौ संलग्नौ निरन्तरौ यस्याः सा तद्बस्तकर्म इतराजासङ्गमरूपं नामृष्यन्न सेहे ॥ ७ ॥

छलारी — शर्मिष्ठां लक्षीकृत्याह ॥ अन्ययाऽजया रममाणमिति । कथम्भूता अजा । रूपसंलग्ना रूपगुणसंपन्ना तत्कर्मान्यासक्तिलक्षणं कर्म नामृष्यत् ॥ ७ ॥

तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदम् ।
इन्द्रियाराममुत्सृज्य स्वामिनं दुःखिता ययौ ॥ ८ ॥

सत्यधर्मीया — तं दुर्हृदं दुर्मनस्कं सुहृद्रूपम् । रूपप्प्रत्ययः । सुहृत्सदृशं बहिः कामिनं कामुकं क्षणसौहृदमस्थिरसौहार्दमिन्द्रियाराममुत्सृज्य त्यक्त्वा स्वामिनं शुक्रं पितरमत्रान्यत्र कश्चन तं स्वामिनं दुःखिताऽजा ययौ ॥ ८ ॥

छलारी — दुर्हृदं दुष्टहृदयम् । सुहृदः सुजनस्य रूपमिव रूपं यस्य तमिन्द्रियाराम-मिन्द्रियप्रीतिकरम् । स्वामिनमिति शुक्राभिप्रायेणाह ॥ ८ ॥

सोऽपि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुम् ।
कुर्वन् बिलबिलाकारं नाशक्नोत् पथि सन्धितुम् ॥ ९ ॥

सत्यधर्मीया — कृपणः स्त्रैणः सोऽपि बस्तोऽपि स्वयं तामजां देवयानीं बिलबिलाकारम् । अजादिजात्युचितव्यवायाह्वानहेतुशब्दविशेषं कुर्वन् । तिर्यग्बिलबिलाकारो मैथुनानुकरो रस इत्यभिधानम् । अन्यत्र पादसंवाहनाद्यनुनयं । पथि मार्गे सन्धितुं सान्त्वयितुं नाशक्नोच्छक्तो नाभूत् ।। ९ ।।

छलारी — बिलबिलाकारं रमणार्थं बस्तजातिस्वरमन्यत्र सीत्कारादिशब्दं च कुर्वन् सन्धितुं प्रसादयितुम् । तामित्यनुषङ्गः ।। ९ ।।

तस्य तत्र द्विजः कश्चिदजास्वाम्यच्छिनद् रुषा ।
लम्बन्तं वृषणं भूयः सन्दधेऽर्थाय योगवित् ।। १० ।।

सत्यधर्मीया — द्विज इत्यङ्गस्मरणाभावात् । अजास्वामी रुषा स्वाजौदासीन्यागतकोपेन लम्बन्तं लम्बमानं वृषणमच्छिनत् । अर्थाय स्वाजाप्रयोजनार्थं पुनः सन्दधे शापविशापोच्छेदनसन्धाने ज्ञेये । योगविदुपायज्ञ एवं चेत्तत्सम्बन्धो भवेदिति तज्ज्ञो वा । जराव्यत्यसनोपायज्ञः परत्र ।। १० ।।

छलारी — लम्बन्तं वृषणमच्छिनदन्याजासम्भोगासमर्थमकरोत् । अर्थाय स्वपुत्र्या कामभोगलक्षणप्रयोजनाय योगविदुपायज्ञः ।। १० ।।

संवृद्धवृषणः सोऽपि ह्यजया कूपलब्धया ।
कालं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ।। ११ ।।

सत्यधर्मीया — संवृद्धवृषणो वयःस्वीकरणेन । बहुतिथं बहुकालमेकत्रान्यत्र तारुण्यवान् ।।११।।

छलारी — अजया । रममाणमिति शेषः ।। ११ ।।

तथाऽहं कृपणः सुभ्रू भवत्याः प्रेमयन्त्रितः ।
आत्मानं नाभिजानामि मोहितस्तव मायया ।। १२ ।।

सत्यधर्मीया — सुभ्रूरिति सुपठम् । प्रेमयन्त्रितः स्नेहाधीनस्तव माययाऽऽत्मानं मां परमात्मानं च न जानामि ।। १२ ।।

छलारी — कृपणस्त्वद्वियोगासहिष्णुरात्मानं परमात्मानं स्वस्वरूपं च मायया विभ्रमलक्षणया ।। १२ ।।

यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
न दुह्यन्ति मनःप्रीतिं पुंसः कामहतस्य मे ॥ १३ ॥

सत्यधर्मीया — अद्यापि पते ते तृप्तिर्न जाता किमित्यत इयता किमायताक्षि इतीदं सर्वमपि न तृप्तिकृदिति तत्प्रतिक्षिपति ॥ यत्पृथिव्यामिति । व्रीहिभिः सहिता यवा यस्मिंस्तद्धिरण्यं पशवः स्त्रियश्च कामहतस्य मे मनःप्रीतिं सन्तो न दुह्यन्ति नालं मतिं जनयन्ति । व्रीहियवमिति समाहारद्वन्द्वो वा ॥ १३ ॥

छलारी — ननु तर्हि पुनरपि विषयः सेव्यतां ततो मनसि प्रीते सति कामोपशान्त्या मोहो निवर्तत इति चेत्तत्राह ॥ यदिति द्वाभ्याम् । व्रीहियवमित्येकवद्भावः । व्रीह्यादयो मनःप्रीतिं न दुह्यन्ति न पूरयन्ति । दुह् प्रपूरण इति धातुः ॥ १३ ॥

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ १४ ॥

सत्यधर्मीया — काम इच्छा । कामानां काम्यानां विषयाणामुपभोगेन जातु कदाचिदपि न शाम्यति । किन्तु भूय एवानुसेवनं यथासेवमधिको भवति । तत्र दृष्टान्तमाचष्टे । कृष्णवर्त्माग्निर्हविषा सर्पिषेवेति । हविर्घृते हेम्नि तोय इत्यभिधानम् ॥ १४ ॥

छलारी — कामस्तृष्णा कामानां विषयाणां हविषा घृतेन । हविर्गव्ये घृते तोये इति यादवः । कृष्णवर्त्माऽग्निः ॥ १४ ॥

यदा न कुरुते भावं सर्वभूतेष्वमङ्गलम् ।
समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥ १५ ॥

सत्यधर्मीया — सर्वभूतेष्वमङ्गलं भावं यो यदा न कुरुते भावमभिप्रायमत एव समदृष्टेः पुंसः सर्वा दिशः । सुखमयाः सुखमाययन्ति प्रापयन्तीति तास्तथा । सुखात्मिका इत्यर्थपक्षे मयटष्टित्त्वप्रयुक्तटिड्ढाणञिति ङीबभाव आर्षः । यदा यः पुमान् सर्वभूतेष्वमङ्गलं भावम् । सुमङ्गलः कश्चन काङ्क्षते हि मामिति रमावचनादमङ्गलमिति भावं कुरुते जगन्मङ्गलताप्रतिपादके कुत्सिते शब्दे भावं मनश्च न कुरुत इत्यावर्त्यान्वयनेऽर्थविशेषश्च ज्ञेयः ॥ १५ ॥

छलारी — नन्वेवं चेत्साधनाभावेन कदापि मुक्तिर्न स्यादिति तत्राह ॥ यदेति । यदा सर्वभूतेष्वमङ्गलं भावं रागद्वेषादिलक्षणं भावं न कुरुते तस्य समदृष्टेः सर्वस्य ब्रह्माधीनत्वेन तत्तद्योग्यताविशिष्टवस्तुदर्शिनः पुंसः सर्वा दिशः सुखमयन्ते प्रापयन्तीति सुखमयाः सुखप्रधाना वा ॥ १५ ॥

या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते ।
तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् ॥ १६ ॥

सत्यधर्मीया — ननु स्थविरतायां कलेवरबलाभावे स्वतो विरतिर्जायत इति तत्राह ॥ येति । या तृष्णा दुर्मतिभिर्दुस्त्यजा दुःसाधत्यागा जीर्यतो जरायुजो न जीर्णा भवति तां तृष्णाम् । तस्याः क्रियामाह ॥ दुःखनिवहामिति । दुःखानां निवहः समूहो यया सा तां । शर्मकामो नित्यसुखरूपमोक्षापेक्षो द्रुतं यथा तथा तां तृष्णां त्यजेत्तत्त्यजनोपायमाचरेत् ॥ १६ ॥

छलारी — ननु स्थानवीर्यं निराहारत्वेन विषयतृष्णात्यागेन मुक्तिः किं न स्यादिति तत्राह ॥ येति । सत्यं तृष्णात्यागेन मुक्तिः स्यात् । स एव नास्ति । तस्माज्ज्ञानेन तत्त्यागस्तदेवापाद्यमित्यर्थः। जीर्यता वयसाऽनशनेन वा जरां प्राप्नुवतो दुःखनिर्वाहां दुःखानि नितरां वहतीति तथा ॥ १६ ॥

मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ १७ ॥

सत्यधर्मीया — विषयशमार्थ्यहं शर्मिष्ठामगममिति त्वं श्रमवत्यभूः किल । कलालापे तदिन्द्रियस्वभावोऽयमिति न चैत्र्यमावहेत्याह ॥ मात्रेति । विविक्तमैकान्तिकमासनं यस्य न भवेत् । ज्ञानी चेत्तानि किं कुर्युरित्यत आह । बलवानिन्द्रियग्रामस्तत्समूहो विद्वांसं मानिनमपि कर्षति । यथा स्थगनं न भवेत्तथा कर्षति । नाविविक्तासन इति पाठेऽविविक्तासन एकासन इत्यर्थः ॥ १७ ॥

छलारी — स्त्रीसंनिधानं तु सर्वथा त्याज्यमित्याह ॥ मात्रेति । अविविक्तासन एकशय्यासनः ॥ ॥ १७ ॥

पूर्णं वर्षसहस्रं मे विषयान् सेवतोऽसकृत् ।
तथापि चानुसवनं तृष्णा तेषूपजायते ॥ १८ ॥

सत्यधर्मीया — विषयान् पूर्णं वर्षसहस्रं तत्राप्यसकृत् सेवतः सेवमानस्य मे । तथाऽपि चानुसवनं तेषु विषयेषु तृष्णोपजायते ॥ १८ ॥

छलारी — स्वतो विषयतृष्णा न शाम्यतीत्यत्र स्वानुभवमाह ॥ पूर्णमिति । अनुसवनं प्रतिदिनम् ॥ १८ ॥

तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निरहङ्कारश्चरिष्यामि मृगैः सह ॥ १९ ॥

सत्यधर्मीया — निगमयति ॥ तस्मादिति । एतां तृष्णां त्यक्त्वा ब्रह्मणि मानसमाधाय निर्द्वन्द्वः शीतोष्णादिभीत्यतीतो निरहङ्कारोऽहंममकारहितो मृगैर्हरिणादिभिः सह चरिष्यामि वने वसिष्यामीत्याशयः ॥ १९ ॥

छलारी — स्वयमित्थं विचार्य फलितमाह ॥ तस्मादिति । मृगयन्ते तत्त्वमिति मृगा ज्ञानिनस्तैः सह तपश्चरिष्यामीत्यन्वयः ॥ १९ ॥

दृष्टं श्रुतमसद् विद्वान् नानुध्यायेन्न संविशेत् ।
संसृतिं चात्मनाशं च तत्र विद्वान् स आत्मदृक् ॥ २० ॥

सत्यधर्मीया — दृष्टमैहिकं सुखम् । श्रुतं स्वर्गगम् । असदस्थिरं विद्वांस्तन्नानुध्यायेन्न संविशेदासक्तिं न कुर्यात् । तत्र ध्यानसंवेशनयोः सतोः संसृतिमात्मनाशं स्वहानिं विद्वानात्मदृक् स्वपरोभयात्मज्ञानी । अतो न ध्यानसंवेशने तत्र कर्तव्ये इत्याह । स आत्मदृगुच्यत इत्यन्वय इति व्याकृतवन्तः ॥ २० ॥

छलारी — दृष्टश्रुतसुखत्यागेनादृष्टाश्रुतसुखाय कः कुशलः प्रयतते तारुण्ये कायक्लेशं विद्वानिति तत्राह ॥ दृष्टमिति । दृष्टं राज्यादिविभवं श्रुतं स्वर्गादिविभवमित्युभयमसत्क्षणभंगुरम् । विद्वांस्तन्नानुध्यायेन्न संविशेत् । भोगलक्षणप्रवेशो न कर्तव्येत्यर्थः । कुत इति तत्राह ॥ संसृतिमिति । तत्रानुध्यानसंवेशनयोः सतोः संसारमात्मनाशं स्वरूपनाशं विद्वान्यः स आत्मदृगात्मज्ञानीत्युच्यत इत्यर्थः । ''ध्यायतो विषयान्पुंसः संगस्तेषूपजायत'' इत्यादिः ॥ २० ॥

श्रीशुक उवाच —

इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः ।
दत्वा स्वां जरसं तस्मादाददे विगतस्पृहः ॥ २१ ॥

सत्यधर्मीया — पूरवे तदीयं वयो यौवनं स्वां जरसं तस्मादाददे ॥ २१ ॥

छलारी — तदीयं पुरुषसम्बन्धि पूरवे स्वस्य कनिष्ठपुत्राय जरसं जराम् ॥ २१ ॥

दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुम् ।
प्रतीच्यां तुर्वसुं चक्रे उदीच्यामनुमीश्वरम् ॥ २२ ॥

सत्यधर्मीया — दक्षिणपूर्वस्यां द्रुह्युमाग्नेय्याम् । स्वाज्ञावज्ञानकर्ताऽप्याज्ञाकर्तुर्ज्येष्ठ इति दाक्षिण्याद् द्रुह्युग्रहणमग्र इति ज्ञेयम् । शापस्त्वखण्डभूमण्डलाधिपत्यप्रतिषेधे नाप्रसिद्धतापादक इति न विरोधः । दक्षिणतो दक्षिणदिशि यदुं प्रतीच्यां तुर्वसुमुदीच्यामनुमीश्वरं चक्रे । नन्वप्रसक्तौ नास्ति चिन्ता । दानप्रसक्तौ त्वादौ भवे यदौ सति कथं पूरोरखण्डाधिपत्यं समयविगीतं ददौ । तथा शुक्रोऽपि स्वनप्तारं ज्येष्ठमतिहायाज्यायसो दानं कथं सेह इति चेन्न ।

अभिषेक्तुकामं नृपतिं पुत्रं पूरुं कनीयसम् । ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् ।
कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो । ज्येष्ठं यदुं परित्यज्य पूरो राज्यं प्रयच्छति ।
कथं ज्येष्ठानतिक्रम्य कनीयान् राज्यमर्हति । एतत्सम्बोधयामस्त्वां धर्मं त्वमनुपालय ।
धर्मं चोल्लङ्घयन् राजा प्रजानां दुःखमावहेत् ।

ययातिरुवाच ।

ब्राह्मणप्रमुखा वर्णाः सर्वे शृणुत मद्वचः । ज्येष्ठं प्रति यथा राज्यं न देयं मे कथञ्चन ।
मम ज्येष्ठेन यदुना नियोगो नानुपालितः । प्रतिकूलः पितुर्यश्च न स पुत्रः सतां मतः ।
मातापित्रोर्वचनकृद्धितः पथ्यश्च यः सुतः । स पुत्रः पुत्रवद्यश्च वर्तते पितृमातृषु ।
यदुनाऽहमवज्ञातस्तथा तुर्वसुनाऽपि च । द्रुह्युणा चानुना चैव मय्यवज्ञा भृशं कृता ।
पूरुणा च कृतं वाक्यं मानितश्च विशेषतः । कनीयान्मम दायादो जरा येन धृता पुरा ।
स च कामो मम कृतः पूरुणा मित्ररूपिणा । शुक्रेण च वरो दत्तः काव्येनोशनसा स्वयम् ।
पुत्रो यस्त्वनुवर्तेत स राजा पृथिवीपतिः । भवतोऽनुनयाम्येवं पूरू राज्येऽभिषेच्यताम् ।

प्रकृतय ऊचुः ।

यः पुत्रो गुणसम्पन्नो मातापित्रोर्हितस्सदा । सर्वमर्हति कल्याणं कनीयानपि सप्रभुः ॥
इत्याद्यादिपर्ववचनेन सुघटमित्याटीकया । पूर्वमपि सच्छुक्रवचः ।
वयो दास्यति यः पुत्रः स च राजा भविष्यति । आयुष्मान्कीर्तिमांश्चैव बहुपुत्रस्तथैव चेति ॥२२॥

छलारी — दक्षिणपूर्वस्यामाग्नेयामीश्वरं राजानं चक्र इति सर्वत्रानुषङ्गः ॥ २२ ॥

भूमण्डलस्य सर्वस्य पूरुमर्हत्तमं विशाम् ।
अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ ॥ २३ ॥

सत्यधर्मीया — अर्हत्तमं योग्यतमम् । अग्रजान् यद्वादीन् वशे स्थाप्य प्रस्थाप्य ॥ २३ ॥

छलारी — विशां प्रजानामर्हत्तमं पूरुमभिषिच्य तस्याग्रजांस्तस्य वशे स्थाप्येत्यन्वयः ॥ २३ ॥

आम्रेडितं वर्षपूगान् षड्वर्गं विषयेषु सः ।
क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः ॥ २४ ॥

सत्यधर्मीया — स ययातिः विषयेषु शब्दादिषु । आम्रेडितमभ्यस्तं षड्वर्गं क्षणेनैव मुमुचे । जातपक्षो द्विजः पक्षी नीडं कुलायं यथा मुञ्चति तथैवेति ॥ २४ ॥

छलारी — शब्दादिविषयेषु वर्षपूगान् । आम्रेडितमभ्यस्तं षडिन्द्रियवर्गं मुमुचे विषयादाहृत्य भगवद्विषयं चकारेत्यर्थः । द्विजः पक्षी ॥ २४ ॥

स तत्र निर्मुक्तसमस्तसङ्गः आत्मानुभूत्या विधुतत्रिलिङ्गः ।
परेऽमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः ॥ २५ ॥

सत्यधर्मीया — स तत्र वने निर्मुक्तसमस्तसङ्गस्त्यक्तसमग्रदुःखसङ्गः । समस्तः सम्यगस्तः सन्निरस्तः सङ्गो गंगनादिसम्बन्धः । स च निर्मुक्तो येनेति वा । आत्मानुभूत्या स्वपरमात्मज्ञानेन । विधुतत्रिलिङ्गो विधुतं त्रिलिङ्गं त्रिभिर्गुणैर्निर्मितं लिङ्गमभिमानो येन । त्रयस्तापा लिङ्गशरीरं च विधुतानि येनेति वा । परे उत्तमेऽमले निर्दुःखादिदोषे वासुदेवे भागवतीं स्वयोग्यतामनुसृत्य । भागवतीं भागोऽस्यास्तीति सा तां गतिं प्रवेशलक्षणां मुक्तिं लेभे । भागवतीं भागवतसम्बन्धिनीमिति वा । प्रतीतः प्रख्यातः ॥ २५ ॥

छलारी — तत्र वने स्थित इति शेषः । आत्मानुभूत्या परमात्मापरोक्षज्ञानेन विधुतं त्रिभिः सत्त्वादिगुणैर्निर्मितमभिमानलक्षणं यस्य स तथा । ब्रह्मणि तदाराधने प्रतीतः कोविदो भागवतीं भगवद्धर्मलभ्यां गतिं जीवन्मुक्त्यवस्थां लेभ इत्यन्वयः ॥ २५ ॥

श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः ।
स्त्रीपुंसोः स्नेहवैक्लव्यात् परिहासमिवोदितम् ॥ २६ ॥

सत्यधर्मीया — प्रस्तोभमजापदेशेन वचनम् । स्त्रीपुंसोः समासान्तविधेरनित्यतया नाच् । स्त्रीपुंसयोः स्नेहवैक्लव्यात्तद्विव्हलतायाः परिहासमुदितमिवैव मेने ज्ञातवती ॥ २६ ॥

छलारी — प्रस्तोभं वञ्चनं स्नेहवैक्लव्यात् । स्नेहभंगभयादिति यावत् । प्राप्तप्रस्तोभमाह ॥ परिहासमिवेति ॥ २६ ॥

सा संनिवासं सुहृदां प्रपायामिव गच्छताम् ।
विज्ञायेश्वरतन्त्राणां मायाविरचितं प्रभो ॥ २७ ॥

सत्यधर्मीया — प्रपायां गच्छतां मिलताम् । मायाविरचितं सन्निवासं सुहृदो विज्ञाय तेऽपि न स्वतन्त्रा इत्याह ॥ ईश्वरतन्त्राणामिति । प्रभो परीक्षित् ॥ २७ ॥

छलारी — प्रपायां गच्छतामागच्छतां सहवासमिव सुहृदां संनिवासं विज्ञाय लिङ्गशरीरमधुनोद-मुञ्चदित्युत्तरेणान्वयः । कथं भूतं सुहृदां संनिवासम् । प्रभोर्हरेरिच्छानिर्मितम् ॥२७॥

सर्वत्र सङ्गमुत्सृज्य स्वाप्नौपम्येन भार्गवी ।
कृष्णे मनः समावेश्य व्यधुनोल्लिङ्गमात्मनः ॥ २८ ॥

सत्यधर्मीया — स्वाप्नौपम्येन तत्स्थपदार्थास्थिरतासादृश्येन सङ्गमुत्सृज्य कृष्णे मनः समावेश्यात्मनो लिङ्गं व्यधुनोत् ॥ २८ ॥

छलारी — उक्तमेव विवृणोति ॥ सर्वत्रेति । स्वप्नौपम्येनानित्यत्वं, विज्ञाय सर्वत्र संगमुत्सृज्येत्यन्वयः ॥ २८ ॥

नमस्तुभ्यं भगवते वासुदेवाय वेधसे ।
सर्वभूताधिवासाय शान्ताय बृहते नमः ॥ २९ ॥

इति श्रीमद्भागवते नवमस्कन्धे षोडशोऽध्यायः ।

सत्यधर्मीया — किं वदन्ती व्यधुनोदित्याशङ्कां विधुनोति ॥ नमस्तुभ्यमिति । वेधसे ज्ञानात्मकायेति सोच्चारयन्ती लिङ्गं व्यधुनोदित्यन्वयः ॥ २९ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां नवमस्कन्धे षोडशोऽध्यायः ।

छलारी — नमस्तुभ्यमिति । जल्पेति शेषः । शुको वा नमस्करोति ॥ नम इति । बृहते पूर्णाय ॥ २९ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां नवमस्कन्धे षोडशोऽध्यायः ।

॥ अथ सप्तदशोऽध्यायः ॥

श्रीशुक उवाच —

पूरोर्वंशं प्रवक्ष्यामि यत्र जातोऽसि भारत ।
यत्र राजर्षयो वंश्या ब्रह्मवंश्याश्च जज्ञिरे ॥ १ ॥

सत्यधर्मीया — यत्र वंशे, न केवलमेतावत् किन्तु यत्रेति य इत्यर्थे । ये केचन वंश्या राजर्षयो जज्ञिरेऽभवन् । केचन ब्रह्मवंश्या ब्राह्मण्यं प्राप्ता इति यावत् । जज्ञिरेऽभवन् । अनेन वंश्या इत्यनेनैव वंशसम्भवत्वलब्धेर्यत्रेत्यनन्वितमवक्तव्यमिति परास्तम् ॥ १ ॥

छलारी — एवं ययातिराजवृत्तान्तं सपरिकरं निरूप्य ययातिराजपुत्रस्य पुरोर्वंशं निरूपयितुं प्रतिजानीते ॥ पुरोर्वंशमिति । यत्र पुरोर्वंशे जातोऽसि यत्र यस्मिन्पुरोर्वंशे ये जज्ञिरे तेषु केचन राजर्षयः केचन ब्रह्मवंश्या ब्रह्मर्षयश्चाभवन् । कथम्भूता वंश्याः राजवंशे भवाः ॥ १ ॥

जनमेजयो ह्यभूत् पूरोः प्रचिन्वांस्तत्सुतः स्मृतः ।
प्रवीरोऽथ नमस्युर्वै तस्माच्चारुपदोऽभवत् ॥ २ ॥

सत्यधर्मीया — पूरोर्जनमेजयस्तत्सुतो जनमेजयसुतः । अथ प्रचिन्वतोऽनन्तरं तस्येति यावत् । प्रवीरस्तस्मान्नमस्युस्तन्नामा तस्माच्चारुपदोऽभवत् ॥ २ ॥

छलारी — अथ प्रवीरात् । वै इत्यव्ययं तस्मादित्यर्थे । तस्मान्नमस्योः ॥ २ ॥

तस्य सुद्युरभूत् पुत्रस्तस्माद् बहुगवस्ततः ।
शंयातिस्तस्य हंयाती रौद्राश्वस्तत्सुतः स्मृतः ॥ ३ ॥

सत्यधर्मीया — तस्य चारुपदस्य । तस्मात्सुद्योस्ततो बहुगवः । तस्य शंयातेस्तत्सुतो हंयातिसुतः ॥ ३ ॥

छलारी — अभूत्पुत्र इत्यस्योत्तरत्राप्यनुषङ्गः । तत्सुतो हंयातिसुतः ॥ ३ ॥

ऋतेयुस्तस्य कक्षेयुः स्थण्डिलेयुः कृतेयुकः ।
जलेयुः सन्तनेयुश्च धर्मसत्यव्रतेयवः ॥ ४ ॥

सत्यधर्मीया — तस्य रौद्राश्वस्य । ऋतेय्वादयो व्रतेयुकान्तः ॥ ४ ॥

छलारी — धर्मेयुश्च व्रतेयुश्च सत्येयुश्च धर्मसत्यव्रतेयवः ॥ ४ ॥

दशैतेऽप्सरसः पुत्रा वनेयुश्चावमः स्मृतः ।
घृताच्यामिन्द्रियाणीव मुख्यस्य जगदात्मनः ॥ ५ ॥

सत्यधर्मीया — अप्सरसः षष्ठी सप्तमी सती घृताच्यामित्यनेनान्वेति । ततश्च घृताच्यामप्सरसि सुजाताः तत्र दशसु सुतेष्ववमो वनेयुर्व्रतेयुर्वा पूर्ववत्पूर्ववत्तथा न नः काचिद्धतिः । किन्तु श्लोकयोः समता मता । पित्राज्ञां वर्तितायां निदर्शनमाह ॥ इन्द्रियाणीवेति । मुख्यस्य जगदात्मनो जगतां दासप्राणानामात्मनोऽधिपतेः प्राणपञ्चकस्य मुख्यस्याधिपस्य मुख्यप्राणस्य जगत्प्रवर्तकत्वेन तत्स्वामिनो मुख्यप्राणस्येति वा । इन्द्रियाणि यथा तथेति । एतच्चोक्थमसीत्यादि छान्दोग्योपनिषदि स्पष्टम् ॥ ५ ॥

छलारी — वनेयुश्चावमोऽन्तिमः । एवं ऋतेयुप्रमुखा दशपुत्रास्तस्य रौद्राश्वसकाशाद्धृताच्यामप्सरसि जाताः । अप्सरस इति षष्ठी सप्तम्यर्थे । वंशवर्तित्वे दृष्टान्तमाह ॥ मुख्यस्येति । जगदात्मनो जगद्व्याप्य तिष्ठतो मुख्यप्राणस्य वशे इन्द्रियाणि यथा वर्तन्ते तद्वदिति भावः ॥ ५ ॥

ऋतेयो रन्तिनारोऽभूत् त्रयस्तस्यात्मजा नृप ।
सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥ ६ ॥

सत्यधर्मीया — ऋतेयो रौद्राश्वप्रथमपुत्रस्य । तस्य रन्तिनारस्य । अप्रतिरथस्य तृतीयस्यात्मजः कण्व इत्यन्वयः ॥ ६ ॥

छलारी — ऋतेयो दशसु प्रथमात् । कण्वोऽप्रतिरथात्मजोऽप्रतिरथपुत्रः ॥ ६ ॥

तस्य मेधातिथिस्तस्मात् प्रस्कण्वाद्या द्विजातयः ।
पुत्रोऽभूत् सुमते रैभ्यो दुष्यन्तस्तत्सुतो मतः ॥ ७ ॥

सत्यधर्मीया — तस्य मेधातिथिस्तस्मात् प्रस्कण्वाद्या द्विजातयो मेधातिथिप्रभृतयो वेदद्रष्टारोऽयं कण्वो मेधातिथिरित्यादिवेदप्रसिद्धा ब्रह्मवंश्याश्चेति प्रागुक्तेः । अप्रथमस्याप्यप्रतिरथस्य प्रथमतो वंशशंसनं सुमतेरादिमत्त्वेऽपि मेधातिथ्यादयो ब्राह्मणा इति सुमतिसुतसम्मान्यतावेदनायेति ज्ञेयम् । अथ सुमतिसुतवंशं शंसति । तत्सुतो रैभ्यभवः ॥ ७ ॥

छलारी — तस्य कण्वस्य सुमतेस्त्रिषु पुत्रेषु प्रथमात् ॥ ७ ॥

दुष्यन्तो मृगयां यातः कण्वाश्रमपदं गतः ।
तत्रासीनां स्वप्रभया मण्डयन्तीं रमामिव ॥ ८ ॥

सत्यधर्मीया — तत्राश्रमे । स्वप्रभया रमामिव मण्डयन्तीं तदाश्रमपदमासीनाम् ॥ ८ ॥

छलारी — दुष्यन्तस्य शकुन्तलायां भरतः पुत्रोऽभवदिति वक्तुं कथामाह ॥ दुष्यन्त इत्यादिना । कण्वाश्रमं रमामिव मण्डयन्तीं देवमायामिव रमामिव स्थितां स्त्रियं विलोक्य मुमुहे । वरारोहां सुन्दरजघनाम् ॥ ८,९ ॥

विलोक्य मुमुहे सद्यो देवमायामिव स्त्रियम् ।
बभाषे तां वरारोहां भटैः कतिपयैर्युतः ॥ ९ ॥

सत्यधर्मीया — देवमायामिव विद्यमानां स्त्रियं विलोक्य सद्यो मुमुहे । कतिपयैर्भटैर्भृत्यैः । उपलक्षणमिदम् । प्रागित्यर्थः । यथोक्तं भारत आदिपर्वणि । एक एवोत्तमबलः क्षुत्पिपासासमन्वित इति । इत इति चेत्यादिना शाकुन्तल इति ज्ञेयम् ॥ ९ ॥

तद्दर्शनप्रमुदितः सन्निवृत्तपरिश्रमः ।
पप्रच्छ कामसन्तप्तः प्रहसन् श्लक्ष्णया गिरा ॥ १० ॥

सत्यधर्मीया — सन्निवृत्तः परिश्रमो मृगयामार्गणमार्गश्रान्तिर्यस्य सः॥ १० ॥

छलारी — तस्या दर्शनेन प्रमुदितोऽत एव सन्निवृत्तः संचारश्रमो यस्या श्लक्ष्णया मधुरया ॥१०॥

का त्वं कमलगर्भाभे कस्यासि हृदयङ्गमे ।
किं वा चिकीर्षितं त्वत्र भवत्या विजने वने ॥ ११ ॥

सत्यधर्मीया — तत्प्रश्नानन्तरं पृच्छति ॥ केति । यथोक्तम् ।

सा तं दृष्ट्वैव राजानं दुष्यन्तमसितेक्षणा ।
स्वागतं त इति क्षिप्रमुवाच प्रतिपूज्य च ॥ इत्यादिना ।

कमलगर्भस्याभेवाभा यस्याः सा तत्सम्बुद्धिः । हृदयङ्गमे मनोरमे । भवत्या विजने जनरहिते वने चिकीर्षितं कर्तुमिष्टं किं वेति । पप्रच्छेत्यन्वयः ॥ ११ ॥

छलारी — कमलगर्भाभे पद्मोदरप्रभे । कस्यासि कस्यात्मजाऽसि । हृदयंगमे सुन्दरि ।। ११ ।।

व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे ।
न हि चेतः पौरवाणामधर्मे रमते क्वचित् ।। १२ ।।

सत्यधर्मीया — स्वयं कान्तापदे तां निधायैव विजातीयायां मम ममता नोदेयादिति सुदर्ती वदति ।। व्यक्तमिति । हे सुमध्यमे । पौरवाणां पूर्वन्वयसम्भवानामधर्मे धर्मविरुद्धेऽर्थे क्वचिदप्यापदादिसमास्कन्दनेऽपि मनो न हि रमते न रतं भवेत् अभूच्च त्वयि रतमतस्त्वां राजन्यतनयां व्यक्तं वेद्मीत्यन्वयः ।। १२ ।।

छलारी — पुरोर्वंशोत्पन्नानां चेतो न ह्यधर्मे रमते । मच्चेतस्त्वयि रमते । अतस्त्वां राजपुत्रीं जानामि ।। १२ ।।

शकुन्तलोवाच —
विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने ।
वेदैतद् भगवान् कण्वो वीर किं करवाम ते ।। १३ ।।

सत्यधर्मीया — यद्राजन्राजन्यतनयां प्रत्यभ्यधास्तद्यथार्थमित्यभिधत्ते ।। शकुन्तलेति । विश्वामित्रात्मजा वने च मेनकया त्यक्ता विश्वामित्रात्तपस्त्रासात् सुत्रामप्रेषितायां मेनकायां तज्जाता तत्त्यक्ता च । तप्यमानः किलेत्यारभ्य मामनिन्दतेति ग्रन्थेन तत्रोक्तेः । एतन्मम जन्म भगवान्कण्वो वेद । वयं किं करवाम ।। १३ ।।

छलारी — विश्वामित्रस्यात्मजाऽहं मेनकायां जाता तया स्वर्गं प्रति गच्छन्त्याऽत्र वने त्यक्ताऽतो राजकन्यैवाहमित्यर्थः ।। १३ ।।

आस्यतामरविन्दाक्ष गृह्यतामर्हणं च नः ।
भुज्यतां सन्ति नीवारा उष्यतां यदि रोचते ।। १४ ।।

सत्यधर्मीया — नोऽर्हणं, नीवारा देवव्रीहयः ।। १४ ।।

छलारी — आस्यतामुपविश्यताम् । अर्हणमर्घ्यादिपूजाम् । नीवारा देवव्रीहयः । तैरापादितमन्नमिति शेषः ।। १४ ।।

दुष्यन्त उवाच —

उपपन्नमिदं सुभ्रु जातायाः कुशिकान्वये ।
स्वयं हि वृणुते राज्ञां कन्यकाः सदृशं वरम् ॥ १५ ॥

सत्यधर्मीया — कुशिकान्वये जातायाः । पूर्वमेव तन्मनःपरीक्षार्थं वदति ॥ स्वयमिति ॥ १५ ॥

छलारी — किं करवामेत्यादि वाक्यात्तदभिप्रायं ज्ञात्वाऽऽह ॥ उपपन्नमिति । इदं वचनं युक्तमित्यर्थः ॥ १५ ॥

श्रीशुक उवाच —

ओमित्युक्ते यथाधर्ममुपयेमे शकुन्तलाम् ।
गान्धर्वविधिना राजा देशकालविधानवित् ॥ १६ ॥

सत्यधर्मीया — यथाधर्मं स्वयं मन्त्रतन्त्रज्ञो गान्धर्वविधिनोपयेमे ॥ १६ ॥

छलारी — त्वमेव मम सदृशो वरोऽतस्तव पतित्वविषयेऽङ्गीकार एवेत्याशयेन तया ॐ इत्युक्त इत्यर्थः । ब्राह्मो राक्षसो गान्धर्व इत्यादयो बहवो विवाहविधयः सन्ति । तेषु गान्धर्वविधिना स्वयंवरलक्षणेनोपयेमे ॥ १६ ॥

अमोघवीर्यो राजर्षिर्महिष्यां वीर्यमादधे ।
श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम् ॥ १७ ॥

सत्यधर्मीया — महिष्यां शकुन्तलायाम् । श्वोभूते उषःकाले ॥ १७ ॥

छलारी — महिष्यां शकुन्तलायां श्वोभूते परदिने ॥ १७ ॥

कण्वः कुमारस्य वने चक्रे समुदिताः क्रियाः ।
बद्ध्वा मृगेन्द्रांस्तरसा क्रीडति स्म स बालकः ॥ १८ ॥

सत्यधर्मीया — समुदिताः सम्यग्विधिबोधिताः । मृगेन्द्रान् सिंहादीन् ॥ १८ ॥

छलारी — समुचिता ज्ञातकर्मादिक्रियाः । मृगेन्द्रान्सिंहान् ॥ १८ ॥

तं दुरत्ययविक्रान्तमादाय प्रमदोत्तमा ।
हरेरंशांशसंभूतं भर्तुरन्तिकमागमत् ॥ १९ ॥

सत्यधर्मीया — भर्तुर्दुष्यन्तस्यान्तिकं कुमारम् । षड्वर्ष एव बालः स इति च ॥ १९ ॥

छलारी — दुरत्ययमत्येतुमशक्यं विक्रान्तं विक्रमणं यस्य तं कुमारं प्रमदोत्तमा शकुन्तला हरेरंशांशेनांशः पद्मनाभस्तस्यांशेन सम्भूतम् ॥ १९ ॥

यदा न जगृहे राजा भार्यापुत्रावनिन्दितौ ।
शृण्वतां सर्वभूतानां खे वागाहाशरीरिणी ॥ २० ॥

सत्यधर्मीया — एकान्तप्रमेयं लोका अजानन्तो राजा सौन्दर्यभ्रान्तः कान्तेति कां वा जग्राहेति वदेयुरिति यदा न जगृह इति युक्तोऽग्रह इति ज्ञेयम् । यथोक्तम् ।

तच्छ्रुत्वा पौरवो राजा व्याहृतं त्रिदिवौकसाम् ।
पुरोहितममात्यांश्च सम्प्रहृष्टोऽब्रवीदिदम् ।

शृण्वन्त्वेतद्भवन्तोऽस्य । भाषितम् ।

अहं चाप्येवमेवैनं जानामि स्वयमात्मजम् । भवेद्धि शङ्क्यो लोकस्य नैवं शुद्धो भवेदयम् ।

वैशंपायन उवाच ।

तं विशोद्ध्य तदा राजा देवदूतेन भारत ।
हृष्टः प्रमुदितश्चापि प्रतिजग्राह तं सुतम् ।
तां चैव भार्यां दुष्यन्तः पूजयामास धर्मतः ।
अब्रवीच्चैव तां राजा सान्त्वपूर्वमिदं वचः ।
कृतो लोकपरोक्षोऽयं सम्बन्धो वै त्वया सह ।
तस्मादेतन्मया देवि तच्छुद्ध्यर्थं विचारितम् ।
लोको हि मन्यते चैवं स्त्रीभावान्मयि सङ्गतम् ।
पुत्रश्चायं वृतो राज्ये मया तस्माद्विचारितम् ।
यच्च कोऽपि तयाऽत्यर्थं त्वयोक्तोऽयं प्रियं प्रिये ।
प्रणयिन्यविशालाक्षि तत्क्षान्तां ते मया शुभ इति ।

अनिन्दिता चानिन्दितश्च तौ ॥ २० ॥

छलारी — न जगृहे । कदाचिन्मृगयां गतो दुष्यन्तो वने शकुन्तलां दृष्ट्वा गान्धर्वविधिना विवाहं कृत्वा स्वपुरं ययौ । ततः कालविलम्बेन स्मरणाभावात्तां शकुन्तलां नेयं भार्या तज्जन्यं पुत्रं नायं पुत्र इति बुद्ध्या न जगृहे इत्यर्थः ॥ २० ॥

माता भस्त्रा पितुः पुत्रो यस्माज्जातः स एव सः ।
भरस्व पुत्रं दौष्यन्तिं माऽवमंस्थाः शकुन्तलाम् ॥ २१ ॥

सत्यधर्मीया — अशरीरिणी देवताका वाणी किमभाणीदित्यत आह ॥ मातेति । भस्त्रचर्मप्रसेचकेत्यमरात् कार्वागारचुल्लीसल्लीनानलवलीकरणफूत्करणकरणचर्ममयमहात् इतिः सा यथाऽन्याहितगन्धवहं वहति तथेयं माता । न पिता तादृश इति शंसति ॥ पितुः पुत्र इति । कुतोऽयं विशेष इत्यत आह ॥ यस्माज्जातः स एव स इति । आत्मा वै पुत्रनामाऽसीत्यादेः । यज्जाया जाया भवति यदस्यां जायते पुनरिति च । औपचारिकी वाङ्मातुः पुत्र इत्यनौपचारिकी पितुः पुत्र इति वागिति भावः । पुत्रं भरस्व । डु भृञिति ञित्वात्स्वरित ञित इत्यात्मनेपदता । स कोऽहं क इति तं कथयेत्याह ॥ दौष्यन्तिमिति । दुष्यन्तस्य तवापत्यमिति स तथा भरस्व पुत्रमिति वा । अतोऽयं दौष्यन्तिस्तां शकुन्तलां माऽवमंस्थाः स्वैरिणीति माऽवमानय । माऽवमंस्था भरस्वेति तत्राप्यन्वयो ज्ञेयः ॥ २१ ॥

छलारी — यथा कारुशालाचुल्लीस्थिताग्निशक्त्युद्दीपकत्वेनाग्नेराधारमात्रं भस्रा । भस भक्षण दीप्त्योरिति धातोः । तथा माता भर्त्राहितं वीर्यमादाय करचरणाद्यवयवविशिष्टदेहाकारेण परिणम-मानस्य वीर्यस्य प्रथमाधारभूतत्वान्मातुः पुत्रत्वमौपचारिकम् । तर्हि कस्य मुख्यपुत्रत्वमिति तत्राह ॥ पितुरिति । मुख्यपुत्रत्वं पितुरेव । कुत इत्यत आह ॥ यस्मादिति स पितैव पुत्रो जात इति यस्मात्तस्मात्सः पुत्रः पितुरेवेत्यर्थः । आत्मा वै पुत्रनामासीदिति श्रुतेः । तज्जाया जाया भवति यदस्यां जायते पुनरिति च । तर्हि किं कर्तव्यमिति तत्राह ॥ दौष्यन्तिमिति । दुष्यन्तस्य तव पुत्रत्वादेव दौष्यन्तिशब्दवाच्यं पुत्रं भरस्व पोषय । अनेन भरतनाम निरुक्तम् । अतः शकुन्तलां स्वैरिणीति माऽव मंस्था अवज्ञां न कुरु ॥ २१ ॥

रेतोधाः पुत्रं नयति नरदेव यमक्षयम् ।
त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥ २२ ॥

सत्यधर्मीया — एतद्भरणकरणे मम किं प्रयोजनमित्यतो मया किमेतस्येत्यतश्चाह ॥ रेतोधा इति । रेतः स्वोपादानकारणं धत्ते इति स सुतः । पुत्रं पुन्नाम्नो नरकादेः स्वपितृत्रायकं स्वपितरम् । हे

नरदेव अक्षयं नाशरहितं लोकं नयति । अस्य गर्भस्य धाता रतिं विधाय धारकः, त्वं त्वमेव । शकुन्तला यं भवन्तं प्रति सत्यमेवेत्यन्वयो वाऽऽह स त्वं भर भरस्वेत्यन्वयः । रेतोधाः पिता नरदेव यमक्षयं नयतीह वनरक्षयं स्वादिनरगेहं देवक्षयं वैकुण्ठं सत्कर्मानुष्ठापयित्वा । यमक्षयमेवमरक्षणे मृत्युलोकमित्यपि योजयन्ति । यमक्षयं गुरुगृहं वा । यः पुत्रः स रेतोधातारमक्षयं नयतीति श्रुतिं व्यत्यस्य विभक्तिं व्याचक्रुश्च ॥ २२ ॥

छलारी — ननु मम पुत्रेण किं प्रयोजनं स्याद्येन भार्या स्यादिति तत्राह ॥ रेतोधा इति । पुत्रम् पुत्र इति व्यत्ययः कार्यः । सुप्तिङुपग्रहलिङ्गनराणामिति महाव्याकरणसूत्रात् । रेतोधा रेतोधातारं पितरम् । सप्तसु प्रथमेति सूत्रात् । यमक्षयम् । अत्रापि व्यत्ययः । अक्षयोऽनन्तो लोकस्तं वैकुण्ठादिकं नयति प्रापयति । भो नरदेव दुष्यन्त । पुत्रं स्वीकुर्विति शेषः । मयाऽनाहितं गर्भं कथं पुत्रं वदसीति तत्राह ॥ त्वं चेति । चशब्द एवार्थे । त्वमेवास्य गर्भस्य धाताऽऽधानकर्ता । क आहेति तत्राह ॥ सत्यमिति । शकुंतला सत्यं यथार्थमेवाह नानृतम् । अथवा । अस्वीकारेऽनर्थमाह ॥ रेतोधा इति । रेतोधाः पिता भवान् पुत्रं यमक्षयं मृत्युलोकं नयति मृतप्रायं करोति । त्वया पुत्रत्वेनास्वीकारात्तेन पुत्रहत्याख्यदोषप्राप्तिस्तव स्यादतस्तद्भयादपि स्वीकुर्वित्यर्थः । रेतोधाः पुत्रो नयति नरदेव यमक्षयमिति पाठे पुत्रो रेतोधा यमक्षयाद्यमलोकाद्रेतोधातारं पितरं नयति तारयतीत्यर्थः ॥ तथा च श्रुतिः ॥ पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः । तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति । ततश्च दुष्यन्तो राजा भार्यापुत्रौ स्वीकृतवानिति ज्ञेयम् ॥ २२ ॥

पितर्युपरते सोऽभूच्चक्रवर्ती महायशाः ।
महिमा गीयते तस्य हरेरंशभुवो भुवि ॥ २३ ॥

सत्यधर्मीया — पितरि दुष्यन्ते उपरते मृते सति । भरतो भरेतिशब्दो यद्विषयोऽस्ति स भरतः । मत्वर्थे तः । चक्रवर्ती महायशाश्चाभूत् । हरेर्नारायणस्यांशात्पद्मनाभाद्भवतीति भूस्तस्य । नान्तो वा टाबन्तो वा । महिमा भुवि गीयते ॥ २३ ॥

छलारी — पितरि दुष्यन्ते उपरते मृते सति स दुष्यन्तपुत्रो भरस्वेत्युक्तत्वाद्भरतो भरेण हरिणा ततत्वाद्वा । चक्रवर्ती बभूवेति शेषः । तस्य महिमा तदप्येते श्लोका अभिगीता इत्यादि बव्हृचश्रुत्या हरेरंशेन सह भवतीत्यंशभुवस्तस्य ॥ २३ ॥

चक्रं दक्षिणहस्तेऽस्य पद्मकोशश्च पादयोः ।
ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराट् प्रभुः ॥ २४ ॥

सत्यधर्मीया — अस्य दक्षिणहस्ते चक्रं तद्रेखा । ननु दक्षिणे हस्ते चक्रं वायुलक्षणम् । यथोक्तं बृहदारण्यकभाष्ये । सहस्रारेण चक्रेण चिह्निता दक्षिणे करे । वायुत्वयोग्यकेति । तथा, अष्टकाद्दषयः प्रोक्तास्तदूनाश्चक्रवर्तिनः इत्युक्तेः कथं चक्रवर्तिन एतस्य चक्रं कर इति चेन्न । सहस्रारेत्युदीरणेन किञ्चिदरकारिणः सर्वत्र तरतमभावेनाभ्यनुज्ञानान्न विरोधः । पादयोर्द्वयोः पद्मकोशः प्राग्वत् । महाभिषेकेणेन्द्रेणाभिषिक्तोऽधिराण्महाराज ईजे ॥ २४ ॥

छलारी — तत्र लिङ्गमाह ॥ चक्रमिति । चक्रं चक्ररेखाः पद्मकोशस्तस्य रेखाः महाभिषेकेण महाभिषेकविधिनाऽभिषिक्तोऽधिराट् प्रभुर्येऽधिराजा राजाधिराजास्तेषां प्रभुरित्यर्थः ॥ २४ ॥

पञ्चपञ्चाशतैर्मेध्यैर्गङ्गायामनु वाजिभिः ।
दीर्घतमसं पुरोधाय यमुनायामनु प्रभुः ॥ २५ ॥

सत्यधर्मीया — एतेन ह वा इत्यष्टमपञ्चमाध्यायगतत्रयोविंशतिखण्डानुसारिणश्चेमे श्लोका इति खण्डो व्याक्रियते । ततश्चायं खण्डः । एतेन ह वा ऐन्द्रेण महाभिषेकेण दीर्घतमा मामतेयो भरतं दौष्यन्तिमभिषिषेच । तस्मादु भरतो दौष्यन्तिः सम्मतं सर्वतः पृथिवीं जयन् पर्यायाश्वैरु च मेध्यैरीजे । तदप्येते श्लोका अभिगीताः ।

हिरण्येन परिवृतान् कृष्णाञ्छुक्लदतो मृगान् ।
मृष्णारे भरतोऽददाच्छतं बद्धानि सप्त च ॥ १ ॥
भरतस्यैष दौष्यन्तेरग्निः साचीगुणे चितः ।
यस्मिन्सहस्रं ब्राह्मणा बद्धशो गा विभेजिरे ॥ २ ॥
अष्टासप्तति भरतो दौष्यन्तिर्यमुनामनु ।
गङ्गायां वृत्रघ्नेऽबध्नात्पञ्चपञ्चाशतं हयान् ॥ ३ ॥
त्रयस्त्रिंशच्छतं राजा अश्वान् बद्ध्वा य मेध्यान् ।
दौष्यन्तिरत्यगाद्राज्ञो मायां मायावत्तरः ॥ ४ ॥
महाकर्म भरतस्य न पूर्वे नापरे जनाः ।
दिवं मर्त्य इव हस्ताभ्यां नोदापुः पञ्च मानवा ॥ ५ ॥ इति ।

ततश्चायमर्थः । मामतेयो ममताया अपत्यं । स्त्रीभ्यो ढक् । दौष्यन्तिं भरतमभिषिषेच महाभिषेकसहितमकरोत् । तस्मात्तदभिषेकमाहात्म्यात् । उ चेति निपातसमुदायः समुच्चयार्थे । सम्मतमिति सम्मतादित्यर्थेऽव्ययम् । सम्मतं परिण्यविशन्तेति बृहदारण्यकभावबोधे सम्मतं समन्तत

इति व्याख्यातत्वात् । सर्वतः सर्वां पृथिवीं जयन् । पर्याय पर्यागत्य मेध्यैरश्वैरीजे । ततस्तद्भरतविषयेऽप्येते उदाहरिष्यमाणाः श्लोका अभिगीताः । तत्र प्रथममाह ॥ हिरण्येनेति । मृगा हि एणाः । मृगः पशौ कुरङ्गे च करिनक्षत्रयोरिति विश्वः । कृष्णांस्तद्वर्णान् शुक्लदतः शुभ्रदन्तान् हिरण्येन सुवर्णेन परिवृतान् तद्भूषितानिति यावत् । मृष्णारे देशविशेषे । बद्वशब्दो वृन्दपर्यायः । वृन्दशब्दश्च शतकोटिवाची । एकं दशशतं च सहस्रं चायुतं नियुतं तथा । प्रयुतकोट्यर्बुदं स्थानं स्थानाद्दशगुणं (बद्वं) स्यादित्याकरकाराः । बद्वानि शतकोटिसङ्ख्यानि । शतसप्तकं चाददाद्दत्तवान् ॥ १ ॥ द्वितीयं श्लोकमाह ॥ भरतस्येति । दौष्यन्तेः भरतस्यैषोऽग्निः साचीगुणे देशविशेषे कृतवान् । यस्मिंश्चयने ब्राह्मणा बद्वशः प्रातिस्विकं कोटिकोटिसङ्ख्या गा विभेजिरे विभज्य कृतवन्तः ॥ २ ॥ तृतीयं श्लोकमाह ॥ अष्टेति । अश्वमेधैरीज इत्युक्तं तत्राश्वसङ्ख्या चोच्यते । भरतो यमुनामनु । अस्मद्व्याख्यानं भारतानुगुणम् । तथा हि द्रोणपर्वणि ।

हैरण्यानश्वान्द्विरदान्रथानुष्ट्रानजाविकान् ।
दासीदासं धनं धान्यं गाः सवत्साः पयस्विनीः ।
ग्रामान्गृहांश्च क्षेत्राणि विविधांश्च परिच्छदान् ।
यस्य यूपः शतव्यामः परिणाहेन काञ्चनः ।

कोटिशतायुतांश्चैव ब्राह्मणेभ्यो ह्यमन्यतेति । चतुर्दशलक्षेत्यादिविवरणं तद्दुर्दशात इति ज्ञेयम् । कालिन्दीकूलेऽष्टसप्ततिहयानबध्नात् बबन्ध । तावद्भिरर्वद्भिरीज इति भावः । यतो गङ्गायां विष्णुपद्यां तत्रापि वृत्रघ्ने क्षेत्रविशेषे पञ्चपञ्चाशत् पञ्चोत्तरपञ्चाशत्सङ्ख्यान्हयान् अबध्नात् ॥ ३ ॥ आहत्य तत्सङ्ख्यां चतुर्थेन श्लोकेनाह ॥ त्रयस्त्रिंशच्छतमिति ॥ ७८+५५=१३३ ॥ त्रयस्त्रिंशदुत्तरशतसङ्ख्यान्मेध्यान्मेधार्हाच्छुद्धानिति यावत् । अश्वान् बद्ध्वा बन्धनं कृत्वा मायावतारो मायावच्छ्रेष्ठो राज्ञः स्ववैरिराजवर्गस्य मायां स्वव्यामोहिनीम् । अत्यगादतिचक्राम । मायावत्तरो वैचित्र्यवदुत्तमो राजा नित्यं प्रजारञ्जनो हरेर्मायामत्यगादिति ॥ ४ ॥ महाभिषेकमहिमानमुक्त्वा पञ्चममेव प्रपञ्चयित्वोपसंहरति ॥ महाकर्मेति । भरतस्य पूर्वे भरतात्पुरातना अपरे तदनन्तरजा जनाः पञ्च मानवाश्चत्वारो वर्णा निषादाश्च पञ्चमाश्चेति पञ्चमानवा नोदापुर्महाकर्म नाप्नुवन्तः । तत्र दृष्टान्तमाचष्टे । मर्त्यो हस्ताभ्यां दिवं स्वर्गं यथा स्पृष्टुं न शक्तस्तथैतत्कर्म केऽपि नाप्नुवन्निति भावः ॥ ५ ॥

अथैतच्छ्रुतिप्रतीकश्लोकार्थः । दीर्घतमसं मामतेयं पुरोधाय पुरोहितं वाऽभिषेक्तारमृत्विजं वा कृत्वा यमुनायामनु तत्तीरेऽष्टसप्ततिसङ्ख्याकानश्वान्बबन्ध । वसुदानादि प्रददे दत्तवान् । गङ्गायामनु तत्तीरे वृत्रघ्ने पञ्चपञ्चाशतैर्मेध्यैर्वाजिभिरीजे ॥ २५ ॥

छलारी — गङ्गायामनु गङ्गातीरे पञ्चपञ्चाशतैः पञ्चभिः पञ्चाशता च पञ्चोत्तरपञ्चाशत्संख्याकैरित्यर्थः । वाजिभिरश्वैरीजे । दीर्घतमसं पुरोधाय पुरोहितं कृत्वा । पुनर्यमुनायामनु यमुनातीरेऽष्टसप्ततिसंख्याकान् अश्वान् बबन्ध । पशुबन्धं कृतवानित्यर्थः । किं कुर्वन् । वसु धनं प्रकर्षेण प्रददे प्राददत् । भरतस्येदं सामर्थ्यमाह ।। भरतस्येति । कैकयीपुत्रव्यावृत्त्यर्थं दौष्यन्तेरिति । भरतस्य यज्ञेऽग्निः साचीगुणे चितः साचिव्यगुणे कृतः साचिव्यं कृतवानित्यर्थः । अग्निमथने कृते सति शीघ्रं प्रकटीबभूवेति भावः ।। २५ ।।

अष्टसप्तति मेध्याश्वान् बबन्ध प्रददे वसु ।
भरतस्य हि दौष्यन्तेरग्निः साचीगुणे चितः ।
सहस्रं वद्वशो यस्मिन् ब्राह्मणा गा विभेजिरे ।। २६ ।।

सत्यधर्मीया — साचीगुणे समीचीनदेशविशेषे चितः । सहस्रं वद्वश इति सुपाठः । द्वन्द्वश इति तु लेखकमहिमा । सर्वत्र श्रौतपदानुवादादत्रेति । खण्डार्थदशावर्णितावद्वशोऽर्थादयमेकस्तत्पदार्थः सम्भवीति केचित् । तथा हि । चतुरशीत्यधिकैस्त्रिदशसहस्रैरेकं वद्वम् । सप्ताधिकशतवद्वानि । इमामेव सङ्गृह्य शुको वक्ष्यति । एवं चतुर्दशलक्षणासप्ताधिकशतभागो वद्वम् । ततो बव्हल्पाच्छसिति स्वार्थे शसि सङ्ख्यापूर्वकत्वाद्वीप्सायां वा वद्वश इति भवतीति । ब्राह्मणा गा विभेजिरे विभज्य गृहीतवन्तः ।। २६ ।।

छलारी — यस्मिन्यज्ञे ब्राह्मणा द्वन्द्वशः सहस्रं द्विसहस्रं गा विभेजिरे विभज्य स्वीकृतवन्तः ।। ।। २६ ।।

त्रयस्त्रिंच्छतं ह्यश्वान् बद्ध्वा विस्मापयन् नृपान् ।
दौष्यन्तिरत्यगान्मायां देवानां पूरुमायया ।। २७ ।।

सत्यधर्मीया — त्रयस्त्रिंशाच्छतं त्रयस्त्रिंशदुत्तरमेकशतमश्वान्बध्वा नृपांस्तद्वशवर्तिनो राज्ञः । राज्ञ इत्येकवचनं बहुवचनार्थं सद्देववाचीति सूचितं भवति । मायावत्तर इति विशेषणीभूतमायायां श्रौततरबर्थभूतं पुरुत्वमन्वेतीति द्योतयति पूरुमाययेत्यनेन ।। २७ ।।

छलारी — दौष्यन्तिर्भरतस्तस्मिन्यज्ञे त्रयस्त्रिंशच्छतमश्वान् बद्ध्वा नृपान्विस्मापयन्विस्मितवतः कुर्वन् पुरुमायया महता महिम्ना देवानां मायां निजभोगेच्छान् अत्यगात्कांक्षितादप्यधिकं ददावित्यर्थः । यद्वा देवानामपि मायां वैभवं स्वमहिम्नाऽत्यगादशेत ।। २७ ।।

मृगान् शुक्लदतः कृष्णान् हिरण्येन परिष्कृतान् ।
अदात् कर्मणि मृष्णारे नियुतानि चतुर्दश ॥ २८ ॥

सत्यधर्मीया — मृगान् गजान् । नियुतानि चतुर्दश । प्राचीनविवरणपक्षे स्वतन्त्रमेतत्सङ्ख्या पृथग्गजदानमिति मन्तव्यम् । मृष्णारे क्षेत्रविशेषे । कर्मणि स्वकृतक्रतुरूपे ॥ २८ ॥

छलारी — शुक्लदतः शुक्लदन्तान्हिरण्येन परिष्कृतान् अलंकृतान् कृष्णान्मृगान् गजान्वा । भद्रो मृगो गजश्चेति हलः । अदात् । मृष्णारे तन्नामके कर्मणि कस्मिंश्चित्कर्मविशेषे तीर्थविशेषे वा । नियुतानि लक्षाणि ॥ २८ ॥

भरतस्य महत्कर्म न पूर्वे नापरे नृपाः ।
नोदापुर्नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा ॥ २९ ॥

सत्यधर्मीया — अपरे भविष्यन्तः बाहुभ्यां त्रिदिवं यथा न प्राप्नोति मर्त्यस्तथा भरतस्य महत्कर्म पूर्वे नापुरपरे न प्राप्नुवन्ति ॥ २९ ॥

छलारी — पूर्वे नृपा महत्कर्म बव्हश्वमहीदानादिरूपं महत्कर्म नोदापुर्न प्रापुः । अपरे पश्चात्तना नृपाश्च न प्राप्स्यन्तीदानीन्तना न प्राप्नुवन्तीति किमु वक्तव्यम् । तत्र दृष्टान्तमाह ॥ बाहुभ्यामिति । अग्निष्टोमादिसाधनमन्तरेण केवलबाहुभ्यां स्वर्गं यथा न गच्छन्ति तद्वदित्यर्थः ॥ २९ ॥

किरातहूणान् यवनावन्ध्रान् कङ्कान् कषान् शकान् ।
अब्रह्मण्यान् नृपांश्चाहन् म्लेच्छान् दिग्विजयेऽखिलान् ॥ ३० ॥

सत्यधर्मीया — किरातादयो म्लेच्छविशेषाः । अब्रह्मण्यान् ब्राह्मणविरोधिनो नृपांश्चेत्यखिलान् दिग्विजये तत्सम्पादनाकालेऽहन् हतवान् ॥ ३० ॥

छलारी — किरातादयो नीचजातिविशेषाः । तान् अब्रह्मण्यान् ब्राह्मणविरोधिनो नृपांश्चाहनद्धतवान् ॥ ३० ॥

जित्वा पुराऽसुरान् देवा येन स्वौकांसि भेजिरे ।
देवस्त्रियो रसां नीताः पणिभिः पुनराहरत् ॥ ३१ ॥

सत्यधर्मीया — येन भरतेन सहायेन देवा असुरान् जित्वा स्वौकांसि स्वानि धामानि भेजिरे। स पणिभिस्तन्नामकैर्दैत्यैः। यथोक्तं ऋग्भाष्यटीकाटिप्पणे। पणिनेव गावः पणिविशेषेण बलेन पणिनामकदैत्यानां मध्य इति। रसातलं नीता देववनिताः पुनः आहरदानीतवान्॥ ३१॥

छलारी — विक्रमान्तरं दर्शयति॥ जित्वेति। पुरा दिग्विजयकाले येन सहायभूतेन भरतेनासुरान्स्वयं जित्वा स्वौकांसि स्वस्वस्थानानि प्रापुः। असुरजयो न भरतकर्तृकः। समानकर्तृकयोः पूर्वकाले क्त्वेत्युक्तत्वात्। स भरतो नाम्ना पणिभिरसुरैः रसातलं नीता देवस्त्रियः पुनराहरदानीतवान्॥ ३१॥

सर्वान् कामान् दुदुहतुः प्रजानां तस्य रोदसी।
समास्त्रिनवसाहस्रीर्दिक्षु चक्रमवर्तयत्॥ ३२॥

सत्यधर्मीया — तस्य भुवं पालयतः सतः सर्वान्कामान्। रोदसी द्यावापृथिव्यौ। प्रजानां दुदुहतुः। यश्च त्रिनवसहस्रीः समाः सप्तविंशत्सहस्रशरदो दिक्षु चक्रमाज्ञाम्। चक्रमाज्ञारथाङ्गयोरिति। चक्रम् ग्रामजालमवर्तयत्प्रवर्तयामास। अपीपलेदिति वा। चक्रं सैन्यरथाङ्गयोर्ग्रामजाल इति विश्वः॥ ३२॥

छलारी — त्रिनवसाहस्रीः समाः सप्तविंशत्सहस्रवत्सरान् रोदसी द्यावाभूमी तस्य राज्ये दुदुहतुर्दोहनं चक्रतुः। स भरतश्चक्रमाज्ञां सर्वदिक्ष्ववर्तयत्प्रवर्तयामास। चक्रमाज्ञारथांगयोरित्यभिधानम्॥ ३२॥

स सम्राट् लोकपालानामैश्वर्यमधिराट्श्रियम्।
चक्रं चास्खलितं प्राणान् मृषेत्युपरराम ह॥ ३३॥

सत्यधर्मीया — सम्राण्महाराजोऽधिराट्श्रियमधिराजां श्रीस्ताम्। लोकपालानां चैश्वर्यमस्खलितं तत्त्वेन प्रतीयमानं चक्रं राष्ट्रं च। राष्ट्रस्त्रयोरपीति तत्रैवोक्तेः। प्राणानिन्द्रियाणि मृषा नाशशिरस्काणीति मत्वोपररामोपरतोऽभूत्। निस्पृहोऽभूदिति भावः। हेति श्रुत्यादिबोधितत्वादिदमवश्यानुष्ठेयमिति सूचयति। मृषेति चास्थिरतार्थकवृथेति वा। यत्र त्रिसर्गो मृषा भित्वा मृषाश्च इत्याद्युक्तवक्ष्यमाणतात्पर्यादिदिशा ज्ञेयम्॥ ३३॥

छलारी — भरतस्य वैराग्यप्रकारमाह॥ स इति। सम्राट् चक्रवर्ती लोकपालानामिन्द्रादीनामैश्वर्यं स्वर्गाद्याधिपत्यमधिराट्श्रियं साम्राज्यलक्ष्मीमस्खलितं केनाप्यप्रतिहतं चक्रं गजतुरगादिसैन्यम्। चक्रं

सैन्ये जलावर्त इत्यादेः । प्राणान् बहुवचनमाद्यर्थे । इन्द्रियादीन्मृषा नाशशिरस्काणीति मत्वोपररामोपरतव्यापारोऽभूत् । हेत्यनेन आब्रह्मस्तंबपर्यन्तमसारं चाप्यनित्यकमित्यादिवाक्यप्रसिद्धिं सूचयति ॥ ३३ ॥

तस्यासन् नृप वैदर्भ्यः पत्न्यस्तिस्रः सुसंमताः ।
जघ्नुस्त्यागभयात् पुत्रान्नानुरूपा इतीरिते ॥ ३४ ॥

सत्यधर्मीया — वैदर्भ्यो विदर्भराजगर्भजाः सुसम्मता आचारेण रुचा च रामाः, पुत्रा नानुरूपा न मे योग्या इतीरिते सति । एतद्दौरात्म्येनास्माकमपि त्यागो भवेदिति भयात्पुत्रान् संजघ्नुर्विष-भेषजादिना सुकुमारान्मारयामासुः ॥ ३४ ॥

छलारी — इदानीं तस्य सन्तानप्रकारमाह ॥ तस्येति । वैदर्भ्यो विदर्भराजपुत्र्यः । नानुरूपा इतीरिते एते मत्सदृशा न भवन्तीति राज्ञेरिते सति व्यभिचारशङ्कया भयात्पुत्रान्जघ्नुरित्यन्वयः ॥३४॥

तस्यैवं वितथे वंशे तदर्थं यजतः सुतम् ।
मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः ॥ ३५ ॥

सत्यधर्मीया — तस्यैवं वंशे सन्ताने वितथे उत्सन्ने सति मरुत्स्तोमेन यागेन मारुतेन तदर्थं सुतार्थे यजतस्तत्पूजां कुर्वतो मरुतस्तुष्टा भरद्वाजं सुतं ददुः पुत्रत्वेन दत्तवन्तः ॥ ३५ ॥

छलारी — नन्वेवं चेद्भरतस्य पुत्राभावेन परलोकाभावः प्रसक्त इत्यत आह ॥ तस्येति । भरतस्य वंशे एवं वितथे उत्सन्ने सति तदर्थं पुत्रार्थं मरुत्स्तोमनामकयागेन यजतस्तस्य प्रसन्नाः सन्तो मरुतो भरद्वाजनामकं पुत्रं उपाददुः पुत्रत्वेन समर्पयामासुः ॥ ३५ ॥

अन्तर्वत्न्या भ्रातृपत्न्या मैथुनाय बृहस्पतिः ।
प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् ॥ ३६ ॥

सत्यधर्मीया — तस्य नामेदं कुतः कस्मात्कथं जात इत्यत आह ॥ अन्तर्वत्न्येति । भ्रातृपत्न्योचथ्यभार्यया स चाग्रजः । यथोक्तमादिपर्वणि ।

उचथ्यस्य यवीयांस्तु पुरोधास्त्रिदिवौकसाम् ।
बृहस्पतिर्महातेजा ममतामन्वपद्यत ।

उवाच ममतां तं तु देवरं वदतां वरम् ।
अन्तर्वत्न्यप्यहं भ्रातुस्तव ज्येष्ठस्य धीमतः । इति ।

भानुरपि देवरशब्दव्याख्यायां द्वे पत्युः कनिष्ठभ्रातुरिति स्वामीत्याह । तन्मैथुनाय प्रवृत्तो बृहस्पतिस्तया वारितो निवारितः । देवराच्च सुतोत्पत्तिरित्यादेः । सा वारिजाक्ष्यपि कुतोऽवारयन्न वरयामासेत्यत आह ॥ अन्तर्वत्न्येति । गर्भं पादेनाध्वानरुन्धानं शप्त्वाऽन्धो भवेति । वीर्यं रेतो योनिद्वार्यवासृजत् तत्याज स्थापितवान् । तेन च दीर्घतमसोऽन्यः कुमारो जातः ॥ ३६ ॥

छलारी — मरुतां तदागमनप्रकारः कथं कस्मादस्य भरद्वाजाख्यं येन तन्नामयुक्तः स्यादतस्तत्ज्ञापनाय तदुक्तिप्रकारमाह ॥ अन्तर्वत्न्येति । अन्तर्वत्न्या गर्भिण्या भ्रातुरुचथ्यस्य पत्न्या चौर्येण मैथुनाय प्रवृत्तो बृहस्पतिरुचथ्याहितगर्भच्छेदनं दीर्घतमसा निवारितः सन् क्रोधेनान्धो भवेति गर्भस्थं शप्त्वा तस्यां वीर्यं बलान्यषिञ्चत् । तच्छापाद्गर्भस्थो दीर्घतमा अन्धो बभूव । तेन च तद्वीर्यं पादप्रहारेण योनेर्बहिर्भूमौ पतितम् । ततः सद्य एव कुमारोऽभवत् ॥ ३६ ॥

तं त्यक्तुकामां ममतां भर्तुस्त्यागविशङ्किताम् ।
नामनिर्वचनं तस्य श्लोकमेतं जगुः सुराः ॥ ३७ ॥

सत्यधर्मीया — तं बृहस्पतिपातितरेतोजातं भर्तुस्त्यागेन भाविना विशङ्किताम‍तस्त्यक्तुकामां ममतां प्रति तस्य जातपोतस्य नामनिर्वचनं नाम्नो निर्वचनं निरुक्तिर्यस्मिन्स तम् । एतं श्लोकं सुरा जगुः ॥ ३७ ॥

छलारी — ततः किमभूदिति तत्राह ॥ तमिति । तं परवीर्यजं कुमारं त्यक्तुकामामुचथ्याख्य-भर्तृत्यागविशंकितां ममतां प्रति सुरा एनं श्लोकं जगुः । एतच्छ्लोकाभिधेयमकथयन्नित्यर्थः । किमर्थं जगुरित्यत आह । तस्य सुतस्य नामनिर्वचनमिति नाम निरुच्यते येनेति स तथा तम् । तन्नामनिर्वचनेनैव भर्तस्त्यागशङ्कामपा कर्तुमित्यर्थः ॥ ३७ ॥

मूढे भर द्वाजमिमं भरद् वाजं बृहस्पतेः ।
त्राता तु दुःखात् पितरौ भरद्वाजस्ततस्त्वयम् ॥ ३८ ॥

तात्पर्यम् — द्वाजमिमं भर । उचथ्यस्य क्षेत्रजो बृहस्पतेर्जात इति । द्वयोर्जातत्वाद्द्वाजः । बृहस्पतेर्वाजः प्रजासन्ततिर्येन भृता बृहस्पतेर्भरद्वाजः । भरद्वाजो मरुद्भिश्च भृतो जातो द्वयोर्यतः। इति पाद्मे ॥ ३८ ॥

सत्यधर्मीया — मूढे भरद्वाजमिममिति श्लोके द्विर्भरद्वाजमिति श्रूयते । अतः पुनरुक्तिः । न प्रतीयते च बृहस्पतेरित्यस्यान्वयः । सुरा आहुश्च यदर्थं श्लोकं जगुश्च तन्नामनिर्वचनमिति न स्फुटं ज्ञायत इत्यतोऽन्वयप्रदर्शनपूर्वकं स्वयं व्याख्याय मानं चोदाहरति ॥ द्वाजमिमं भरेति । कथं द्वाजत्वमित्यत आह ॥ उचथ्यस्येति । क्षेत्रं भार्या तज्ज्ञो बृहस्पतेर्वीर्यादिति ममताया बृहस्पतेश्चेति द्वयोर्जातत्वाद् द्वाजः तम् । द्वितीयपादं व्याचष्टे ॥ बृहस्पतेरिति । बृहस्पतेर्वाजः प्रजासन्ततिर्येन भृता स बृहस्पतेर्भरन्वाजमिति स तथेति निर्वचनानन्तरम् । मरुद्भिर्द्वाज इति यतो द्वयोर्जातः स इति मरुद्भिश्च भृतो भृत बृहस्पतिवाजश्च ततो भरद्वाज इति मानार्थः । ऐतरेयोपनिषदि च । एष उ एव बिभ्रद्वाजः प्रजा वै वाजस्तस्या एष यद्बिभर्ति तस्माद्भरद्वाजस्तस्माद्भरद्वाज इत्याचक्षत एतमेव सन्तमिति ॥ ततश्चायं श्लोकार्थः ॥ हे मूढे इमं कुमारं पोषय । द्वाजं द्वाभ्यां त्वत्तो बृहस्पतेरिति जातम् । भरणे निमित्तमेतदुत्तरत्र वक्ष्यमाणे चेति ज्ञेयम् । बृहस्पतेर्भर द्वाजं सन्ततिं चेति भरद्वाजस्तं । पितरौ त्वां बृहस्पतिं च त्रातेत्यर्थकथनं भर्तेति भरन् त्राता दुःखात्ततोऽप्ययं भरद्वाजेति नामनिर्वचनानि वा ॥ ३८ ॥

छलारी — जगुः सुरा इत्युक्तमेव विवृणोति ॥ मूढ इति । हे मूढे । द्वाजं द्वाभ्यामुचथ्यबृहस्पतिभ्यां जातमिमं कुमारं भर पोषय । भृञ् भरण इति धातोः । कथम्भूतम् । बृहस्पतेर्वाजं सन्ततिं भरद्भरतं वंशकारकमित्यर्थः । प्रजा वै वाज इति श्रुतेः । वाजशब्दः सन्तानवाचकः । द्वाजं भरेत्यस्माभिरुक्तत्वाद्बृहस्पतिसन्ततिभरत्वाच्च भरद्वाजः । एवं निमित्तद्वयेन भरद्वाजशब्दवाच्य इत्यर्थः । अयं कुमारः पितरावुचथ्यबृहस्पतिनामकौ दुःखात्त्राता भविष्यतीत्येवं निर्वचनरूपमेनं श्लोकं जगुरिति पूर्वेणान्वयः । अत्र विशेषस्तु तात्पर्यानुसारेणावगन्तव्यः ॥ ३८ ॥

चोद्यमाना सुरैरेवं मत्वा तं देवमात्मजम् ।
व्यसृजन्मरुतोऽबिभ्रन् दत्तोऽयं वितथेऽन्वये ॥ ३९ ॥

इति श्रीमद्भागवते नवमस्कन्धे सप्तदशोऽध्यायः ।

सत्यधर्मीया — एवं सुरैर्देवैश्चोद्यमाना ममता तं देवं द्योतमानमात्मजम् । वितथमिति पाठे 'तथा दीर्घतमोवन्नेति वितथो जारजस्तमित्यर्थः । व्यसृजत्पतिभीता तत्याज । तदा मरुतः प्राणमात्रावशिष्टं मात्रा विसृष्टं स्वकार्यत्वादबिभ्रन् बभरुर्भृतत्वान्मरुद्भिःभरः स चासौ द्वाजश्चेति

निर्वचनान्तरं ज्ञेयम् । भरद्वाजेत्यत्र भरेति तिङन्तस्य सुबन्तेन समासः । सहसुपेत्यनेन । पर्यभूषदनुव्यचलत् । स च छन्दस्येवेत्युक्तेस्तद्वज्ज्ञेयः ॥ ३९ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे सप्तदशोऽध्यायः ।

छलारी — सा ममता सुरैरेवं चोद्यमानाऽपि भरेति प्रेर्यमाणाऽपि देवं द्योतमानं कुमारमात्मजम्। बृहस्पतेरिति शेषः । मत्वा भर्तृत्यागशङ्कया तं व्यसृजत् । ततो मरुतस्तद्वाजं गर्भमबिभृन् भृतवन्तोऽपोषयन्नित्यर्थः । अनेन मरुद्भिर्भृतत्वाद्भरो द्वाभ्यां जातत्वाद्वाजो भरश्चासौ द्वाजश्चेति भारद्वाज इति भारद्वाजशब्दस्य निर्वचनान्तरं सूचितं भवति। भृत्वा किं कृतं तैरिति तत्राह ॥ दत्त इति । भरतस्यान्वये वितथे सतीति मरुद्भिरयं भरताय दत्तः । पुत्रत्वेनेति शेषः । अस्य भरतपुत्रत्वानन्तरं वितथेति नामान्तरमपि ज्ञातव्यम्। वितथस्य सुतान्मन्योरित्युत्तरवचनाच्चेति ॥३९॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे सप्तदशोऽध्यायः ।

॥ अथ अष्टादशोऽध्यायः ॥

श्रीशुक उवाच —

वितथस्य सुतान्मन्योर्बृहत्क्षेत्रो जयस्ततः ।
महावीर्यो नरो गर्गः सङ्कृतिस्तु नरात्मजः ॥ १ ॥

सत्यधर्मीया — वितथ इत्यपि भरद्वाजस्य नाम । ततो बृहत्क्षेत्रात्। ततो जयात् महावीर्यो नरो गर्ग इति जाताः । सङ्कृतिर्नरात्मजः । स चापि वितथः पुत्राञ्जनयामास पञ्च वै । सुहोत्रं च सुहोतारं गयं गर्गं तथैव च । कपिलं च महात्मानमिति हरिवंशोक्तिश्च मन्युव्यतिरिक्तसुतपञ्चकपरेति न विरोधः ॥ १ ॥

छलारी — इदानीं दौष्यन्तिभरतस्यान्वये वितथे सति दत्तत्वाद्वितथसंज्ञो भरद्वाजो ब्राह्मणोऽपि भरतस्य दत्तपुत्रो जात इति तद्वंशोऽनुक्रम्यते ॥ वितथस्येति । ततो मरुद्भ्यः सुहृदानन्तरं तस्य वितथस्य सुतो मन्युस्तस्माद्बृहत्क्षेत्रो जयो महावीर्यो नरो गर्गश्चेति पञ्चपुत्रा बभूवुः ॥ १ ॥

गुरुश्च रन्तिदेवश्च सङ्कृतेः पाण्डुनन्दन ।
रन्तिदेवस्य हि यश इहामुत्र च गीयते ॥ २ ॥

सत्यधर्मीया — गुरू रन्तिदेवश्चेति द्वौ सङ्कृतेर्जातौ । न केवलमिह किन्त्वमुत्र च गीयते । यथोद्रिक्तारिमारणेन रणे तथा वित्तवितरणेनापि यशो ज्ञेयम् । यथोक्तं द्रोणपर्वणि षोडशराजकीये ।

यस्य द्विशतसाहस्रा आसन्सूदा महात्मनः ।
गृहानभ्यागतान्विप्रानतिथीन्परिवेषकाः ।
वेदानधीत्य धर्मेण यश्चक्रे द्विषतो वश इत्यादि ॥ २ ॥

छलारी — इति सङ्कृतेर्द्वौ पुत्रौ भरतात्पंचमो रन्तिदेवस्तस्य माहात्म्यं भगवन्महिमोपचितत्वात्कथयति ॥ रन्तिदेवस्येत्यादिना ॥ २ ॥

वीतवित्तस्य ददतो लब्धं लब्धं बुभुक्षतः ।
निष्किञ्चनस्य धीरस्य सकुटुम्बस्य सीदतः ॥ ३ ॥

सत्यधर्मीया — लब्धं लब्धं राज्यादिनेवाज्यादितः । वीतं परिवीतं वित्तं यस्य तस्य प्राग्ददतोऽतो निष्किञ्चिनस्य । निर्न विद्यते किञ्चन यस्य स तस्य । बुभुक्षतः । तथाऽप्यस्खलच्चेतस्क इत्याह ॥ धीरस्येति । न तदनुसारिण इतर इति नेत्याह । सकुटुम्बस्य । सीदतः शिथिलाङ्गस्य ॥३॥

छलारी — कीदृशं यशः । शत्रुजयाल्लब्धमुतान्यस्मादिति तत्राह ॥ वीतवित्तस्येति । दरिद्रस्य ददतो दानं कुर्वतो धनाभावे दानं कथं घटत इति तत्राह ॥ लब्धमिति । स्वस्य बुभुक्षाभावाद्ददाति न तु कर्तव्यत्वेनेति तत्राह ॥ बुभुक्षत इति । स्वयमकृपणस्य कथं दानं घटत इति तत्राह ॥ निष्किञ्चनस्येति । अकृपणत्वं कथमवगतमिति तत्राह ॥ धीरस्येति । धिया हरौ रमते न तु स्त्रियेति धीरः । तस्यैकाकिनः का चिन्तेति तत्राह ॥ सकुटुम्बस्येति । सीदत आहाराभावेन सीदतः शीर्णस्येत्यर्थः ॥ ३ ॥

व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल ।
घृतपायससंयावं तोयं प्रातरुपस्थितम् ॥ ४ ॥

सत्यधर्मीया — जलमप्यपिबतोऽष्टचत्वारिंशदहानि व्यतीयुः किल । अहःपदेन दिनानि ग्राह्याणि । दिनानीति पाठोऽतिसरलः । घृतपायससंयावं घृतं च पायसं क्षीरपक्वमन्नं च । ताभ्यां सहितः संयावो गोधूमान्नं च यस्य तत् । तोयं प्रातरुपस्थितम् ॥ ४ ॥

छलारी — शीर्णत्वे निमित्तमाह ।। अपिबत इति । जलपानमकुर्वत इत्यर्थः । घृतपायसंयावमिति द्वन्द्वैकवद्भावः । संयाव इत्यस्य गोधूमविकारभक्षस्येत्यर्थः । प्रातरुपस्थितं केनचित्पुरुषेण दययाऽऽनीतमित्यर्थः ।। ४ ।।

कृत्स्नप्राप्तकुटुम्बस्य क्षुत्तृड्भ्यां जातवेपथोः ।
अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ।। ५ ।।

सत्यधर्मीया — कृत्स्नप्राप्तकुटुम्बस्य कृत्स्नं प्राप्तं येन तत्कुटुम्बं यस्य स तस्य । जातवेपथो-रुत्पन्नकम्पस्य भोक्तुकामस्य सतः काले तत्कालेऽतिथिर्ब्राह्मणोऽगमत् ।। ५ ।।

छलारी — एतद्भोक्तुकामस्य काले भोजनसमये ।। ५ ।।

तस्मै संव्यभजत् सोऽन्नमाहृत्य श्रद्धयाऽन्वितः ।
हरिं सर्वत्र संपश्यन् स भुक्त्वा प्रययौ द्विजः ।। ६ ।।

सत्यधर्मीया — सर्वत्रैतदादिषु हरिं पश्यन् श्रद्धयाऽन्वितः सन् अन्नमाहृत्य तस्मा अतिथये संव्यभजदित्यन्वयः ।। ६ ।।

छलारी — स रन्तिदेव आहृत्यादरं कृत्वा सर्वत्रातिथिषु हरिं संपश्यन् हरिरेवातिथिरूपेण समागत इति जानन्सन् संव्यभजद्विभज्य दत्तवान् ।। ६ ।।

अथाऽन्यो भोक्ष्यमाणस्य विभक्तस्य महीपतेः ।
विभक्तं व्यभजत् तस्मै वृषलाय हरिं स्मरन् ।। ७ ।।

सत्यधर्मीया — अथानन्तरं विभक्तस्य विभक्तं ब्राह्मणदत्तं शेषं भोक्ष्यमाणस्य भोक्तुमयुञ्जान-स्यावनीपतेरन्यो वृषलोऽगमदित्यन्वयः । हरिं स्मरन् तस्मै विभक्तं विभक्तमध्ये पुनर्विभक्ते व्यभजत् । अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रित इत्यादेर्यत्र कुत्र वा समर्पितं हर्यर्पितमेवेति तत्स्मरणमिति भावः ।। ७ ।।

छलारी — ब्राह्मणाय विभक्तस्यान्नस्य शेषं भोक्ष्यमाणस्य भोक्तुकामस्य महीपतेरन्यो वृषलोऽतिथिरागमत् । वृषलाय शूद्राय ।। ७ ।।

याते शूद्रे तमभ्यागादतिथिः श्वभिरावृतः ।
राजन् मे दीयतामन्नं सगणाय बुभुक्षते ।। ८ ।।

सत्यधर्मीया — श्वभिः सारमेयैः । हे राजन्! मेऽन्नं दीयताम् । नैकलाय किल म इत्याह ॥ सगणायेति । इदानीं तत्र भुक्त्वा यात इति किं त्वया तव गणेनेति न भणेति भणति ॥ बुभुक्षत इति । बुभुक्षत्वं योग्यतया गणे गणोच्चे चान्वेतव्यम् । बुभुक्षते गणाय बुभुक्षते मह्यं चेत्यर्थः ॥ ८ ॥

छलारी — अन्यः शूद्रोऽतिथिः । श्वभिः सारमेयैः । सगणाय स्वयूथगणसहिताय बुभुक्षते ॥८॥

स आतिथ्यावशिष्टं यद् बहुमानपुरस्सरम् ।
तच्च दत्वा नमश्चक्रे श्वभ्यः श्वपतये विभुः ॥ ९ ॥

सत्यधर्मीया — ब्राह्मणवृषवृषलातिथ्यावशिष्टं यद्बहुमानपुरःसरं सत्कारपूर्वकं तद्दत्वा श्वभ्यः श्वपतये च विभुर्नमश्चक्रे । ब्राह्मणे गविहस्तिनि । शुनि चैव श्वपाके च पण्डिताः समदर्शिन इत्यादेः । श्वभ्यः श्वपतय इत्युक्रमः कुतः सगणायेति गणाप्रधान्योक्तेरिति चेत् । सत्यम् । श्वपत्यन्न-वितरणसमये ततः प्रागेव श्वभिराश्वन्ने मुखप्रसारणानुसारेण तत्तदन्तर्गतभगवन्नमनमादाविति न क्रमानुक्रमणं तदप्राधान्यप्रच्युतिश्चेति विजानीहि । श्वभ्यः श्वपतये चान्नं दत्वा हरये नमश्चक्र इति वा । अत्रापि श्वभ्योऽन्नदानं प्रथमतः कुत इति शङ्काया उत्तरं तदेवेति ज्ञेयम् ॥ ९ ॥

छलारी — नमश्चक्रे । तदन्तर्गताय हरय इति शेषः । श्वपतये । वृषलाय इति शेषः ॥ ९ ॥

पानीयमात्रमुच्छेषं तच्चैकपरितर्पणम् ।
पास्यतः पुल्कसोऽभ्यागादपो देह्यशुभस्य मे ॥ १० ॥

सत्यधर्मीया — आयातातिथिपीतोर्वरितं वारि । न भूरि तदपीत्याह ॥ तदिति । एकपरितर्पणमेकस्य तृप्तिकरं तदप्येकवारं परितर्पयतीति तत्तथा वा । एकस्यापि परिवर्जितं तर्पणं येन तद्वा समग्रतृष्णाशामकं नेति वा । पास्यतः पातुकामस्याशुभस्यामङ्गलाचारस्य मेऽपः । शब्दस्वाभाव्याद्बहुवचनम् । किञ्चिदुदकं देहीति पुल्कसोऽन्तेवसाय्यभ्यगात् ॥ १० ॥

छलारी — पानीयमात्रं जलमात्रमुच्छेषमुर्वरितं तदप्येकपरितर्पणमेकस्य तृप्तिकरं न बहूनां । तज्जलं पास्यतः पातुकामस्य पुल्कसः कश्चन नीचजातिपुरुषो बुरुडो देहीति । ब्रुवन्निति शेषः ॥१०॥

तस्यातिकरुणां वाचं निशम्य विपुलश्रमम् ।
कृपया भृशसन्तप्त इदमाहामृतं वचः ॥ ११ ॥

सत्यधर्मीया — अतिकरुणां पुरुकृपाजननीं वाचं निशाम्य श्रुत्वा विपुलश्रमं च निशाम्य कृपया भृशं यथा तथा सन्तप्त इदममृतं वचः (स्पष्टमग्रे भविष्यति) चाह । पानीयपानापेक्षया श्रवणमात्रेण तृप्तिहेतुत्वाद्वचनममृतमिति भावः ॥ ११ ॥

छलारी — विपुलश्रमां पिपासयाऽतिश्रमोपेताम् । आह । पुल्कसं प्रतीति शेषः । अमृतं कर्णामृतम् ॥ ११ ॥

न कामयेऽहं गतिमीश्वराणां महर्द्धियुक्तामपुनर्भवं च ।
आर्तिं प्रपद्येऽखिलदेहभाजामन्तःस्थितां येन भवन्त्यदुःखाः ॥ १२ ॥

सत्यधर्मीया — महती च सा ऋद्धिः सिद्धिस्तया युक्तामीश्वराणां योगीश्वराणां गतिं न कामये नेच्छामि । तर्हि मोक्षमपेक्षस्वेत्यतस्तमपि क्षिपति ॥ अपुनर्भवं चेति । न कामय इति वा न प्रपद्य इत्यनुकर्षेणाकर्षेण वाऽन्वेति । तर्हि किमर्हितं काङ्क्षसीत्यत आह । अखिलभाजां देहिनामन्तःस्थितामार्तिं पीडामहं प्रपद्ये प्राप्नोमीति । येन तदपेक्षितप्रदानेन तद्दुःखभोक्त्रा मयेति वा । अदुःखाः तृषादिजनितार्तिरहिता भवन्ति तामार्तिं प्रपद्ये । मम तृषादिकं भवतु भवतु च तत्तन्निवारणमिति भावः ॥ १२ ॥

छलारी — परदुःखासहिष्णुतया सर्वेषां दुःखं स्वयमाशास्ते न कामय इति ॥ नैवोचे महर्धियुक्तामगणितसमृद्धिसंपन्नां योगेश्वराणां गतिं महरादिलोकमपुनर्भवं मोक्षं वा न कामये । तर्हि कं कामयस इति तत्राह ॥ अखिलदेहभाजामिति । येन जलार्पणेन देहभाजोऽदुःखा भवन्ति तत्तेभ्यो दत्वा तेषां देहभाजामन्तःस्थितामार्तिमहं प्रपद्ये इत्यन्वयः ॥ १२ ॥

क्षुत्तृट्श्रमो गात्रपरिश्रमश्च दैन्यं क्लमः शोकविषादमोहाः ।
सर्वे निवृत्ताः कृपणस्य जन्तोर्जिजीविषोर्जीवजलार्पणेन ॥ १३ ॥

सत्यधर्मीया — प्रस्तुतं तदेवोर्वरितमित्युर्वीशस्तद्दानादानयोरन्वयव्यतिरेकाभ्यामेवं अर्थानर्थौ भविष्यत इत्याह ॥ क्षुत्तृडिति । कृपणस्य दरिद्रस्य जिजीविषोर्जीवितुमिच्छोर्जीवजलार्पणेन जीवे जीवनहेतुभूतजलार्पणेन, जीवयतीति जीवं तच्च तज्जलं वा । क्षुत्तृट्श्रमो गात्रपरिश्रम आन्तरङ्गिको बाहिरङ्गिकश्च श्रमो क्रमाद्बोध्यः । क्लमस्तन्द्री, शोकविषादमोहाः शोकोऽन्तर्दुःखं, विषादो बहिर्नेत्रस्रुतजलादिना दर्शितो, मोहो विचिन्तना इति सर्वे दातुर्निवृत्ता भवन्ति । कृपणस्य जिजीविषोर्जन्तोर्जीवे जीवने जलार्पणे कृते सति सर्व एते निवृत्ता न भवन्ति । अतो देयमेव मया पानीयमानीय तस्मै पुल्कसायेति भावः ॥ १३ ॥

छलारी — ननु दुःखं किमर्थं प्रार्थयसे, परदुःखनिवृत्त्यैव मम सर्वदुःखनिवृत्तेरिति तत्राह ॥ क्षुत्तृडिति । कृपणस्य जन्तोर्जीवजलार्पणेन जीवनप्रदजलदानेन सर्वेषां सुखं स्यात् । तदार्तिर्ममास्त्विति जिजीविषोर्जीवितुमिच्छतः पुंसः क्षुत्तृडादयो निवृत्ता भवन्तीत्यन्वयः । क्षुत्तृट्श्रम इत्येकं पदम् । गात्रपरिभ्रमो देहपरिभ्रमणं क्लमो ग्लानिर्विषादो विषण्णता मोहो मूर्छा । अनेन क्षुधादिमतः पुंसो जलादिदानेन दातुरपि तन्निवृत्तिस्तददाने न तन्निवृत्तिरित्यन्वयव्यतिरेकौ द्रष्टव्यौ ॥ १३ ॥

एवं प्रभाष्य पानीयं म्रियमाणः पिपासया ।
पुल्कसायाददाद् धीरो निसर्गकरुणो नृपः ॥ १४ ॥

सत्यधर्मीया — एवं प्रभाष्य स्वचेतस्यालोच्य तमपि लक्ष्यीकृत्य प्रभाष्य स्वयं पिपासया म्रियमाणः सोऽपि पुल्कसोऽपि पिपासया म्रियमाण इति तस्मै । निसर्गकरुणः स्वाभाविककृपो नृपो धीरो नारायणोऽयं मामप्यवेदिति वृत्तिमान् अददात् ॥ १४ ॥

छलारी — पिपासया म्रियमाणोऽत्यन्तं पीडितोऽपि ॥ १४ ॥

तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छताम् ।
आत्मानं दर्शयाञ्चक्रुर्मायां विष्णुविनिर्मिताम् ॥ १५ ॥

सत्यधर्मीया — ये यस्य त्रिभुवनाधीशाः फलमिच्छतां जनानां फलदा विष्णुविनिर्मितां मायां ब्राह्मणवृषलश्वश्वपतितपुल्कसादिप्रदर्शनरूपिणीं स्वशक्तिं दर्शयामासुः । परीक्षार्थं ते देवा आत्मानं स्वां दर्शयाञ्चक्रुरित्यन्वयः ॥ १५ ॥

छलारी — त्रिभुवनाधीशा ब्रह्मादयो वैष्णवीं मायाम् । आश्रिता इति शेषः । ईश्वरेच्छया तद्धैर्यपरीक्षार्थे ब्राह्मणादिरूपेण समागता इत्यर्थः ॥ १५ ॥

स वै तेभ्यो नमस्कृत्य निःसङ्गो विगतस्पृहः ।
वासुदेवे भगवति भक्त्या चक्रे मनः परम् ॥ १६ ॥

सत्यधर्मीया — तेभ्य आगतेभ्यो ब्राह्मणादिभ्यो नमस्कृत्य । तातमनुकूलयितुं तन्नमस्करणमित्युपपन्ना चतुर्थी । निःसङ्गः फलस्नेहरहितः । गता स्पृहा येभ्यस्तैर्भार्यादिभिर्विशिष्ट इति विगतस्पृहः । सकुटुम्बस्य प्रागुक्तेः इति ततस्तेऽपि तथा चेदेवैतस्य निःसङ्गता भवेन्न चेदसङ्गतता स्यादिति भावः । परमित्यनन्यसाधारणतां मनोधारणस्याह ॥ १६ ॥

छलारी — परं केवलं वासुदेवे भक्त्या मनश्चक्रे । न तु तान् किमपि ययाचे । कथम्भूतः । निःसङ्गोऽत्यन्तं कुटुम्बासक्तिशून्योऽत एव निस्पृहस्तत्पोषणायात्यन्तवित्तादिस्पृहारहितः ॥ १६ ॥

ईश्वरालम्बनं चित्तं कुर्वतोऽनन्यराधसः ।
माया गुणमयी राजन् स्वप्नवत् प्रत्यलीयत ॥ १७ ॥

सत्यधर्मीया — अनन्यराधसोऽनन्येन स्वतन्त्रेण भगवता राधः संसिद्धिर्मोक्षो यस्य तस्येश्वरालम्बनं तदाश्रयं चित्तं कुर्वतो रन्तिदेवस्य गुणमयी माया संसारः प्रत्यलीयत निलिल्ये । तत्र निदर्शनं स्वप्नवत्स्वाप्नपदार्थवदिति । स सन्नप्यवसन्नप्रायोऽभूदिति भावः ॥ १७ ॥

छलारी — ईश्वरालम्बनं श्रीहरिविषयमनन्यराधसो भगवत्सिद्धिमन्तरेणान्यसिद्धिशून्यस्य तदेकनिष्ठस्येत्यर्थः । माया संसाराख्या प्रत्यलीयत नष्टाऽभूत् ॥ १७ ॥

तत्प्रसङ्गानुभावेन रन्तिदेवानुवर्तिनः ।
अभवन् योगिनः सर्वे नारायणपरायणाः ॥ १८ ॥

सत्यधर्मीया — तत्प्रसङ्गस्तद्बहुसहवासस्तस्यानुभावः प्रभावस्तेन । रन्तिदेवानुर्तिनः सर्वेऽपि नारायणपरायणा योगिनः सोपायाः सन्तोऽभवन् ॥ १८ ॥

छलारी — तत्प्रसंगानुभावेन तत्संगतिप्रभावेन योगिनो योगितुल्याः ॥ १८ ॥

गर्गाच्छिनिस्ततो गार्ग्यात् क्षत्राद् ब्रह्म ह्यवर्तत ।
दुरितक्षयो महावीर्यात् तस्य त्र्य्यारुणिः कविः ।
पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः ॥ १९ ॥

सत्यधर्मीया — गर्गात् । ततः शिनेर्गार्ग्यात् क्षत्रात् ब्रह्म ब्राह्मणकुलम् । तस्य दुरितक्षयस्य त्र्य्यारुणिः कविः पुष्करारुणिरिति त्रयो ब्राह्मणगतिं गताः क्षत्रजा अपि ब्राह्मणा अभूवन्नित्यर्थः ॥ १९ ॥

छलारी — भरतपौत्रेषु मन्युसुतेषु वंशस्य वंशमुक्त्वा पञ्चमस्य गर्गस्य वंशमाह ॥ गर्गादिति । गार्ग्याद्गर्गसुतात्क्षत्रात्क्षत्रियात्ततः शिनेर्ब्रह्मावर्तत । मन्युसुतस्य महावीर्यस्य वंशमाह ॥ महावीर्याद्दुरितक्षय इति । तस्य दुरितक्षयस्य त्र्य्यारुणिः कविः पुष्करारुणिश्चेति त्रयः पुत्राः । अत्र क्षत्रवंशे त्रैय्यारुणादयो ब्राह्मणगतिं ब्राह्मणरूपतां गताः ॥ १९ ॥

बृहत्क्षेत्रस्य होत्रोऽस्माद्धस्ती यद् हस्तिनापुरम् ।
अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः ॥ २० ॥

सत्यधर्मीया — अस्मात् होत्रात् हस्ती नाम्ना, यदव्ययं, येन हस्तिनापुरं निर्मितमिति शेषः॥२०॥

छलारी — मन्योर्ज्येष्ठसुतस्य वंशमाह ॥ बृहत्क्षेत्रस्येति । होत्रः पुत्रोऽभूत् । अस्माद्धोत्राद्धस्ती हस्तिनाम यत् येन हस्तिनापुरं कृतमिति शेषः । अजमीढादयस्त्रयो हस्तिनः पुत्राः । अजमीढस्य वंशेयाः प्रियमेधादयः केचन द्विजाः स्युः ॥ २०,२१ ॥

अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः ॥ २१ ॥

सत्यधर्मीया — द्विजाः स्युरभवन् ॥ २१ ॥

अजमीढाद् बृहदिषुस्तस्य पुत्रो बृहद्धनुः ।
बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः ॥ २२ ॥

सत्यधर्मीया — तस्य बृहदिषोः ततो बृहद्धनोः तस्य बृहत्कायस्य ॥ २२ ॥

तत्सुतो विशदस्तस्य श्येनजित् समजायत ।
रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः ॥ २३ ॥

रुचिराश्वसुतो याजः पृथुसेनस्तदात्मजः ।
पारस्तत्तनयो नीपस्तस्य पुत्रशतं त्वभूत् ॥ २४ ॥

सत्यधर्मीया — तत्सुतो जयद्रथसूनुस्तस्य विशदस्य । तस्य सुताः श्येनजित्सुताः । तदात्मजः याजजो याज इत्यपि वदन्ति । तन्नामकरणाकालिका वयं तेऽपीति पुस्तकन्यस्तभाराः । तत्तनयः पृथुसेनतनयः । तत्तनयः पारतनयः । तस्य नीपस्य ॥ २३,२४ ॥

छलारी — रुचिराश्वादयश्चत्वारस्तत्सुताः श्येनजित्सुताः । तस्येत्यस्यावृत्तिः । तस्य पारस्य तनयो नीपः । तस्य नीपस्य पुत्रशतमभूत् ॥२३,२४॥

अणुहो नाम यस्तेषां ज्येष्ठो सत्यात्मको नृप ।
स कल्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ॥ २५ ॥

सत्यधर्मीया — तेषां मध्ये ज्येष्ठोऽणुहः सत्यात्मकः सत्ये भगवत्यात्मा मनो यस्य सः । शुकस्य व्याससूनोः कन्यायां कल्यां नाम्ना ब्रह्मदत्तमजीजनत् ।

पराशरकुलोत्पन्नः शुको नाम महायशाः ।
व्यासादरण्यां सम्भूतो विधूमोऽग्निरिव ज्वलन् ।
स तस्यां पितृकन्यायां वीरिण्यां जनयिष्यति ।
कृष्णं गौरप्रभं शम्भुं तथा भूरिश्रुतं जयम् ।
कन्यां कीर्तिमतीं षष्ठीं योगिनीं योगमातरम् ।
ब्रह्मदत्तस्य जननीं माहिषीमणुहस्य च ॥ इति हरिवंशोक्तेः ।

साक्षात्त्र्यक्षस्य गृहस्थत्वमवधूतत्वं च, गार्हस्थ्यं च यतित्वं च देवेष्वेकत्वमागतमित्यादेः । पञ्चकं नाः स्मरेन्नित्यमित्यहल्यादि कन्यात्वादिवदविरुद्धम् ॥ २५ ॥

छलारी — तेषु पुत्राणां मध्ये योऽणुहो ज्येष्ठः स ब्रह्मदत्तमजीजनदित्यन्वयः । कथम्भूतोऽणुहः। सत्यात्मकः सत्ये पूर्णानन्दज्ञानात्मके हरावात्मा मनो यस्य सः सत्यात्मकः ॥ २५ ॥

योगेशो गवि भार्यायां विश्वक्सेनमधात् सुतम् ।
जैगीषव्योपदेशेन योगतन्त्रं चकार ह ॥ २६ ॥

सत्यधर्मीया — योगेशो ब्रह्मदत्तो गवि तन्नाम्न्यां भार्यायां विष्वक्सेनं सुतमधात् गर्भाधानद्वारा जनयामासेति यावत् । जैगीषव्यो योगी तस्योपदेशेन योगतन्त्रं योगशास्त्रं चकार । हेति पाराशर्यो जालकर्ण्यः पराशरसुतावुभौ । विप्रायामेव भार्यायां तृतीयः कृष्ण एव चेति बृहद्भाष्योक्तेः । पराशरशरीरजो व्यासाग्रज इति सूचयति । स शिवावतारः । यथोक्तं तत्रैव । शुकस्तथा सद्यो ज़ातो वामदेवश्चाद्योरस्तत्पुमानिति । दूर्वासा द्रौणिरौर्वश्च जैगीषव्यादिरूपका इति ॥ २६ ॥

छलारी — योगेशो ब्रह्मदत्तो योगशास्त्रवित् गविनामिकायाम् । अधात् अजीजनत् । जैगीषव्यो रुद्रावतारस्तस्योपदेशेन योगतन्त्रं योगशास्त्रम् ॥ २६ ॥

उदक्सेनस्ततस्तस्माद् भल्लादो बार्हदीषवाः ।
यवीनरो द्विमीढस्य कृतिमांस्तत्सुतस्ततः ॥ २७ ॥

सत्यधर्मीया — ततो विष्वक्सेनात् । तस्मादुदक्सेनात् भल्लाद इत्येते बार्हदीषवाः । बृहदिषुरेव बार्हदीषुस्तस्येमे बार्हदीषवाः । तत्सुतो यवीनरसुतस्ततः कृतिमतः ॥ २७ ॥

छलारी — इमे बार्हदीषवा अजमीढपुत्रस्य बृहदिषोर्वंश्याः । अजमीढानुजस्य द्विमीढस्य वंशमाह ॥ यवीनर इति ॥ २७ ॥

नाम्ना सत्यधृतिर्यस्माद् दृढनेमिः सुपार्श्वकृत् ।
सुपार्श्वात् सुमतिस्तस्य पुत्रः सन्ततिमांस्ततः ॥ २८ ॥

सत्यधर्मीया — यस्मात्सत्यधृतेर्दृढनेमिः सुपार्श्वकृत्सुपार्श्वपिता । तस्य सुमतेः ॥ २८ ॥

छलारी — ततः सत्यधृतेः सुपार्श्वकृत्सुपार्श्वजनकस्तस्य सन्ततिमान्पुत्रः ॥ २८ ॥

कृतिर्हिरण्यनाभाद् यो योगं प्राप्य जगौ द्विषट् ।
संहिताः प्राच्यसाम्नां वै नीपो ह्यौग्रायुधस्ततः ॥ २९ ॥

सत्यधर्मीया — कृतिर्हिरण्यनाभादृषेर्योगं तच्छास्त्रं प्राप्य प्राच्यसाम्नां तन्नाम्नां द्विषट् द्वादशसंहिताः जगौ अध्यापयामास । ततः कृतेरुग्रायुधस्यायमौग्रायुधो नीपः । अनेन पुत्रो ह्युग्रायुधस्तत्पुत्रो नीप इत्युक्तं भवति ॥ २९ ॥

छलारी — ततः कृतिर्यो हिरण्यनाभादृषेर्योगं प्राप्य योगशास्त्रं प्राप्य प्राच्यसाम्नादि द्विषट्सु संहितां विभज्य जगावध्यापितवान् । तस्य कृतेरुग्रायुधः सुतोऽभूत् ॥ २९ ॥

तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुञ्जयः ।
ततो बहुतिथो नाम पुरुमीढोऽप्रजोऽभवत् ॥ ३० ॥

सत्यधर्मीया — तस्य नीपस्य । ततो रिपुञ्जयादप्रजो गतम् ॥ ३० ॥

छलारी — अथ तस्मात् द्विमीढानुजस्य वंशो नाभूदित्याह ॥ पुरुमीढ इति ॥ ३० ॥

नलिन्यामजमीढस्य नीलः शान्तिस्तु तत्सुतः ।
शान्तेः सुशान्तिस्तत्पुत्रः पुराजोऽर्कस्ततोऽभवत् ॥ ३१ ॥

सत्यधर्मीया — अजमीढाः केचिद्द्विजाः केचित्क्षत्रिया इति तद्वंशद्वयं प्रोच्य तद्वंशानन्तरं शंसति ॥ नलिन्यामिति । तत्सुतो नीलबालस्तत्पुत्रः सुशान्तिसुतस्ततः पुराजात् ॥ ३१ ॥

छलारी — अजमीढस्य वंश्याः प्रियमेधादयः केचिद्ब्राह्मणा बभूवुः । बृहदिषुप्रभृतयः क्षत्रियाश्चेति वंशद्वयमुक्तम् । तस्यैव वंशान्तरमाह ।। नलिन्यामिति यावत्समाप्तिः । ततः पुराजादर्काख्यः ।। ३१ ।।

हर्म्याश्वस्तत्सुतस्तस्य पञ्चासन् मुद्गलादयः ।
यवीनरो बृहदिषुः काम्पिल्यः सञ्जयस्ततः ।। ३२ ।।

सत्यधर्मीया — तत्सुतोऽर्कार्भिकस्तस्य हर्म्याश्वस्य मुद्गलादयः पञ्च सुता आसन् । उर्वरितचतुर्नामाह ।। यवीनर इति । ततः पञ्चानामुत्पत्त्यनन्तरम् ।। ३२ ।।

छलारी — मद्गुल एको यवीनरादयश्चत्वार इत्येवं पञ्च सुताः ।। ३२ ।।

हर्म्याश्वः प्राह पुत्रा मे पञ्चानां रक्षणाय हि ।
विषयाणामलमिमे इति पञ्चालसञ्ज्ञिताः ।। ३३ ।।

सत्यधर्मीया — पञ्चानां विषयाणां देशानां रक्षणायेमे पञ्च, अलं पर्याप्ता इत्युक्तेस्ते मुद्गलादयः पञ्च पञ्चालसंज्ञिता अभवन् । पञ्चानां शब्दादीनां विषयाणां सकाशात् मद्रक्षणाय । तेष्वमनः प्रसृत्यै अलमित्युक्तेः पञ्चालसंज्ञिता इति ज्ञेयम् ।। ३३ ।।

छलारी — इमे च पुत्राः पञ्चानां विषयाणां शब्दादिपञ्चविषयेभ्यो वैराग्यजननाय समर्थाः पञ्चालसंज्ञावन्तो भवन्तीति नाम चकारेत्यर्थः ।। ३३ ।।

मुद्गलाद् ब्रह्म निर्वृत्तं गोत्रं मौद्गल्यसञ्ज्ञितम् ।
मिथुनं मुद्गलाद्धार्म्याद् दिवोदासः पुमानभूत् ।। ३४ ।।

सत्यधर्मीया — मुद्गलात् ब्रह्म ब्राह्मणजातिश्च निर्वृत्तं जातं गोत्रं च मौद्गल्यसंज्ञितं निर्वृत्तमित्यन्वयः । हार्म्यादिकदेशवैकृत्यन्यायेन हर्म्याश्वपुत्रात् । धार्म्यात् धर्म्याश्वपुत्रात् इत्यपि पठित्वा व्याकुर्वन्ति । मिथुनं यमलं तद्द्वन्द्वमध्ये दिवोदासः पुमानभूत् ।। ३४ ।।

छलारी — ब्रह्म निर्वृतं ब्राह्मणकुलमभवत् । गोत्रं कुलं मौद्गल्यसंज्ञितम् । हर्म्याश्वसुतान्मुद्गलान्मिथुनमभूत्तदेवाह ।। दिवोदासः पुमान् अहल्या कन्यकेति । गौतमाज्जात इति शेषः । धनुर्वेदोऽस्त्रविद्या ।। ३४,३५ ।।

अहल्या कन्यका यस्यां शतानन्दस्तु गौतमात् ।
तस्य शतधृतिः पुत्रो धनुर्वेदविशारदः ॥ ३५ ॥

सत्यधर्मीया — कन्यका चाहल्या नाम्ना यस्यां गौतमाच्छतानन्दनामा नन्दनोऽभवत् । अहल्यानामनिरुक्तिस्तु ''हलं नामेह वैरूपं हल्यं तत्प्रभवं भवेत् । यस्या न विद्यते हल्यं तेनाहल्येति विश्रुता । अहल्येत्येव च मया तस्या नाम प्रकीर्तितम्'' इत्युत्तरकाण्डरामायणब्रह्मवचनतः सिद्धा । उत्तररामायणे - सोऽहं तासां विशेषार्थं स्त्रियमेकां विनिर्ममे । यद्यत्प्रजानां प्रत्यङ्गं तत्तदुद्धृतम् । ततो मया रूपगुणैरहल्या स्त्री विनिर्मितेति वचनं च तस्या एव जन्मान्तरविवक्षया, मुद्गलद्वारा ब्रह्मसृष्टतया वा ससम्भवत्का । तस्य शतानन्दस्य ॥ ३५ ॥

शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात् किल ।
शरस्तम्बेऽपतद् रेतो मिथुनं तदभूच्छुभम् ॥ ३६ ॥

सत्यधर्मीया — तत्सुतः शतधृतिसूनुर्यस्माच्छरद्वतः शरस्तम्बे मुद्गल्ये ॥ ३६ ॥

छलारी — यस्माच्छरद्वतः । शुभं सुन्दरम् ॥ ३६ ॥

तद् दृष्ट्वा कृपयाऽगृह्णाच्छन्तनुर्मृगयां चरन् ।
कृपः कुमारः कन्या च द्रोणपत्न्यभवत् कृपी ॥ ३७ ॥

इति श्रीमद्भागवते नवमस्कन्धे अष्टादशोऽध्यायः ।

सत्यधर्मीया — मृगयां गतः शन्तनुः कृपया । तन्मिथुनं दृष्ट्वाऽगृह्णात् । कृपया नृपग्रहणाद्धेतोः कुमारः कृपस्तन्नामाऽभवत् । या च कन्या कृपी सा च द्रोणप्रणयिन्यभवत् ॥ ३७ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे अष्टादशोऽध्यायः ।

छलारी — अत एव कुमारः कृपः कन्या च कृपी ॥ ३७ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे अष्टादशोऽध्यायः ।

॥ अथ एकोनविंशोऽध्यायः ॥

श्रीशुक उवाच —

मित्रायुश्च दिवोदासाच्च्यवनस्तत्सुतो नृप ।
सुदासः सहदेवोऽथ सोमको जन्तुजन्मकृत् ॥ १ ॥

सत्यधर्मीया — अहल्यायाः सन्ततिमुक्त्वा तद्भ्रातृदिवोदाससन्तानं कथयति ॥ मित्रायुरिति । तत्सुतश्च्यवनसुतः सुदासस्तत्सुतः सहदेवस्तत्सुतो जन्तुजन्मकृज्जन्तुपिता सोमक इति विवेकः ॥१॥

छलारी — अहल्यासन्ततिं प्रोच्य दिवोदाससन्ततिं कथयति ॥ मित्रायुरिति । अथेत्यस्यावृत्तिः । तस्मात्सुदासस्तस्मात्सहदेवस्तस्मात्सोमक इति विवेकः । जन्तुजन्मकृत्सोमकस्य जन्तुर्ज्येष्ठपुत्रः ॥१॥

तस्य पुत्रशतं तेषां यवीयान् पृषतस्ततः ।
द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः ॥ २ ॥

सत्यधर्मीया — तस्य सोमकस्य पुत्रशतम् । तेषां जन्तुं प्रथमजन्तुं वदन्ति । यवीयान्कनिष्ठः सुतः पृषत इति शतं मन्तव्यम् । तस्य पृषतो द्रुपदस्तस्य द्रुपदस्य द्रौपदी धृष्टद्युम्नादयः सुता अभवन् ॥ २ ॥

छलारी — सोमकस्य बहवः पुत्रा बभुवुरित्याह ॥ तस्येति । पृषतो यवीयान्कनिष्ठः ॥ २ ॥

धृष्टद्युम्नाद् धृष्टकेतुर्हर्म्यार्ः पाञ्चालका इमे ।
योऽजमीढसुतो ह्यन्य ऋक्षात् संवरणस्ततः ॥ ३ ॥

सत्यधर्मीया — हर्म्या उपाधितः पाञ्चालका अन्यो बृहदिषो ऋक्षस्तस्मात्संवरणः स्मृतः ॥३॥

छलारी — ततः पृषतादिमे हर्म्या हर्म्याश्विवंश्यः पञ्चालवंशोत्पन्नत्वात्पाञ्चालका इत्युच्यन्ते । अजमीढस्य वंशान्तरमाह ॥ य इति । अन्यः । बृहदिषोरिति शेषः । अन्यस्यां भार्यायां जातः स ऋक्षो नाम ततः संवरणः ॥ ३ ॥

तत्पत्न्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः ।
परीक्षित् सुधनुर्जह्नुर्निषधाश्वः कुरोः सुताः ॥ ४ ॥

सत्यधर्मीया — सूर्यकन्यायां नाम्ना तत्पत्न्यां ततः संवरणात्कुरुक्षेत्राधिपतिः कुरुरभूत् । कुरोः सुताः परीक्षिदादयश्चत्वारः सुता अभवन् ॥ ४ ॥

छलारी — तत इत्यस्यावृत्तिः । ततः संवरणात्तत्पत्न्यां तपतीनामिकायां सूर्यकन्यायां कुरुरभूत् परीक्षिदादयश्चत्वारः कुरोः सुताः ॥ ४ ॥

सुहोत्रोऽभूत् सुधनुषश्च्यवनस्तत्सुतः कृती ।
वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः ॥ ५ ॥

सत्यधर्मीया — तत्सुतश्च्यवनसुतः तस्य कृतिनस्ततो वसोस्तत उपरिचरात् ॥ ५ ॥

छलारी — सुहोत्रसुतश्च्यवनः । तत्सुत इत्यस्यानुकर्षः । कृती तत्सुतश्च्यवनसुतः । तस्य कृतिन उपरिचर इति सोमपादो वसुर्जात एतद्वीर्यादेव सत्यवती विराटश्च मत्स्यादुत्पन्ना वेति ज्ञेयम् । ततो वसोर्भार्याभेदेन बृहद्रथमुखाः कुशांब्वाद्याश्च जाताः । कथम्भूताः । चेदिपाश्चेदिदेशपालाः । तस्य ऋषभः ॥ ५,६ ॥

कुशाम्बुमत्स्यप्रत्यग्रवेदिषाद्याश्च चेदिपाः ।
बृहद्रथात् कुशाग्रोऽभूद् ऋषभस्तस्य तत्सुतः ॥ ६ ॥

सत्यधर्मीया — कुशाम्बादयश्चेदिपास्तस्य कुशाग्रस्य । तत्सुतः सत्यहितः ॥ ६ ॥

जज्ञे सत्यहितोऽपत्यं पुष्पवांस्तत्सुतो जहुः ।
अन्यस्यामपि भार्यायां शकले द्वे बृहद्रथात् ॥ ७ ॥

सत्यधर्मीया — तत्सुतः पुष्पवान् तत्सुतो जहुस्तन्नामा बृहद्रथाज्जातः ॥ ७ ॥

छलारी — जज्ञे । सत्यहितस्तत्सुतः सन् जज्ञे । तस्य पुष्पवानपत्यं पुत्रः । बृहद्रथस्यैकभार्यासन्ततिमुक्त्वाऽन्यभार्यासन्ततिमाह ॥ अन्यस्यामिति । द्वे शकले एककर्णाद्यवयवयुक्तार्धशरीररूपशकले ॥ ७ ॥

ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते ।
जीव जीवेति क्रीडन्त्या जरासन्धोऽभवत् सुतः ॥ ८ ॥

सत्यधर्मीया — जरया तन्नाम्न्या जीव जीवेति क्रीडन्त्या ततो जरासन्धस्तदभिधोऽभवत् ॥ ८ ॥

छलारी — बृहद्रथादुत्पन्ने । जीव जीवेति वदन्त्याऽशेषजरया रक्षस्या ताभ्यां शकलाभ्यां जरासंधोऽभवत् ॥ ८ ॥

ततश्च सहदेवोऽभूत् सोमापिर्यच्छ्रुतश्रवाः ।
परीक्षिदनपत्योऽभूत् सुरथो नाम जाह्नवः ॥ ९ ॥

सत्यधर्मीया — ततो जरासन्धात् । ततो सहदेवात् । सोमापिस्ततः सोमापेः परीक्षित् । जाह्नवो जह्नुसुतः ॥ ९ ॥

छलारी — यदित्यस्योभयत्रानुषङ्गः । यतो यस्मात्सहदेवात्सोमापिर्यस्मात्सोमापेः श्रुतश्रवाः कुरोश्चतुर्षु पुत्रेषु ज्येष्ठः पुत्रः । परीक्षिदनपत्योऽभूत् । कुरुपुत्रस्य जह्नोर्वंशमाह ॥ सुरथ इति ॥ ९ ॥

ततो विदूरथस्तस्मात् सार्वभौमस्ततोऽभवत् ।
जयत्सेनस्तत्तनयो राचीकोऽतो द्युमानभूत् ॥ १० ॥

सत्यधर्मीया — ततो जाह्नवात् । तस्माद्विदूरथात् । तत्तनयः सार्वभौमसुतस्तत्सुतो जयत्सेनतनयः । अतो राचीकात् ॥ १० ॥

छलारी — सार्वभौमस्तन्नामकस्ततो जयत्सेनादभवद्राचीकस्तत्तनयः । ततो ऋचीकात् ॥ १० ॥

ततश्च क्रोधनस्तस्माद् देवातिथिरमुष्य च ।
ऋक्षस्तस्य दिलीपोऽभूत् प्रतीपस्तस्य चात्मजः ॥ ११ ॥

सत्यधर्मीया — ततो द्युमतस्तस्मात्क्रोधनात् । अमुष्य देवातिथेस्तस्य ऋक्षस्य तस्य दिलीपस्य ॥ ११ ॥

छलारी — ऋक्षो ऋक्षनामा ॥ ११ ॥

देवापिः शन्तनुस्तस्य बाह्लीक इति चात्मजाः ।
पितृराज्यं समुत्सृज्य देवापिस्तु वनं गतः ॥ १२ ॥

सत्यधर्मीया — तस्य प्रतीपस्य । तुस्त्वग्दोषादिविशेषसूचकः ॥ १२ ॥

छलारी — तस्य प्रतीपस्य देवापिशंतनुबाह्लीकाख्यास्त्रयः पुत्राः । स च शन्तनुः पूर्वं वरुणो, बाल्हीकः पूर्वं प्रल्हादो, देवापिस्त्वग्दोषयुक्तत्वात्तपसे वनं गतः ।। १२ ।।

अभवच्छन्तनू राजा प्राङ्महाभिषजसञ्ज्ञितः ।
यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः ।। १३ ।।

सत्यधर्मीया — प्राग्विधिशापतो महाभिषगिति जातस्तदनन्तरं शन्तनुर्जातः । यथोक्तमाचार्यैः । पूर्वोदधेरित्यारभ्य तया मुमोदाब्दगणान्बहूंश्चेत्यन्तैः श्लोकैः । शन्तनुशब्दं निर्वक्ति ।। यं यमिति । स यं यं जीर्णं कराभ्यां स्पृशति स स एतत्स्पृष्टो यौवनमेति प्राप्नोति । शं सुखसाधनीभूता तनुर्येन स इति सुखं यन्नामेवेति ।। १३ ।।

छलारी — प्राक् पूर्वजन्मनि महाभिषङ्नामकः । जीर्णं जराद्युपेतम् ।। १३ ।।

शान्तिमाप्नोति चैवाग्र्यां कर्मणा तेन शन्तनुः ।
समा द्वादश तद्राष्ट्रे न ववर्ष यदा विभुः ।। १४ ।।

सत्यधर्मीया — कराभ्यामित्युक्त्या तयोरविशेषमाह । यः स्पर्शेन रूपेण जीर्णोऽशान्तिमाञ्छान्तिमाप्नोति यत्तेन शन्तनुरभवत् । शान्तं शान्तिं नयतीति शन्तनुरिति निरुक्तिं सूचयति । तद्राष्ट्रे शन्तनुदेशे द्वादश समाः संवत्सरान्विभुरिन्द्रो न ववर्ष यदा तदा ।। १४ ।।

छलारी — शान्तिं सुखम् । यदा देवो न ववर्ष तदा शन्तनुस्तत्र । ब्राह्मणानपृच्छदिति शेषः ।। ।। १४ ।।

शन्तनुर्ब्राह्मणैरुक्तः परिवेत्ताऽयमग्रभुक् ।
राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये ।। १५ ।।

सत्यधर्मीया — ब्राह्मणैरयं परिवेत्तेति ।

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स इत्युक्तः परिवित्तिस्तु पूर्वजः ।।

इत्युक्तेः । अग्रभुक् अग्रजे समे ततोऽप्यग्रतो भुङ्क्ते सम्पदमिति सोऽपि परिवेत्ता भवति । एतदधर्मादनावृष्टिः । पुरराष्ट्रविवृद्धये । अग्रजाय देवापये आशु जननाशात्पूर्वं राज्यं देहीत्युक्त इत्यन्वयः ।। १५ ।।

छलारी — ततो ब्राह्मणैरेवमुक्तो "दाराग्निहोत्रसंयोगं कुरुते चाग्रजे स्थिते परिवेत्ता स विज्ञेयो परिवित्तिस्तु पूर्वज" इति स्मृतेः । अग्रभुक् अग्रतो राज्यभोक्ता त्वं परिवेत्ताऽग्रवित्तोऽयं शन्तनुरग्रभुक् अग्रजस्य देवापेरग्रतो राज्यं देहीत्युक्तः । अतस्तद्दोषपरिहारायाग्रजाय देहि ततो वृष्टिर्भविष्यतीति ॥ १५ ॥

एवमुक्तो द्विजैर्ज्येष्ठं छन्दयामास सोऽब्रवीत् ।
तन्मन्त्रिप्रहितैर्विप्रैर्वेदाद् विभ्रंशितो गिरा ।
वेदवादातिवादान् वै ततो देवो ववर्ष ह ॥ १६ ॥

सत्यधर्मीया — एवं पूर्वं ब्राह्मणैरित्युक्त्वेदानीं द्विजैरिति वदन् वृद्धक्षत्रवैश्यादिबोधनमपि ध्वनयति । छन्दयामास वरयाञ्चकार । तस्य मन्त्रिणाऽशाकशर्मकेन प्रहितैः प्रेषितैर्गिरा वचनेन वेदाद्विभ्रंशितः पाषण्डमतप्रवेशनेन सन्मार्गभ्रंशितः प्रकर्षेण हि शन्तनुतन्मन्त्रिणो यैस्तैरित्यर्थः । तथासन् दवादातिवादान्वेदवादमतीत्य विद्यमानान्वादानब्रवीत् । ततः पतितया पतितायोग्यत्वान्न शन्तनोस्तनुरपि व्यत्यय इति । ततो देवो देवेन्द्रो ववर्ष ॥ १६ ॥

छलारी — शन्तनोर्ज्येष्ठं प्रतिगमनात्प्रागेव शन्तनुं प्रत्यमुं त्यक्त्वा स्वेच्छयैव दुष्टेन केनचिन्मन्त्रिणा देवापिं पाषण्डीकृत्वा राज्यनर्हं कुरुत इत्युक्त्वा प्रेषितैर्विप्रैर्वनम् । पाषण्डिमताश्रयो गिरा वेदोक्तसन्मार्गाद्विभ्रंशितः सन् वेदवादस्य वेदार्थस्यातिवादान्निन्दावचनान्यब्रवीत् । शन्तनुस्त्विदमज्ञात्वावनं प्रति गत्वा ज्येष्ठं छन्दयामास प्रसादयामास । प्रजापालनादिधर्मः परो धर्मोऽवश्यं त्वयाऽनुष्ठेयः । इत्युक्त्वा देवापिर्वेदन प्रमाणं तदुक्तं न कर्तव्यं किन्तु प्रजापीडा कर्तव्या । सर्वे ब्राह्मणा अयं दोषी राज्यानर्हः शन्तनुरेव गुणी राज्यार्ह इत्युक्त्वा तस्यैव भूपतित्वमङ्गीचक्रुस्तदेत्यर्थः ॥ १६ ॥

देवापिर्योगमास्थाय कलापग्राममास्थितः ।
सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति ॥ १७ ॥

सत्यधर्मीया — योगं समाधिर्भगवद्ध्यानं वा । आस्थाय कलापनामकग्राममास्थितस्तत्र वसन् । सोमवंशे सन्ताने शीतांशोर्नष्टे सति स कृतादौ स्थापयिष्यति ॥ १७ ॥

छलारी — कृतादौ कृतयुगस्यादिभागे विष्णोः प्रसादाद्राजा भूत्वा स्वस्य सोमवंशोत्पन्नत्वात्पुत्रपौत्रादिरूपेण सन्ततिं कृत्वा सोमवंशं स्थापयिष्यतीत्यर्थः ॥ तदुक्तम् ॥ विष्णोः प्रसादात्स युगे कृते राजा भविष्यतीति ॥ १७ ॥

बाह्लीकात् सोमदत्तोऽभूद् भूरिर्भूरिश्रवास्ततः ।
शलश्च शन्तनोरासीद् गङ्गायां भीष्म आत्मवान् ॥ १८ ॥

सत्यधर्मीया — ततः सोमदत्तात् । भूरिर्भूरिश्रवाः शलश्चेति त्रयः पुत्रा अभवन् । गङ्गायां भागीरथ्यामात्मवानूर्ध्वरेतस्त्वादिहेतुर्मनस्वी ॥ १८ ॥

छलारी — बाह्लीकात्प्रतीपपुत्रात्ततः सोमदत्ताद्भूरिर्भूरिश्रवाः शलश्चेति त्रयः पुत्राः । तत्र रुद्रेषु सोमदत्तः पूर्वं पत्रतापाख्यो, भूरिः पूर्वमजैकपान्नामको, भूरिश्रवाः पूर्वमहिर्बुध्नामकः शिवादिसर्वरुद्रैराविष्टः शलः पूर्वं विरूपाक्षः ॥ १८ ॥

सर्वधर्मविदां श्रेष्ठो महाभागवतः कविः ।
वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः ॥ १९ ॥

सत्यधर्मीया — रामोऽपि भार्गवरामोऽपि ॥ १९ ॥

छलारी — भीष्मः पूर्वं द्युनामा वसुरात्मवान् जितेन्द्रियो येन भीष्मेण तोषितो मम पाणिं गृह्णात्वित्यंबया प्रार्थितोऽपि परशुरामस्तेन युद्धं कृत्वा स्थैर्यं दृष्ट्वा सन्तुष्टोऽभूदित्यर्थः ॥ १९ ॥

शन्तनोर्दाशकन्यायां जज्ञे चित्राङ्गदः सुतः ।
विचित्रवीर्योऽवरजो नाम्ना चित्राङ्गदो हतः ॥ २० ॥

सत्यधर्मीया — दाशकन्यायां तत्पालितायाम् । नाम्नाऽत्यक्तेन चित्रांगदेन निहतो नाम स्वमपरित्यजन् । चित्राङ्गदोऽकृतोद्वाह इत्याचार्योक्तेः ॥ २० ॥

छलारी — दाशकन्यायां दाशैः कैवर्तैः पालितत्वादेव दाशकन्यायां सत्यवत्यां नाम्नाऽतिप्रसिद्धसमाननाम्ना निमित्तेन चित्रांगदेन गन्धर्वेण युद्धे हतः ॥ २० ॥

यस्यां पराशरात् साक्षादवतीर्णो हरेः कला ।
वेदगुप्त्यै मुनिः कृष्णो यतोऽहमिदमध्यगाम् ॥ २१ ॥

सत्यधर्मीया — यस्यां सत्यवत्यां पराशराद्धरेः साक्षात्कलाबलादिव्यावृत्तये साक्षादिति । वेदगुप्त्यै तद्रक्षणाय कृष्णो मुनिरवतीर्णः । यतोऽहमिदं भागवतं पुराणमध्यगामधीतवान् ।। २१ ।।

छलारी — यस्यां शन्तनुपरिग्रहात्पूर्वमेवावतीर्णः साक्षात्कला स्वरूपांशभूतः । अवतार-प्रयोजनमाह ।। वेदेति । वेदविभागार्थं कृष्णो व्यासो यतो व्यासाच्छुकनामकोऽहं जातः। इदं भागवतं पुराणमध्यगामधिगतवानस्मि ।। २१ ।।

हित्वा स्वशिष्यान् पैलादीन् भगवान् बादरायणः ।
मह्यं पुत्राय शान्ताय परं गुह्यमिदं जगौ ।। २२ ।।

सत्यधर्मीया — मयि ममताविशेषः सुतत्वादित्यभिधत्ते ।। हित्वेति । स्वशिष्यान्पैलादीन्पैल-जैमिन्यादीन्हित्वा पुत्राय मह्यं परं गुह्यं गोप्यमिदं जगौ ।। २२ ।।

छलारी — श्रीभागवतं स्तौति ।। हित्वेति ।। २२ ।।

विचित्रवीर्योऽथोवाह काशिराजसुते बलात् ।
स्वयंवरादुपानीते अम्बिकाम्बालिके उभे ।। २३ ।।

सत्यधर्मीया — बलाद्भीष्मेणोपानीते अम्बिकाम्बालिके उभ उत्कृष्टाभार्ययोस्ते ते । एतेन द्विवचनादेव द्वित्वे लब्धे पुनरुभे इति व्यर्थमिति परास्तम् ।। २३ ।।

छलारी — विचित्रवीर्यः सत्यवत्यां कनिष्ठपुत्रः । स्वयंवराद्भीष्मेण बलादुपानीते । यक्ष्मणा क्षयेन ।। २३,२४ ।।

तयोरासक्तहृदयो गृहीतो यक्ष्मणा मृतः ।। २४ ।।

सत्यधर्मीया — यक्ष्मणा क्षयरोगेण ।। २४ ।।

क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः ।
धृतराष्ट्रं च पाण्डुं च विदुरं चाप्यजीजनत् ।। २५ ।।

सत्यधर्मीया — अप्रजस्य प्रजारहितस्य विचित्रवीर्यस्य भ्रातुः क्षेत्रे भार्ये ये तयोः । सप्तमी वा । मात्रा उक्तः । तद्दाक्षिण्यादकार्यमप्यकार्यं नेति ज्ञेयम् । अम्बिका सामान्यतोऽम्बकद्वयमाच्छाद्य रेमेऽतोऽन्धः सुतो जातः । अम्बालिकाऽपि भीता पाण्डुरे नेत्रे विधायारीरमत् तेन पाण्डुः सुतोऽभ-वन्नामतो वर्णतश्च । भीतयोस्तयोरनागतयोरागतायां भुजिष्यायां विदुरं जनयामास व्यासः ।। २५ ।।

छलारी — अप्रजस्य सन्तानरहितस्य भ्रातुर्विचित्रवीर्यस्य प्रथमक्षेत्रे धृतराष्ट्रं द्वितीयक्षेत्रे पाण्डुमिति विवेकः । भुजिष्यां विदुरमिति विवेकः । तत्र धृतराष्ट्रः पूर्वं धृतराष्ट्रनामकगन्धर्वः पाण्डुः पूर्वं परावहो नामकमरुत्, विदुरः पूर्वं यमधर्मः ॥ २५ ॥

गान्धार्यां धृतराष्ट्रस्य जज्ञे सुतशतं नृप ।
तेषां दुर्योधनो ज्येष्ठो दुःशला चापि कन्यका ॥ २६ ॥

सत्यधर्मीया — तेषां सुतानां मध्ये दुर्योधनो ज्येष्ठः शतोत्तरा च दुःशला कन्यका जज्ञे ॥२६॥

छलारी — दुर्योधनः पूर्वं कलिः । दुःशला नाम कन्या जज्ञे ॥ २६ ॥

शापान्मैथुनरुद्धस्य पाण्डोः कुन्त्यां महारथाः ।
जाता धर्मानिलेन्द्रेभ्यो युधिष्ठिरमुखास्त्रयः ॥ २७ ॥

सत्यधर्मीया — शापात् सुरतरतेऽनेन हतेर्मृगीरूपिणी वृषौ कर्दमे स्वस्मिन् समय एतस्मिंस्तव भवतु मृतिरिति शशाप । यथोक्तमादिपर्वणि । अहं हि कर्दमो नामेत्यारभ्यास्य तु त्वं फलं मूढ त्वं प्राप्स्यसीदृशीमेव हीत्यन्तेन । तस्माच्छापात् । मैथुनं व्यवायो रुद्धं यस्य तस्य । कुन्त्यां पाण्डोराज्ञया तेभ्यो धर्मानिलेन्द्रेभ्यः । अनिलेन्द्रधर्मेभ्य इति क्रमाद्वक्तव्ये उक्तातिक्रमात्तत्रापि द्वयोरपि वायोरावेशं द्योतयितुमनिलो मध्ये निबद्धः । युधिष्ठिरो मुखं येषां ते त्रयः । युधिष्ठिरस्यापि त्रित्वघटक-तयाऽन्तर्निवेशाद्यास्तिस्रः स्थितयः पुण्या इतिवद्युधिष्ठिरमुखास्त्रय इति युज्यते ॥ २७ ॥

छलारी — शापान्मुनिशापात् । कुन्ती पूर्वदेहेऽपि पाण्डुभार्या ॥ २७ ॥

नकुलः सहदेवश्च माद्र्यां नासत्यदस्रयोः ।
द्रौपद्यां पञ्च पञ्चभ्यः पुत्रास्ते पितरोऽभवन् ॥ २८ ॥

सत्यधर्मीया — नासत्यदस्राविति यथेति ऋग्भाष्योक्तेर्नासत्यदस्रयोः सकाशान्माद्र्यां नकुलः सहदेवश्चेति द्वौ जातौ । द्रौपद्यां पञ्चभ्यो युधिष्ठिरादिभ्यः पञ्च ते तव पितरः पितृव्या अभवन् । पितरो जन्मान्तरे पितर इत्यप्याहुः ॥ २८ ॥

छलारी — नासत्यदस्रयोरश्विभ्यां जातौ । पञ्चभ्यो युधिष्ठिरादिभ्यः पञ्च पुत्रास्ते पूर्वजन्मनि पितरः ॥ २८ ॥

युधिष्ठिरात् प्रतिविन्ध्यः श्रुतसेनो वृकोदरात् ।
अर्जुनाच्छतकीर्तिस्तु शतानीकस्तु नाकुलिः ॥ २९ ॥

सत्यधर्मीया — कस्मात्क इत्यत आह ॥ युधिष्ठिरादिति । नाकुलिर्नकुलसुतः ॥ २९ ॥

छलारी — विविच्याह ॥ युधिष्ठिरादिति । नाकुलिर्नकुलपुत्रो भार्यान्तरेषु युधिष्ठिरादिभ्योऽपरे च सुता बभूवुः ॥ २९ ॥

सहदेवसुतो राजन् श्रुतकीर्तिस्तथाऽपरे ।
युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः ॥ ३० ॥

सत्यधर्मीया — पौरव्यां पौरवीनाम्न्यां देवकः ॥ ३० ॥

छलारी — अपरे भार्यान्तरेष्वित्युक्तं विवृणोति ॥ युधिष्ठिरादिति । पौरव्यां पौरवीनामिकायां देवकः सुतः । युधिष्ठिरस्य देवकी नामिका शिशुपालसुताऽन्यभार्या, तस्यां सुहोत्रो नामपुत्रो बभूवेति ज्ञेयम् । तात्पर्यनिर्णये तथोक्तेः । हिडिम्बायां घटोत्कच इति ज्ञेयम् । काली च काशिराजपुत्री अन्या । भीमसेनस्य भार्या भारती । तस्यां ततो भीमसेनादसूत । ततः शर्वगतः शर्वत्रातः पूर्वं समानवायुः । विजयानामिकायाः पार्वतीति नामान्तरम् ॥ ३०,३१ ॥

भीमसेनाद् हिडिम्बायां काल्यां शर्वगतस्ततः ।
सहदेवात् सुहोत्रं तु विजयाऽसूत पार्वती ॥ ३१ ॥

सत्यधर्मीया — घटोत्कचो भीमसेनाद्धिडिम्बायामजायत । शर्वगतः शर्वत्रातस्तम् । पार्वती विजया चेत्येकस्या नामद्वयम् ॥ ३१ ॥

करेणुमत्यां नकुलो निरमित्रं तथाऽर्जुनः ।
इरावन्तमुलूप्यां वै सुतायां बभ्रुवाहनम् ॥ ३२ ॥

मणिपूरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः ।
तव तातः सुभद्रायामभिमन्युरजायत ॥ ३३ ॥

सत्यधर्मीया — करेणुमत्यां तन्नामवत्यां निरमित्रं पुत्रमजीजनदित्यन्वयः । उलूपी नागकन्यका । इरावन्तं नाम्ना । मणिपूरपतेः सुतायां चित्राङ्गदायां बभ्रुवाहनाह्वयम् । अस्यां यो जायते पुत्रः स मे

पुत्रो भविष्यतीति पुत्रिकापुत्रनीतिः । अनेन तस्य निरपत्यता बा स्वायम्भुववत्सापत्यत्वेऽपि विशिष्टत्वेन गुणैर्यज्ञवरणवदर्जुनजोऽर्जुनयशस्को भवेदिति वा पुत्रीपुत्रवरणमिति ज्ञेयम् । तत्पुत्रो मणिपूरपतेः सुतः । सुभद्रायां भगवद्भगिन्याम् ।। ३२,३३ ।।

छलारी — निरमित्रम् । अजीजनदिति शेषः । अर्जुन उलूप्यां नागकन्यकायामिरावन्तम् ।अर्जुन एवं मणिपूरपतेः पाण्ड्यस्य सुतायां चित्रांगदायां पुत्रिकापुत्रधर्मेण दत्तायां बभ्रुवाहनमजीजनत् । सोऽपि बभ्रुवाहनोऽपि तत्पुत्रो मणिपूरपतेः पुत्रः । अभूदिति शेषः । तव तातोऽभिमन्युः सुभद्रायामजायत । अर्जुनादिति शेषः । पूर्वं सुभद्रा त्रिजटाऽभिमन्युः पूर्वं बुधः ।।३२-३३ ।।

सर्वातिरथजिद् वीर उत्तरायां ततो भवान् ।
परिक्षीणेषु कुरुषु द्रौणेर्ब्रह्मास्त्रतेजसा ।। ३४ ।।

त्वं तु कृष्णानुभावेन सजीवो मोचितोऽन्तकात् ।
तवेमे तनयास्तात जनमेजयपूर्वकाः ।। ३५ ।।

सत्यधर्मीया — ततोऽभिमन्योरुत्तरायां विराट्कुमार्याम् कुरुषु कुरुक्षेत्रे मृतेषु सत्सु द्रौणेरश्वत्थानाम्नो ब्रह्मास्त्रतेजसा । अन्तः पेशि प्रसरता प्राप्तो योऽन्तको मृत्युस्तस्मात् । त्वं कृष्णानुभावेन सजीवो मोचित इत्यन्वयः ।।३४- ३५ ।।

छलारी — कथम्भूतोऽभिमन्युः । सर्वातिरथजित्सर्वान् अतिरथान् जयतीति तथा । ततोऽभिमन्योः सकाशादुत्तरायां विराटपुत्र्यां भवान् जातः । ब्रह्मास्त्रतेजसा कुरुषु पौरवेषु परिक्षीणेषु सत्सु नष्टेषु सत्सु ।अन्तकान्मृत्योः सकाशात्सजीवो जीवसहितः सन्मोचितः ।।३४- ३५ ।।

श्रुतसेनो भीमसेन उग्रसेनश्च वीर्यवान् ।
जनमेजयस्त्वां विदित्वा तक्षकान्निधनं गतम् ।। ३६ ।।

सत्यधर्मीया — तक्षकात्सर्पात् ।। ३६ ।।

छलारी — जनमेजयपूर्वकान्पुत्रानाह ।। श्रुतसेन इत्यादिना वीर्यवानित्यन्तेन । जनमेजयस्य महिमानमाह ।। जनमेजय इति । तक्षकात्तन्नामकसर्पान्निधनं मरणम् । परीक्षितस्तक्षकान्मरणं तु प्रथमस्कन्धे स्पष्टम् ।। ३६ ।।

सर्पान् वै सर्पयागाग्नौ स होष्यति रुषाऽन्वितः ।
कावषेयं पुरोधाय तुरं तुरगमेधया ॥ ३७ ॥

सत्यधर्मीया — मेधया मेधेन पशुविषयिण्या मत्या । मेधः क्रतौ स्त्रियां मेधौ मताविति विश्वः । काविषयं कविषीपुत्रं तुरं तन्नामकं पुरोधाय पुरोहितं कृत्वा ॥ ३७ ॥

छलारी — स जनमेजयः सर्पान्होष्यति । कावषेयं तन्नामकं ऋषिं गुरुं पुरोधाय पुरतः कृत्वा तुरगमेधयाऽश्वमेधयागेन ॥ ३७ ॥

समन्तात् पृथिवीं सर्वां जित्वा यक्ष्यति चाध्वरैः ।
तस्य पुत्रः शतानीको याज्ञवल्क्यात् त्रयीं पठन् ॥ ३८ ॥
अस्त्रज्ञानं क्रियाज्ञानं शौनकात् परमेष्यति ।
सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः ॥ ३९ ॥

सत्यधर्मीया — सर्वां पृथिवीं जित्वा समन्तात् यत्र यत्र तीर्थविशेषास्तत्र सर्वत्राध्वरैरश्वमेधादिभिर्यक्ष्यति । तथा चाष्टमपञ्चकैकोनचत्वारिंशेऽध्याये एकविंशतिखण्ड उक्तम् । जनमेजयजयनं यजनं च । एतेन ह वा ऐन्द्रेण महाभिषेकेण तुरः काविषयो जनमेजयं पारीक्षितमभिषिषेच । तस्मादु जनमेजयः परीक्षितः समन्तं सर्वतः पृथिवीं जयन्परियायाश्वेन च मेध्येनेजे तदेषाभियज्ञगाथा गीयते । आसन्दीवति धान्यादं रुग्मिणं हरितस्रजम् । अश्वं बबन्ध सारङ्गं देवेभ्यो जनमेजय इति । तस्यार्थः । तत्तस्मिन् जनमेजययजनविषये एषा वक्ष्यमाणा गाथा गीयते । तां गाथामाह । आसन्दिवतीति । आसन्दिवति देशविशेषे जनमेजयो देवेभ्यो देवार्थं योग्यमश्वं बबन्ध । तद्भोज्यमाह । धान्यादमिति । धान्यं चणकाद्यत्तीति धान्यादस्तं रुग्मिणं स्वर्णालङ्कृतं ललाटं श्वेतलाञ्छनयुक्तमिति वा । हरितवर्णा स्रग्यस्यासौ तं सारं कर्म श्रेष्ठं यागं गच्छति स तथा तम् । इतरत् स्पष्टम् । जनमेजयस्य शतानीको नाम्ना यः क्रियाज्ञानं कर्मज्ञानं शौनकात् परं हरिविषयकज्ञानं कृपात् । कृपादस्त्राण्यवाप्यैष इति विष्णुपुराणोक्तेः । अस्त्रज्ञानं कृपाचार्यादिति पाठ इति वदन्ति । तत्पुत्रः शतानीकतोकस्ततः सहस्रानीकाज्जातो योऽश्वमेधस्तज्जातः ॥ ३८,३९ ॥

छलारी — सर्वां पृथ्वीं जित्वाऽश्वमेधेन तदतिरिक्तैरध्वरैश्च यक्ष्यतीत्यन्वयः । भविष्यानाह ॥ तस्य पुत्र इति । मत्समाप्तिजनमेजयस्येत्यर्थः ।याज्ञवल्क्यात्क्रियाज्ञानं शौनकात्परं चात्मसदृशादस्य ज्ञानं प्राप्स्यति । कृपादस्त्राण्यवाप्येति विष्णुपुराणोक्तेः । कचित्ज्ञानं कृपाचार्यादित्येव पाठः ॥ ३९ ॥

विश्रम्भकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः ।
गजाह्वये हृते नद्या कौशाम्ब्यां साधु वत्स्यति ॥ ४० ॥

सत्यधर्मीया — विश्रम्भकृष्णस्तस्य विश्रम्भकृष्णस्य नेमिचक्रस्तत्सुतो नेमिचक्रसुतः । नद्या यमुनया गजाह्वये नगरे हृते प्लाविते सति कौशाम्ब्यां नगर्यां साधु सम्यग्वत्स्यति वासं करिष्यति ॥ ४० ॥

छलारी — नेमिचक्रस्तत्सुतो विश्रंभकृष्णसुतः । नेमिचक्र इति शेषः । गजाह्वये पुरे नदीप्रवाहेण हृते सति कौशांब्यां पुर्यां वत्स्यति वासं करिष्यति । कौशांब्यां तन्नामकपुर्याम् ॥ ४० ॥

उक्तस्ततश्चित्ररथस्तस्माच्छुचिरथः सुतः ।
तस्माच्च धृष्टिमांस्तस्य सुषेणोऽथ महीपतिः ॥ ४१ ॥

सत्यधर्मीया — उक्तो नाम्ना । ततस्तस्माच्चित्ररथस्तस्माच्छुचिरथस्तस्माच्छुचिरथाद्धृष्टिमान् । तस्य सुषेणः ॥ ४१ ॥

छलारी — ततो नेमिचक्राच्चित्ररथ उक्तश्चित्ररथेत्युक्तः सुतः । अथ सुषेणात्सुनीथो महीपतिस्तन्नामकः ॥ ४१ ॥

सुनीथस्तस्य भविता नृचक्षुर्यत् सुखीनलः ।
पारिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः ॥ ४२ ॥

सत्यधर्मीया — तस्य सुषेणस्य तस्य सुनीथस्य नृचक्षुः । यद्यस्मात् सुखीनलो नाम्ना । सुनय आत्मजो यस्येति, सुनयस्यात्मज इति वा ॥ ४२ ॥

छलारी — भविता भविष्यति । तस्येत्यनुवर्तते । तस्य नृचक्षुर्यद्यस्मात् सुखीनलो सुखीनलनामकः सुतः । तस्मादित्युभयत्र सम्बन्धः । तस्मात्सुखीनलात्पारिप्लवस्तस्मात् मेधावीत्यध्याहार्यम् । मेधावी सुनयात्मज इत्यनुवादात् ॥ ४२ ॥

नृपञ्जयस्ततो दुर्वस्तिमिस्तस्माज्जनिष्यते ।
ततो बृहद्रथस्तस्माच्छतानीकः सुदासजः ॥ ४३ ॥

सत्यधर्मीया — ततो नृपञ्जयात्तस्मात् दुर्वातिमिस्ततस्तिमेस्तस्माद्बृहद्रथात्सुदासजः शतानीकः । ॥ ४३ ॥

छलारी — तत इत्युभयत्रानुषज्यते । ततो नृपंजयस्ततो दुर्व इति तस्माद्दुर्वात्तिमिः । तस्माद्बृहद्रथात्सुदासः ।। ४३ ।।

शतानीकाद् दुर्दमनस्तस्यापत्यं बहीनरः ।
दण्डपाणिर्निमिस्तस्य क्षेमको भविता नृप ।। ४४ ।।

सत्यधर्मीया — तस्य शतानीकस्तस्य दुर्दमनस्तस्य दुर्दमनस्य बहीनरः । क्षेमको भविता ।।४४।।

छलारी — सुदासाच्छतानीक इत्यध्याहार्यम् । शतानीकः सुदासज इत्यनुवादात् । शतानीकः सुदासपुत्र इत्यर्थः । तस्य दुर्दमनस्य । तस्येत्युत्तरत्रापि सम्बन्धः । तस्य बहीनरस्य दण्ड-पाणिर्निमिस्तस्य क्षेमकनृपः ।। ४४ ।।

ब्रह्मक्षत्रस्य वै योनिर्वंशे देवर्षिसत्कृतः ।
क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ।। ४५ ।।

सत्यधर्मीया — ब्रह्मक्षत्रस्य योनी रक्षको देवर्षिभिः सत्कृतो, देवर्षयः सत्कृता येनेति वा क्षेमकं राजानं प्राप्य कलौ काले संस्थामवसानं प्राप्स्यति ।। ४५ ।।

छलारी — ब्रह्मक्षत्रियस्य ब्राह्मणक्षत्रियात्मकस्य राजसमूहस्य देवर्षिसत्कृतः पूजितः संस्थामवसानं नाशम् ।। ४५ ।।

पापानि कीर्तनादेषां विलयं यान्ति कृत्स्नशः ।
अथ मागधराजानो भाविनो ये वदामि ते ।। ४६ ।।

सत्यधर्मीया — फलमेतत्कीर्तनस्यालपति ।। पापानीति । मागधराजानो मागधराजाः ।। ४६ ।।

छलारी — पूर्वं कुरोश्चत्वारः कुमारा इत्युक्तम् । तत्र कुरुपुत्रस्य जह्नोर्वंशं क्षेमकपर्यन्तमुक्त्वा कुरुपुत्रस्य सुधनुष उक्तावशिष्टवंशमाह ।। अथेति । बृहद्रथस्य जरासन्धस्तस्य सहदेवस्य सोमापिर्यद्यस्मात्सोमापेः श्रुतश्रवाः । यद्यपि सोमापिश्रुतश्रवसौ पूर्वोक्तौ तथाऽपि तयोर्भावित्वेन पुनर्ग्रहणम् ।। ४६,४७ ।।

भविता सहदेवस्य सोमापिर्य(त्सुतः)च्छ्रुतश्रवाः ।
ततोऽयुतायुस्तस्यापि निरमित्रोऽथ तत्सुतः ।। ४७ ।।

सत्यधर्मीया — यत्सुतः सोमापिसुतः ॥ ४७ ॥

सुनक्षत्रः सुनक्षत्राद् बृहत्सेनोऽथ कर्मजित् ।
ततः श्रुतञ्जयो विप्रः शुचिस्तस्य भविष्यति ॥ ४८ ॥

सत्यधर्मीया — विप्रो नाम्ना ॥ ४८ ॥

छलारी — ततः सुतश्रवसोऽथानन्तरं सुनक्षत्रस्तत्सुतो बृहत्सेनात् । तत इत्यनुवर्तते । ततः श्रुतंजयः । विप्रो विप्रनामाऽथ तस्माच्छुचेः ॥ ४८ ॥

क्षेमोऽथ सुव्रतस्तस्माद् धर्मसत्रः शमस्ततः ।
दृढसेनोऽथ सुमतिः सुबलो जनिता तत ॥ ४९ ॥

सत्यधर्मीया — तस्मात्सुव्रतात् ततो धर्मसत्रात् ततो दृढसेनात् ततः सुमतेः ॥ ४९ ॥

छलारी — क्षेमस्तस्मात्सुव्रतः । तस्मादित्यस्योत्तरत्रापि सम्बन्धः । तस्माद्धर्मसत्रः । अथेत्यस्योभयत्र सम्बन्धः । अथ दृढसेनोऽथ सुमतिस्ततः सुबलो जनिता भविता ॥ ४९ ॥

सुनीथः सत्यजिदथ विश्वजिद् यद् रिपुञ्जयः ।
बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरम् ॥ ५० ॥

इति श्रीमद्भागवते नवमस्कन्धे एकोनविंशोऽध्यायः ।

सत्यधर्मीया — साहस्रं वत्सरं सहस्रसंवत्सरपर्यन्तम् ॥ ५० ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे एकोनविंशोऽध्यायः ।

छलारी — तत इत्यस्योत्तरत्रापि सम्बन्धः । ततः सुनीथस्ततः सत्यजित् । यद्यस्माद्भूपालाः सहस्रवत्सरं भाव्यांस्तदनन्तरभाव्यान् द्वादशस्कन्धे वक्ष्यति ॥ ५० ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे एकोनविंशोऽध्यायः ।

॥ अथ विंशोऽध्यायः ॥

श्रीशुक उवाच —

अनोः सभानरश्चक्षुः परेक्षुश्च त्रयः सुताः ।
सभानरात् कालनरः सञ्जयस्तत्सुतस्ततः ॥ १ ॥

सत्यधर्मीया — अनुसन्ततिमाह ॥ अनोरिति । सभानरादयस्त्रयः पुत्राः । तत्सुतः कालनरसुतः ॥ १ ॥

छलारी — तदेवं ययातेः पुत्राणां पञ्चमस्य पुरोर्वंशो निरूपितः । इदानीं चतुर्थस्यानोर्वंशमनुक्रामति ॥ अनोरिति । त्रयः । ततो जनमेजयः ॥ १ ॥

जनमेजयस्तस्य पुत्रो महाशीलो महामनाः ।
उशीनरस्तितिक्षुश्च महामनस आत्मजौ ॥ २ ॥

सत्यधर्मीया — तत्पुत्रः सञ्जयजस्तत्पुत्रो महाशीलसुतः। उशीनरस्तितिक्षुश्चेति आत्मजौ ॥ २ ॥

छलारी — तस्य जनमेजनस्य महाशालस्तस्य महामनाः ॥ २ ॥

शिबिर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः ।
वृषदर्भः सुवीरश्च मद्रः केकय आत्मजाः ॥ ३ ॥

सत्यधर्मीया — चत्वारोशीनरात्मजा इत्यत्र सन्धिरार्षः ॥ ३ ॥

छलारी — चत्वारोशीनरात्मजाः । सन्धिरार्षः । वृषदर्भादयश्चत्वारः शिबेरात्मजा इत्यन्वयः । ॥ ३ ॥

शिबेश्चत्वार एवासन् तितिक्षोश्च पृषद्रथः ।
ततो हेमोऽथ सुतपा बलिः सुतपसोऽभवत् ॥ ४ ॥

सत्यधर्मीया — केकयान्तिमा शिबेश्चत्वार आत्मजास्तितिक्षोः पृषद्रथस्ततः पृषद्रथात् ॥ ४ ॥

छलारी — तितिक्षोरुशीनरानुजस्य ॥ ४ ॥

अङ्गवङ्गकलिङ्गाद्याः सुह्मपुण्ड्रान्ध्रसञ्ज्ञिताः ।
जज्ञिरे दीर्घतमसो बलेः क्षेत्रे महीक्षितः ॥ ५ ॥

सत्यधर्मीया — अङ्गवङ्गकलिङ्गाद्या बले राज्ञो दीर्घतमसो मामतेयाद्भर्त्राज्ञया । क्षेत्रे भार्यायाम् ॥ ॥ ५ ॥

छलारी — दीर्घतपसः सकाशादंगवंगकलिंगाद्या अंगवङ्गकलिङ्ग एवाद्या प्रधाना येषां ते तथोक्ताः सुह्मपुण्ड्रादिनामानो महीक्षितो राजानो बलेः क्षेत्रे जज्ञिर इत्यन्वयः ॥ ५ ॥

चक्रुः स्वनाम्ना विषयान् षडिमान् प्राच्यकानिह ।
खनपानोऽङ्गतो जज्ञे तस्माद् दिविरथस्ततः ॥ ६ ॥

सत्यधर्मीया — तेऽङ्गादयः षट् स्वनाम्ना विषयान्देशान्प्राच्यकान्प्राचीविषयांश्चक्रुः । अङ्गतोऽङ्गात्तस्मात्खनपानात् ॥ ६ ॥

छलारी — तेऽङ्गाद्या षट् राजानः प्राच्यकान् पूर्वादिदिशि विद्यमानान् षट् विषयान् स्वनाम्ना ख्यातिं चक्रुः । अङ्गतोऽङ्गदेशाधिपतेरङ्गराजात्खनपानो नाम्ना ॥ ६ ॥

सुतो धर्मरथस्तस्य जज्ञे मित्ररथोऽप्रजः ।
रोमपाद इति ख्यातस्तस्मै दशरथः सखा ।
शान्तां स्वकन्यां प्रायच्छद् ऋष्यशृङ्ग उवाह ताम् ॥ ७ ॥

सत्यधर्मीया — ततस्तस्य सुतस्तस्य धर्मरथस्य । अप्रजः पुमपत्यरहितस्तस्मै ॥ ७ ॥

छलारी — ततो धर्मरथाख्यः सुतः । अऽप्रजः प्रजारहितः । स मित्ररथो रोमपाद इति ख्यातः । दशरथो रामपिता । तस्मै तस्य सखा प्रायच्छत् । ऋष्यशृङ्गे । उवास इति शेषः ॥ ७ ॥

देवेऽवर्षति यं रामा आनिन्युर्हरिणीसुतम् ।
वाद्यसङ्गीतवादित्रैर्विभ्रमालिङ्गनार्हणैः ॥ ८ ॥

सत्यधर्मीया — सति, रामा सुन्दर्यो हरिणीसुतमृष्यशृङ्गमानिन्युरानीतवन्तः । सा ऋष्यशृङ्गमानेष्यन्त्यङ्गना मुनिवेषतः,अनावृष्टिभयोद्विग्नो वृष्टिर्लब्धा ततो नृपः दास्यत्ययं मौल्यमिव शान्तानाम्नीं निजात्मजामिति सङ्ग्रहरामायणोक्तेः । वाद्यसङ्गीतेति नाट्यसङ्गीतेति द्वावपि सरलौ पाठौ ॥ ८ ॥

छलारी — देवे देवेन्द्रे । यं ऋष्यशृङ्गम् । रामा वरांगनाः । वाद्यानि रववाद्यानि वीणादिभिर्वादित्राणि मृदंगादीनि विभ्रमो विलासोऽर्हणानि पुष्पादीनि । तैरानिन्युरिति सम्बन्धः । ततो वृष्टिं लब्ध्वा स्वकन्यां प्रायच्छदिति विज्ञातव्यम् । अनावृष्टिभयोद्विग्नो लोमपादो वनस्थे हरिणीसुते ऋष्यशृङ्गमुनावत्रानीते सुवृष्टिर्भविष्यतीति ब्राह्मणैरुक्ते सति । नानाप्रयत्नैस्तस्मिन्नानीते सति तस्माहृष्यशृङ्गमुनेर्वृष्टिं लब्ध्वा सन्तुष्टः सन् स्वकन्यां शान्ताख्यां प्रायच्छदिति ज्ञातव्यम् ॥ तदुक्तम् ॥ अनावृष्टिभयोद्विग्नो वृष्टिं लब्ध्वा ततो नृपः । दास्यत्ययं मौल्यमिव शान्तां नाम निजात्मजामिति ॥ ८ ॥

स तु राज्ञोऽनपत्यस्य निरूप्येष्टिं मरुत्वतः ।
प्रजामदाद् दशरथो येन लेभेऽप्रजः प्रजाः ॥ ९ ॥

सत्यधर्मीया — मरुत्वत इति सरलः पाठः । मरुत्पतेरिति पाठेऽपीन्द्रस्येत्यर्थः । इष्टिं निरूप्य कारयित्वा येन ऋष्यशृङ्गेणाप्रजो दशरथः प्रजां रामाद्यां लेभे ॥ ९ ॥

छलारी — अत्र पुत्रस्य लोमपादस्य पुत्रोत्पत्तिप्रकारं निरूपयति । अनपत्यस्य सन्तानरहितस्य लोमपादस्य इति । ऋष्यशृङ्गो मरुत्वत इन्द्रस्येष्टिमिन्द्रदेवताकमिष्टिमित्यर्थः । स इष्टिः कीदृशः । अप्रजो दशरथो येन ऋष्यशृङ्गेनेष्टिविशेषेण प्रजाः रामादीन् लेभे ॥ ९ ॥

चतुरङ्गो रोमपादात् पृथुलाक्षस्तु तत्सुतः ॥ १० ॥

सत्यधर्मीया — रोमपादाच्चतुरङ्गस्ततश्चतुरङ्गाङ्गजः ॥ १० ॥

बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुताः ।
ततो बृहन्मनास्तस्माज्जयद्रथ उदाहृतः ॥ ११ ॥

सत्यधर्मीया — तत्सुताः पृथुलाक्षसुतास्ततो बृहद्रथात् तस्माद्बृहन्मनसः ॥ ११ ॥

छलारी — बृहद्रथादयस्त्रयस्तत्सुताः पृथुलाक्षसुताः । ततो बृहद्भानोः ॥ ११ ॥

विजयस्तस्य सम्भूत्यां ततो धृतिरजायत ।
ततो धृतव्रतस्तस्य सत्कर्माऽधिरथस्ततः ॥ १२ ॥

सत्यधर्मीया — तस्य जयद्रथस्य । ततो विजयात् । ततो धृतेस्तस्य धृतवृतस्य सत्कर्मा । ततः सत्कर्मणोऽधिरथः ॥ १२ ॥

छलारी — ततो विजयात्संभूतिनामिकायां धृतिनामकस्ततः सत्कर्माख्यादधिरथः ॥ १२ ॥

योऽसौ गङ्गातटे क्रीडन् मञ्जूषान्तर्गतं शिशुम् ।
कुन्त्याऽपविद्धं कानीनमनपत्योऽकरोत् सुतम् ॥ १३ ॥

सत्यधर्मीया — अपविद्धमेकान्तत्यक्तं कानीनं कन्यकाजातम् ॥ १३ ॥

छलारी — अपविद्धं गङ्गायां विसृष्टं कानीनं कन्यावस्थायां जातम् ॥ १३ ॥

वृषसेनः सुतस्तस्य कर्णस्य जगतीपते ।
द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ॥ १४ ॥

सत्यधर्मीया — जगतीपते हे परीक्षित् । द्रुह्युवंशं शंसति ॥ द्रुह्योरिति । तस्य बभ्रोस्ततः सेतोः ॥ १४ ॥

छलारी — तस्य कर्णस्य सुद्युम्नसुतः । कुन्त्याऽपविद्धं क्षिप्तं कानीनं कन्यावस्थायां जातं शिशुं सुतमकरोदित्यर्थः । ययातिपुत्रस्यानोर्वंशं निरूप्य द्रुह्योर्वंशं निरूपयति ॥ द्रुह्योश्चेति । आत्मज इत्यस्योत्तरत्राप्यनुषङ्गः ॥ १४ ॥

आरब्धस्तस्य गान्धारस्तस्य धर्मस्ततो धृतः ।
धृतस्य कर्दमस्तस्मात् प्रचेताः प्राचेतसं शतम् ॥ १५ ॥

सत्यधर्मीया — तस्यारब्धस्य, तस्य गान्धारस्य धर्मस्ततो धर्मात् । तस्मात्कर्दमात् । प्राचेतसं प्रचेतोजातम् ॥ १५ ॥

छलारी — आरब्ध आरब्धनामकः शतं पुत्रशतं प्राचेतसं प्रचेतसूसम्बन्धिप्राचेतसः शतसंख्याकाः पुत्राः बभूवुरित्यर्थः । तेनेति शेषः ॥ १५ ॥

म्लेच्छाधिपतयोऽभूवन्नुदीचीं दिशमाश्रिताः ॥ १६ ॥

सत्यधर्मीया — उदीचीं दिशमाश्रिता म्लेच्छाधिपतयोऽभूवन् ॥ १६ ॥

छलारी — केनचिन्निमित्तेन म्लेंछाधिपतयोऽभूवन् ॥ १६ ॥

तुर्वसोस्तु सुतो वह्निर्वह्नेर्भार्गोऽथ भानुमान् ।
नृभानुस्तत्सुतोऽस्यापि करन्धम उदारधीः ।
मरुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् ॥ १७ ॥

सत्यधर्मीया — तुर्वसुवंशं शंसति ॥ तुर्वसोरिति । अथ भागानन्तरम् । तत्सुतो भानुमत्सुतोऽस्य नृभानोस्तत्सुतः मरुतोऽपुत्रः पौरवं तद्वंशभवमन्वभूत् । औरसाभावात्पुरुवंशस्थं पालनाय गृहीतवानित्यर्थः ॥ १७ ॥

छलारी — ययातिपुत्रस्य तुर्वसोर्वंशं कथयति ॥ तुर्वसोरिति । वह्निनामः । अथ तस्मात् । तत्सुतो भानुमत्सुतः । तत्सुतः करंधमसुतः पौरवं पुरुवंशोत्पन्नं दुष्यन्तं पुत्रम् । अस्य मरुतस्यौरसपुत्राभावादेनं दत्तपुत्रं चकारेत्यर्थः । स दुष्यन्तः किञ्चित्कालं मरुतस्य वंशे स्थित्वा राज्याधिपत्यापेक्षयायं दुष्यन्तभरतत्वात्पितुर्दुष्यन्तादन्य इति ज्ञातव्यम् ॥ १७ ॥

दुष्यन्तं स पुनर्भेजे स्वयं साम्राज्यकामुकः ॥ १८ ॥

सत्यधर्मीया — दुष्यन्तं स्वसाक्षात्पितरं स्वयं साम्राज्यकामुकः पुनर्भेजे ॥ १८ ॥

ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ ।
वर्णयामि महापुण्यं सर्वपापहरं नृप ॥ १९ ॥

यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ।
यत्रावतीर्णो भगवान् परमात्मा नराकृतिः ॥ २० ॥

यदोः सहस्रजित् क्रोष्टा नलो रिपुरिति श्रुताः ।
चत्वारः सूनवस्तस्य शतजित् प्रथमात्मजः ।
महाहयो वेणुहयो हैहयश्चेति तत्सुताः ॥ २१ ॥

सत्यधर्मीया — यदोर्वंशं नरः श्रुत्वा (स्थितः) सर्वपापैः प्रमुच्यते । इदमेवोदाहृत्य समान-कर्तृकतानियमो नास्तीति व्याख्याय यत्र यत्र श्रीटीकाकृत्पादाः स्थितस्येति शेषं पूरितवन्तस्तत्र तत्र पररीत्येति भावं चाविर्भावयामासुः । शेषवाक्यार्थचन्द्रिकाकारा इतोऽपि विस्तरतस्ततोऽनुसन्धेयः ।

चन्द्रिकायामपि ''इत्युक्त्वा प्रतीयते'' इति भाष्ये क्रिययोः समानकर्तृकत्वाभावेऽपि क्त्वाप्रत्ययो यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यत इतिवद्द्रष्टव्य इत्यदृश्यत्वाधिकरणे चोक्तम् । अक्षरात्परतः परस्याप्यक्षरान्तत्ववचनादिति न्यायविवरणतत्त्वप्रदीपटीकादितः प्रतीयते व्याकरणप्रतीयता चैतत्पक्षे कथं वारणीयेत्याचार्या विचार्याः । यद्यपि व्याकर्तारो द्रष्टव्य इत्यत्र वर्तमान इति पदाध्याहारेण निर्वाह इवात्रापि वचनादित्यादिपदाध्याहारेण निर्वाहो ज्ञातव्य इति तात्पर्यमवधातव्यमिति विवृतवन्तश्चेदपि समानकर्तृकत्वाभावेऽपि यदोर्वंशमित्यादेश्चानुदाहार्यत्वशङ्कां न ते लङ्घितवन्त इत्यलम् । प्रसङ्गच्छलमेव मूलं ज्ञेयम् । नराणामाकृतिरिवाकृतिर्यस्य सः । यदोः सहस्रजिदादयश्चत्वारः श्रुताः प्रसिद्धाः प्रथमस्य सहस्रजितः ॥ १९-२१ ॥

छलारी — सूचीकटाहन्यायेन द्रुह्यादीनां पुत्राणां वंशं कथयित्वा बहुलपुण्यहेतुत्वाच्च ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं कथयति ॥ ययातेरिति ॥ महापुण्यं तद्वंशे भगवतोऽवतीर्णत्वादिति हृदयम् । तदेव विशदमाह ॥ यदोर्वंशमिति । नरवदाकृतिर्यस्य । यदोश्चत्वारः सूनवः श्रुताः विख्याताः । प्रथमात्मजः प्रथमस्य सहस्रजित आत्मजः । तत्सुताः शतजित्सुतास्त्रयः ॥१९- २१ ॥

धर्मस्तु हैहयसुतो नेत्रः कुन्तेः पिता ततः ।
सोहञ्जिरभवत् कुन्तेर्महिष्मान् भद्रसेनकः ॥ २२ ॥

सत्यधर्मीया — तत्सुताः शतजित्सुताः । कुन्तेः पिता नेत्रस्ततः कुन्तेः सोहञ्जिस्ततः सोहञ्जेः । महिष्मान् ततो भद्रसेनकः ॥ २२ ॥

दुर्मदो भद्रसेनस्य धनकः कृतवीर्यकः ।
कृत्याग्निः कृतवर्मा च कृतौजा धनकात्मजाः ॥ २३ ॥

सत्यधर्मीया — धनकः कृतवीर्यादयश्चत्वारो धनकात्मजाः ॥ २३ ॥

छलारी — ततो धर्मात् । नेत्र इत्यनुषङ्गः । स च कुन्तेस्तन्नामकस्य पिता कुन्तिनामको नेत्रस्य पुत्र इत्यर्थः । कुन्तेः सोहंजिः सोहंजेर्महिष्मान्महिष्मतो भद्रसेनः । भद्रसेनस्य दुर्मदो धनकश्चेति द्वौ पुत्रौ । धनकः कृतवीर्यकः कृतवीर्यजनकः । धनकस्यान्येऽपि पुत्रास्तानाह ॥ कृत्याग्निरित्यादिना । अर्जुनः कार्तवीर्यार्जुनः । प्राप्ता अणिमादयो योगाः शौर्यादयश्च महागुणा यस्य स तथोक्तः ॥ २३,२४ ॥

अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत् ।
दत्तात्रेयाद् हरेरंशात् प्राप्तयोगमहागुणः ॥ २४ ॥

सत्यधर्मीया — अर्जुनः कार्तवीर्यार्जुनो हरेः साक्षादंशात् ॥ २४ ॥

न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः ।
यमदानतपोयोगैः श्रुतवीर्यजयादिभिः ॥ २५ ॥

सत्यधर्मीया — श्रुतं श्रवणं वीर्यं पराक्रमो जयोऽरीणामेत आदयो येषां ते तैः ॥ २५ ॥

छलारी — तानेव महागुणानाह ॥ न नूनमिति । गतिं स्थितिम् । सामर्थ्यमिति यावत् । ते पार्थिवाः । योगोऽणिमादिर्ज्ञानादिश्च जयः शत्रुजयः ॥ २५ ॥

पञ्चाशीतिसहस्राणि ह्यव्याहतबलः समाः ।
अकरोदर्जुनो राज्यं हरिं चैवान्वहं स्मरन् ॥ २६ ॥

सत्यधर्मीया — पञ्चाशीतिसहस्राणि समा इति सामानाधिकरण्यम् ॥ २६ ॥

छलारी — पञ्चोत्तराशीतिसहस्रसंख्याकाः समा अव्याहतमप्रतिहतं शरीरबलं यस्य स तथा ॥ ॥ २६ ॥

अनष्टविष्णुस्मरणो बुभुजेऽक्षय्यषड्वसु ।
तस्य पुत्रसहस्राणां पञ्चैवोर्वरिता मृधे ॥ २७ ॥

सत्यधर्मीया — स्वयं स्मरतु हरिं न समीपवर्तिनस्तथेति चेत् नेति कथयति ॥ अनष्टविष्णुस्मरण इति । नष्टं विष्णुस्मरणं येषां ते, ते न विद्यन्ते यस्मिन्निति स तथा । अनेनान्वहं हरिं स्मरन्निति गतार्थतेति ज्ञेयम् । षडिन्द्रियभोग्यं वसु विषयजातं । तस्य कार्तवीर्यस्य ये दशसहस्राणां मध्येऽयुतं दुद्रुवुर्भयादिति पूर्वमुक्तेर्मृधे पञ्चोर्वरिताः ॥ २७ ॥

छलारी — भोगकालेऽपि विष्णुस्मरणं न परित्यक्तवानित्याह ॥ अनिष्टेति । अक्षय्यं षट्सु षडिन्द्रियविषयं षष्ठांशं वसु षड्वसु वा बुभुजे । तस्य कार्तवीर्यार्जुनस्य मृधे युद्धे ॥ २७ ॥

जयध्वजः शूरसेनो ऋषभो मधुरूर्जितः ।
जयध्वजात् तालजङ्घस्तस्य पुत्रशतं त्वभूत् ॥ २८ ॥

सत्यधर्मीया — पश्चानां नामान्याह ॥ जयध्वज इति । जयध्वजात्तालजङ्घस्तस्य तालजङ्घस्य पुत्रशतम् ॥ २८ ॥

छलारी — तानेवाह ॥ जयध्वज इति । यत्पुत्रशतं यत्तालजंघपुत्रशतत्वादेव तदाख्यं क्षत्रं क्षत्रकुलं तदौर्वस्य मुनेस्तेजो यस्य स तथा तेन सगरेण संहृतमित्यर्थः । यद्वा । सगरेणौर्वतेजसा युद्धे संहृतम् । तेषां तालजङ्घपुत्राणां वीतिहोत्रो ज्येष्ठः । वीतिहोत्रस्येति शेषः । मधुः सुत इत्यन्वयः । कथम्भूतो मधुः । वृष्णिपुत्रो वृष्णिः पुत्रो यस्य स तथा । तस्य मधोः पुत्रशतं त्वासीदिति हरिवंशवचनादिति दुर्घटभावदीपोक्तेः । कीदृशं पुत्रशतम् । वृष्णिर्ज्येष्ठो यस्य स तथोक्तम् । वृष्णिं प्रथममुक्त्वाऽनन्तरं पुत्रशतमभूदित्यर्थः । यतो मधोर्वृष्णेः यदोश्च हेतोरिदं कुलमुत्पन्नम् अतस्तत्कुलस्था माधवा वृष्णयो यादवाश्चेति संज्ञिता इति योज्यम् ॥ २८-३० ॥

क्षत्रं यत् तालजङ्घाख्यमौर्वतेजोपसंहृतम् ।
तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः ॥ २९ ॥

सत्यधर्मीया — और्वतेजोपसंहृतमौर्वेण तेजो यस्य स सगरस्तेनोपसंहृतम् । तेषां शतसुतानां मध्ये वीतिहोत्रो ज्येष्ठस्तस्य मधोर्वृष्णिः सुतः स्मृतः ॥ २९ ॥

तस्य पुत्रशतं त्वासीद् वृष्णिज्येष्ठं यतः कुलम् ।
माधवा वृष्णयो राजन् यादवाश्चेति सञ्ज्ञितम् ॥ ३० ॥

सत्यधर्मीया — तस्य पुत्रशतं त्वासीत् वृष्णिः शतातिरिक्तो यतः कुलं, माधवा वृष्णयो यादवाश्चेति संज्ञितम् । तत्तन्मुख्यपुरुषजन्यत्वात् । मधोः पुत्रशतं त्वासीदित्यादिहरिवंशोक्तेः । वृष्णय इत्यत्र देशस्य तत्संज्ञाङ्गीकारेण तद्राजस्य बहुषु तेनैवास्त्रियामिति व्यचूकाणलुक् ॥ ३० ॥

यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः ।
वाहितोऽतोनुशेकुर्वै तस्य चित्ररथस्ततः ॥ ३१ ॥

सत्यधर्मीया — ततो वृजिनवतोऽतो वाहितादनुशेकुस्तस्यानुशेकोस्ततश्चित्ररथात् ॥ ३१ ॥

छलारी — यदुपुत्रेषु चतुर्षु ज्येष्ठस्य सहस्रजितो वंशमुक्त्वा द्वितीयस्य वंशमाह ॥ यदुपुत्रस्येति । क्रोष्टोः क्रोष्टनामकस्य वृजिनवान्पुत्रस्ततो वाहेरनुशेकुः । तत इत्यस्योत्तरत्र सम्बन्धः ॥ ३१ ॥

शशबिन्दुर्महायोगी महाभोजो महानभूत् ।
चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः ॥ ३२ ॥

सत्यधर्मीया — शशबिन्दुस्तस्यैव महाभोज इति नामान्तरम् । चतुर्दश महान्ति रत्नानि यस्य सः । तत्तज्जातिजाया रत्नमुच्यते । गजवाजिरथास्त्रेषु निधिमालाम्बरद्रुमाः । शक्तिसासिमणिच्छन्न-विमानानि चतुर्दशेति मार्कण्डेयपुराणोक्तानि । चक्रो रथो मणिः खड्गश्चर्मरत्नं च पञ्चमम् । केतुर्निधिश्च सप्तैव प्राणहीनानि चक्षते । भार्या पुरोहितश्चैव सेनानी रथकृच्च यः । पत्यश्वौ कलभश्चेति प्राणिनां सप्त कीर्तिताः । चतुर्दशैतानि रत्नानि सर्वेषां चक्रवर्तिनामिति धर्मसंहितोक्तानि वा रत्नानि ज्ञेयानि । चक्रवर्ती गतम् । अपराजितः, शत्रुमद्भिभूतीरभिध्यायन् श्रीवत्सास्त्रविभूषिताः । ध्वजातपत्रव्यजनैः स भवेदपराजित इत्येकादशस्कन्धोक्तलक्षणवानपराजितो वा ॥ ३२ ॥

छलारी — ततश्चित्ररथाच्छशबिन्दुर्महाभोज इति नामान्तरम् । तं विशिनष्टि ॥ चतुर्दशेति । चतुर्दशमहारत्नानि तज्जातिश्रेष्ठवस्तूनि यस्य सः । तानि मार्कण्डेयपुराणे वर्णितानि । गजवाजिरथस्त्रेषु निधिमौक्तिकविद्रुमाः । शक्तिपाशमणिच्छन्नविमानानि चतुर्दशेति ॥ ३२ ॥

तस्य पत्नीसहस्राणां दशासन् स महायशाः ।
दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् ॥ ३३ ॥

सत्यधर्मीया — पत्नीसहस्राणां दश, दशसहस्रसङ्ख्याः पत्न्योऽभवन् । स महायशाः शशबिन्दु-स्तासु दशलक्षसहस्राणि प्रत्येकं प्रत्येकं लक्षं लक्षमेवं दशलक्षसहस्राणि पुत्राणामजीजनत् ॥ ३३ ॥

छलारी — तस्य शशबिन्दोः पत्नीसहस्राणां दश आसन् । दशसहस्रसंख्याकाः पत्न्योऽभवन्नित्यर्थः । महायशाः सः शशबिन्दुस्तासु भार्यासु प्रत्येकं लक्षं लक्षमेवं तासु पुत्राणां दशलक्षसहस्राणि जनयामास । शशबिन्दोरनेकेषु पुत्रेषु पृथुश्रवः प्रभृतयः षट् पुत्राः प्रधानाः ॥३३॥

तेषां तु षट्प्रधानानां पृथुश्रवस आत्मजः ।
धर्मो नामोशनास्तस्य हयमेधशतस्य राट् ॥ ३४ ॥

सत्यधर्मीया — षट् प्रधानानां पृथश्रवा इति श्रेयांस्तस्यात्मजो धर्मस्तत्कर्म । तस्य धर्मस्योशनाः । नायमुशनेति अविसर्गः पाठः सम्भवति । हयमेधशतस्य राट् तदनुष्ठाता ॥ ३४ ॥

छलारी — तत्र शशबिन्दोर्ज्येष्ठपुत्रस्य पृथुश्रवसो वंशमाह ॥ तेषामिति । तेषां मध्ये धर्मो नाम पृथुश्रवस आत्मजः । तस्य धर्मस्योशना नामात्मजो हयमेधशतस्य हयमेधानां शतेन राजत इति राट् शताश्वमेधकर्तेत्यर्थः ॥ ३४ ॥

तत्सुतो रुचकस्तस्य पञ्चासन्नात्मजाः शृणु ।
पुरुजिद्रुक्मरुक्मेषुपृथुज्यामघसञ्ज्ञिताः ॥ ३५ ॥

सत्यधर्मीया — तत्सुत उशनःसुतस्तस्य रुचकस्य पञ्चासन् तानात्मजांच्छृणु ॥ ३५ ॥

छलारी — तस्य रुचकस्य पञ्चात्मजा आसन् । तानात्मजान् शृणु ॥ ३५ ॥

ज्यामघस्त्वप्रजोऽप्यन्यां भार्यां शैब्यापतिर्भयात् ।
नाविन्दच्छत्रुभवनात् कन्यां भ्रष्टामहारषीत् ॥ ३६ ॥

सत्यधर्मीया — ज्यामघः शैब्यापतिर्भयाद्भार्याभीतेर्युद्धे भ्रष्टां कन्यामहार्षीत्सामर्थ्यादानीतवान् ॥ ॥ ३६ ॥

छलारी — शैब्यानामकभार्याभयादेवैकभार्यस्य वन्ध्यापतेर्ज्यामघस्य राज्ञः पुत्रस्य तद्भयमेव पुत्रप्रदमभवदिति प्रदर्शयन्नाह ॥ ज्यामघस्त्विति । अन्यां भार्यां नाविन्दन्न प्राप शत्रुभवनान्मार्गभ्रष्टामहर्षीदपहार्षीत् ॥ ३६ ॥

रथस्थां तां निरीक्ष्याह शैब्या पतिममर्षिता ।
केयं कुहक मत्स्थानं रथमारोपितेति वै ॥ ३७ ॥

सत्यधर्मीया — तां कन्यां शैब्याऽमर्षिता सती पुनः परिणयनायानयनमित्यमर्षात्पतिमाह । हे कुहक कपटिन् मत्स्थानं रथमारोपिता केत्याह ॥ ३७ ॥

छलारी — हे कुहक कपटयुक्त । मदावासस्थानम् ॥ ३७ ॥

स्नुषा तवेत्यभिहिता स्मयन्ती पतिमब्रवीत् ।
अहं वन्ध्याऽसपत्नी च स्नुषा युज्येत मे कथम् ॥ ३८ ॥

सत्यधर्मीया — तव स्नुषा, सपत्नी नेति स्मयन्ती पुत्रासत्त्ववचनमिदं कथमिति स्मयः । अहं च वन्ध्याऽसपत्नी च तादृश्या मम स्नुषा कथं युज्येत ॥ ३८ ॥

छलारी — स्नुषा स्नुषेति वचनं कथं युज्यते ॥ ३८ ॥

जनयिष्यसि यं राज्ञि तस्येयमुपपत्स्यते ।
अन्वमोदन्त तद् विश्वेदेवाः पितर एव च ॥ ३९ ॥

सत्यधर्मीया — हे राज्ञि यं जनयिष्यसि तस्येयमुपपत्स्यते उपयुक्ता भविष्यति । तन्नामधे जननं विश्वेदेवाः पितरश्च तेन बहुचिरं समचिन्ता अन्वमोदन्त तथाऽस्त्वित्यवदन् ॥ ३९ ॥

छलारी — अतिभयेन व्याकुलमाह ॥ जनयिष्यसीति । देवताप्रसादेनेति शेषः । भार्याभयेन कथं मनःखिन्नसर्वाङ्गस्य राज्ञः प्राणसंकटमालोक्य कयाऽनुकंपितास्तेन पूर्वं बहुकालमाराधिता विश्वे देवाः पितरश्च तथेत्यन्वमोदन्त ॥ ३९ ॥

शैब्या गर्भमधात् काले कुमारं सुषुवे शुभम् ।
स विदर्भ इति प्रोक्त उपयेमे स्नुषां सतीम् ॥ ४० ॥

इति श्रीमद्भागवते नवमस्कन्धे विंशोऽध्यायः ।

सत्यधर्मीया — स शैब्यात्मजो विदर्भ इति प्रोक्तः । प्रोक्तां पित्रा स्नुषेति या तां सतीमुपयेमे इत्यन्वयः ॥ ४० ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां
नवमस्कन्धे विंशोऽध्यायः ।

छलारी — स्नुषां पूर्वं स्नुषेत्यभिहिताम् ॥ ४० ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे विंशोऽध्यायः ।

॥ अथ एकविंशोऽध्यायः ॥

श्रीशुक उवाच —

तस्यां विदर्भोऽजनयत् पुत्रौ नाम्ना कुशक्रथौ ।
तृतीयं रोमपादं च वैदर्भकुलनन्दनम् ॥ १ ॥

छलारी — ज्यामघवंशं निरूपयति ॥ तस्यामिति ॥ १ ॥

रोमपादसुतो बभ्रुर्बभ्रोः कृतिरजायत ।
कुशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो यतः ॥ २ ॥

सत्यधर्मीया — तत्सुतः कुशिककुमारश्चेदिश्चैद्यादयः शिशुपालादयो यतः चेदेः ॥ २ ॥

छलारी — यतश्चेदिश्चैद्यादयो दमघोषादयः ॥ २ ॥

क्रथस्य कुन्तिः पुत्रोऽभूद् बलिस्तस्याथ निर्वृतिः ।
ततो दशार्हनामाऽथ तस्य व्योमः सुतस्ततः ॥ ३ ॥

सत्यधर्मीया — तस्य कुन्तेरथ बलेस्ततो निर्वृतेस्तस्य दशार्हस्य ततो व्योमात् ॥ ३ ॥

छलारी — कुशस्य वंशाभावाद्विदर्भसुतस्य क्रथस्य वंशमाह ॥ क्रथस्येति । ततो जीमूतसम्बन्धः ॥ ३ ॥

जीमूतो विकृतिस्तस्य ततो भीमरथः सुतः ।
ततो नवरथः पुत्रो जातो दशरथस्ततः ॥ ४ ॥

सत्यधर्मीया — तस्य जीमूतस्य तस्य विकृतेस्ततो भीमरथात् ततो नवरथात् दशरथोऽयमितरो रामतातात् ॥ ४ ॥

छलारी — ततो दशरथात् । शकुनिः पुत्र इति ज्ञेयम् । शकुनेः करम्भिरित्यनुवादात् ॥ ४ ॥

करम्भिः शकुनेः पुत्रो देवरातस्तदात्मजः ।
देवक्षत्रस्ततस्तस्य मधुः कुरुवशादनुः ॥ ५ ॥

सत्यधर्मीया — ततो दशरथात् शकुनिः शकुनेः करम्भिः करम्भिजस्ततो देवरातात् तस्य देवक्षत्रस्य ततो मधोस्ततः ककुरस्य ॥ ५ ॥

छलारी — तदात्मजः करम्भिसुतो मधोः कुरुवंशस्तत इति ज्ञातव्यम्। कुरुवंश इत्यनुवादात् ॥ ५ ॥

पुरुहोत्रस्त्वनोः पुत्रस्तस्यायुः सात्वतस्ततः ।
भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोऽन्धकः ॥ ६ ॥

सत्यधर्मीया — अनोरित्यनुवादादनुः सूनुस्तस्य पुरुहोत्रस्य, तत आयोस्तस्य सात्वतस्य भजमानादयो महाभोजान्ताः ॥ ६ ॥

छलारी — सात्वतस्य पुत्रानाह ॥ भजमान इति । महाभोजश्चेत्येवं सप्त । मारिष हे आर्य ॥६॥

सात्वतस्य सुताः सप्त महाभोजश्च मारिष ।
भजमानस्य निम्लोचिः किङ्किणो धृष्टिरेव च ॥ ७ ॥

सत्यधर्मीया — सप्त मारिषेति गतम् ॥ ७ ॥

छलारी — सात्वतस्य ज्येष्ठपुत्रस्य भजमानस्य पुत्रानाह । भजमानस्येति ॥ ७ ॥

एकस्यामात्मजाः पत्न्यामन्यस्यां च त्रयः सुताः ।
शताजिच्च सहस्राजिदयुताजिदिति प्रभो ॥ ८ ॥
बभ्रुर्देवावृधसुतस्तयोः श्लोकं पठन्त्यमुम् ।

सत्यधर्मीया — एकस्यां भार्यायामन्यस्यां च त्रय एवं षट् । नामाह ॥ शताजिच्चेति ॥ तयोः पितापुत्रयोर्विषयेऽमुं वक्ष्यमाणं श्लोकं पठन्ति । श्लोकमित्येकवचनं द्विवचनार्थे । तयोस्तस्य तस्यामुं श्लोकं श्लोकमिति प्रातिस्विकमन्वयने तद्विकसम्पत्तिर्वा । मूले श्लोकमित्येकवचनं श्लोकद्वयाखण्डान्वय-मूलकमिति ज्ञेयम् ॥ ८ ॥

छलारी — एकस्यां पत्न्यां निम्लोचिः । आत्मज इत्यनुषंगः । अन्यस्यां पत्न्यां शताजिदित्या-दयस्त्रय सुताः ॥ ८ ॥

यथैव शृणुमो दूरात् सम्पश्यामस्तथाऽन्तिकात् ।
बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ॥ ९ ॥

सत्यधर्मीया — दूराद्यथैव येन प्रकारेण शृणुमोऽन्तिकात्समीपेऽपि तथैव पश्यामः । लोके दूरतोऽधिकं श्रूयते समीपेऽल्पीयो दृश्यते न तथाऽपि तु श्रवणदर्शनयोः समानमानविषयकतेति भावः । बभ्रुः पुत्रो मनुष्याणां मध्ये श्रेष्ठो देवावृधः पिता देवैः समो बभ्रोर्देवावृधादपीति पितापुत्राभ्याम् ॥ ९ ॥

छलारी — सात्वतस्य पञ्चमपुत्रस्य देवावृधस्य वंशमाह ॥ बभ्रुरिति । तयोर्बभ्रुदेवावृधयोर्माहा-त्म्यप्रतिपादकश्लोक इत्यर्थः । श्रुणुमः । तयोर्माहात्म्यमिति शेषः । अथ देवावृधो बभ्रोः सकाशाच्छ्रेष्ठ इत्यर्थः ॥ ९ ॥

पुरुषाः पञ्चषष्टिश्च षट्सहस्राणि चाष्ट च ।
येऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि ॥ १० ॥

सत्यधर्मीया — ये पञ्चषष्टिस्तथाऽष्ट च । षट्सहस्रोपरि त्रिसप्ततिसङ्ख्याः पुरुषास्ते । तदुभयोपदेशतोऽमृतत्वं मुक्तिमनुप्राप्ताः ॥ १० ॥

छलारी — ये पञ्चषष्ठ्यादिसंख्यावच्छिन्नाः । बहव इति यावत् । पुरुषा वंशे बभ्रोः । देवावृधादपि तत्त्वोपदेशं प्राप्तास्ते सर्वेऽप्यमृतत्वं मोक्षं प्राप्ताः ॥ १० ॥

महाभोजोऽतिधर्मात्मा भोजा आसन् तदन्वये ॥ ११ ॥

सत्यधर्मीया — महाभोजवंशजानाह । तदन्वये भोजास्तन्नामान आसन्नभवन्निति ॥ ११ ॥

छलारी — महाभोजः सात्वतस्य सप्तमपुत्रः । भोजास्तदन्वये जाताः ॥ ११ ॥

वृष्णेः सुमित्रः पुत्रोऽभूद् युधाजिच्च परन्तप ।
शिनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः ॥ १२ ॥

सत्यधर्मीया — सुमित्रो युधाजिच्चेति द्वौ । तस्य सुमित्रस्य । तस्य शिनेः ॥ १२ ॥

छलारी — सात्वतपुत्रस्य वृष्णेर्युधाजिच्च पुत्रोऽभवत् वृष्णिसुमित्रावित्यर्थः । तस्य युधाजितः(?) शिनिरनामित्रश्चेति पुत्रौ ॥ १२ ॥

सत्राजितः प्रसेनश्च निम्नस्याप्यासतुः सुतौ ।
अनमित्रसुतो योऽन्यः शिनिस्तस्य च सत्यकः ॥ १३ ॥

सत्यधर्मीया — सत्राजितः अकारान्तः । प्रसेनश्चेति द्वौ निम्नस्य सुतावासतुः । अनमित्रस्य सुतोऽन्यः शिनिः सुमित्रपुत्रशिनेरन्यः तस्य शिनेः सत्यकोऽपत्यम् ॥ १३ ॥

छलारी — योऽन्यः पूर्वोक्तात् निम्नादिति शेषः ॥ १३ ॥

युयुधानः सात्यकिर्वै जयस्तस्य कुणिस्ततः ।
युगन्धरोऽनमित्रस्य पृश्निः पुत्रोऽपरस्ततः ॥ १४ ॥

सत्यधर्मीया — तस्य सात्यकिः सत्यकस्यापत्यम् । त्रियन्तो (?) युयुधान इति रूढं नामान्तरम् । तस्य सात्यकेर्जयस्ततो जयात् युगन्धरोऽनमित्रस्य पृश्निरपरः पुत्रः ॥ १४ ॥

छलारी — युयुधानः सत्यकपुत्रस्तस्य युयुधानस्य जयो जयस्य कुणिस्तन्नामकः । कुणेर्युगन्धरोऽनमित्रस्यैवापरः पृश्निर्नामपुत्रः अनेनानमित्रस्य निम्नः शिनिः प्रश्निश्चेति त्रयः पुत्राः आसन्नित्युक्तं भवति ॥ १४ ॥

श्वफल्कश्चित्ररथश्चैव गान्दिन्यां तु श्वफल्कतः ।
अक्रूरप्रमुखा आसन् पुत्रा द्वादश विश्रुताः ॥ १५ ॥

सत्यधर्मीया — ततः पृश्नेः श्वफल्कश्चित्ररथश्चेति द्वौ । तत्र श्वफल्कतो गान्दिन्यां तन्नाम्न्याम् । एतेन साऽपि सुकृतवतीति ध्वन्यते । अक्रूरः प्रमुखं प्रमुख एव येषां ते तथा । अतद्गुणसंविज्ञानबहुव्रीहिमाश्रित्याक्रूरमन्यमन्यांश्च द्वादशसङ्ख्यानाहुः ॥ १५ ॥

छलारी — ततः प्रश्नेः सकाशात् श्वफल्किश्चैत्ररथश्चेति द्वौ पुत्रौ बभूवतुः । अक्रूरप्रमुखः प्रधानो येषां द्वादशपुत्राणामिति । अतद्गुणसंविज्ञानो बहुव्रीहिः । तथाऽक्रूरादन्ये वक्ष्यमाणाश्च द्वादशपुत्राश्च श्वफल्किनो गान्दिन्यां तन्नामिकायां जाता इत्यर्थः ॥ १५ ॥

आसङ्गः सारमेयश्च मृदुरो मृदुवद्गिरिः ।
धर्मो विधृष्टकर्मा च क्षेत्रोपेक्षोऽरिमर्दनः ॥ १६ ॥

शत्रुघ्नो गन्धमोदाह्वः प्रतिबाहुश्च द्वादश ।
तेषां स्वसा सुचाराख्या द्वावक्रूरसुतावपि ॥ १७ ॥

सत्यधर्मीया — मृदुवद्भिरिमेके चारिमर्दन इति सर्वविशेषणं वाऽङ्गीकृत्य द्वादशतायास्तद्गुण-बहुव्रीहिणा निर्वाह इति वदन्ति । तन्नामान्याह ॥ आसङ्ग इत्यादिना ॥ १६,१७ ॥

छलारी — अक्रूरव्यतिरिक्तात् द्वादशान्दर्शयति ॥ आसङ्ग इति । आसङ्गादिप्रतिबाव्हान्ता द्वादशपुत्राः । उपदेवश्चेति । द्वावितः पूर्वेणान्वयः ॥ १६,१७ ॥

देववानुपदेवश्च तथा चित्ररथात्मजाः ।
पृथुर्विपृथुनामाद्या बहवो वृष्णिनन्दनाः ॥ १८ ॥

सत्यधर्मीया — तन्नामनी आह ॥ देववानिति । चित्ररथस्य श्वफल्कभ्रातुः ॥ १८ ॥

छलारी — श्वफल्कानुजस्य चित्ररथस्य वंशमाह ॥ तथेति । विपृथुनामाद्या अन्ये बहवश्चित्ररथात्मजा इत्यन्वयः । वृष्णिनन्दनाः पूर्वोक्ता एते सर्वे सात्वतपुत्रवृष्णिकुलनन्दनाः ॥१८॥

कुकुरो भजमानश्च शुचिः कम्बलबर्हिषः ।
कुकुरस्य सुतो धृष्णुर्विलोमा तनयस्ततः ॥ १९ ॥

सत्यधर्मीया — ककुराद्यास्ततो धृष्णेर्विलोमा तनयः ॥ १९ ॥

छलारी — अथ सात्वतपुत्रस्यान्धकस्य वंशमाह ॥ कुक्कुर इति । कुक्कुरादयाश्चत्वारो अन्धकस्य सुता इति ज्ञेयम् ॥ तथा चोक्तं विष्णुपुराणे ॥ कक्कुरो भजमानः शुचिकम्बलबर्हिषास्तस्थाऽन्धकपुत्रा इति । वन्हिर्वन्हिनामा । तत इत्यस्योत्तरत्रापि सम्बन्धः ॥ १९ ॥

कपोतरोमा तस्यानुः सखा यस्य च तुम्बुरुः ।
अनोश्च दुन्दुभिस्तस्य दरिद्योतः पुनर्वसुः ॥ २० ॥

सत्यधर्मीया — तस्य विलोम्नः । तस्य कपोतरोम्णो, यस्यानोः सखा तुम्बुरुर्देवगन्धर्वस्त-स्यान्धकोऽन्धकाद्दुन्दुभिरिति मध्येऽन्धको ज्ञेयः । यथोदाजहार पराशरः । कुकुरभजमानशुचि-कम्बलबर्हिषस्तथाऽन्धकस्य पुत्रा इति । दुन्दुभेर्दरिद्योतस्तस्मात्पुनर्वसुः ॥ २० ॥

छलारी — अनुरनुनामको यस्यानोः पुत्रो दुन्दुभिर्दरिद्योतः । तस्येत्यस्यावृत्तिः । तस्य दरिद्योतस्य ॥ २० ॥

तस्याहुकश्चाहुकी च कन्या द्वावाहुकात्मजौ ।
देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः ॥ २१ ॥

सत्यधर्मीया — तस्य पुनर्वसोः । आहुकात्मजौ द्वौ तावाह ॥ देवकश्चोग्रसेनश्चेति ॥ २१ ॥

छलारी — पुनर्वसोराहुकः पुत्र आहुकीनामकन्या चेत्यपत्यद्वयम् । देवकश्चोग्रसेनश्चेति द्वावाहुकजाविति सम्बन्धः ॥ २१ ॥

देववानुपदेवश्च सुदेवो देववर्धनः ।
तेषां स्वसारः सप्तासन् धृतदेवादयो नृप ॥ २२ ॥

सत्यधर्मीया — तेषां देववदादीनाम् । धृतदेवा आदिर्यासां ताः ॥ २२ ॥

छलारी — तानेवाह ॥ देववानिति । शान्तिदेव आदिर्यासां देवाताः सप्त ॥ २२ ॥

शान्तिदेवोपदेवा च श्रीदेवा देवरक्षिता ।
सहदेवा देवकी च वसुदेव उवाह ताः ॥ २३ ॥

सत्यधर्मीया — ताः सप्तापि ॥ २३ ॥

छलारी — तासां नामान्याह ॥ शान्तिदेवेति । वासुदेवस्योत्पत्तिमनुपदमेव वक्ष्यति ॥ २३ ॥

कंसः सुनामा न्यग्रोधः कङ्कः शङ्कुः सुभूस्तथा ।
राष्ट्रपालोऽब्दसृष्टिश्च तृष्टिमानौग्रसेनयः ॥ २४ ॥

सत्यधर्मीया — कंसादयस्तुष्टिमदन्ता औग्रसेनय उग्रसेनपुत्राः ॥ २४ ॥

छलारी — उग्रसेनस्य वंशमाह ॥ कंस इति । औग्रसेनयः उग्रसेनपुत्राः ॥ २४ ॥

कंसा कंसवती कङ्का सुरभू राष्ट्रपालिका ।
औग्रसेना दुहितरो वसुदेवानुजस्त्रियः ॥ २५ ॥

सत्यधर्मीया — कंसा योषिदाद्या राष्ट्रपालिकान्ता औग्रसेना उग्रसेनस्येमाः । णप्रत्ययस्ततो न ङीप् । वसुदेवानुजानां वक्ष्यमाणानां देवभागादीनाम् ॥ २५ ॥

छलारी — वसुदेवस्यानुजानां देवभगादीनां स्त्रियो भार्या वसुदेवानुजश्चोत्तरत्र कथ्यन्ते ॥ २५ ॥

शूरो विदूरथादासीद् भजमानसुतात् ततः ।
शिनिस्तस्मात् स्वयम्भोजो हृदिकस्तत्सुतो मतः ॥ २६ ॥

सत्यधर्मीया — भजमानसुताद्विदूरथात् शूरो वसुदेवपितुरन्य आसीत् । ततः शूरात् शिनिरन्यस्तस्माच्छिनेस्तत्सुतो भोजसुतः ॥ २६ ॥

छलारी — कुकुरस्य वंशमुक्त्वाऽन्धकस्य भजमानस्य वंशमाह ॥ शूर इति । भजमानसुताद्विदूरथाच्छूर आसीदिति ज्ञेयम् । अयं शूरो वसुदेवपितुः अन्यः इति ज्ञेयम् । ततः शूराच्छिनिः॥२६॥

देवबाहुः शतधनुः कृतवर्मेति तत्सुताः ।
दैवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् ॥ २७ ॥

सत्यधर्मीया — तत्सुताः हृदिकसुताः । दैवमीढस्य देवमीढसुतस्य शूरस्य मारीषा पत्नी अभून्नामेत्यन्वयः ॥ २७ ॥

छलारी — देवबाहुः शतधनुः कृतवर्मा देवमीढश्चेति तत्सुता हृदिकसुताश्चत्वार इति ज्ञातव्यम् । दैवमीढस्य शूरस्येत्युत्तरत्रानुवादात् । पुराणान्तरे तथोक्तेश्च । दैवमीढस्य देवमीढपुत्रस्य शूरस्य सः शूरः ॥ २७ ॥

तस्यां सञ्जनयामास दशपुत्रानकल्मषान् ।
वसुदेवं देवभागं देवश्रवसमानकम् ॥ २८ ॥

सत्यधर्मीया — तस्यां मारीषायाम् ॥ २८ ॥

छलारी — तस्यां मारिषायाम् । शूरपुत्राणां नामान्याह ॥ वसुदेवमिति ॥ २८ ॥

सृञ्जयं श्यामकं कङ्कमनीकं वत्सकं वृकम् ।
देवदुन्दुभयो नेदुरानका यस्य जन्मनि ॥ २९ ॥

सत्यधर्मीया — वसुदेवाद्या वृकान्ता देवेतिः । दुन्दुभिपदसमस्तं योग्यतयाऽऽनकपदेनाप्यन्वेति । देवदुन्दुभयो देवानकाश्च पटहाश्च यस्य जन्मनि तत्समये नेदुः ॥ २९ ॥

छलारी — वसुदेवस्य नामान्तरमस्तीत्याह ॥ देवेति । आनकाश्च नेदुः ॥ २९ ॥

वसुदेवं हरेः स्थानं वदन्त्यानकदुन्दुभिम् ।
पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवाः ॥ ३० ॥

सत्यधर्मीया — स्थानं प्रादुर्भावस्य ॥ ३० ॥

छलारी — कृष्णावतारस्य स्थानं स्थानभूतं वसुदेवमानकन्दुदुभिमिति वदन्ति । पृथा चेयमेव कुन्ती ॥ ३० ॥

राजाधिदेवी चैतेषां भगिन्यः पञ्चकन्यकाः ।
कुन्तेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् ॥ ३१ ॥

सत्यधर्मीया — एतेषां वसुदेवादीनां सख्युः स्वस्य शूरः कुन्तेरपुत्रस्य पृथां पालनायादात् ॥ ३१ ॥

छलारी — एतेषां वसुदेवादीनाम् । पृथायाः कन्यकावस्थायाः कर्णोत्पत्तिप्रकारमाह ॥ कुन्तेरिति । पृथायाः पिता शूरः स्वसख्युरपुत्रस्य कुन्तेः कुन्तिभोजस्य पृथामदादित्यन्वयः ॥ ३१ ॥

सा च दुर्वाससो विद्यां देवहूतिं प्रतोषितात् ।
तस्या वीर्यपरीक्षार्थमाजुहाव रविं शुचिः ॥ ३२ ॥

सत्यधर्मीया — सा पृथा प्रतोषितात्परिचर्यया दूर्वाससः । देवहूतिं देवा हूयन्तेऽनयेति देवहूती ताम् । देवताव्हानेन तदागमनहेतुं विद्यां लब्ध्वेति शेषः । साऽपेति पाठे न श्रमः । तस्या विद्यायाः शुचिः स्नानादिना परीक्षार्थं रविमाजुहाव ॥ ३२ ॥

छलारी — देवा आहूयन्तेऽनयेति देवहूती देवाव्हानकारीत्यर्थः । तां विद्यां दुर्वाससः । लेभे इति शेषः । तस्या विद्यायाः शुचिर्ऋतुस्नाता ॥ ३२ ॥

तदैवोपागतं देवं वीक्ष्य विस्मितमानसा ।
प्रत्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे ॥ ३३ ॥

सत्यधर्मीया — तदैव मन्त्रमात्रोच्चारणसमय एवोपागतं देवं सवितारं वीक्ष्य विस्मितमानसा सती भो देव रवे मे मया प्रत्ययार्थं विद्या प्रयुक्ता । एतमपराधं क्षमस्व । याहि स्वलोकम् । प्रत्ययार्थं प्रयुक्तायां विद्यायां माहात्म्यस्येदमकरणं क्षमस्व मां जनापवादतः पाहीति वा ॥ ३३ ॥

छलारी — मे मया प्रत्ययार्थं मन्त्रपरीक्षार्थं विद्या प्रयुक्ता । भो देव । त्वं क्षमस्व स्वस्थानमेहीत्यर्थः ॥ ३३ ॥

अमोघं देवसंदर्शमाधास्ये त्वयि चात्मजम् ।
योनिर्यथा न दुष्येत कर्ताऽहं ते सुमध्यमे ॥ ३४ ॥

सत्यधर्मीया — कुन्तीचिन्तां शमयन् रविराह ॥ अमोघमिति । देवस्य मम सन्दर्शो दर्शनं येन तन्मदागमनममोघं न वृथा फलानाधायकं न भवेत् । अतस्त्वय्यात्मजमाधस्ये । न वद कनीयसीति समाधत्ते ॥ योनिरिति । न दुष्येत दुष्येद्यथा तथा कर्ता पुरुषसंसर्गो न भवेत्तथाऽहं कर्तेति रविराबभाषे ॥ ३४ ॥

छलारी — अतो याहीत्युक्तो रविः कुन्तीमाह ॥ अमोघमिति । देवसन्दर्शं देवसंस्पर्शनम् । अमोघम् । सफलमिति शेषः । मैथुनयोग्यतारुण्यादर्शनाच्छिन्नयोनिर्दुष्टा स्यामिति पृथाया मनोगतशंकापरिहारार्थमाह ॥ योनिरिति । कन्याऽहमिति चेत्तत्राह । यथा योनिर्न दुष्येत तथाऽहं कर्ता करिष्यामीति ॥ ३४ ॥

इति तस्यां समाधाय गर्भं सूर्यो दिवं गतः ।
सद्यः कुमारः संजज्ञे द्वितीय इव भास्करः ॥ ३५ ॥

सत्यधर्मीया — इति तां समाधाय समाहितां कृत्वा तस्यां गर्भं च समाधाय सूर्यो दिवं स्वस्थानं गतः । द्वितीयो भास्कर इव सद्यः कुमारः सञ्जज्ञे जातः ॥ ३५ ॥

छलारी — इति समाधाय समाधानं कृत्वा गर्भं समाधाय निधाय ॥ ३५ ॥

तं साऽत्यजन्नदीतोये कृच्छ्राल्लोकस्य बिभ्यती ।
प्रपितामहस्तामुवाह पाण्डुर्वै सत्यविक्रमः ॥ ३६ ॥

सत्यधर्मीया — लोकस्य कृत्स्नात्तदपवादभाविकष्टाद्बिभ्यती भीता नदीतोये मञ्जूषायां निधाय तत्याज । प्रपितामहस्तव ॥ ३६ ॥

छलारी — कृच्छ्रादत्यजदित्यनुषङ्गः । तव प्रपितामहः पाण्डुः ॥ ३६ ॥

श्रुतदेवां तु कारूशो वृद्धशर्मा समग्रहीत् ।
यस्यामभूद् दन्तवक्र ऋषिशप्तो दितेः सुतः ॥ ३७ ॥

सत्यधर्मीया — कारुषस्तद्देशेशो वृद्धशर्मा श्रुतदेवां समग्रहीत् । यस्यां श्रुतदेवायामृषिशप्तः जयः स एव दितेः सुतो हिरण्यकशिपुर्जातः । स एव दन्तवक्र इत्यभूदित्यर्थः । दितेःसुत इत्यत्र षष्ठ्या आक्रोश इत्यलुग्वा ॥ ३७ ॥

छलारी — वसुदेवभगिनीनां विवाहं पुत्रांश्च कथयति ॥ श्रुतदेवामित्यादिना । कारुषः करूशदेशाधिपतिर्वृद्धशर्मा नामतः । स पूर्वं किमित्यत आह ॥ ऋषिशप्त इति । प्राक् सनकादिभिः शप्तो विजयो दितेः सुतः । स तु हिरण्यकशिपुरभूत् । स एवाधुना दन्तवक्त्र इति जात इति ज्ञातव्यम् ॥ ३७ ॥

कैकेयो धृष्टकेतुश्च श्रुतकीर्तिमविन्दत ।
सन्तर्दनादयस्तस्याः पञ्चासुः कैकयाः सुताः ॥ ३८ ॥

सत्यधर्मीया — कैकेयो देशः नाम्ना । नाम्ना च धृष्टकेतुः श्रुतकीर्तिं भार्यामविन्दत, सन्तर्दनादयः सुताः पञ्चासुः ॥ ३८ ॥

छलारी — कैकेयः कैकेयदेशाधिपतिर्नाम्ना धृष्टकेतुः । कैकेयदेशाधिपतित्वात्तत्सुता अपि कैकेयनामानः ॥ ३८ ॥

राजाधिदेव्यामावन्त्यौ जयत्सेनोऽजनिष्ट ह ।
दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् ॥ ३९ ॥

सत्यधर्मीया — आवन्त्यौ अवन्तिदेशभवौ । जयत्सेनो नाम्नाऽजनिष्ट जनयामास । चेदिराजो दमघोषः श्रुतःश्रवसं भार्यात्वे ॥ ३९ ॥

छलारी — जयत्सेनोऽवन्त्यौ विन्दानुविन्दावजनिष्ट जनयामास । समग्रहीत् पाणिग्रहणं चकार ॥ ३९ ॥

शिशुपालः सुतस्तस्याः कथितस्तस्य सम्भवः ।
देवभागस्य कंसायां चित्रकेतुबृहद्बलौ ॥ ४० ॥

सत्यधर्मीया — तस्य शिशुपालस्य सम्भवो जन्म । तद्भ्रातॄणां पत्नीः पुत्रांश्चाह ॥ देवभागस्येति । कंसायां कंससहोदर्यां चित्रकेतुबृहद्बलौ जातौ ॥ ४० ॥

छलारी — अयं पूर्वं क इत्यत आह ॥ कथित इति । तस्य शिशुपालस्य सम्भवः । दितेः सकाशादिति शेषः । द्वारपालो जयो ऋषिशापाद्धिरण्याक्षनामकः सन् विजयवद्दितेः सुतोऽभवदित्यस्योत्पत्तिप्रकारः पूर्वं कथित इत्यर्थः । तदेव वसुदेवस्य भगिन्यास्तत्पुत्रींश्चोक्त्वा तद्भ्रातॄणां पत्नीपुत्रांश्च कथयति ॥ देवभागस्येत्यादिना । देवभागस्य सकाशाच्चित्रकेतुर्बृहद्बलौ । जाताविति शेषः ॥ ४० ॥

कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा ।
कङ्कायामानकाज्जातः सत्यजित् पुरुजित् तथा ॥ ४१ ॥

सत्यधर्मीया — देवश्रवसो वसुदेवभ्रातुः सुवीर इषुमांश्चेति द्वौ । जात इति पृथक् पृथगन्वेति ॥ ॥ ४१ ॥

छलारी — देवश्रवसः सकाशात् ॥ ४१ ॥

सृञ्जयो राष्ट्रपाल्यां तु वृषदुर्मर्षणादिकान् ।
हरिकेशहिरण्याक्षौ सुरभूम्यां तु श्यामकः ॥ ४२ ॥

सत्यधर्मीया — सृञ्जयो राष्ट्रपाल्यां तन्नाम्न्याम् । सुरभूम्यां श्यामकः ॥ ४२ ॥

छलारी — राष्ट्रपाल्यां तन्नामिकायां सुरभूम्यां तन्नामिकायाम् ॥ ४२ ॥

मित्रकेश्यामप्सरसि वृकादीन् वत्सकस्तथा ।
तक्षपुष्करसालादीनुर्वश्यां वृक आदधे ॥ ४३ ॥

सत्यधर्मीया — मित्रकेश्यां तन्नामिकायामप्सरसि अप्सरःसु गतम् । वृकस्तूर्वश्यां तक्षपुष्करसालादीनादधे ॥ ४३ ॥

छलारी — मित्रकेश्यां तन्नामिकायां वृको वृकनामक आदधे जनयामास । अस्य सर्वत्र सम्बन्धः ॥ ४३ ॥

सुमित्रार्जुनबाणादीननीकात् तु सुदामनी ।
कङ्कश्च कर्णिकायां वै ऋतधामजयावपि ॥ ४४ ॥

सत्यधर्मीया — अनीकात् तन्नामकात्सुदामनी तन्नाम्नी । कङ्कः नाम्ना कर्णिकायां तन्नाम्न्याम् ॥ ॥ ४४ ॥

छलारी — सुदामिनी सुमित्रादीन्सुषुवे । कर्णिकायां तन्नामिकायाम् ॥ ४४ ॥

पौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकीप्रमुखा आसन् पत्न्य आनकदुन्दुभेः ॥ ४५ ॥

सत्यधर्मीया — आनकदुन्दुभेर्वसुदेवस्य ॥ ४५ ॥

छलारी — वसुदेवस्य पत्नीः पुत्रांश्चाह ॥ पौरवीत्येकादशभिः । देवकीप्रमुखा अन्याः प्रश्रमप्रधृतिदेवाद्या बहुपत्न्य आसन् । देवकी पूर्वमदितिः ॥ ४५ ॥

बलं गदं सारणं च दुर्मदं विपुलं ध्रुवम् ।
वसुदेवस्तु रोहिण्यां कृतधीरुदपादयत् ॥ ४६ ॥

सत्यधर्मीया — कृतधीः शिक्षितबुद्धिरुदपादयदुत्पादयामास ॥ ४६ ॥

छलारी — बलं बलरामोऽयं शेषावतारः । अत्र हरेः शुक्लकेशस्तस्मिन्नस्तीति ज्ञेयम् । वसुदेवः पूर्वं कश्यपः रोहिणी पूर्वं कश्यपभार्या सुरभिः कृतधीः शिक्षितबुद्धिरित्यर्थः ॥ ४६ ॥

सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च ।
पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ॥ ४७ ॥

सत्यधर्मीया — भूताद्या द्वादशाभवन् ॥ ४७ ॥

छलारी — सुभद्राद्याश्चेत्येते द्वादशतनया इत्यनुषङ्गः ॥ ४७ ॥

नन्दोपनन्दकृतकशूराद्या मदिरात्मजाः ।
भद्राख्या केशिनं त्वेकं कौसल्या कुलनन्दनम् ॥ ४८ ॥

सत्यधर्मीया — मदिराया आत्मजाः । कौसल्या भद्रा । सुपुत्रः कुलदीपक इति कुलनन्दनम् ॥ ॥ ४८ ॥

छलारी — मदिराया मदिरानामिकाया आत्मजाः । कौसल्या कोसलराजपुत्री भद्रा ॥ ४८ ॥

रोचनायां ततो जाता हस्तहेमाङ्गदादयः ।
इलायां पुरुवल्कादीन् यदुमुख्यानजीजनत् ॥ ४९ ॥

सत्यधर्मीया — इलायां जनयामास ॥ ४९ ॥

छलारी — यदुमुख्यांश्च ॥ ४९ ॥

त्रिपृष्ठो धृतदेवायां जात आनकदुन्दुभेः ।
शान्तिदेवात्मजा राजन् प्रश्रमप्रश्रितादयः ॥ ५० ॥

सत्यधर्मीया — प्रश्रमप्रश्रितादयः शान्तिदेवाया आत्मजाः ॥ ५० ॥

छलारी — त्रिपृष्ट एकः पुत्रोऽभूत् ॥ ५० ॥

राजानः कल्पवर्षाद्या उपदेव्याः सुता दश ॥ ५१ ॥
वसुहंससुधन्वाद्याः श्रीदेवायाश्च षट् सुताः ।
देवरक्षितया लब्धा नव चात्र गदादयः ।
वसुदेवः सुतानष्टावादधे सहदेवया ॥ ५२ ॥

सत्यधर्मीया — कल्पवर्ष एव आद्यो येषां ते तथा । गदादयो गदोऽयमन्यो रोहिणीतनयात् । सहदेवया सहदेवायाम् ॥ ५१,५२ ॥

छलारी — उपदेव्या दशसुताश्च राजानोऽभवन् । देवरक्षितया तन्नामिकया नवपुत्रा अभवन् ॥ ॥ ५१,५२ ॥

पुरुवत्समृदुमुख्यान् साक्षाद्धर्मो वसूनिव ।
वसुदेवस्तु देवक्यामष्टपुत्रानजीजनत् ॥ ५३ ॥

सत्यधर्मीया — साक्षाद्धर्मो धर्मराजो वसुनाम्न्यामष्टौ वसूनिव । तदुक्तं षष्ठे । वसुर्मुहूर्ता सङ्कल्पे धर्मपत्न्यः सुताञ्छृणु । वसवोऽष्टो वसोः पुत्रास्तेषां नामानि मे श्रुण्विति । पुरुवत्समृदुमुख्यान्देवक्यामष्टपुत्रानजीजनत् ॥ ५३ ॥

छलारी — साक्षाद्धर्मः । धर्मपुत्रव्यावृत्त्यर्थं साक्षादिति । धर्मराजो वसुनामिकायां पत्न्यामष्टवसूनि । सहदेवया सहदेवायामष्टौ सुतानादधे ।। तदुक्तं षष्ठस्कन्धे षष्ठाध्याये ।। वसुमुहूर्ता सङ्कल्पा धर्मपत्न्यः सुतान् श्रुणु । अष्टौ वसोः पुत्रास्तेषां नामानि शृण्विति । देहलीदीपन्यायेनोभयत्रायं दृष्टान्तः । अजीजनज्जनयामास ।। ५३ ।।

कीर्तिमन्तं सुषेणं च भद्रसेनमुदारधीः ।
ऋजुं संमर्दनं भद्रं सङ्कर्षणमहीश्वरम् ।। ५४ ।।

सत्यधर्मीया — अहीश्वरं शेषांशं यो दुर्गयाऽपवाह्य देवकीतो रोहिण्यां प्ररोहितः स सङ्कर्षणस्तम् ।। ५४ ।।

छलारी — उदारधीर्महाबुद्धिर्वसुदेवः । सङ्कर्षणः पूर्वं क इत्यत आह ।। अहीश्वरमिति ।। ५४ ।।

अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल ।
सुभद्रा च महाभागा तव राजन् पितामही ।। ५५ ।।

सत्यधर्मीया — तयोर्देवकीवसुदेवयोः स्वयमेव यो हरिः सोऽष्टम आसीत् । पितामही पितामहमहिषी ।। ५५ ।।

छलारी — अष्टमस्तु स्वयमेव स्वैच्छयैवासीत् । न कर्मादिना । यतो हरिः । किलेति श्रुत्यादिप्रसिद्धिमाह । सुभद्रा च कन्याऽऽसीत् । पितामहमही । अभिमन्युमातृत्वादियं सुभद्रा पूर्वं त्रिजटा ।। ५५ ।।

यदा यदा हि धर्मस्य क्षयो वृद्धिश्च पाप्मनः ।
तदा तु भगवानीश आत्मानं सृजते हरिः ।। ५६ ।।

सत्यधर्मीया — हरिरयं धरिण्यां नरवदवतारी चेन्नावतारी दुरितं न चेच्चेतनसमः स्यात् । किञ्चानेनानेनसो न प्रयोजनमिति च वक्तव्यम् । अन्यथाऽपूर्णताऽऽपद्येत । न च तद्विना प्रेक्षावतां प्रवृत्तिः श्रुता वा दृष्टा वेत्यादिशङ्कामङ्कुरयन्नासीत्स्वयमेव हरिः किलेति स्वयं व्यासस्तत्सम्भवादिसम्भवमेतत्स्कन्धावसिति शंसन् तां शातां तनोति ।। यदा यदा हीत्यादिना । यदा यदेति मुखनिरीक्षणेनोत्तरत्र तदोपरि तदेति पूरणीयम् । विस्तृतः प्राक् प्रकारो वीप्सया प्रति प्रति तत्समयम् । धर्मस्य क्षयः पाप्मनः पापस्य वृद्धिर्यदा यदा तदा तदा ।

तुर्मानिकरेतोऽविकृतत्वादिविशेषसूचकः । भगवानिति प्राप्यं प्रयोजनं नास्तीति सूचयति । आत्मानं सृजति । सृजतीत्यनेन न कर्मनिर्मितता तनोः । तत्कुत इयं चर्येत्यत ईश इति लोकचर्यान्यथा स्यात् । धर्मादिरिरक्षिषातो लीलेति च सूचयति ॥ ५६ ॥

छलारी — स्वयमेवासीन्न कर्मादिनेत्येतदुपपादयति ॥ यदेत्यादिना । आत्मानं सृजते स्वयमवतारं करोति ॥ ५६ ॥

न ह्यस्य जन्मनो हेतुः कर्मणां वा महीपते ।
आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ॥ ५७ ॥

सत्यधर्मीया — सङ्क्षेपविस्तराभ्यां तु कथयन्ति मनीषिण इत्युक्तेः सङ्कुच्योक्त्वा विविच्य वदति ॥ न हीति । अत एवाध्यायावसितीत्यवतारिकाऽपि लग्नेति ज्ञेयम् । अस्य प्रत्यक्षसिद्धदेहवतोऽपि जन्मन उत्पत्तेर्हेतुः कारणं न हि न ह्यस्ति । कर्मणां तत्तदवतार-रचितकर्मणामपि हेतुः प्राप्यफलादिकं कारणं न हीत्यन्वय इति वेति सूचयति । तर्हि कस्य जन्मादेर्हेतुरस्तीत्यतोऽप्याह ॥ न ह्यस्येति । नह्यो हि हरिवध्यो जीवसङ्घस्तस्यैव जन्मनः कर्मणां च हेतुरस्तीत्यर्थः । न विना कारणं लोके लोकानां प्रवृत्तिरित्यतोऽनयैव प्रवृत्तिरस्येत्याह ॥ आत्ममायामिति । आत्मनः स्वस्य मायामिच्छां विना स्वेच्छयैव हेतुरित्यर्थः ॥ तदसम्भावनोन्मूल-कान्मानानुसारेण हेतूनाह ॥ ईशस्येत्यादिना । स ईश इत्यादेरीशत्वात्परस्य जीवविलक्षणस्य तत्त्वात् । उत्तमः पुरुषस्त्वन्य इत्यादेः । द्रष्टुः साक्षात्कर्तुः । तृना स्वरूपतां दर्शनस्य दर्शयति । यः सर्वज्ञः सर्ववित् । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इत्यादेः । न केवलं पदत्रयबोध्यगुणत्रय-मात्रतस्तदसम्भावनासाम्भावित्वं किन्तु सकलगुणकत्वादित्याह ॥ आत्मन इति । सर्वगुणपूर्णस्य सर्वान्गुणानात्मशब्दो ब्रवीतीत्यादेः ॥ ५७ ॥

छलारी — द्रष्टुः सर्वज्ञस्य परमात्मनः परमात्मनोऽवतारस्यावतारकर्मणां चात्ममायां स्वेच्छां विना हेतुर्ना हि सम्भवति ॥ ५७ ॥

यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि ।
अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ॥ ५८ ॥

सत्यधर्मीया — निग्रहानुग्रहौ संसारतन्निःसरणोपायावित्याह ॥ यन्मायेति । पुंसः प्रपञ्चस्य स्थित्युत्पत्त्यप्ययाय स्थित्युत्पत्तिभ्यां सहितोऽप्ययो नाशस्तस्मै । यस्य मायायाश्चेष्टितमिच्छाया

निग्रहरूपो व्यापारः । उत्तरत्रापि निवृत्तेरनुग्रह इत्युक्तेस्तत्प्रतियोगी निग्रहो ग्राह्य इति विवृतं चेष्टितमिति पदमिति ज्ञेयम् । तन्निवृत्तेः संसारपरिहृतये । आयस्तु फलमृद्दिष्टं प्रोक्तं मायेति निष्फलमित्येकादशतात्पर्योक्तेः । यस्य माया न विद्यते तद्यन्मायम् । तच्च तदाचरितमीष-च्चरितमचरितं सच्चरितविरुद्धमचरितमिति चेष्टितचरितपाठौ सरलौ । तदनन्तरमात्मलाभाय स्वरूपा-नन्दावाप्तये चेष्यते । यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेणेत्यादिश्रुतेः ॥ ५८ ॥

छलारी — उक्तार्थं स्पष्टयति ॥ यन्मायेति । यस्येश्वरस्याधीनाया मायायास्त्रिगुणात्मिकायाः प्रकृतेश्चेष्टितं व्यापारः पुंसः पुरुषस्य । उपलक्षणमेतत् । प्रपञ्चस्य स्थित्युत्पत्तिसंहाराय भवन्ति । भगवानेव सत्त्वादिगुणैः सृष्ट्यादिकं करोतीत्यर्थः । अनुग्रहो यस्य प्रसादस्तन्निवृत्तेर्मायानिवृत्तेः । हेतुरिति शेषः । यत्प्रसादाल्लिङ्गशरीररूपसंसारनिवृत्तिर्भवतीत्यर्थः । यस्य प्रसादात्परमार्तिरूपा-दस्मात्ससारान्मुच्यते नापरेणेति श्रुतेः । सा च संसारनिवृत्तिरात्मलाभाय स्वरूपानंदाविर्भावाय भवति ॥ ५८ ॥

अक्षौहिणीनां पतिभिरसुरैर्नृपलाञ्छनैः ।
भुव आक्रम्यमाणायाः अभावाय कृतोद्यमः ॥ ५९ ॥

सत्यधर्मीया — चरितश्रवणकीर्तनादिभिरनुग्रहस्तेन च लिङ्गभङ्ग आनन्दादिश्चेति तच्चरितं वदति ॥ अक्षौहिणीनामिति । नृपाणां लाञ्छनमिव लाञ्छनं येषां तैरक्षौहिणीनां पतिभिर्जरासन्धादिभिरसुरैः प्राग्विप्रचित्त्याद्यात्मभिर्भुव आक्रम्यमाणायाः सत्या अभावाय तदसत्तायै तन्नाशायेति यावत् । कृत उद्यम उत्कृष्ट उद्योगो यस्य स धराभारभूतदितिसुतविनाशोद्योगवानित्यर्थः ॥ ५९ ॥

छलारी — हरेर्लोकविलक्षणत्वमुपपाद्यावतारप्रयोजनमाह ॥ अक्षौहिणीनामिति द्वाभ्याम् । बव्हक्षौहिणीसंख्यातसेनानां पतिभिर्नृपलाञ्छनैः छत्रादि तैः । नृपाभासैरिति यावत् । असुरैराक्रम्य-माणाया भुवोऽभाराय भारहृतये प्रयत्नः सन् ॥ ५९ ॥

कर्माण्यपरिमेयानि मनसाऽपि सुरेश्वरैः ।
सह सङ्कर्षणश्चक्रे भगवान् मधुसूदनः ॥ ६० ॥

सत्यधर्मीया — सुरैर्यथाक्रमं रमाब्रह्मवायुभारतीसरस्वतीन्द्रादिभिः सह सङ्कर्षण इत्युक्ति-स्वारस्यात् मनसाऽप्यपरिमेयानि कर्माण्यालोचयितुमशक्यानि ॥ ६० ॥

छलारी — सुरेश्वरैरपि मनसाऽपि अपरिमेयान्यवितथकर्माणि दुष्टनिग्रहादीनि कर्माणि सङ्कर्षणसहितः ॥ ६० ॥

कलौ जनिष्यमाणानां दुःखशोकतमोनुदम् ।
अनुग्रहाय भूतानां सुपुण्यं व्यतनोद् यशः ।। ६१ ।।

सत्यधर्मीया — कलौ युगे जनिष्यमाणानां भूतानामुपर्यनुग्रहाय दुःखशोकतमोनुदं दुःखशोकतमांसि नुदतीति तत्तथा । अकारान्तो नुदशब्दः सुपुण्यं तत्प्रापकं यशो व्यतनोद्विस्तारयामास ।।६१।।

छलारी — सङ्कल्पमात्रेण भूभारहरणसमर्थस्यापि कर्मकरणं यशोविस्तारद्वारा भक्तानुग्रहार्थमित्याह ।। कलाविति । यशोलक्षणं पराक्रमं दुःखशोकतमांसि नुदतीति तथा ।। ६१ ।।

यस्मिन् सत्कर्णपीयूषे यशस्तीर्थवरेऽसकृत् ।
श्रोत्राञ्जलिरुपस्पृश्य धुनुते कर्मवासनाः ।। ६२ ।।

सत्यधर्मीया — सत्कर्णपीयूषे सतां सज्जनानां कर्णानां तच्छ्रोत्राणां पीयूषममृतमिव विद्यमाने यशस्तीर्थवरे यशोरूपतीर्थश्रेष्ठेऽसकृद्वा माहात्म्यातिशयलाभात्सकृदेकवारमिति वा । श्रोत्राञ्जलिः श्रोत्रे एवाञ्जलिः पात्रं यस्य स पुमानुपस्पृश्य श्रवणादिस्पर्शं कृत्वा पुमान् कर्मवासना दुष्कर्मसंस्कारान् धुनुते कम्पयति नाशयतीति यावत् । यद्वा यस्मिन्नित्यादि सप्तमी द्वितीयार्थे । श्रोत्रमिवाञ्जलिः स उपस्पृश्य स्पृष्ट्वा अधिकारी कर्मवासना धुनुत इति ।। ६२ ।।

छलारी — सतां कर्णयोरमृताय मनो यशोरूपेतीर्थवरे श्रोत्रमेवाञ्जलिः पानसाधनं यस्य स पुरुषोऽसकृदुपस्पृश्य श्रवणादिलक्षणस्नानादि कृत्वा । यद्वा । सकृदप्युपस्पृश्य दुष्कर्मसंस्कारान् धुनुते नाशयति ।। ६२ ।।

भोजवृष्ण्यन्धकमधुशूरसेनदशार्हकैः ।
श्लाघनीयेहितः शश्वत् कुरुसृञ्जयपाण्डुभिः ।। ६३ ।।

सत्यधर्मीया — श्लाघनीयमीहितं चेष्टितं यस्य सः ।। ६३ ।।

छलारी — तदेवाह ।। भोजेति द्वाभ्याम् । भोजादिभिः कौरवादिभिश्च । शश्वत् श्लाघनीयेहितः पूज्यमानचरितः ।। ६३ ।।

स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया ।
नृलोकं रमयामास मूर्त्या सर्वाङ्गरम्यया ।। ६४ ।।

सत्यधर्मीया — स्निग्धेति स्मितवीक्षितोभयान्वयि । ताभ्यामुदाराणि महान्ति तैर्वाक्यैर्विक्रम-लीलया पराक्रमशोभया सर्वाङ्गरम्यया मूर्त्या स्वशरीरेण च नृलोकं नृणां मध्ये लोको ज्ञानिजनस्तं नरोऽसाधारण्येन न्यायेन विशिष्टमानवास्ते च ज्ञानिनः शर्मणा नृपत्नीरिति व्याख्यावसरे टीकायां तथैवोक्तेः । रमयामास ।। ६४ ।।

छलारी — स्निग्धस्मितेक्षितेनोदारैर्वाक्यैर्लीलया विक्रमविलासेन सर्वाङ्गसुन्दरया मूर्त्या नृलोकं मनुष्यजनं रमयामासेत्यन्वयः ।। ६४ ।।

यस्याननं मकरकुण्डलचारुकर्ण-
भ्राजत्कपोलसुभगं सविलासहासम् ।
नित्योत्सवं न ततृपुर्दृशिभिः पिबन्त्यो
नार्यो नराश्च मुदिताः कुपिता निमेश्च ।। ६५ ।।

सत्यधर्मीया — यस्य श्रीकृष्णस्याननं मुखं नरा नार्यश्च दृशिभिर्नयनैः पिबन्तः पिबन्त्यश्च वीक्ष्यमाणा इति यावत् । मुदितास्तुष्टा निमेर्निमेषं प्रति कुपिता बभूवुः । इयता पतता व्यवहतिर्भवति भगवदवलोकनस्येति निमेषं प्रति रोषस्तेषां योषाणां चेति ज्ञेयम् । अतृप्तौ मुखसौष्टवं कारणमिति तदाह ।। मकरेति । मकरकुण्डलाभ्यां चारू च तौ कर्णौ च ताभ्यां भ्राजन्तौ कपोलौ ताभ्यां सुभगं सुन्दरम् । सविलासो हासो यस्य तत् । नित्योत्सवं नित्य उत्सवो यस्य तत् । निमेश्चेति चशब्दान्निमेषनिर्मातारं प्रति च कुपिता इत्यप्यसूचि । यद्वक्ष्यति जड उदीक्षतां पक्ष्मनूदृशामिति पक्ष्मकृतं शपन्तीति च ।। ६५ ।।

छलारी — नृलोकं रमयामासेत्युक्तं विशदयति ।। यस्याननमिति । यस्याननं दृशिभिर्नेत्रैः पिबन्त्यो नार्यो नराश्च न ततृपुर्नतृप्ताः । निमेषोन्मेषमात्रव्यवधानमप्यसहमानास्तत्कर्तुर्निमेः । निमेषस्येति षष्ठी द्वितीयार्थे । निमेषं प्रति कुपिताः । कुतः । विकासविरोधित्वात् । कथं भूतमाननम् । मकरकुण्डलाभ्यां चारू च तौ कर्णौ च ताभ्यां भ्राजन्तौ च तौ कपोलौ च ताभ्यां सुभगं सुन्दरम् । विलासेन सहितो हासो यस्य स तथा तं नित्योत्सवं यस्य स तथा तम् ।। ६५ ।।

जातो गतः पितृगृहाद् व्रजमेधितोऽत्र
हत्वा रिपून् सुतशतानि कृतोरुदारः ।
उत्पाद्य तेषु पुरुषः क्रतुभिः समीजे
आत्मानमात्मनिगमं प्रथयन् जनेषु ।। ६६ ।।

सत्यधर्मीया — जातः सद्यो जन्मवान्पितृगृहाद्वसुदेवकारागाराद्व्रजं गतोऽत्र च रिपून्हत्वा पूतनादीन्संहृत्य कृतोरुदारः कृता उरवो महान्तो दारा भार्या येन सः । तेषु दारेषु सुतशतानि दशलक्षसङ्ख्याकान् तथैकैकस्यां दश दश पुंसः कन्यां चैकैकामिति सुतांश्चोत्पाद्य पुरुषः पूर्णषड्गुणः सर्वशरीरशायी वाऽऽत्मानं क्रतुभिरश्वमेधादिभिरन्यस्य यष्टव्यस्याभावात्स्वयमननुष्ठाने । यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः । मम वर्त्मानुवर्तन्ते । उत्सीदयुरिमे लोकाः न कुर्यां कर्म चेदहमित्यादेर्लोको न प्रवर्तेतातस्तत्प्राशस्त्यै कर्मानुष्ठेयं चातो मामेवाहं यजामीति । आत्मना स्वेनैव विधायकतया विहितो यो निगमो वेदः कर्मादिकर्तव्यतावगाहकस्तं प्रथयन्प्रख्यापयन् जनेषु सज्जनेषु समीज इत्यन्वयः ।। ६६ ।।

छलारी — विदितसंक्षेपा हि प्रपञ्चजिज्ञासवो भवन्तीति हेतोः श्रीकृष्णचरितं संक्षेपतो वर्णयति ।। जात इत्यादि द्वाभ्याम् । निजरूपेण पश्चात्पुरुषाकारः सन् गतः । अत्र लोकदृष्ट्यैधितः सन् रिपून् पूतनादिकंसान्तसर्वशत्रून्हत्वा कृतोरुदार उद्वाहितबहुभार्यस्तेषु दारेषु सुतानां शतानि । अत्र शतशब्दो बहुत्ववचनः । तथा चोद्वाहितगोपकन्यासु दशलक्षपुत्रादीन् रुक्मिण्यादिषु प्रद्युम्नादीन् षोडश-सहस्रस्त्रीष्वेकैकस्यां दशदश पुत्रांश्चैकैकां कन्यां चोत्पाद्येत्यर्थः । ऋतुभिरश्वमेधादिभिः समीजे । किमर्थं जनेषु सज्जनेष्वात्मनिगमं स्वज्ञानरूपवेदोक्तयज्ञादिसत्कर्मानुष्ठानमार्गं प्रथयत्सज्जनान् शिक्षयितुमित्यर्थः ।। ६६ ।।

पृथ्व्याः स वै गुरुभरं क्षपयन् कुरूणा
मन्तःसमुत्थकलिना युधि भूपबन्धम् ।
दृष्ट्वा विधूय विजये जयमुद्विघुष्य
प्रोच्योद्धवाय च परं समगात् स्वधाम ।। ६७ ।।

इति श्रीमद्भागवते नवमस्कन्धे एकविंशोऽध्यायः ।

सत्यधर्मीया — स वासुदेवः पृथ्व्या भूमेर्गुरुभरं महान्तं भारं क्षपयन्नाशयितुकामः । कुरूणां कुर्वादिभ्य इति ण्यस्य तद्राजलुपि कुरवस्तेषामन्तः पाण्डवकौरवमध्ये समुत्थः कलिः कलहस्तेन निमित्तेन युधि भूपबन्धं भूपसमूहकृतचक्रबन्धादिकं दृष्ट्वा विधूय । मयैवैते निहताः पूर्वमेव, निमित्तमात्रं भव सव्यसाचिन्नित्यादेः । कम्पयित्वा विजयेऽर्जुने जयं जितवानाजौ पार्थोऽरिसार्थमित्युद्घोष्य प्रख्यापयित्वोद्धवाय परं तत्त्वं च प्रोच्योक्त्वा स्वधाम वैकुण्ठं समगात् । समगात्रेणैतेन सत्रेति सूचयति । स्वधाम स्वस्वरूपं समगात्प्रविवेशेति वा । पूर्णमदः पूर्णमिदं

पूर्णात्पूर्णमुदच्यत इत्यादेः । इति समेधितार्थः । समभिवर्धत सर्वपुरुषार्थ उद्धवायैव । नित्योत्सवाय जातः । परं पूर्णं प्रोच्यैवं वर्तध्वमिति मङ्गलमध्वानं समगं पिप्पलं तरुमासाद्य परं तत उत्तरं स्वधाम समगादित्यावृत्त्याऽन्वयः । तदुक्तमेकादशस्कन्धे । तूष्णीमासाद्य पिप्पलमिति । समगच्छदित्यतुलधीरनुदाहरन्नुदाहरन्समगादित्यमुमर्थविशेषं सूचयामास इत्यशेषमतिमङ्गलम् ॥ ६७ ॥

नवमे नवमेऽप्यर्थैः कथामात्रप्रथायुजि ।
परिश्रमो विश्रमदो भूयाद्भूयो धियो मम ॥ १ ॥

इति श्रीसत्यधर्मयतिकृतायां भागवतटिप्पण्यां श्रीमद्भागवतविवृतौ
नवमस्कन्धे एकविंशोऽध्यायः ।

छलारी — पृथ्व्या गुरुभरं दृष्ट्वैव दर्शनमात्रेण क्षपयन् क्षपणसमर्थः कृष्णः कुरुणां कौरवाणां पाण्डवानां चान्तः समुत्थितेन कलिना कलहेन निमित्तेन भूपवर्यान् दुष्टराजन्यान् विधूय संहृत्य विजयेऽर्जुने जयमर्जुनः सर्वशत्रून्विजिगायेत्येवोभयमुद्घिघुष्य डिण्डिमघोषं कारयित्वा प्रोच्य । तत्वमिति शेषः । उद्धवायोपदिश्य स्वधाम परंधाम समगाज्जगामेति सर्वं मङ्गलम् ॥ ६७ ॥

इति श्रीछलारी शेषाचार्यकृतायां भागवतटिप्पण्यां
नवमस्कन्धे एकविंशोऽध्यायः ॥ ९-२१ ॥

नवलक्षणसम्पन्नो नवरत्नैर्विभूषितः ।
नवभक्तिप्रदो भूयान्नवमस्कन्धगो हरिः ॥ १ ॥
नवमस्कन्धगोविन्दो नवलक्षणसम्युतः ।
नवरत्नाम्बरधरो नवमेऽभीष्टदो भवेत् ॥ २ ॥
वेङ्कटेशहयग्रीवनृसिंहाद्यात्मको हरिः ।
आनन्दसन्ततिं कुर्यात् काले काले सुशिक्षयन् ॥ ३ ॥

इति श्रीमच्छल्लारीनरसिंहाचार्याणां निजशिष्येण शेषेण
विरचितायां श्रीभागवताष्टमस्कन्धटिप्पण्यां मन्दबोधिन्यां एकविंशोऽध्यायः ।

समाप्तश्चायं नवमस्कन्धः ॥

अथ नवमस्कन्धः दुर्घटभावदीपिका

॥ हरिः ॐ ॥ त्वयोक्तानि सर्वाणि मन्वन्तराणि मे मया श्रुतानि । तत्र मन्वन्तरेष्वप्यनन्तवीर्यस्यानन्तवीर्येणापरिच्छिन्नवीर्येण हरेर्हरिणा कृतानि वीर्याणि वीर्य साध्यानि त्वयोक्तानि कर्माणि च मया श्रुतानीति । एतेन तत्र मन्वन्तरेष्वप्यनन्तवीर्येण हरिणा कृतानीति वक्तव्यम्। तत्र मन्वन्तरेष्वनन्तवीर्यस्य हरेः कृतानीति कथमनुपपन्नमिति दूषणं परास्तम् । अनन्तवीर्यस्य हरेरिति षष्ठी तृतीयादेश इत्यभ्युपगमात् । ऐतनैव कर्मणां वीर्यस्य साध्यत्वेन वीर्यरूपत्वाभावाद्वीर्याणि कर्माणीति वचनमयुक्तमिति चोद्यं परिहृतम् । वीर्य शब्दान्मत्वर्थीयाच् अङ्गीकृत्य वीर्याणीत्यस्य वीर्यसाध्यानीत्यर्थस्योक्तत्वात् । एनेनैव हरिणा कृतानि कर्माणीति वक्तव्यम् । कर्माणीति पदाभावान्न्यूनतोति शङ्कानवकाशः । कृतानीत्यस्यावृत्तिमङ्गीकृत्य द्वितीयकृतानीत्यस्य कर्माणीत्यर्थ इत्यभ्युपगमात् ॥ १ ॥

परावरेषां भूतानामात्मा स्वामी पर उत्तमो यः पुरुषः स एव कल्पान्ते आसीत् । यत्किञ्चन प्रकृत्यादिकमासीत् । तदन्यत्परमपुरुषस्यानधीनं नासीत्किन्तु परमपुरुषस्याधीनमेवासीदिति । एतेन स एवासीद्विश्वं नासीदित्यनेन पूर्णत्वादन्यत्किञ्चनेति व्यर्थमिति दूषणं परास्तम् । यदित्यादि शेषपूरणेनासीदित्यादेरावृत्त्या चान्यदित्यस्यानधीन- त्वार्थकत्वाङ्गीकारेण चान्यत्किञ्चनेत्यनेन कल्पान्ते विद्यमानस्य प्रकृत्यादेः परमपुरुषाधीनत्वमुच्यत इत्यभ्युपगमात् ॥ ८ ॥

आत्मवान्भगवत्यन्तःकरणवान्सः श्राद्धदेवः श्रद्धायां दशपुत्रान् जनयामास ॥ ११ ॥

दशपुत्रान् जनयामासेत्युक्तं विवृणोति ॥ इक्ष्वाकिति । इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूपकान् जनयामास । नरिष्यन्तं जनयामास । नाभगं च जनयामास । नभं विभुं जनयामासेति । एतेनेक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूपकानित्यत्रोक्तानां दशत्वाभावादिक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूपका-नित्यस्य दशपुत्रानित्यनेनान्वयः । तथा नरिष्यन्तमित्यादावुक्तानां दशत्वाभावादेकवचनांतत्वाच्च । नरिष्यन्त इत्यादेर्दशपुत्रानित्यनेनान्वय इति दूषणं परिहृतम् । जनयामासेत्यस्यावृत्तिमङ्गीकृत्येक्ष्वाकुनृग-शर्यातिदिष्टधृष्टकरूषकानित्यादेर्जनयामासेत्यनेन प्रत्येकमन्वयस्योक्तत्वात् ॥ १२ ॥

अस्येयं योजना । हे भगवन् ब्रह्मवादिनां वो युष्माकमिदं कर्म किं कस्मान्निमित्ताद्विपरीतं स्त्रीत्वापादकं जातम् । इदं स्त्रीत्वं कष्टम् । ब्रह्मविक्रिया एवमनिष्टापादनी मैव स्यान्नैव भवति । अतो भवतां कर्मणां स्त्रीत्वापादकत्वमहो आश्चर्यम् । अतो बलवन्निमित्तं वक्तव्यम् । तद्बलवन्निमित्तं किमिति हृदयमिति । एतेनेदं कर्म कस्मान्निमित्ताद्विपरीतमिति वक्तव्ये किमिति कथनमनुपपन्नमिति दूषणं

निरस्तम् । किमित्यस्य कस्मादित्यर्थ इत्युक्तत्वात् ॥ १७ ॥ इति श्रीभागवतटिप्पण्यां प्रथमोऽध्यायः ॥ १-९ ॥

प्रश्नमेतं समाचक्ष्वेत्यस्य एतमेतस्य प्रश्नस्योत्तरं समाचक्ष्वेत्यर्थः । एतेनास्य प्रश्नस्योत्तरं समाचक्ष्वेति वक्तव्यम् । एनं प्रश्नं समाचक्ष्वेति कथनमनुपपन्नमिति दूषणं परिहृतम् । एनं प्रश्नमिति द्वितीया षष्ठ्यादेश इत्यङ्गीकृत्योत्तरमित्यस्य शेषपूरणेनास्य प्रश्नस्योत्तरं समाचक्ष्वेत्यर्थस्योक्तत्वात् ॥१॥ इति श्रीभागवतटिप्पण्यां द्वितीयोऽध्यायः ॥ ९-२ ॥

सम इत्यस्य सुहृदादिषु सम इत्यर्थः । एतेन सर्वभूतसुहृदित्यनेन सर्वभूतसमत्वस्य प्राप्तत्वात्सम इत्येतव्द्यर्थमिति दूषणं निरस्तम् । सुखदुःखादिष्विति शेषपूरणेन सुखदुःखादि इत्यर्थस्योक्तत्वात् ॥ ११ ॥

गतं क्षितावित्यस्य भूमण्डलस्थतीर्थक्षेत्रादिकं गतमित्यर्थः । सर्वदा तीर्थक्षेत्रादि सञ्चार एव कृत इति भावः । क्षितिशब्देन क्षितिस्थिततीर्थक्षेत्रादिकं गृहीत्वा तत्सञ्चार उच्यत इत्यभ्युपगमात् । एतेनैव गमनक्रियायाः सकर्मकत्वात् । कर्मणि द्वितीयेति द्वितीयायां क्षितिं गतमिति वक्तव्यम् । क्षितौ गतमित्ययुक्तमिति चोद्यं प्रत्युक्तम् । क्षिताविति सप्तमी द्वितीयादेश इत्यङ्गीकारात् ॥ १७ ॥

सुधृतिस्तत्सुतो दमसुतः सन् जज्ञे । सौधृतेयः सौधृतेयनामकः सुधृतेः सुतः सन् जज्ञे । नरः सौधृतेयस्य सुतः सन् जज्ञे । इति । एतेन नरः सौधृतेय इत्यनेन नरस्य सुधृतिपुत्रत्वस्योक्तत्वात् । सुत इत्येतत्पुनरुक्तमिति दूषणस्यानवकाशः । नरस्य सुधृतिपौत्रत्वमेवोच्यते न तु सुधृतिपुत्रत्वमुच्यत इत्यङ्गीकारात् ॥ २९ ॥ इति श्रीभागवटिप्पण्यां तृतीयोऽध्यायः ॥ ९-३ ॥

नासत्यौ कस्यचित्कालस्याथानन्तरं च्यवनस्याश्रमं गतौ । च्यवनस्तौ नासत्यौ तु विशेषतः पूजयित्वेश्वरौ महावयो दत्तमिति प्रोवोचेति । एतेन कस्यचित्कालस्येतदन्वितमिति चोद्यस्यानवकाशः । आनन्तर्यार्थकाथशब्देनान्वयस्योक्तत्वात् ॥ ११ ॥

भिषक्तमावश्विनौ बाढमित्युक्त्वा विप्रं च्यवनमभिनन्द्य सन्तोषयित्वा भवान्सिद्धविनिर्मितेऽस्मिन्ह्रदे निमज्जतामित्यूचतुरिति । एतेनोचतुरित्यस्य बाढमित्यनेनान्वयस्य जातत्वात् । निमज्जतामित्येतदनन्वितमिति दूषणं परास्तम् । बाढमितीत्यस्याध्याहृतेनोक्तेत्यनेनान्वयमुक्त्वा निमज्जतामित्यस्योचतुरित्यन्वयस्योक्तत्वात् ॥ १३ ॥

नयस्यधस्तम इत्यस्य तमोऽन्धकार इत्युक्तम् । अधोऽधोलोकं नरकं नयसीत्यर्थः । एतेन परमपुरुषसञ्ज्ञस्य तमःशब्दवाच्यनित्यनरकहेतुत्वस्यैवाभावेनाधस्तमोहेतुत्वस्य सुतरामभावादधस्तमो नयसीत्यनुपपन्नमिति चोद्यं निरस्तम् । अन्धकारवाचकेन तमःशब्देनान्धकारयुक्तत्वं लक्ष्यत इत्यङ्गीकृत्यान्धकारयुक्तं नरकं नयसीत्यर्थस्योक्तत्वात् ॥ २१ ॥

सर्वे ततस्तदन्तरं वज्रेन्द्रभुजस्तम्भनानन्तरं भिषजाविति बुद्ध्या पूर्वं सोमाहुत्या यत् यौ बहिष्कृतौ तयोश्च तयोरप्यश्विनोः सोमस्य ग्रहमन्वजानन्निति । एतेन सोमाहूत्या बहिष्कृतत्वस्य सोमग्रहानुज्ञानं प्रति हेतुत्वाभावात् । यस्मात्सोमाहूत्या बहिष्कृतौ तस्मादन्वजानन्निति कथनमयुक्तमिति दूषणं परास्तम् । याविति पुल्लिङ्गप्रथमाद्विवचनस्य यदिति नपुंसकप्रथमैकवचनमित्यभ्युपेत्य तयोरित्यस्य शेषं च स्वीकृत्य यौ सोमाहूत्या बहिष्कृतौ तयोरप्यश्विनोरन्वजानान्नित्यर्थस्योक्तत्वात् ॥ २६ ॥ इति श्रीभागवतटिप्पण्यां चतुर्थोऽध्यायः ॥ ९-४ ॥

कृष्णदर्शन इत्यस्य कृष्णा इति कृष्ण वर्णा इति दर्शनं लोपकर्तृकदर्शनं यस्य स कृष्णदर्शन इत्यर्थः । एतेन कृष्णा वर्णा इति वक्तव्ये कृष्णदर्शन इति दर्शनस्य कृष्णत्वाभिधानमयुक्तमिति शङ्कानवकाशः । कृष्णदर्शन इत्यस्य कृष्णा इति दर्शनं यस्येति व्युत्पत्त्या कृष्णा वर्णा इति तात्पर्यार्थ इत्यभ्युपगमात् ॥ ६ ॥ इति श्रीभागवतटिप्पण्यां पञ्चमोऽध्यायः ॥ ९-५ ॥

तद्भृत्यगात्रस्पर्शेऽङ्गमित्यस्येयं योजना । अङ्गसङ्गं अङ्गानां सर्वाङ्गानां सङ्गः सम्बन्धो यस्य तस्येन्द्रियं तद्भृत्यगात्रस्पर्शार्थे चकारेति पूर्वेणान्वय इति । एतेन स्पर्शेन्द्रियमिति वक्तव्येऽङ्गसङ्गमिति कथनमनुपपन्नमिति दूषणं निरस्तम् । अङ्गसङ्गमित्यस्य सर्वाङ्गसम्बन्धस्य स्पर्शेन्द्रियमित्यर्थ इत्युक्तत्वात् ॥ ७ ॥

अभिस्रोतमसौ सरस्वतीमित्यस्येयं योजना । असौ सरस्वतीं सरस्वत्योऽभिस्रोतं स्रोते स्रोतः सम्बन्धि तीरे ईज इत्यन्वय इति । एतेन सरस्वत्यास्तीर इति वक्तव्ये सरस्वतीमाभिस्रोतमिति कथनमनुपपन्नमिति दूषणं परिहृतम् । सरस्वतीमिति द्वितीया षष्ठ्यादेशः । अभिस्रोतमिति विभक्त्यर्थेऽव्यीभावः । स्रोतासि सकारान्तशब्दवत् स्रोतेत्यकारान्तोऽप्यस्ति स च तीरलक्षक इति चाङ्गीकृत्य सरस्वत्यास्तीर इत्यर्थस्योक्तत्वात् ॥ १० ॥

कृष्णमारिराधयिषुर्वीरोऽम्बरीषस्तुल्यशीलया महिष्या युक्तः । सन् प्रतीत्यादीनां शेषः । सांवत्सरम् । दीर्घः छान्दसः । प्रतिसंवत्सरं कार्तिके मासि द्वादशीव्रतं द्वादश्युपलक्षितदशम्यादि दिनत्रयव्रतं दधार करिष्य इति । सङ्कल्पं कृतवानिति यावत् । प्रतिपक्षं त्रिरात्रं दशम्यां रात्रावेकादश्यां

दिवारात्रौ च द्वादश्यां रात्रौ समुपेषितः सन् व्रतान्ते कार्तिके मास्युत्सवं चकार । कदाचित्कस्मिंश्चित्संवत्सरे कार्तिकशुद्धद्वादश्यां कालिन्द्यां स्नातः सन् मधुवने हरिमर्चयदिति । एतेन दशम्यादि दिनत्रयव्रतस्य सर्वदा कर्तव्यत्वात्सांवत्सरव्रतं दधारेत्यनुपपन्नमिति दूषणं परास्तम् । प्रतिसंवत्सरं संवत्सरसमाप्तिपर्यन्तं दशम्यादि दिनत्रयव्रतं करिष्य इति कार्तिककृष्णदशम्यां सङ्कल्पं कृतवानित्यर्थ इत्यभ्युपगमात् । एतेनैव प्रतिपक्षं दशम्यादि दिनत्रयव्रतस्य कर्तव्यता । व्रतान्ते कार्तिके मासि त्रिरात्रं समुपोषित इति वचनमयुक्तमिति दूषणं परिहृतम् । प्रतिपक्षं दशम्यादि दिनत्रये उपवासं संवत्सरपर्यन्तं कृत्वा संवत्सरान्ते कार्तिकशुद्धद्वादश्यामुत्सवः कृत इत्युज्यत इत्यङ्गीकारात् । एतेनैव दशम्यां द्वादश्यां च भोजनस्य कर्तव्यत्वात् । त्रिरात्रं समुपोषित इत्यनुपपन्नमिति दूषणं निरस्तम् । त्रिरात्रं समुपोषित इत्यनेन दशम्यां द्वादश्यां च रात्रवेवोपासः कृत इत्युच्यत इत्यभ्युपगमात् ॥१७,१८॥

पावकोऽग्निः क्रुद्धाहिमिव क्रुद्धाहिं यथा दहति तथा भक्तरक्षायां महात्मना पुरुषेण नारायणेनादिष्टमाज्ञप्तं चक्रं तां कृत्यां ददाहेति । अयं भावः । यथा क्रुद्धाहिं दग्ध्वा महाभयं परिहृत्य महासौख्यं जनयति । तथा चक्रं कृत्यां दग्ध्वा महाभयं परिहृत्य महासौख्यं जनयामासेति । एतेन चक्रं कृत्यामनायासेन ददाहेत्यर्थलाभार्थं पावकोऽहिमिति दृष्टान्तो वक्तव्यः । क्रुद्धेति विशेषणं व्यर्थमिति शङ्का परास्ता । चक्रमनायासेन कृत्यां दग्ध्वा महाभयं परिहृत्य महासुखं जनयामासेत्यर्थलाभार्थं क्रुद्धाहिमिवेति क्रुद्धाहिदृष्टान्तोऽभिहित इत्यभ्युपगमात् ॥ ३६ ॥

हिशब्दो हेतौ । हि यस्मात्ते तव यतो यस्याम्बरीषस्यायं द्रोह आत्माभिचार आत्मनस्तव पीडाकरस्तस्माद्भवान् । वैशब्द एवार्थे । तं वै तमेव । शरणमिति शेषः । शरणं यात्विति ॥ ५८ ॥

एकः प्रधानः सर्वभूतात्मभावेन सर्वजीवान्तर्यामित्वेन सर्वगुणाश्रयः सर्वजीवगुणाश्रयो भगवान् यदि मे मम प्रीतिस्तर्हि द्विजो भवत्विति । एतेन सर्वभूतात्मभावेनेत्येतदनन्वितमिति दूषणं निरस्तम् । सर्वभूतात्मभावेनेत्यस्य सर्वगुणाश्रय इत्यनेनान्वयमङ्गीकृत्य विज्वरत्वादि- गुणानामीश्वराधीनत्वमुच्यत इत्यभ्युपगमात् ॥ ७१ ॥

राज्ञ इति संस्तुतवतः सुदर्शनं सुदर्शननामकं विष्णुचक्रं राजयाञ्चया सर्वतः सामस्त्येनाशाम्यच्छान्तमभवत् । विप्रमजहात् । अडभावः छान्दसः । प्रकर्षेणाजहादिति । एतेनेति संस्तुतवतो राज्ञो याञ्चयेति याच्नया राज्ञः सम्बन्धित्वस्योक्तत्वात् । राजयाच्नयेत्यत्र राजेत्येतद्व्यर्थमिति दूषणस्यानवकाशः । सत इत्यस्याध्याहारं कृत्वा राज इत्यस्य संस्तुतवतः सत इत्यनेनान्वयमभ्युपेत्य राज्ञः स्तुत्या राज्ञो याञ्चाया च विष्णुचक्रमशाम्यद्विप्रमजहाच्चेत्युच्यत इत्यूरीकरणात् ॥ ७२ ॥

वासनादित्येतदर्थवशाद्व्यसनमिति द्वितीयान्तं सम्बध्यते। ऋषेर्व्यसनं व्यसनाद्विमोक्षं च परानुभावं परमात्मसामर्थ्याधीनं स्ववीर्यं स्वस्य ऋषेः सामर्थ्याधीनं मुख्यतो भगवत्सामर्थ्याधीनम्। अमुख्यतो ऋषिसामर्थ्याधीनं न भवति किन्तु भगवत्सामर्थ्याधीनम्। ऋषेर्व्यसनाद्विमोक्षणं मुख्यतो चोद्यस्यानवकाशः। न केवलं ऋषेर्व्यसनं परानुभावं मेने। ऋषेर्व्यसनाद्विमोक्षं च परानुभावं मेन इति समुच्चयार्थमाद्यश्चशब्दः। ऋषेर्व्यसनाद्विमोक्षणं स्ववीर्यं मेन इत्ययुक्तम्। दुर्वाससो रुद्रावतारत्वेन तन्मोक्षणस्य राजवीर्यधीनत्वायोगादिति दूषणं परिहृतम्। स्ववीर्यामिति स्वशब्देन ऋषेरेव ग्रहणं न तु राज्ञ इत्यङ्गीकारात्॥ ८४॥

एवंविधानेकगुणः पूर्वोक्तप्रकारोऽवच्छिन्नानेकगुणसम्पन्नः स राजाऽम्बरीषो यथा भक्त्या विरिञ्चादि विरिञ्चरुदेन्द्रादिमधश्चकार तां भक्तिं परमात्मनि वासुदेवे ब्रह्मणि क्रियाकलापैः समर्पितैर्निमित्तैः समुवाहेत्यम्बरीषराजकीर्तिं विष्णुब्रह्मादयश्च व्यञ्जयामासुरति। एतेनाम्बरीषराजस्य ब्रह्मादिभक्तिकोठ्यंशस्याप्यभावाद्यया विरिञ्चादिमधश्चकार। तां भक्तिं समुवाहेति कथनमनुपपन्नमिति दूषणं निरस्तम्। इत्यम्बरीषराजकीर्तिं विष्णुब्रह्मादयश्च व्यञ्जयामासुरिति शेषपूरणेनाविद्यमान-विषयकीर्तिं व्यञ्जयामास इत्यर्थस्योक्तत्वात्॥ तात्पर्यार्थः॥ उदाहृतगरुडवचनस्यायमर्थः। यद्यपि ब्रह्मादिभक्तिकोठ्यंशाद्ब्रह्मादिनिष्ठा विष्णुभक्तिकोठ्यंशस्यांशोऽम्बरीषके राज्ञि नैवास्ति। अन्यस्य कस्य चापि कस्यचिदपि प्रल्हदादेरपि ब्रह्मादि भक्तिकोठ्यंशांशो नैवास्ति। तथाऽप्यादिराट् आदौ प्रलयकालेऽपि राजते प्रकाशत इत्यादिराट् ईश्वरो हरिर्ब्रह्मादयश्च ब्रह्माद्यपेऽक्षयाऽम्बरीष- राजादीनां भक्तिरधिके सतीति शेषः। ब्रह्माद्यपेक्षयाऽम्बरीषराजादीनां भक्तिरधिकेत्युत्तमां तत्कीर्तिमम्बरीष-राजादीनां कीर्तिं व्यञ्जयामासुः।

ननु विष्णुब्रह्मादयश्च कालान्तरपरित्यागेन कालविशेषेऽम्बरीषराजादीनां कीर्तिं कुतो व्यञ्जयामासुरित्यत उक्तम्॥ तात्कालिकोपचयत्वादिति। तेषामम्बरीषराजादीनां यशस्तात्कालि-कोपचयत्वात्तत्कालसम्बन्ध्यभिवृद्धियोग्यत्वात्। पूर्वकालापेक्षया कालविशेषे। सज्जनेष्वधिक-कीर्तेर्भाव्यत्वादिति यावत्। तर्हि विद्यमानविषयकीर्तेरेव व्यञ्जनं कर्तव्यमविद्यमानविषयकीर्तेर्व्यञ्जनं कुतः कृतमित्यत आह॥ मोहनायेति। परस्परसमुच्चये चशब्दौ। दैत्यानां मोहनाय विष्णुभक्तिविषये ब्रह्माद्यपेक्षयाऽम्बरीषादयोऽधिका इति मोहोत्पादनार्थं च ब्रह्मादेर्निदनायाम्बरीषादयोऽधिका ब्रह्रादयो नीचा इति निन्दनार्थं ब्रह्मादय उत्तमां कीर्तिं व्यञ्जयामासुरिति पूर्वेणान्वयः। अविद्यमान विषयकीर्तिं व्यञ्जने विष्णोः किं प्रयोजनमित्यत आह॥ अन्यार्थमिति। चशब्द एवार्थे। अन्यार्थं ब्रह्मादिविषयमोहार्थं निन्दोत्पादार्थमेव विष्णुः स्वयमप्युत्तमां कीर्तिं व्यञ्जयामासेति सम्बन्धः। अनेन

विष्णोरविद्यमानविषयकीर्तिव्यञ्जनस्य ब्रह्मादि विषयमोहनिन्दोत्पादनमेव प्रयोजनं न तु स्वविषयमोहनिन्दोत्पादनमित्युक्तं भवति । ननु ब्रह्मादीनां स्वविषयमोहनिन्दाभावकामनायाः सत्वे स्वविषयमोहनिन्दार्थं कथं प्रवृत्तिर्भविष्यतीत्यत आह ॥ ब्रह्माद्या इति । चशब्द एवार्थे । ब्रह्माद्या निराशिषश्च स्वविषयमोहनिन्दाभावकामनारहिता एव । अतः स्वविषयमोहनिन्दार्थम् । प्रवृत्तिरुपपन्नेति शेषः । ननु ब्रह्माद्यपेक्षया नीचानां बहूनां विष्णुभक्तानां विद्यमानत्वात्तत्परित्यागेनाम्बरीषादीनामेव कीर्तिं कुतो व्यञ्जयामासुरित्यत आह ॥ मानुषेष्विति । तेषामम्बरीषादीनां मध्ये केषाञ्चिद्भक्त्यादिभिर्गुणैर्मानुषेषूत्तमत्वात् । चशब्दोऽनुक्तसमुच्चये । केषाञ्चिद्दैत्यादिषूत्तमत्वाच्चाम्बरीषप्रल्हादादीनामेव कीर्तिं व्यञ्जयामासुः । ब्रह्मादि विषयमोहनिन्दनोत्पादनस्य प्रयोजनमाह ॥ ब्रह्मादेरिति । सज्जनानामिति शेषः । ननु रुद्रावतारत्वात्स्वभक्तोत्तमस्य दुर्वाससः पीडा विष्णुना कथं चक्रेण कृतेत्यत आह ॥ दुर्वासा इति । तस्यापीत्यपिशब्दात्पूर्वम् । यदीति शेषः । अपि यद्यपि दुर्वासाः स्वयं मुख्यतो रुद्रो रुद्रावतारः । च शब्दोऽनुक्तसमुच्चये । विष्णुभक्तोत्तमश्च । तथाऽपि दुर्वासा अन्याय्यमुक्तवान् दर्पनाशार्थमेव । चोति च शब्दोऽनुक्तसमुच्चये । अन्याय्यं कृतवांश्च । अतस्तस्य दुर्वाससो दर्पनाशार्थमनुग्रहार्थायैव विष्णुना स्वचक्रेण । पीडा कृतेति शेषः ॥ ८५ ॥ इति श्रीभागवतटिप्पण्यां षष्ठोऽध्यायः ॥ ९-६ ॥

स विकुक्षिस्तु जापकेन विप्रेण संवादं समाचरन्कुर्वन् । तेन संवाद नितेन ब्रह्माज्ञानेन स योगी विकुक्षिः कालान्तरे कलेवरं त्यक्त्वा यत्परं ब्रह्म तदवापेति । एतेन पितर्युपरत इत्युत्तरवाक्ये पितुर्मरणानन्तरमागत्य पृथिवीशासनं कृतमिति वक्ष्यमाणत्वात् । कलेवरं त्यक्त्वा परं ब्रह्मावापेत्यनुपपन्नमिति दूषणं परिहृतम् । कालान्तर इति शेषपूरणेन पितुर्मरणानन्तरमागत्य पृथिवीशासनं कृत्वा योगसामर्थ्येन कलेवरं त्यकत्वा परं ब्रह्मावापेत्यर्थ इत्युक्तत्वात् ॥ १० ॥

तस्य विकुक्षेः सुतः पुरञ्जय इन्द्रवाह इति । नामभ्यामीरितः ककुस्थ इति नाम्ना चाप्युक्तः । यैः कर्मभिः पुरञ्जय इन्द्रवाहः ककुस्थ इति नामानि प्राप्तानि तानि कर्माणि शृण्विति । एतेन यैरित्यादि शेषपूरणेन नामप्राप्तिहेतुभूतकर्माणि शृण्वित्यर्थ उक्तः ॥ १२ ॥

अत्रेयं योजना । स्तन्यः स्तन्यापेक्षावानयं कुमारो भृशं रोरूयते कं कस्य स्त्रीजनस्य स्तनं धास्याति वास्यतीति विचार्येन्द्रो हे वत्स मान्धातर्धाता पाता भव मा रोदीरित्युक्त्वा देशिनीमदाद्धेतोर्मान्धातारिति सम्बोध्यो जातस्तस्य बालस्य मान्धतेति नामाभवदिति यावदिति । एतेन कं धास्यतीत्यादिकमनान्वितमिति दूषणं परिहृतम् । विचार्येत्यादीनां शेषमङ्गीकृत्येति मान्धातरित्यस्यावृत्तिं चाभ्युपेत्य धातरित्यर्थवशात्सम्बोधनप्रथमैकवचनान्तत्वं स्वीकृत्यान्वयस्योक्तत्वात् ॥ ३१ ॥

व्यवसित इत्येतदुपलक्षणम् । कृतवांश्चेत्यपि द्रष्टव्यम् । एतेनात्मानं सुरस्त्रीणामभीप्सितं साधयिष्ये किं पुनर्मनुजस्त्रीणामिति व्यवसितः कृतवांश्चेति वक्तव्यमिति व्यवसित इति व्यवसायमात्र-कथनमनुपपन्नमिति दूषणं परास्तम् । व्यवसित इत्यस्य लक्षणया न केवलं व्यवसायं प्राप्तः किन्तु कृतवांश्चेत्यर्थस्योक्तत्वात् ॥ ४३ ॥

आत्मवित्परमात्मज्ञानी । सः सौभरिस्तत्र वने तीक्ष्णमत एवात्मकर्शनं देहस्य कार्श्यत्वापादकं तपस्तप्त्वाऽऽत्मानमन्तःकरणं परमात्मन्येव युयोज । आत्मनं देहमग्निभिर्युयोज ददाहेति यावदित्येतद्धि प्रसिद्धमिति । एतेनाग्निभिर्देहं ददाहेति वक्तव्यमिति दूषणं पराकृतम् । आत्मनं युयुजेत्यनयोरावृत्ति-मङ्गीकृत्याग्निभिर्देहं ददाहेत्यर्थस्योक्तत्वात् । एतेनैव सहेत्येतव्द्यर्थमिति दूषणं परिहृतम् । सहेत्येकं पदं न भवति किन्तु सः हेति पदद्वयमिति स्वीकृत्यार्थस्योक्तत्वात् ॥ ५५ ॥ इति श्रीभागवतटिप्पण्यां सप्तमोऽध्यायः ॥ ९-७ ॥

साहस इत्यस्य साहसा परलोकं गमयितेत्यर्थः । सहसेति शब्दोपृपदण्यन्तात्सृगतावित्यस्माड्डु प्रत्यये टि लोपे छान्दसे सेत्यस्य लोपे सेति ह्रस्वस्य दीर्घे साहसेति रूपं निष्पन्नमित्यभ्युपगमात् ॥४॥

ये देहभाजस्ते त्रिगुणप्रधानाः । देहभाजां मध्ये केचन सत्त्वगुणप्रधाना केचन रजोगुणप्रधाना केचन तमोगुणप्रधानाः । ये सत्त्वगुणप्रधानास्ते भगवति । उत शब्द एवार्थे । अज्ञानवाचकेन तमः शब्देन दोषान्तरं लभ्यते । तमो वाऽज्ञानादि दोषानेव विपश्यन्ति । ये रजोगुणप्रधानास्ते भगवति ज्ञानादि गुणानज्ञानादि दोषांश्च विपश्यन्ति । ननु सत्त्वगुणप्रधानैरिव तमोगुणरजोगुण-प्रधानैरप्यनपेक्षितशरीरपीडादिना शरीरनियमनादौ स्वातन्त्र्यायोगात्स्वस्वशरीरनियामकः स्वतन्त्रो ज्ञानादि गुणसम्पन्नोऽज्ञानादि दोषरहितः स्वस्वदेहस्थितो भगवानङ्गीकर्तव्य एवातस्तद्गुणप्रधाना रजोगुणप्रधानाश्च भगवान्ज्ञानादि गुणैरेव युक्तो नत्वज्ञानादि दोषैरिति न पश्यन्तीति कथमुक्तमित्यत आह ॥ यन्माययेति । ते तमोगुणप्रधाना रजोगुणप्रधानाश्च यन्मायया भगवतो मायया मोहितचेतसस्तं स्वसंस्थं स्वदेहे स्थितं भगवन्तं न विदुः । ननु देहस्थित भगवत्ज्ञानाभावे भगवान्दोषीति कथं ज्ञानं स्यादित्यत आह ॥ बहिः प्रकाशा इति । बहिःस्थितभगवत्ज्ञाना इति ॥ २३ ॥

देहभस्मभिरित्यस्य देहभस्मनामित्यर्थः । एतेन भस्मभिरित्येतदन्वितान्वितमिति दूषणं निरस्तम् । भस्मभिरिति तृतीयाबहुवचनं षष्ठीबहुवचनादेश इत्यङ्गीकृत्य यज्जलस्पर्शमात्रेणेत्यनेनान्वय इत्यङ्गीकारात् ॥ ४३ ॥

तत्पत्न्याहाकृतार्थवदित्यस्याकृतार्थवदकृतार्थवत्यकृतार्था तत्पत्न्याहेत्यर्थः । एतेन विप्र-पत्न्याऽकृतार्थत्वादकृतार्थेति वक्तव्यम् । अकृतार्थवदित्यकृतार्थसाम्याभिधानमयुक्तमिति दूषणस्यानव-काशः । अकृतार्थशब्दान्मतुम् प्रत्यये ङीप् प्रत्ययस्य छान्दसे लोपेऽकृतार्थवदिति रूपं निष्पन्नमिति स्वीकृत्याकृतार्थवदित्यस्याकृतार्थेत्यर्थस्योक्तत्वात् ॥ ५८ ॥

सर्वभूतात्मभावेन सर्वभूतनियामकत्वेन सर्वभूतेष्वन्तर्हितमदृश्यतया स्थितम् । गुणैः पूर्णमिति । एतेन गुणैरित्येतदनन्वितमिति दूषणं परिहृतम् । पूर्णमित्यस्य विशेष्यमभ्युपेत्यान्वयस्योक्तत्वात् ॥६२॥

अहमवमं कामं (कर्म) न वृणे न स्वीकरोमि । भूतभावनभावनात् भूतोत्पादकभगवध्याना-दन्यत्कर्म न वृणे न करोमीति । एतेन पूर्ववाक्ये देवैः कामवरो दत्त इत्युक्तत्वादवमं कामं न वृण इति वक्तव्यम् । अवमं कर्म न वृण इति कथनमसङ्गतम् । भूतभावनादित्येतदनन्वितमिति दूषणं परिहृतम् । काममन्यदिति पदयोः शेषमङ्गीकृत्य न वृण इत्यस्यावृत्तिं वृण इत्यस्य स्वीकारार्थत्वं करोमीत्यर्थं चाभ्युपगम्यावमं कामं न स्वीकरोमि । भूतभावनादन्यत्कर्म न करोमीत्यर्थस्योक्तत्वात् ॥ ७८ ॥

खड्गांगो नारायणगृहीतया नारायणदत्तया बुध्या । इति व्यवसित इति पूर्वोक्तप्रकारेण व्यवसितो व्यवसायं प्राप्तः सन् । अज्ञानं भावरूपाज्ञानविशिष्टमन्यभावं भगवव्द्यतिरिक्तब्रह्मादिरूपपदार्थं हित्वा यद्वस्तु तत्सर्वप्रमाणप्रसिद्धम् । परं सर्वोत्तमं सूक्ष्ममतीन्द्रियशून्यं गुणैः शून्यं न भवति । गुणपूर्णमिति यावत् । शून्यकल्पितं शून्यनामकमूलरूपादभिव्यक्तं वासुदेवेति शब्दवाच्यं ब्रह्मेति शब्दवाच्यमिति सात्त्वताः सात्त्विका गृणन्ति यं च भगवानिति गृणन्ति । ततः स्वं स्वतन्त्रं भावं नारायणाख्यपदार्थमाश्रित इत्येतद्धि प्रमाणप्रसिद्धमिति । एतेन तत इत्येतव्द्यर्थमिति दूषणं निरस्तम् । तच्छब्दात्परस्य द्वितीयायास्तसिलङ्गीकृत्य तत इत्यस्य तमित्यर्थस्योक्तत्वात् । एतेनैव वासुदेवादि शब्दवाच्यस्य भगवतः सत्यत्वेन मिथ्यात्वाभावाच्छून्यकल्पितमिति शून्यस्य कल्पितत्वाभिधानं चायुक्तमिति दूषणमपास्तम् । शमूनं कुरुते यस्माच्छून्यस्तस्माज्जनार्दन इति प्रमाणानुसारेण शून्य शब्देन शून्यनामकमूलरूपं भगवन्तं गृहीत्वा कल्पितशब्दस्याभिव्यक्त्यर्थकत्वं चाङ्गीकृत्य शून्यकल्पितमित्यनेन वासुदेवादिशब्दवाच्यस्य भगवतः शून्यनामकभगवदवतारत्वमुच्यत इत्यभ्युपगमात् ॥ ८१ ॥ इति श्रीभगवतटिप्पण्यामष्टमोऽध्यायः ॥ ९-८ ॥

हे भगवन्भुवनेश्वर राम त्वया नोऽस्मभ्यमप्रत्तमादत्तं किं न सर्वं त्वद्दत्तमेवेत्येतन्नु निश्चितमतस्त्वद्दत्तराज्यसमर्पणं युक्तमेव । ननु मम पूज्यत्वमेव कुतो येन मददत्तस्य कस्याप्यभावात् ।

मद्दत्तं राज्यं समर्पणीयं स्यादित्यत आह ।। यत इति । यतः कारणात् हृदि हृदयस्यान्तः संविश्य स्वरोचिषा स्वविषयकज्ञानमुत्पाद्य तमोऽज्ञानं हंसि । अतस्तव गुरुत्वात्पूजाऽवश्यं कर्तव्येति । एतेनाप्रत्तं न इत्येतद्यतोऽन्तर्हृदीत्येतच्चासङ्गीतमिति दूषणं परिहृतम् । अप्रत्तं न इत्यनेन मत्पूजार्थं मया यद्दत्तं न भवति तदेव देयम् । मद्दत्तराज्यं कथं दीयत इत्याशङ्कापरिहारोऽतस्त्वद्दत्तराज्यसमर्पणं युक्तमेवेति शेषपूरणेन क्रियते । यतोऽन्तर्हृदीत्यनेनातस्तव गुरुत्वात्पूजाऽवश्यं कर्तव्येति शेषपूरणेन पूज्यत्वमुपपाद्यत इत्यूरीकरणात् ।। ६ ।।

न्यस्ततन्वार्पितान्घ्रय इत्यस्य समर्पितदेहाय भक्तायार्पितपादायेत्यर्थः । अयं भावः । यो भगवते स्वदेहमर्पयति तस्य भगवत्प्राप्तिर्भवतीति । एतेन न्यस्ततन्व इत्यनेन देहसमर्पणोक्त्या पादसमर्पणस्यापि प्राप्तत्वादर्पितान्घ्रय इत्येतव्द्यर्थमिति दूषणस्यानवकाशः । न्यस्ततन्व इत्यनेन भक्तकर्तृकदेहसमर्पणमुच्यते । अर्पितान्घ्रय इत्यनेन भगवत्कर्तृकपादसमर्पणमुच्यत इत्यभ्युपगमात् ।।७।।

लोकाद्बहुमुखादित्यस्य बहुभाषणाल्लोकादित्यर्थः । एतेन बहुलोकादित्यनेनैव पूर्णत्वात् । बहुमुखादिति मुखशब्दो व्यर्थ इति चोद्यं निराकृतम् । मुखशब्देन मुखकार्यभाषणं गृहीत्वा बहुमुखादित्यस्य बहुभाषणादित्यर्थ इत्युक्तत्वात् ।। १० ।।

दिगिभेन्द्रपात इत्यस्य दिग्गजेन्द्रसदृशरावणपात इत्यर्थः । एतेन रावणपात इति वक्तव्ये दिगिभेन्द्रपात इति कथनमनुपपन्नमिति दूषणं परिहृतम् ।। २१ ।। इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ।। ९-९ ।।

तस्मात्सुश्रुत इत्यस्य तस्मान्मरुत उक्त विशिष्टः सुश्रुतः सुश्रुतनामकोऽजायतेति । एतेन तुशब्दो व्यर्थ इति दूषणस्यानवकाशः । सुश्रुतस्य गुणवैशिष्ट्यं वक्तुं तुशब्दः प्रत्युक्त इत्यभ्युपगमात् ।। ७ ।। इति श्रीभागवतटिप्पण्यां दशमोऽध्यायः ।। ९-१० ।।

तावन्मां प्रतिपालयेत्यस्य तावन्मां प्रतिक्षस्वेत्यर्थः । एतेन तावन्मां प्रतिक्षस्वेति वक्तव्ये तावन्मां प्रतिपालयेति कथनमनुपपन्नमिति चोद्यं निरस्तम् । धातूनामनेकार्थत्वात्प्रतिपालयेत्यस्य प्रतीक्षस्वेत्यर्थ इत्युक्तत्वात् ।। २ ।। इति श्रीभागवतटिप्पण्यामेकादशोऽध्यायः ।। ९-११ ।।

मत्क्षेत्रादाहितं परैरित्यस्य मत्क्षेत्रान्मत्क्षेत्रे परैः परेणाहितमित्यर्थः । एतेन मत्क्षेत्र इति वक्तव्यं मत्क्षेत्रादिति वचनमनुपपन्नमिति दूषणं परास्तम् । मत्क्षेत्रादिनां पञ्चमी सप्तम्यादेश इत्यङ्गीकारात् ।

एतेनैव गर्भाधानकर्तुः परस्यैकत्वात्परेणेति वक्तव्यम् । परैरित्येतदयुक्तमिति दूषणं परिहृतम् । परैरिति तृतीयाबहुवचनं तृतीयैकवचनादेश इत्यूरीकरणात् ॥ ९ ॥

व्रीडिता तारा कनकप्रभं कुमारं तत्याज बुद्धिपूर्वकम् । सुषावेति यावत् । यः कनकप्रभः कुमारस्तस्यां जज्ञ इत्यस्य प्राप्तत्वात् । कनकप्रभः कुमारस्तस्यां जज्ञ इत्येतत्पुनरुक्तमिति दूषणं परिहृतम् । यत्तच्छब्दाध्याहारेण कनकप्रभः कुमारस्तस्यां जज्ञ इत्यस्यानुवादं कृत्वा दस्युहन्तृत्वं विधीयत इत्यङ्गीकारात् ॥ १० ॥

अहमात्मावद्यविगूहिनीमात्मदोषनाच्छदिकां त्वां भस्मसान्न तु नैव कुर्यामिति । आत्मदोषाच्छादने भस्मसात्कुर्यामिति भावः । एतेनात्मदोषाच्छादने भस्मसात्कुर्यामिति बाधकं सूचयितुमात्मावद्यस्या-गूहिनीं त्वां भस्मसान्न कुर्यामिति वक्तव्यम् । आत्मावद्यविगूहिनीमिति कथनमनुपपन्नमिति दूषणं निरस्तम् । आत्मावद्यविगूहिनीमित्यस्यात्मावद्यस्यागुहिनीमित्यर्थस्योक्तत्वात् ॥ १३ ॥

निशम्येत्यस्य निशाम्य दृष्ट्वेत्यर्थः । एतेन तस्य रूपगुणैदार्येति श्लोके उर्वशीपुरूरवसो रूपगुणौदार्यादिकं श्रुत्वा तदन्तिकमुपेयायेत्युक्तत्वान्निशम्योपतस्थ इत्येतपुनरुक्तामिति दूषणं निरस्तम्। निशम्येति ह्रस्वः छान्दसः इत्यङ्गीकृत्य निशाम्येत्यर्थकत्वमङ्गीकृत्य तदन्तिकमुपतस्थ इत्यनेन तस्यातिसमीपमुपतस्थ इत्युच्यत इत्यभ्युपगमात् ॥ १९ ॥ इति श्रीभागवतटिप्पण्यां द्वादशोऽध्यायः ॥ ९-१२ ॥

एतेन ऋचीकभ्रान्तिप्रतिपन्नस्यार्थस्यानुवादः क्रियते । एतेन किं दुष्टान्प्रति घोरत्वमुच्यते किंवा निर्दुष्टान्प्रति । नाद्यः । दुष्टान्प्रति घोरत्वस्य सुखहेतुत्वेन दुःखहेतुत्वाभावात् । नः कष्टमकार्षीदित्यभिधानस्यायोगात् । न द्वितीयः । दृप्तं क्षत्रं भुवो भारमब्रह्मण्यमधार्मिकम् । रजस्तमोवृतमहन्फल्गुन्यपीत्युत्तरग्रन्थविरोधादिति दूषणं निरस्तम् । जमदग्निकृद्वचो केन भ्रान्त्या निर्दुष्टान्प्रति घोरत्वमुच्यत इत्यङ्गीकारात् । जमदग्नेर्भ्रान्त्योक्तिस्तु । रामराम महाबाहो भवान्पापमकार्षीदित्यादि वक्ष्यमाणवाक्यत्सिद्धा ॥ १० ॥

अथ हविर्धान्या अपहारानन्तरं राजन्यर्जुने निर्याते सत्याश्रमे आश्रममागतःसन् तस्यार्जुनस्य तद्दौरात्म्यमाश्रमे श्रुत्वाऽऽहतोऽहिरिव चुक्रोधेति । एतेनाश्रम आगत इति वक्तव्यमाश्रम इति सप्तम्यन्तमनन्वितमिति दूषणं परास्तम् । आश्रम इत्यस्यावृत्तिमङ्गीकृत्यैकस्यार्थवशाद्द्वितीयान्तं चाङ्गी-कृत्यागत इत्यनेनान्वयमुक्त्वा द्वितीयस्याश्रम इति सप्तम्यन्तस्य श्रुत्वेत्यनेनान्वयस्योक्तत्वात् ॥२७॥

परशुं योजयामासेत्यस्य परशुं हस्तेन योजयामासेत्यर्थः । परशुं हस्ते दधारेति भावः ॥ आत्मधामभिरित्यस्य परमात्मरूपाश्च तास्तेजोरूपाश्च ताभिरित्यर्थः ॥ २९ ॥

मनोनिलौजा मनोवायुवद्वेगो यस्य स तथा । परचक्रसूदनः परसैन्यसंहारकोऽसौ परश्वधः परशु यतो यान् यान्प्रहरन् बभूव ततस्ततस्ते हतसूतवाहनाः छिन्नभुजोरुकन्धराः सन्त उर्व्यां निपेतुरिति । एतेन यान्यानिति वक्तव्यम् । यतो यतस्ततस्तत इति वचनमनुपपन्नमिति दूषणस्यानवकाशः । यतो यत इति तसिर्द्वितीयायास्ततस्तत इति तसिः प्रथमाया इत्यभ्युपगमात् ॥ ३१ ॥ इति श्रीभागवतटिप्पण्यां त्रयोदशोऽध्यायः ॥ ९-१३ ॥

रामः परशुरामः पित्रा जमदग्निना सञ्चोदितः सम्प्रेरितः सन् मात्रा सह भ्रातॄनवधीत् । सत्यवतीसुतो जमदग्निर्मात्रादीनां वधेन प्रीतः सन् वरेण परशुरामं छन्दयामास तोषयामास । रामः परशुरामोऽपि हतानां मात्रादीनां जीवितं वधे विषयेस्मृतिं च वरं वव्रे अशक्यं वरं कथं वव्र इत्यत आह ॥ प्रभावज्ञा इति । स रामो यतो मुनेर्जमदग्निमुनेः समाधेस्तपसश्च सम्यक् प्रभावमो मृतजीवनाद्यनुकूलप्रभावज्ञोऽतो जीवनादि वरं वव्र इत्यन्वयः । ततो राममात्रादयः कुशलिनः सन्तो निद्रापाये निद्रापगम इवाञ्जसोत्तस्थुः । ननु परशुरामः पापहेतुमात्रादिवधं कथं कृतवादित्यत आह ॥ पितुरिति । रामो यतः पितुर्जमदग्नेस्तपसो वीर्यं भ्रात्रादिवधनिमित्तकपापाश्लेषहेतुतपःसामर्थ्यं विद्वानतः सुहृद्वधं मात्रादीनां वदं चक्र इति । एतेन पितुर्विद्वांस्तपोवीर्यं रामश्चक्रे सुहृद्वधमित्येतत्सरामो यतो मुनेः समाधेस्तपसश्च प्रभावज्ञोऽतो मात्रा सह भ्रातृनवधीदित्यनेन पुनरुक्तमिति दूषणं परिहृतम् । प्रभावज्ञो मुनेरित्यस्य भ्रातृन्मात्रा सहानवधीदित्यनेनान्वयमनङ्गीकृत्य वव्रे हतानां रामोऽपीत्यन-नोन्वय स्योक्तत्वात् ॥ ६,७,८ ॥

ते जमदग्निसुता दुःखरोषामर्षार्तिशोकवेगविमोहिताः स्वपितृमरणनिमित्तकं दुःखशोकानिमित्त-कोरस्ताडनादिकममर्षोऽसहनमार्तिश्चिन्ताशोकवेगाश्चिन्तादिनिमित्तकदुःखातिशय इत्येतैर्विमोहिता इति । तेन दुःखेत्यादीनां पुनरुक्तिरिति शङ्कानवकाशः ॥ १५ ॥

हरिरवतीर्य भुवः परममुत्कृष्टं यथा भवति भारं भारभूतान्नृपान्बहुशोऽहन्निति । एतेन भारभूतानिति वक्तव्यम् । भारमिति वचनमभुपपन्नमिति दूषणं निरस्तम् । भारमिति द्वितीयैकवचनं द्वितीयाबहुवचनादेश इत्यभ्युपगम्य भार शब्देन भारभूतत्वं गृहीत्वा भारमित्यस्य भारभूतानित्यर्थ इत्युक्तत्वात् ॥ २७ ॥ इति श्रीभागवतटिप्पण्यां चतुर्दशोऽध्यायः ॥ ९-१४ ॥

भ्रातेत्यस्यात्यक्तभ्रातृवृत्तिरित्यर्थः । एतेन यवीयसो भ्रातृनित्यनेनैव ययातेर्ज्येष्ठभ्रातृत्वस्य लब्धत्वाद्भ्रातेति व्यर्थमिति चोद्यं पराकृतम् । आधिपत्यवशाद्भ्रतृवृत्तिस्त्यक्तेति शङ्कापरिहारार्थं भ्रातेत्यनेनात्यक्तभ्रातृवृत्तित्वमुच्यत इत्यङ्गीकारात् ॥ ४ ॥

देवयान्या पुरोद्यानेति श्लोके अबलेत्यस्य सुन्दरस्त्रीत्यर्थः । एतेनैकदा दानवेन्द्रस्य शर्मिष्ठा नाम कन्यकेत्यत्र विद्यमानेन कन्याशब्देन स्त्रीत्वस्य लब्धत्वादबलेति स्त्रीत्वकथनमनुपन्नमिति दूषणं परिहृतम् । मुख्यामुख्ययोर्मुख्ये सम्प्रत्यय इति न्यायेनाबलेत्यनेन सुन्दरस्त्रीत्वमुच्यत इत्यभ्युपगमात् ॥ ७ ॥
